श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(चतुर्थसम्पुटः—अरण्यकाण्डः)

प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः
मैसूरु
१९६५

श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(चतुर्थसंपुटः—अरण्यकाण्डः)



प्राच्यविद्यासंशोधनालयः
मैसूरुविश्वविद्यानिलयः
मैसूरु
१९६५

ORIENTAL RESEARCH INSTITUTE SANSKRIT SERIES 110

GENERAL EDITOR:

H. DEVEERAPPA, M.A.,

Director

ŚRĪMADVĀLMĪKI RĀMĀYAṆA

WITH

AMṚTAKATAKA OF MĀDHAVAYOGI

(VOL. IV—ARAṆYAKĀṆDA)

EDITOR:

VIDWAN N. S. VENKATANATHACHARYA,

Research Assistant

ORIENTAL RESEARCH INSTITUTE

UNIVERSITY OF MYSORE

MYSORE

1965

ALL RIGHTS RESERVED

Price: Rs. 9–70

MYSORE:
PRINTED BY THE SUPERINTENDENT, GOVT. TEXT BOOK PRESS
1965

प्राच्यविद्यासंशोधनालयसंस्कृतग्रन्थमाला ११०

प्रधानसम्पादकः

एच्. देवीरप्प, एम्.ए.,

डैरेक्टर्

श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(चतुर्थसम्पुटः—अरण्यकाण्डः)

सम्पादकः

विद्वान् एन्. एस्. वेङ्कटनाथाचार्यः,

रिसर्च् असिस्टेण्ट्

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः

मैसूरु

१९६५

आरक्षितास्सर्वेऽधिकाराः

मूल्यं: ९-७०

मैसूरुराज्ञकीयपत्र्यपुस्तकमुद्रणालये तदधिकारिभिः मुद्रितम्
१९६५

PREFACE

IT is indeed a matter of pleasure that we have been able to publish this volume along with its preceding one, Ayodhyākāṇḍa, Part II.

Vidwan Sri N. S. Venkatanathacharya has executed the editing work very ably, within a short time. His enthusiasm is really appreciable.

We offer our thanks to the authorities of the Mysore Palace Sarasvatī Bhaṇḍāra, the Kūḍali Śṛṅgeri Mutt, and the Government Oriental Manuscripts Library, Madras, who kindly lent their manuscripts of Kataka, for collation.

We are thankful to the Superintendent and staff of the Government Text Book Press, Mysore, who co-operated with us in our endeavour to bring out the volumes early.

We hope to publish soon the other remaining volumes, with the help of the diligent scholars on our staff.

MYSORE,
Dated 9-8-1965

H. DEVEERAPPA,
Director,
Oriental Research Institute.

ददातीवोपरितनवाक्यैः। चतुर्दशवत्सरपरिमिते वनवासकाले मार्कि त्रयोदश संवत्सराः मुनीनामाश्रमेषु, पञ्चवट्यां च सुसुखं नीताः श्रीरामेण ॥

'अनाकृष्टस्य विषयैः विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीत् वृद्धत्वं जरसा विना' *

इत्युक्तसहजवार्धक्यशालिनां राघवाणां 'वार्धके मुनिवृत्तीनाम्' † इत्यभिहिता मुनिवृत्तिः सुखावहैव स्यादिति युक्तमेव ॥

वनवासः खलु ‡चैत्रे मास्युपक्रान्तः। अतश्च—

'पूर्णे चतुर्दशे वर्षे पञ्चम्यां भरताग्रजः।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम्' §

इत्यत्रोक्ता पञ्चमी चैत्रपञ्चम्येव। पम्पासरोवरप्राप्तिश्च वसन्तर्तावेवेति ‖ स्पष्टमवगम्यते। तथा च सुग्रीवसख्यादारभ्य भरद्वाजाश्रमप्रत्यागमनपर्यन्तकथाभागः एकसंवत्सरवृत्त इति स्पष्टम्। एवञ्चास्मिन्नरण्यकाण्डे रामवनवासस्य आरम्भकालिककतिपयमासवर्जं त्रयोदशवत्सरवृत्तकथाभागः क्रोडीकृत इत्ययमंशः अवधेयः। अरण्यकाण्डनामप्राप्तौ अयमपि कश्चित् हेतुर्भवितुमर्हति ॥

नवरसभरितेऽस्मिन् हि महाकाव्ये आदिकविः नवस्वपि रसेषु अलौकिरेव वाक्यैः परां काष्ठां प्रापयत्यस्मानित्ययमप्यंशोऽवधेयोऽत्र ॥

---

* रघुवंश. 1–23.

† रघुवंश. 1–8.

‡ 'चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः।
यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम् ॥' अयो. 3–3

§ युद्ध. 127–1.

‖ 'सुखानिलोऽयं सौमित्रे कालः प्रचुरमन्मथः।
गन्धवान् सुरभिर्मासः जातः पुष्पफलद्रुमः ॥' किष्कि. 1–10

तत्र पञ्चवट्यां सीतया सह रामस्य वासं वदन् गंभीरतया *संयोगशृङ्गारं वर्णयन्, कविभिः उत्तमत्वेन भाव्यमानं विप्रलंभ-शृङ्गारं सीतापहरणानन्तरं विस्तरेण वर्णयन् † शृङ्गारस्य परां काष्ठां प्रदर्शयत्यस्माकं स आदिकविः ॥

एवं खरदूषणादिवधप्रकरणे असाधारणस्य वीरस्य ‡ ;

जटायुवध - सीतापहरणादिप्रकरणेषु हृदयविद्राविकायाः करुणायाः § ;

---

* 'कञ्चित्कालं स धर्मात्मा सीतया लक्ष्मणेन च ।
अन्वास्यमानो न्यवसत् स्वर्गलोके यथाऽमरः ॥' अर. 15–31

† 61, 62, 63, सर्गाः अरण्यकाण्डीयाः द्रष्टव्याः । सारतस्तु —
'स राजपुत्रः प्रियया विहीनः शोकेन मोहेन च पीड्यमानः ।
विषादयन् भ्रातरमार्तरूपः भूयो विषादं प्रविवेश तीव्रम्' (अर. 63-1) इत्यादिकं द्रष्टव्यम् ॥

‡ 'अर्धाधिकमुहूर्तेन रामेण निशितैश्शरैः ।
चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ॥ अर. 30–34

खरदूषणमुख्यानां निहतानि महाहवे ।' अर. 30–35

'चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ।
हतान्येकेन रामेण मानुषेण पदातिना ॥' अर. 26–35

§ 'तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम् ।
अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता' अर. 51–44

'त दीनं दीनया वाचा सफेनं रुधिरं वमन् ।
अभ्यभाषत पक्षी तु रामं दशरथात्मजम्' अर. 67–14

'त्राहि मामद्य काकुत्स्थ ! लक्ष्मणेति वराङ्गना ।
सुसंत्रस्ता समाक्रन्दत शृण्वतां तु यथाऽन्तिके' अर. 52–7

'तां लतामिव वेष्टन्तीं आलिङ्गन्तीं महाद्रुमान् ।
मुञ्च मुञ्चेति बहुशः प्रवदन् राक्षसाधिपः ॥ अर. 52–9

शूर्पणखाप्रवेशेऽतिगंभीरस्य हास्यस्य * ;

सीतापहरणक्षुभितस्य रामस्य वर्णनायां रोमाञ्चकारिणो रौद्रस्य † ;

रौद्रकर्माणं रौद्रं रावणं पश्यतां अचेतनानामपि भयस्य प्रदर्शनेन हृदयस्तंभकस्य भयानकस्य ‡ ;

क्रोशन्तीं राम रामेति रामेण रहितां वने ।
जीवितान्ताय केशेषु जग्राहान्तकसन्निभः ' अर. 52–10

* ' अनुजस्त्वेष मे भ्राता शीलवान् प्रियदर्शनः ' अर. 18–3

' अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति ।
एनं भज, विशालाक्षि ! भर्तारं भ्रातरं मम ' अर. 18–5

' आर्यस्य त्वं, विशालाक्षि ! भार्या भव यवीयसी । अर. 18–10

एनां (सीतां) विरूपामसतीं करालां निर्णतोदरीम् ।
भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ' अर. 18–11

† ' इत्युक्त्वा रोषताम्राक्षः स्फुरमाणोष्ठसंपुटः ।
वल्कलाजिनमाबध्य जटाभारमबन्धयत् ॥ अर. 64–73

तस्य क्रुद्धस्य रामस्य तथाभूतस्य धीमतः ।
त्रिपुरं जघ्नुषः पूर्वं रुद्रस्येव बभौ तनुः ' अर. 64–74

' पुरेव मे चारुदतीमनिन्दितां दिशन्ति सीतां यदि नाद्य मैथिलीम् ।
सदेवगन्धर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहम् ' अर. 64–78

‡ ' प्रधर्षितायां सीतायां बभूव सचराचरम् ।
जगत्सर्वममर्यादं तमसाऽन्धेन संवृतम् ॥ अर. 52–11

न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः ' अर. 52–12

' रावणस्य च तद्रूपं कर्माणि च दुरात्मनः ।
ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस ताम् ' अर. 64–9

कबन्धकलेबरदाहादौ सर्वेन्द्रियसंकोचकस्य बीभत्सस्य * ; जनस्थानसंहारे सुरमुनिविस्मयावहस्य अद्भुतस्य † ; ऋषीणामाश्रमेषु सर्वनिर्वृतिदायकस्य शान्तस्य च ‡ रसस्य वर्णनासु अल्पैरेव वाक्यैरस्माकं तत्तद्रसस्य परां काष्ठां परिचाययत्यादिकविरिति अहो ! महर्षेः कवितावातुरी । इदं सर्वमस्माकं

---

* ' तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत् ।
मेदसा पच्यमानस्य मन्दं दहति पावकः ' अर. 72–3

† ' अहो बत महत्कर्म ! रामस्य विदितात्मनः ।
अहो वीर्यं ! अहो दाक्ष्यं ! विष्णोरिव हि दृश्यते ' अर. 30–36

‡ ' स्निग्धपक्षा यथा वृक्षाः यथा शान्तमृगद्विजाः ।
आश्रमो नातिदूरस्थः महर्षेर्भावितात्मनः ॥ अर. 11–80

अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ।
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ,, 11–81

प्राज्यधूमाकुलवनः चीरमालापरिष्कृतः ।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ' ,, 11–82

' पश्याश्रमपदं रम्यं दण्डकारण्यवासिनाम् ।
एषां तपस्विनां, वीर ! तपसा भावितात्मनाम् ॥ ,, 8–12

सप्राज्यफलमूलानि पुष्पितानि वनानि च ।
प्रशान्तमृगयूथानि शान्तपक्षिगणानि च ॥ ,, 8–13

फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च ।
कारण्डवविकीर्णानि तटाकानि सरांसि च ॥ ,, 8–14

द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च ।
रमणीयान्यरण्यानि मयूराभिरतानि च ॥ ' ,, 8–15

'मच्छन्दादेव ते ब्रह्मन् ! प्रवृत्तेयं सरस्वती' * इति चतुर्मुखवाक्यं स्मारयतीत्येतावदेव वक्तुं प्रभवामो वयम् ॥

तदेतस्याद्भुतस्यारण्यकाण्डस्यातिशये निदर्शनमात्रमुपपादितम्, यतोऽत्र वक्तव्यं सर्वं पश्चादवसरे विस्तरेण विचिचारयिषवो वयम् ॥

एतत्संपुटसंपादनोपयुक्तमातृकादिविषये न किञ्चिन्नूतनतया वक्तव्यमस्ति । यावच्छक्ति शीघ्रमेवावशिष्टानपि भागान् प्रकटीकृत्य सहृदयानानन्दयितुमिच्छामो वयम् । अनुगृह्णातु चास्मान् तथासंपादनेन श्रीरामचन्द्रः ॥

मैसूरु,
9–8–1965

इति
सुधीजनविधेयः,
N. S. वेङ्कटनाथशर्मा.

---

* बाल. 2–31

श्रीमद्वाल्मीकिरामायणारण्यकाण्डस्य

विषयानुक्रमणिका

सर्गसंख्या	विषयः	पृष्ठसंख्या
१	मुनिगणशरणागतिः	1
२	विराधनिरोधः	9
३	विराधकदनम्	15

श्लोकसंख्या	अवान्तरविषयाः	
	१	
१	अथ रामादयोऽपश्यन् समृद्धांस्तापसाश्रमान् ।	3
	रामादीन् ऋषयस्सर्वे प्रत्यगृह्णन् मुदा तदा ॥	5
२	आत्मनां न्यस्तदण्डानां रामं रक्षां ययाचिरे ।	7
	२	
	अथामन्त्र्य मुनीन् रामः प्रविवेश वनान्तरम् ॥	9
३	तत्राभ्यधावद्रामादीन् विराधो नाम राक्षसः ।	11
	तेन चापहृतां सीतां दृष्ट्वा रामोऽन्वतप्यत ॥	13
४	लक्ष्मणस्तु सुसंक्रुद्धः तदाऽभूत् तद्बधोद्यतः ।	15
	३	
	अथ तौ भ्रातरौ तस्मिन् शरवर्षं ववर्षतुः ॥	17
५	सीतां त्यक्त्वा स तु क्रोधात् तौ गृहीत्वा विनिर्ययौ ।	19

सर्गसंख्या	विषयः		पृष्ठसंख्या
४	विराधखननम्	....	21
५	शरभङ्गदर्शनम्	....	29
६	रक्षोवधप्रतिज्ञा	....	40
७	सुतीक्ष्णसन्दर्शनम्	....	47

श्लोकसंख्या	अवान्तरविषयाः		
	४		
	अकृन्ततां विराधस्य भ्रातरौ तौ भुजद्वयम् ॥	....	21
६	स विराधो निजं रूपं स्मृत्वोवाच निजां कथाम् ।	....	23
	स्वस्य शापकथामुक्त्वा विराधः स्वर्गमारुहत् ॥	....	25
७	निचख्नतुः ततो गर्तं तत् कायं भ्रातरावुभौ ।	....	27
	५		
	ततस्तु ते त्रयो हृष्टाः शरभङ्गाश्रमं ययुः ॥	....	29
८	तत्रागतं तं देवेन्द्रं दृष्ट्वा रामो विसिष्मिये ।	...	31
	रामः सौमित्रिसीताभ्यां ववन्दे तं मुनीश्वरम् ॥	....	33
९	रामं प्रियातिथिं दृष्ट्वाऽतिहृष्टो बभूव सः ।	....	35
	सुतीक्ष्णमभिगच्छेति प्राह रामं मुनीश्वरः ॥	....	37
१०	संदृश्य रामं धन्यः सः मुनिः स्वर्गं समारुहत् ।	....	39
	६		
	ततः सर्वे समागम्य मुनयो राममब्रुवन् ॥	....	41
११	राक्षसैर्वध्यमानांस्तु मुनींस्त्वं त्रातुमर्हसि	....	43
	ददौ तेभ्योऽभयं रामः श्लक्ष्णया धीरया गिरा ॥	....	45
	७		
१२	ततो रामः स तैर्विप्रैः सुतीक्ष्णस्याश्रमं ययौ ।	....	47
	ततः सुतीक्ष्णं दृष्ट्वा ते ववन्दुः तं तपोधनम् ॥	....	49
१३	स्वाश्रमे नियतं वासं तेषामाह मुनीश्वरः ।	....	51
	नारोचयत्तु रामस्तत् दिदृक्षुः कृत्स्नमाश्रमम् ॥	....	53

सर्गसंख्या	विषयः		पृष्ठसंख्या
८	सुतीक्ष्णाभ्यनुज्ञा	.. .	54
९	सीताधर्मप्रतिबोधनम्	....	58
१०	रक्षोवधसमर्थनम्	....	67
११	आश्रममण्डलवासः	....	73

श्लोकसंख्या	अवान्तरविषयाः		
	८		
१४	ततः प्रभाते ते सर्वे प्रतस्थुस्त्वाश्रमान्तरम् ।	....	55
	सुतीक्ष्णः प्रार्थयामास तेषामागमनं पुनः ॥	....	57
	९		
१५	तदा सीताऽब्रवीत् प्रीत्या रामं रक्षोवधे स्थितम् ।	....	59
	प्रतिज्ञातः त्वया वीर ! वधः खल्वद्य रक्षसाम् ॥	....	61
१६	किन्तु वैरं विना हन्तुं राक्षसान् किं नु साम्प्रतम् ।	....	63
	धनुषा कार्यमेतावत् आर्तानामभिरक्षणम् ॥	....	65
	१०		
१७	एवं वदन्तीं तां रामः प्रत्युवाचाथ मैथिलीम् ।	....	67
	सत्यं सीते ! करोम्यद्य त्वार्तानामभिरक्षणम् ॥	....	69
१८	रक्षोभिरार्ता मुनयः ततो वध्या हि राक्षसाः ।	....	71
	११		
	ततस्तु ते त्रयो रम्यान् आश्रमान् क्रमशो ययुः ॥	....	73
१९	माण्डकर्णिकथां रामः मुनिभ्यः श्रुतवान् पथि ।	....	75
	एवं ते ददृशुः सर्वान् आश्रमांश्च तपस्विनाम् ॥	....	77
२०	एवं परीत्य ते प्रापुः सुतीक्ष्णस्याश्रमं पुनः ।	....	79
	ततः सुतीक्ष्णवचनात् तेऽगस्त्यस्याश्रमं ययुः ॥	....	81
२१	लक्ष्मणाय पथि प्राह रामोऽगस्त्यस्य वैभवम् ।	....	83
	वातापेर्निग्रहं तेन मुनिनाऽप्यब्रवीत् तदा ॥	....	85
२२	अगस्त्यभ्रातरं चैते मार्गमध्ये व्यलोकयम् ।	....	87
	ततः प्रस्थाय ते प्रापुः अगस्त्यस्याश्रमं शनैः ॥	....	89
२३	प्राहागस्त्याय तच्छिष्यस्तेषामागमनं पुनः ।	....	91

सर्गसंख्या	विषयः		पृष्ठसंख्या
१२	अगस्त्यसन्दर्शनम्	....	92
१३	पञ्चवटीगमनम्	....	101
१४	जटायुस्सङ्गमः	...	107
१५	पञ्चवटीनिवासः	....	115

श्लोकसंख्या अवान्तरविषयाः

१२

ऋषिणाऽप्यभ्यनुज्ञाताः विविशुस्ते तदाश्रमम् ॥ 93

२४ ततस्ते दूरतोऽपश्यन् अगस्त्यं दीप्ततेजसम् । 95

जगृहुः परमप्रीताः तस्य पादौ तु ते त्रयः ॥ 97

२५ अगस्त्योऽपि तदाऽतीव हृष्टः राममपूजयत् । 99

रामाय वैष्णवं चापं तूणी चापि ददौ मुनिः ॥ 101

१३

२६ पञ्चवट्यां सुखावासं रामायाह मुनीश्वरः । 103

अथ तेनाभ्यनुज्ञातः रामः पञ्चवटीं ययौ ॥ 105

१४

२७ पञ्चवट्याः समीपे तेऽपश्यन् गृध्रं जटायुषम् । 107

स गृध्रः प्राह चात्मानं मित्रं दशरथप्रियम् ॥ 109

२८ रामोऽपि हृष्टः तेनैव साकं पञ्चवटीं ययौ । 111

सीताया रक्षकं रामो वने मेने जटायुषम् ॥ 113

१५

२९ प्राप्य पञ्चवटीं रामः हृष्टः सौमित्रिमब्रवीत् । 115

रमेतेह यथा सीता कुरु सौम्य ! तथाऽऽश्रमम् ॥ ... 117

३० एवमुक्तस्तु सौमित्रिः अकरोत् रम्यमाश्रमम् । 119

तत्रोवास सुखं रामः सीतया लक्ष्मणेन च ॥ 121

सर्गसंख्या	विषयः	पृष्ठसंख्या
१६	हेमन्तवर्णनम्	 121
१७	शूर्पणखाऽऽगमः	 131
१८	शूर्पणखाविरूपणम्	 137
१९	खराक्रोशः	 142
२०	चतुर्दशरक्षोवधः	 147

श्लोकसंख्या	अवान्तरविषयाः	
	१६	
३१	सुखं वसत्सु तेष्वेवं हेमन्तर्तुः समाययौ ।	 123
	कदाचिदभिषेकार्थं ते तु गोदावरीं ययुः ॥	 125
३२	अन्वीक्षमाणाः हेमन्तश्रियं तां सुमनःप्रियाम् ।	 127
	स्नात्वाऽथ नद्यां पावन्यां स्वाश्रमं पुनरागमन् ॥	 129
	१७	
३३	तत्र शूर्पणखा नाम राक्षसी काचिदाययौ ।	 131
	कन्दर्पसदृशं रामं साऽपश्यत् रावणानुजा ॥	 133
३४	मोहिता रामरूपेण तमैच्छत् सा निजं पतिम् ।	 135
	रामस्तु नैच्छत् , तत्क्रोधात् हर्तुं सीतामियेष सा ॥	 137
	१८	
३५	चिच्छेदास्याः कर्णनासं लक्ष्मणो रामचोदितः ।	 139
	सा गर्जन्ती ययौ तूर्णं राक्षसं खरमग्रजम् ॥	 141
	१९	
३६	पृष्टा शूर्पणखा तेन वृत्तं तस्मै न्यवेदयत् ।	 143
	तच्छ्रुत्वाऽमर्षितः चक्रे खरः तेषां वधे मतिम् ॥	 145
३७	प्रेषयामास रामस्य वधार्थं राक्षसान् खरः ।	 147
	२०	
	तान् सर्वान् अहनत् रामः ब्रह्मघ्नान् पिशिताशनान् ॥	 149
३८	दृष्ट्वा शूर्पणखा तत्तु भीताऽऽगच्छत् खरं पुनः ।	 151

सर्गसंख्या	विषय:		पृष्ठसंख्या
२१	**खरसन्धुक्षणम्**	....	152
२२	**खराभिषेणनम्**	....	156
२३	**उत्पातदर्शनम्**	....	161
२४	**रामसमुद्यमः**	....	167
२५	**खरसैन्यविध्वंसनम्**	....	175

श्लोकसंख्या	अवान्तरविषया:		
	२१		
	आचचक्षे वधं तेषां राक्षसानां खराय सा ॥	....	153
३९	रामात् भीतस्त्वमित्येवं सा निनिन्द तथा खरम् ।	....	155
	२२		
	आदिशत् दूषणं सेनापतिं रुष्टः खरस्ततः ॥	....	157
४०	स राममाययौ तूर्णं दूषणः सेनयाऽऽवृतः ।	....	159
	खरोऽपि निर्ययौ रोषात् तदैव सपरिच्छदः ॥	....	161
	२३		
४१	बहूनि दुर्निमित्तानि भीषणान्यभवंस्तदा ।	....	163
	तथापि कालवशगः न न्यवर्तत राक्षसः ॥	....	165
	२४		
४२	रामोऽपि दुर्निमित्तानि तान्येवालोक्य चोद्यतः ।	....	167
	न्ययूयुजत् लक्ष्मणं सः सीतायाः परिपालने ॥	....	169
४३	सधनुः निर्ययौ रामः कालाग्निरिव संज्वलन् ।	....	171
	तत्र देवाः सगन्धर्वाः आययुः तद्दिदृक्षवः ॥	....	173
	२५		
४४	रामं सचापं संक्रुद्धं खरोऽभ्येत्य व्यलोकयत् ।	....	175
	स खरः निशितैर्बाणैः रामं भृशमपीडयत् ॥	....	177
४५	रामस्तु तेन संक्रुद्धः जघान शतधा खरम् ।	....	179
	गन्धर्वास्त्रेण तत् सैन्यं नाशयामास राघवः ॥	....	181
४६	राक्षसैस्तु हतैः कीर्णं तदाभूत् समराङ्गणम् ।	....	183

सर्गसंख्या	विषयः	पृष्ठसंख्या
२६	दूषणादिवधः	 184
२७	त्रिशिरोवधः	 190
२८	रामखरसंग्रामः	 194
२९	खरगदाभेदनम्	 200
३०	खरसंहारः	 207

श्लोकसंख्या	अवान्तरविषयाः	
	२६	
	दृष्ट्वा तत् दूषणः क्रुद्धः राममेवाभ्यधावत ॥	 185
४७	रामस्तु भृशसंक्रुद्धः शरैश्छिच्छेद तच्छिरः ।	 187
	रक्षसां चाहनद्रामः सहस्राणि चतुर्दश ॥	 189
	२७	
४८	ततः क्रुद्धः त्रिशिरसं आदिदेश खरो रणे ।	 191
	शिरांस्यपातयद्रामः सामर्षः तस्य रक्षसः ॥	 193
	२८	
४९	खरस्याप्यभवद्भीतिः वधं दृष्ट्वैव रक्षसाम् ।	 195
	अथापि कालविवशः खरोऽसौ राममाययौ ॥	 197
५०	तयोः समभवद्घोरं युद्धं तत्र जयैषिणोः ।	 199
	२९	
	परस्परं वीरवादान् जजल्पतुरनेकधा ॥	 201
५१	गर्हयामास च खरः रामं मृत्युमुखे स्थितः ।	 203
	चिक्षेप च गदां घोरां रामायामर्षितः खरः ॥	 205
	३०	
५२	तामापतन्तीं चिच्छेद रामस्तु शतधा शरैः ।	 207
	खरोऽन्ते दुर्मतिर्मत्तः भर्त्सयामास राघवम् ॥	 209
५३	रामोऽपि रोषितः तीव्रं निजघान रणे खरम् ।	 211
	निहतं च खरं दृष्ट्वा देवाः राघवमस्तुवन् ॥	 213
५४	सभ्रातृदारो विजयी रामः प्राविशदाश्रमम् ।	 215

सर्गसंख्या	विषय:		पृष्ठसंख्या
३१	रावणाकम्पनसंवाद:	....	216
३२	शूर्पणखालङ्कागमनम्	....	227
३३	रावणोपालम्भ:	....	231
३४	सीताहरणोपदेश:	....	236
३५	पुन: मारीचाश्रमगमनम्	....	241

श्लोकसंख्या	अवान्तरविषया:		
	३१		
	क्रुद्धोऽभूत् रावण: तीव्रं ज्ञातवृत्तो ह्यकम्पनात् ॥	....	217
५१	उवाचाकम्पन: पृष्ट: रामस्य बलपौरुषम् ।	....	219
	वधोपायं हि रामस्य सीताहरणमाह च ॥	....	221
५६	दशास्य: प्रेरितस्तेन मारीचं द्रष्टुमागमत् ।	....	223
	मारीचाद्बोधित: सम्यक् न्यवर्तत च रावण: ॥	....	225
	३२		
५७	दृष्ट्वेदं सर्वमुद्विग्ना लङ्कां शूर्पणखाऽविशत् ।	....	227
	दृष्ट्वा च धीरमासीनं रावणं मूर्छिताऽब्रवीत् ॥	....	229
	३३		
५८	न बुध्यसे भयं घोरं प्रमत्तस्त्वं हि रावण!	....	231
	नाश्रौषी: नैकसाहस्ररक्षसां हननं मृधे ॥	....	233
५९	निपत्स्यते हि निश्चार: किंप्रभु: कामलम्पट: ।	....	235
	३४		
	इदानीमपि वोत्थाय हृत्वा सीतां जहि द्विषम् ॥	....	237
६०	सीतां त्वदर्थं आनेतुमुद्यताऽहं विरूपिता ।	....	239
	३५		
	तयैवं चोदित: क्रुद्ध: प्रस्थितो रावणो गृहात् ॥	....	241
६१	क्रान्त्वार्णवं ययौ शीघ्रं आकाशे रथमास्थित: ।	....	243
	पश्यन् ययौ शुभान् लोकान् वनानि च नदीर्गिरीन् ॥	....	245
६२	गत्वा सुदूरं मारीचस्याश्रमं प्राप रावण: ।	....	247

सर्गसंख्या	विषयः	पृष्ठसंख्या
३६	मारीचसहायप्रार्थना	 249
३७	मारीचहितोपदेशः	 253
३८	रामपराक्रमकथनम्	 258
३९	साहाय्यकानभ्युपगमः	 265
४०	मारीचभर्त्सनम्	 270

श्लोकसंख्या	अवान्तरविषयाः	
	३६	
	मारीचेनार्चितो वव्रे सहायं तं पुनर्बलात् ॥	 249
६३	सौवर्णमृगतां प्राप्य रामं द्रोग्धुमचोदयत् ।	 251
	३७	
	त्रस्तश्च तेन मारीचः प्राह तस्मै हितं वचः ॥	 253
६७	तस्मै शशंसे रामस्य धर्ममूर्तेः शुभान् गुणान् ।	 255
	रामस्य दुस्सहं वीर्यं यथादृष्टं जगाद च ॥	 257
	३८	
६५	तदप्यकथयत् वृत्तं यत्पुरा कौशिकाश्रमे ।	 259
	तस्यासहायशूरत्वमपि स प्रत्यपादयत् ॥	 261
६६	राजन्! रामविरोधेन मा नश्यात् रक्षसां कुलम् ।	 263
	३९	
	कम्पते हृदयं राजन् स्मरतः तस्य पौरुषम् ॥	 265
६७	रेफादीन्यपि नामानि त्रासयन्ति पदे पदे ।	 267
	शीघ्रं लङ्कां निवर्तस्व यदि जीवितुमिच्छसि ॥	 269
	४०	
६८	मारीचेनैवमुक्तोऽपि रावणः कुपितोऽब्रवीत् ।	 271
	गुणदोषौ न पृच्छामि राजाहं त्वादिशामि ते ॥	 273
६९	मारीचाद्यैव हन्यां त्वां मदुक्तं न करोषि चेत् ।	 275

सर्गसंख्या	विषय:		पृष्ठसंख्या
४१	रावणप्रतिबोधनम्	....	275
४२	सौवर्णमृगदर्शनम्	....	280
४३	लक्ष्मणाशङ्का	....	286
४४	मायामृगवधः	....	298
४५	लक्ष्मणापसरणम्	....	303

श्लोकसंख्या	अवान्तरविषया:		
	४१		
	ततः पुनः बोधितोऽपि नाश्रौषीत् रावणो हितम् ॥	....	277
७०	ततोऽपश्यन् गतिं ह्यन्यां मारीचोऽनुजगाम तम् ।	....	279
	४२		
	ततस्तु तावुभौ तूर्णं रामाश्रममगच्छताम् ॥	....	281
७१	चचार तत्र मारीचः चित्रवर्णमृगाकृतिः ।	....	283
	सीता च तं मृगं चित्रं दृष्ट्वा विस्मयमागता ॥	....	285
	४३		
७२	क्रीडार्थमानयैनं मे इति सा राममब्रवीत् ।	....	287
	रामोऽप्यद्भुतरूपं तं दृष्ट्वा प्रोवाच लक्ष्मणम् ॥	....	289
७३	पश्य लक्ष्मण ! वैचित्र्यं शोभां चास्य चमत्कृतिम् ।	....	291
	विस्मापयति मामेव किं पुनर्मैथिलीमसौ ॥	....	293
७४	यद्ययं राक्षसी माया वध्यो वातापिवत् तदा ।	....	295
	हत्वैनं शीघ्रमेष्यामि तावत् संरक्ष मैथिलीम् ॥	....	297
	४४		
७५	एवमादिश्य बद्धासिः अनुधाव्यावधीन्मृगम् ।	....	299
	म्रियमाणश्च सोऽक्रोशत् हा सीते लक्ष्मणेति च ॥	....	301
	४५		
७६	आर्तस्वरोऽयं सीतायां रामे च भयमादधात् ।	....	303
	तमार्तं राघवं त्रातुं सीता सौमित्रिमादिशत् ॥	....	305
७७	स तामाश्वासयत् भर्तुः वीर्यं अज्ञां च वर्णयन् ।	....	307
	अथाप्यसौ निर्गमितः सीतया परुषोक्तिभिः ॥	....	309

सर्गसंख्या	विषय:		पृष्ठसंख्या
४६	रावणप्रवेशः	....	311
४७	रावणप्रलोभनम्	....	318
४८	सीताधिक्कारः	....	328
४९	सीतापहरणम्	....	333

श्लोकसंख्या	अवान्तरविषयाः		
	४६		
७८	क्षणादेवाभ्यगात् सीतां रावणो यतिरूपधृत् ।	....	311
	पप्रच्छ तस्याः वृत्तान्तान् कामुको वर्णयंश्च ताम् ॥	....	313
७९	उत्तमा त्वं वरारोहे कुतोऽसि विजने वने ।	....	315
	निर्याह्यस्मात् प्रदेशात् द्राक् इत्युक्ता तेन पापिना ॥	....	317
	४७		
८०	(अतिथिः ब्राह्मणोऽनुक्तः शपेतेति भयादियम् ।)		
	विधाय स्वागतं तस्मै कथां स्वां प्राह जानकी ॥	....	319
८१	तया पृष्टश्च वृत्तं स्वं निर्लज्जो रावणोऽब्रवीत् ।	....	321
	प्राचीकशत् क्रमात तीव्रं दुर्भावं कामितां च सः ॥	....	323
८२	ततश्च कुपिता सीता नीत्वा धिक्कृत्य रावणम् ।	....	325
	तं वारयन्त्यकृत्यात् सा भयात् भृशमवेपत ॥	....	327
	४८		
८३	रावणः तां वशयितुं पुनराह स्ववैभवम् ।	....	329
	सीता तस्मै रामवीर्यं स्मारयन्त्याह 'मंक्ष्यसि' ॥	....	331
	४९		
८४	स तु क्रुद्धः कत्थमानः भिक्षुरूपं जहौ हठात् ।	....	333
	जग्राह चैनां पाणिभ्यां पापोऽपापां पतिव्रताम् ॥	....	335
८५	स चैनां रथमारोप्य क्रोशन्तीमुत्पपात खम् ।	....	337
	करुणं विलपन्ती सा पथि दृष्ट्वा जटायुषम् ॥	....	339
८६	क्षिप्रं एतां दशां शंस रामायेत्याह तं प्रति ।	....	341

सर्गसंख्या	विषय:		पृष्ठसंख्या
५०	**जटायुरभियोगः**	....	341
५१	**जटायुश्शातनम्**	....	347
५२	**सीतानूपुरादिभ्रंशः**	....	355
५३	**रावणगर्हणम्**	....	365

श्लोकसंख्या	अवान्तरविषया:		
	५०		
	स तु तं रावणं नीत्वा धिक्कारेण च तर्जयन् ॥	....	343
८७	ज्ञात्वा तं पापसंकल्पं युद्धेऽभूत् कृतनिश्चयः।	....	345
	५१		
	बभूवैवं महद्युद्धं गृध्रराक्षसयोर्वने ॥	....	347
८८	जटायुः पातयामास रावणं सरथं बलात्।	....	349
	अधर्मवर्म तस्यैतत् निनिन्द च शुभोक्तिभिः ॥	....	351
८९	तस्याच्छिनत् पक्षपादं असिना रावणो रुषा।	....	353
	५२		
	सीता रुरोद दुःखार्ता दृष्ट्वा गृध्रं निपातितम् ॥	....	355
९०	क्रोशन्तीं राम रामेति सीतां जग्राह रावणः।	....	357
	गृहीत्वैवं पुनर्दीनां स जगाम विहायसा ॥	....	359
९१	पपात ह्रियमाणायाः पुष्पाण्याभरणानि च।	....	361
	दृष्ट्वैतत् सर्वभूतानि करुणं पर्यदेवयन् ॥	....	363
	५३		
९२	निनिन्द बहुधा सीता रोषात् दुःखाच्च रावणम्।	....	365
	प्राप्तस्त्वान्तकालोऽयं इति रक्षो निनिन्द च ॥	....	367
९३	एतत् सर्वं ह्यगणयन् सीतां लङ्कां निनाय सः।	....	369

सर्गसंख्या	विषयः		पृष्ठसंख्या
५४	लङ्काप्रापणम्	....	370
५५	सीताप्रलोभनप्रयत्नः	....	376
५६	वत्सरावधिकरणम्	....	384
	इन्द्रेण सीतायै हविःप्रदानम् (प्रक्षिप्तसर्गः)	....	392
५७	रामप्रत्यागमनम्	....	394

श्लोकसंख्या	अवान्तरविषयाः		
	५४		
	ऋष्यमूकगिरौ केचित् कपयः तद्व्यलोकयन् ॥	....	371
९४	रावणः स्वपुरे सीतां स्वावरोधे न्यवेशयत् ।	....	373
	तस्याः संरक्षणार्थं सः राक्षसांश्च न्ययूयुजत् ॥	....	375
	५५		
९५	बहुधा लोभयामासुः सीतां सर्वे च राक्षसाः ।	....	377
	रावणस्तु प्रणामाद्यैः प्रसाद्योवाच जानकीम् ॥	....	379
९६	त्वदधीनाश्च मे प्राणाः सीते राज्यं धनं च ते ।	....	381
	प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥	....	383
	५६		
९७	इत्युक्ता रक्षसा सीता न्यकरोत् निर्भयैव तम् ।	....	385
	नैतत् कर्म सुखोदर्कं नाहं च वशगा तव ॥	....	387
९८	श्रुत्वैतत् रावणः क्रोधात् अकरोत् वत्सरावधिम् ।	....	389
	नीता चाशोकवनिकां सीता रक्षस्समावृता ॥	....	391
	(प्रक्षिप्तसर्गः)		
९९	हविः पीत्वा सेन्द्रदत्तं कालं निन्ये प्रभुस्मृतौ ।	....	393
	५७		
	हत्वा रामस्तु मारीचं शङ्कितः सन् न्यवर्तत ॥	....	395
१००	आयान्तं चानुजं दृष्ट्वा जगर्हे भीत एवं तम् ।	....	397
	सीतां एकाकिनीं त्यक्त्वा कुत एवं समागतः ॥	....	399

सर्गसंख्या	विषयः		पुटसंख्या
५८	लक्ष्मणदर्शनम्	....	399
५९	लक्ष्मणगर्हणम्	....	404
६०	शून्याश्रमदर्शनम्	....	410
६१	सीतान्वेषणम्	....	418
६२	रामविलापः	....	424

श्लोकसंख्या	अवान्तरविषयाः		
	५८		
१०१	कुतः त्यक्तोऽसि तां भ्रातः ! जीवितं हि हृतं मम।	....	401
	इति ब्रुवाणं सावेगं भीतोऽसौ लक्ष्मणोऽब्रवीत् ॥	....	403
	५९		
१०२	आर्येत्याक्रन्दितं श्रुत्वा भयान्मां सा व्यसर्जयत् ।	....	405
	ऊचेऽपि परुषं वाक्यं वारिताऽपि मयाऽसकृत् ॥	....	407
१०३	इत्युक्तः न्यक्करोद्रामः तं क्रोधवशमागतम् ।	....	409
	६०		
	शङ्कयानश्चाशुभैस्तैः निमित्तैः प्रापदाश्रमम् ॥	....	411
१०४	तत्रापश्यन् प्रियां रामः विललापाश्रुगद्गदः ।	....	413
	सीतां ब्रूहीति पप्रच्छ चेतनाचेतनान् वने ॥	....	415
१०५	दुःसहेन च वेगेन शुशोच परितो भ्रमन् ।	....	417
	६१		
	हा प्रिये ! क्व नु यातासि दर्शय क्षणमाननम् ॥	....	419
१०६	चरन्तमेवं शोचन्तं लपन्तं चानुजोऽब्रवीत् ।	....	421
	धैर्येणान्विष्यतां सीता विधिः सिद्धिं विधास्यति ॥	....	423
	६२		
१०७	उक्तोऽप्येवं न तत्याज स सीताविरहव्यथाम् ।	....	425
	भूयो विषादमेवासौ प्राप कामादिपीडितः ॥	....	427

सर्गसंख्या	विषयः	पृष्ठसंख्या
६३	शोकानुचिन्तनम्	 428
६४	रामरौद्रावेशः	... 434
६५	लक्ष्मणप्रार्थना	 451
६६	लक्ष्मणहितवचनम्	 455

श्लोकसंख्या	अवान्तरविषयाः	
	६३	
१०८	विधिर्वामः सकामोऽस्तु हा लक्ष्मण ! न पारये ।	 429
	हा प्रिये ! कुत्र दृश्याऽसि का वाऽवस्था गता त्वया ॥	 431
१०९	अधीर एवं सक्रोधः पप्रच्छ च नदीः शिवाः ।	 433
	६४	
	नैताः शशंसू रामाय सीतां तां रक्षसो भयात् ॥	 435
११०	मृगाः परमवेक्षन्ते दुःखिताः दक्षिणां दिशम् ।	 437
	तदनु प्रस्थितो रामः दिशं तां चोदितस्त्विव ॥	 439
१११	ददर्श भूमौ सीतायाः पदान्यपि च रक्षसः ।	 441
	भग्नं धनुः रथं बिन्दून् भूषणानां हतान् जनान् ॥	 443
११२	दृष्ट्वेमं समरस्थानं विस्मितोऽथ रुषाऽब्रवीत् ।	 445
	अकिन्नरमगन्धर्वं अपिशाचमराक्षसम् ॥	 447
११३	अपन्नगमभूतं च करिष्याम्यखिलं जगत् ।	 449
	इति ब्रुवाणः सज्जोऽभूत् धनुराकृष्य राघवः ॥	 451
	६५	
११४	दृष्ट्वैवं राघवं क्रुद्धं भ्राता नीत्या व्यबोधयत् ।	 453
	६६	
	पश्य राम ! कुलं धर्मं श्रुतं नीतिं विधेः क्रमम् ॥	 455
११५	धृतिर्दुःखे हि महतां सिद्धिमार्गप्रदर्शिनी ।	 457
	दिव्यमानुषसत्त्वानि माऽऽत्मनो विस्मर प्रभो !	 459

सर्गसंख्या	विषय:		पृष्ठसंख्या
६७	जटायुर्दर्शनम्	....	461
६८	सीतावृत्तान्तपरिज्ञानम्	....	466
६९	कबन्धग्रहणम्	....	475
७०	कबन्धनिग्रहः	....	486

श्लोकसंख्या	अवान्तरविषयाः		
	६७		
११६	चचार बोधितस्त्वेवं रामः किंचित् समाहितः।	....	461
	दृष्ट्वा जटायुषं तत्र पतितं शङ्कितोऽभवत् ॥	....	463
११७	अपापं तं ततो मेने सीतार्थे त्यक्तजीवितम्।	....	465
	६८		
	सीताहरणवृत्तं तं पप्रच्छ करुणाकुलः ॥	....	467
११८	जटायुरपि वृत्तं तत् सर्वमुक्त्वा यथास्थितम्।	....	469
	सीतालाभविधिं चोक्त्वा जहौ प्राणान् समाहितः ॥	....	471
११९	राघवस्तं तु संस्कृत्य ददौ तस्योत्तमां गतिम्।	....	473
	६९		
	वनान्तरं गाहमानौ ततस्तौ शोकविह्वलौ ॥	....	475
१२०	प्रेक्षेतां राक्षसीं मूर्तिं विकृतां घोरदर्शनाम्।	....	477
	उपद्रुताया: छित्त्वाऽस्या: कर्णनासौ ययुर्वने ॥	....	479
१२१	ततोऽपश्यद्घोरमेकं कबन्धं तत्र राघवः।	....	481
	स त्वाचकर्ष बाहुभ्यां राघवौ पीडयन् बलात् ॥	....	483
१२२	दृष्ट्वा तद्व्यसनं स्मृत्वा दैवतं च विस्मितौ।	....	485
	७०		
	तस्य रामो भुजं वामं सव्यं चिच्छेद लक्ष्मणः ॥	....	487
१२३	तेन पृष्टः तदोवाच लक्ष्मणस्त्वात्मनोः कथाम्।	....	489

सर्गसंख्या	विषयः		पृष्ठसंख्या
७१	कबन्धवृत्तान्तः	....	491
७२	सीताप्राप्त्युपायकथनम्	....	499
७३	ऋष्यमूकमार्गकथनम्	....	506
७४	ऋष्यमूकप्रस्थानं शबरीदर्शनं च	....	515

श्लोकसंख्या	अवान्तरविषयाः		
	७१		
	स कृत्तबाहुः ताभ्यां हि स्वां कथामाह दानवः ॥	....	491
१२४	राम ! जानीहि मां शूरं लोकवित्रासनं पुरा ।	....	493
	शापान्मुनेः शक्रकोपात् एवं प्राप्तः कबन्धताम् ॥	....	495
१२५	संस्कारे मेऽग्निना वृत्ते वक्ष्ये सीताधिवर्त्म ते ।	....	497
	७२		
	इत्युक्त्वा संस्कृतस्ताभ्यां उत्तस्थौ ज्वलनात्तदा ॥	....	499
१२६	दिव्यरूपो विमाने च तिष्ठन् प्राह च राघवम् ।	....	501
	भ्रात्रा निरस्तः सुग्रीवः ऋष्यमूके स्थितोऽधुना ॥	....	503
१२७	तेन सख्यं विधाय त्वं सीतामधिगमिष्यसि ।	....	505
	७३		
	एष पन्थाः यत्र पम्पासरो वृक्षाश्च पुष्पिताः ॥	....	507
१२८	यत्रैकः श्रमणो गुप्तः सिद्धैश्च परिरक्षितः ।	....	509
	नात्र प्रवेशं लभते पापकर्मा न नास्तिकः ॥	....	511
१२९	स्वस्ति तेऽस्तु व्रज क्षिप्रं इत्युक्त्वा खं विवेश सः ।	....	513
	७४		
	रामस्तदुपदिष्टेन वर्त्मनैव शनैर्व्रजन् ॥	....	515
१३०	ददर्श शबरीं सिद्धां मूर्तामिव तपःश्रियम् ।	....	517
	पृष्टा सा प्रणता प्राह कुशलं रामदर्शनात् ॥	....	519
१३१	रामाय वर्णयित्वा सा ताः सिद्धीः अद्भुता वने ।	....	521
	भक्त्या प्रभुं समाराध्य धन्या संतुष्टमानसा ॥	....	223
१३२	लब्ध्वाऽनुज्ञां ययौ सा तत्पदमात्मसमाधिना ।	....	525

सर्गसंख्या	विषयः	पृष्ठसंख्या
७५	पम्पादर्शनम्	526

श्लोकसंख्या	अवान्तरविषयाः	
	७५	
	रामोऽपि पम्पां त्वरितं गच्छन् सौमित्रिमब्रवीत् ॥	527
१३३	सर्वाङ्गसुन्दरं ह्येतत् दृश्यते काननान्तरम् ।	529
	मन्ये पुण्ये हि देशेऽस्मिन् क्षीणा स्यान्मम दुर्दशा ॥	531
१३४	इत्येवं संलपन्नेव प्राप पम्पासरः प्रभुः ।	533

श्रीमद्वाल्मीकिरामायणम्

अमृतकतकव्याख्यासहितम

अरण्यकाण्डः

॥ श्रीः ॥

॥ श्रीरामचन्द्रपरब्रह्मणे नमः ॥

श्रीमद्वाल्मीकिरामायणम्

श्रीमन्माधवयोगिविरचितया

अमृतकतकाख्यव्याख्यया सहितम्

अरण्यकाण्डः

प्रथमः सर्गः

[मुनिगणशरणागतिः]

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ।
ददर्श रामो *[1] दुर्धर्षः तापसाश्रममण्डलम् ॥ १ ॥

अथ अत्र्याश्रमवर्त्यृषिदर्शितवर्त्मना दण्डकारण्यं प्रविश्य दण्डकारण्यऋषिसङ्गमः । प्रविश्येत्यादि । अनेन तु वनं गन्तुं क्षममिति–

---

* 'दुर्धर्ष' इति पाठे रक्षोयुतत्वादशक्यप्रवेशमित्यर्थः–ति. रा.

[1] दुर्धर्ष–ङ. च.

ति–तिलकम्. गो–गोविन्दराजीयम्. ती–महेश्वरतीर्थीयम्.
रा–रामायणशिरोमणिः.

तापसैरुपदर्शितमार्गेणेति शेषः। दण्डकारण्यसंज्ञकं महारण्यम्। दण्डकस्य राज्ञः महाराष्ट्रदेशः शुक्रशापवशात् अरण्यमभूत्। ततः प्रभृति स देशः दण्डकारण्यसंज्ञितः*। आत्मवान्—स्वायत्तचित्तादित्रिपरिकरः। अत एव दुर्धर्षः—अशक्यरक्षोऽसुराक्रमः। मण्डलं—समूहः। मण्डलवत् अविदूरैकदेशसहितबहुवस्तुत्वात् मण्डलवाच्यत्वम् ॥ १ ॥

कुशचीरपरिक्षिप्तं [1] ब्रह्मलक्ष्म्या समावृतम्।
यथा प्रदीप्तं [2] दुर्धर्षं † गगने सूर्यमण्डलम् ॥ २ ॥

आश्रममण्डलमेव वर्णयते—कुशेत्यादि। परिक्षिप्तं—व्याप्तम्। ब्रह्मविद्यानुष्ठानजा लक्ष्मीः ब्रह्मलक्ष्मीः, तया समन्वितत्वादेव गगनाधिकरणसूर्यमण्डलवत् दुर्धर्षं, व्याकृतार्थम् ॥ २ ॥

शरण्यं सर्वभूतानां ‡ सुसंमृष्टाजिरं सदा।
मृगैः बहुभिराकीर्णं पक्षिसङ्घैः समावृतम् ॥ ३ ॥

शरण्यं—आवासार्हं सर्वभयत्राणार्हं च, तदर्हतीति यत्। 'शरणं गृहरक्षित्रोः' ॥ ३ ॥

सुपूजितं [3] चोपनृत्तं नित्यमप्सरसां गणैः।
विशालैरग्निशरणैः स्रुग्भाण्डैः अजिनैः कुशैः ॥ ४ ॥

अप्सरसां गणैः उपनृत्तं—उप—समीपे नर्तनवत्। मत्वर्थीयाजन्तो बहुव्रीहिर्वा, अतिमनोरमप्रदेशत्वात्। अतः एतैः सुपूजितं—

---

* प्रायः इदानीन्तनमहाराष्ट्रदेश एव दण्डकारण्यमिति—ति. एतत्कथा उत्तरकाण्डे 79, 80, 81 सर्गेषु द्रष्टव्या। † गगनमध्यस्थमित्यर्थः, तद्वद्रक्षोभिरनभिभवनीयम्। उदयास्तमययोर्हि सूर्यस्य मन्देहाख्यरक्षोभिराक्रमणं, न तु मध्याह्ने—गो. ‡ अलङ्कृतप्राङ्गणम्—ति.

[1] ब्राह्म्या लक्ष्म्या—ङ. ज. [2] दुर्दर्शं—ङ. [3] प्रनृत्तं च—ङ.

पूज्यमानमिति यावत्। तृतीया त्वार्षी। अग्निशरणैः—अग्निहोत्रगृहैः। स्रुङ्मुखादिभाण्डानि यज्ञपात्राणि। तथा अरण्ये भवाः आरण्याः ॥ ४ ॥

समिद्भिः तोयकलशैः फलमूलैश्च शोभितम्।
आरण्यैश्च महावृक्षैः[1] पुण्यैः स्वादुफलैर्वृतम् ॥ ५ ॥
बलिहोमार्चितं पुण्यं ब्रह्मघोषनिनादितम्।
पुष्पैः वन्यैः परिक्षिप्तं पद्मिन्या च सपद्मया ॥ ६ ॥

बलिहोमार्चितं—वैश्वदेवबलिहरणसुसंस्कृतमित्यर्थः। ब्रह्मघोषः—वेदघोषः, तेन नादितं—संजातनित्यघोषम्। पद्मिनी—पद्मसरसी। सपद्मया—पद्मपुष्पयुक्तया ॥ ६ ॥

फलमूलाशनैर्दान्तैः चीरकृष्णाजिनाम्बरैः।
सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्वृतम् ॥ ७ ॥

पुराणैः—वृद्धैः ॥ ७ ॥

पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः।
तद्ब्रह्मभवनप्रख्यं ब्रह्मघोषनिनादितम् ॥ ८ ॥
ब्रह्मविद्भिः महाभागैः ब्राह्मणैरुपशोभितम् ॥

ब्रह्मभवनं—ब्रह्मलोकः। तत्त्वदर्शिभिः—अनाद्यनन्तब्रह्मविभूतिमयसकलप्रपञ्चानारोपितदर्शनवद्भिः, अत एव ब्रह्मविद्भिः। कार्यस्य उपादानानन्यतः ब्रह्मविभूतिमयाशेषप्रत्ययस्य अकृतकब्रह्मानन्यत्वघोषवद्भिः उक्तलक्षणब्राह्मणैः उपशोभितत्वात् प्रागुक्तब्रह्मभवनसाम्यत्वम् ॥ ८ ॥

[1] पुण्य—ङ.

[1]स दृष्ट्वा राघवः श्रीमान् तापसाश्रममण्डलम् ।
अभ्यगच्छन्महातेजाः * विज्यं कृत्वा महद्धनुः ॥ ९ ॥

विज्यं कृत्वेति । आश्रमवर्तिमृगपक्षित्रासनिवृत्त्यर्थमिति शेषः ॥

दिव्यज्ञानोपपन्नास्ते रामं दृष्ट्वा महर्षयः ॥
[2]अभ्यगच्छंस्तथा प्रीताः वैदेहीं च यशस्विनीम् ॥ १० ॥

दिव्यज्ञानोपपन्ना इति । निजकुलदैवतश्रीमदादिगुरुब्रह्मणः स्वशक्तिशुद्ध्यर्थावतारो रामः, स त्वागमिष्यतीह, वाधिष्यति च रावणमिति त्रिकालज्ञानोपपन्नाः इत्यर्थः । यशस्विनीमिति । दृष्टवन्त इति शेषः ॥ १० ॥

[3]ते तं सोममिवोद्यन्तं दृष्ट्वा वै [4]धर्मचारिणः ।
मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः ॥ ११ ॥

उद्यन्तं सोममिव दृष्ट्वेति—तद्वत् प्रियदर्शनम् । "सोमोऽस्माकं ब्राह्मणानां राजा" इति श्रुतेः । स्वकुलरक्षकसोमराजबुद्ध्या च दृष्ट्वेत्यर्थः । अत एव वक्ष्यमाणरक्षाप्रार्थनोपपत्तिः । मङ्गलानि—आशीर्वचनानि प्रयुञ्जानाः प्रत्यगृह्णन्—कुलदेवताबुद्ध्या प्रतिगृहीतवन्तः । येन क्रमेण अस्माभिः व्याख्यायते अयमेव

---

* विनीतवेषप्रवेशत्वादाश्रमाणां—गो.

[1] तत्र—ङ. [2] इदमर्धं नास्ति—झ. [3] एतदर्धानन्तरं लक्ष्मणं चैव दृष्ट्वा तु वैदेहीं च यशस्विनीम् इत्यधिकं—ङ. झ. [4] धर्मचारिणम्—ज.

पाठक्रमः । *अन्ये तु पाङ्क्तपाठयोजनाशक्त्या पाङ्क्तपाठमेव नाशयन्ति । तत् न क्वाप्यादरणीयम् ॥ ११ ॥

†रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम् ।
ददृशुः विस्मिताकाराः रामस्य वनवासिनः ॥ १२ ॥

रूपसंहननं—रूपयुक्तम् । रूप्यते अनेन आयुरादिकं इति रूपं, सामुद्रिकलक्षणं, तद्युक्तं संहननं—पादादिषु शान्तगतिसंस्थानम् । तथा लक्ष्मीं—कान्तिम् । सौकुमार्यं—वयोवस्थाकृतं सुकुमारत्वं, अतिकामलावण्यं, परदृष्टिचित्तग्राहिकालक्षणं, सुवेषतां—अभिगमनीय-सौकुमार्यत्वं, विस्मितानां अद्भुतवस्तुदर्शनवतां यः प्रसिद्ध आकारः तथाविधाकारवन्तः, विस्मितचित्ता इति यावत् ॥ १२ ॥

वैदेहीं लक्ष्मणं रामं नेत्रैरनिमिषैरिव ।
‡आश्चर्यभूतान् ददृशुः सर्वे ते वनचारिणः ॥ १३ ॥
अत्रैनं हि महाभागाः सर्वभूतहिते [1]रतम् ।
अतिथिं पर्णशालायां राघवं संन्यवेशयन् ॥ १४ ॥

---

*गोविन्दराजादयः । तैः अत्र 'लक्ष्मणं चैव दृष्ट्वा तु वैदेहीं च यशस्विनीम् ।' इत्यधिकं संयोज्य व्याकृतम् । †रूपस्य—शरीरस्य संहननं—'समः समविभक्ताङ्गः' इत्युक्तावयवसंस्थानविशेषं, लक्ष्मीं—समुदायशोभां, सौकुमार्यं—पुष्पहासतुल्यकोमलतां, सुवेषतां—शोभनलावण्यवत्तां; यद्वा अभूषणेऽपि भूषितवत् भासमानत्वं रूपं, तथोक्तं 'अङ्गान्यभूषितान्येव बलयाद्यैर्विभूषणैः । येन भूषितवत् भान्ति तद्रूपमिति कथ्यते' इति । संहननं—सौन्दर्यं, तदप्युक्तं 'अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितः । सुश्लिष्टसन्धिबन्धः स्यात् तत् सौन्दर्यमिहोच्यते' इति । सुवेषतां—उचितशृङ्गारसंपन्नत्वम्—गो. ‡यद्यपि पूर्वं 'दिव्यज्ञानोपपन्नाः' इति कथनात न विस्मयस्यावकाशः, अथापि तत्सौन्दर्यस्यैव वाङ्मनसातीतत्वात परतत्त्वस्वरूपस्यैव तादृशत्वाच्च आश्चर्यं युज्यत एव ॥

[1] रताः—क्ष.

अत्रेति। यं आश्रममण्डलं अभ्यगच्छदिति पूर्वमुक्तं, अत्रैवेत्यर्थः। अतिथिं—न्यायतः पूजार्हं, पर्णशालायां—प्रातिस्विकायामिति शेषः ॥ १४ ॥

ततो[1] रामस्य सत्कृत्य विधिना पावकोपमाः।
[2]आजह्रुस्ते महाभागाः सलिलं[3] धर्मचारिणः ॥ १५ ॥

रामस्य सत्कृत्येति। 'न लोकाव्यये'ति निषेधेऽपि षष्ठ्यार्षी ॥

पुष्पं मूलं फलं वन्यं आश्रमं च महात्मनः।
*निवेदयित्वा धर्मज्ञाः ततः प्राञ्जलयोऽब्रुवन् ॥ १६ ॥

आश्रमं चेति—आवृतसलिलादिकमाश्रमं च। न्यवेदयन् इति शेषः। प्राञ्जलय इति। अवगतनिजनित्योपास्यनिजकुलदैवतब्रह्मावतारत्वात्। अन्यथा न हि क्षत्रियमृषयो नमन्ति ॥ १६ ॥

धर्मपालो जनस्यास्य शरण्यस्त्वं महायशाः।
पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः ॥ १७ ॥

पूजनीयश्चेति। देवताबुद्ध्येति शेषः। मान्यश्चेति। राजबुद्ध्या सत्कारार्हश्च। तदुभयमेवोपपादयन्ति—राजेत्यादि। दण्डधरः—दुष्टनिग्रहकर्ता राजा चासि। एवमादिवादोपपत्तिः प्रागेवोक्ता दिव्यज्ञानोपपन्ना इति ॥ १७ ॥

---

* निवेदयित्वा—इमानि भवदीयानि, यथेष्टं विनियुङ्क्ष्वेति निवेद्य—गो.

[1] रामं सु-ङ. [2] एतदनन्तरं-'मङ्गलानि प्रयुञ्जानाः मुदा परमया युताः' इत्यधिकं—ङ्. [3] ब्रह्मचारिणः—ङ्. ज.

*[1] इन्द्रस्यैव चतुर्भागः प्रजा रक्षति, राघव !
राजा तस्मात् वरान् भोगान्[2] भुङ्क्ते लोकनमस्कृतः ॥१८॥

अथ सर्वलोकप्रसिद्धं पूजार्हहेतुं दर्शयन्ति—इन्द्रस्येति। यो राजा प्रजाः धर्मेण रक्षति स तु इन्द्रस्य भगवतो जगदशेषयागाभिपूजनीयस्य चतुर्भागः—चतुरंशोपादानविग्रहवान्। यदेवं तस्मात्—वरानित्यादि। इन्द्रस्य—परमात्मनः श्रीहिरण्यगर्भस्य चतुर्धा विभज्यावतीर्णस्य प्रधानभूतः चतुर्भागः इत्यपि स्पष्टम्। इन्द्रस्यैवेत्येवकारेण न तु यस्य कस्यापि देवतासामान्यस्येत्यर्थः। लोकनमस्कृतः इति। भवतीति शेषः ॥ १८ ॥

ते वयं भवता रक्ष्याः भवद्विषयवासिनः।
नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वरः ॥ १९ ॥
न्यस्तदण्डा वयं, राजन् ! जितक्रोधा जितेन्द्रियाः।
रक्षितव्यास्त्वया शश्वत् † गर्भभूताः तपोधनाः ॥ २० ॥

ते वयमिति—ऋषयः। भवता रक्ष्या इत्यत्र हेतुः—भवद्विषयवासिनः इति—भवद्देशवासिन इत्यर्थः। यद्यपि दण्डकारण्यदेशः रामस्य विषयो न भवति, तथापि सार्वभौमत्वात्

---

* इह—भूस्वर्गे इन्द्रस्य चतुर्भागः चतुर्थांशः राजा प्रजा रक्षति, इन्द्रस्येति लोकपालान्तराणामुपलक्षणम्, अष्टाभिर्लोकपालानां मात्राभिः निर्मितो नृपः' इति वचनात्। वस्तुतस्तु इन्द्रशब्दोऽयं परमात्मपरः। इन्द्रस्य—परमात्मनः चतुर्भागः—चतुर्थांशः तदवतारभूते व्यक्तिचतुष्टये एकव्याप्तभूतः भवान् भोगान् भुङ्क्ते—गो. चतुर्भागः—चतुर्णां अर्थधर्मकाममोक्षाणां भागः आश्रितकर्तृकसेवा यस्मात् सः—शि. † गर्भभूताः—प्रजातुल्याः—गो. मात्रेकरक्ष्यपुत्रतुल्याः—रा.

[1] इन्द्रस्येह—झ. [2] रम्यान् भुङ्क्ते नमस्कृताः—ज.

सामान्यतः तद्देशत्वं दण्डकारण्यस्यापि । अन्तराभिप्रायस्तु भूमविराड्विग्रहाश्रितत्वात् त्वद्विषयवासित्वं नित्यमेवेति । परावरायोध्यानगरस्थो वा भूः, परावरवनस्थो वा भूः ; तद्वदेतावरण्यं च ब्रह्मलोके विन्दतीति (?) श्रुतेः परं ब्रह्मवनं चास्ति । किं बहुना ? कारणप्रधानः कार्यप्रधानो वा त्वमेवेहामुत्र सर्वेषां रक्ष इत्यान्तराशयः । महाप्रभावानां भवतां कुतो रक्षकान्तरापेक्षेत्यत्राहुः—न्यस्तेत्यादि । न्यस्तः दण्डः—भूतनिग्रहो यैस्ते तथा । जितशापतो भूतनिग्रहाभावे च हेतुः—जितक्रोधा इति । तपोनाशभिया परिहृतक्रोधाः । तत्रापि हेतुः—जितेन्द्रिया इति । इन्द्रियैकद्वारकसकलदुःखक्षमापराः इत्यर्थः । यदेवमतः—रक्षितव्या इत्यादि । गर्भभूता इति । यथा मातुः गर्भं प्राप्तो जीवः मात्रा रक्ष्यते, तद्वत् रक्ष्याः इत्यर्थः । अत्राप्यन्तराभिप्र यस्तु — भवदीयभूमविग्रहाण्डगर्भनित्यप्रतिष्ठिता इति ॥ २० ॥

एवमुक्त्वा फलैर्मूलैः पुष्पैर्वन्यैश्च [1] राघवम् ।
* अन्यैश्च विविधाहारैः सलक्ष्मणमपूजयन् ॥ २१ ॥

अन्यैरिति । नीवारादिभिरित्यर्थः ॥ २१ ॥

तथाऽन्ये तापसाः सिद्धाः रामं वैश्वानरो[2]पमाः ।
न्यायवृत्ताः यथान्यायं तर्पयामासुरीश्वरम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे प्रथमः सर्गः

---

* अन्ये—संकल्पसिद्धाः—गो. ति.

[1] पार्थिवम्—ङ. ज. [2] पमम्—ङ.

अन्ये सिद्धा इति। भरद्वाजादिवत् सङ्कल्पसिद्धा इत्यर्थः। न्यायवृत्ताः—न्यायः—धर्मः तदेकानुरुद्धं वृत्तं—चरित्रं येषां ते तथा। यथान्यायं ईश्वरं तर्पयामासुरिति। ईश्वरार्हपदार्थोपस्थानेनेति शेषः। अराका (२२$\frac{1}{2}$) मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे प्रथमः सर्गः

द्वितीयः सर्गः

[विराधनिरोधः]

* कृतातिथ्योऽथ रामस्तु † सूर्यस्योदयनं प्रति।
आमन्त्र्य स मुनीन् सर्वान् वनमेवान्वगाहत ॥ १ ॥

अथ तद्रजन्यां तत्रोपविश्य प्रातः तत्रत्यमुनीन् आपृच्छ्य वनमवगाहमानस्य विराधसंसर्गः। कृतातिथ्य इत्यादि। सूर्यस्योदयनं प्रतीति। उदयकाले इत्यर्थः। 'लक्षणेत्थंभूताख्यान' इति प्रतेः कर्मप्रवचनीयत्वात् उदयनशब्दात् द्वितीया, 'कर्मप्रवचनीययुक्ते द्वितीया' इति। अथ वा 'कृत्यल्युटो बहुलम्' इति ल्युडन्तत्वात् उदयनं—उदयं प्रति—प्राप्येत्यर्थः ॥ १ ॥

नानामृगगणाकीर्णं शार्दूलवृकसेवितम्।
ध्वस्तवृक्षलतागुल्मं [1] दुर्दर्शसलिलाशयम् ॥ २ ॥
‡ निष्कूजनानाशकुनिझिल्लिकागणनादितम्।
लक्ष्मणानुगतो रामः वनमध्यं ददर्श ह ॥ ३ ॥

---

* एवं ऋषिभिः प्रार्थितो रामः विराधवधोपहारेण शरभङ्गं द्रष्टुं प्रतस्थ इत्युच्यते। † उदयनं प्रति—उदयकाले—गो. ति. शि. ‡ इदमपि विराधोपप्लवादेव। झिल्लिकास्तु घर्मजन्तवः।

[1] प्रसन्न—झ.

ध्वस्ता वृक्षाः लता गुल्मानि यस्मिन् तत्तथा; पर्वतोपम-विराधसंचारवशादिति शेषः। दुर्दर्शसलिलाशयमित्यपि उक्तहेतोरेव। निष्कूजाः—निश्शब्दाः नानाः शकुनयो यस्मिन् तत्तथा। नादितं वनं अन्वगाहत इति पूर्वेण सम्बन्धः ॥ ३ ॥

[1]सीतया सह काकुत्स्थः तस्मिन् घोरमृगायुते।
ददर्श गिरिशृङ्गाभं पुरुषादं महास्वनम् ॥ ४ ॥

घोरमृगाः—तरक्ष्वादयः। पुरुषान् अत्तीति पुरुषादाः, पचाद्यच् ॥

गम्भीराक्षं [2]महावक्त्रं विकटं विषमोदरम्।
बीभत्सं विषमं दीर्घं विकृतं घोरदर्शनम् ॥ ५ ॥

गम्भीराक्षं—अगाधचक्षुषं, विकटं—विशालं, विषमं—निम्नोन्नत-संस्थानं, बीभत्सं—कुत्सितं, विकृतं—उच्यमानधर्मभवत्तो विपरीत-वेषम्। अत एव घोरदर्शनम् ॥ ५ ॥

वसानं चर्म वैयाघ्रं वसार्द्रं रुधिरोक्षितम्।
त्रासनं सर्वभूतानां व्यादितास्यमिवान्तकम् ॥ ६ ॥

वसा—मांसविशेषः। व्यादितं, छान्दस इट्, व्यात्ताम्यमिति यावत् ॥ ६ ॥

त्रीन् सिंहांश्चतुरो व्याघ्रान् द्वौ वृकौ पृषतान् दश।
सविषाणं वसादिग्धं गजस्य च शिरो महत् ॥ ७ ॥
अवसज्यायसे शूले विनदन्तं महास्वनम् ॥

---

[1] वनमध्ये तु—ङ. ञ. [2] महासत्त्वं—ङ.

पृषताः—बिन्दुमृगाः। महास्वन यथा तथा विनदन्तं—क्ष्वेलनं कुर्वाणम् ॥ ७ ॥

स रामं लक्ष्मणं चैव सीतां दृष्ट्वा च मैथिलीम्।
[1]अभ्यधावत् सुसंक्रुद्धः प्रजाः काल इवान्तकः ॥ ८ ॥

काले-युगान्तकाले क्रुद्धः अन्तकः प्रजाः अभि-उद्दिश्य यथा अधावत, तद्वत् अभ्यधावत ॥ ८ ॥

स कृत्वा भैरवं नादं चालयन्निव मेदिनीम्।
अङ्केनादाय वैदेहीं अपक्रम्य ततोऽब्रवीत् ॥ ९ ॥

अङ्केनेति—कटिप्रदेशनेति यावत् ॥ ९ ॥

युवां जटाचीरधरौ सभार्यौ क्षीणजीवितौ।
*प्रविष्टौ दण्डकारण्यं शरचापासि[2]धारिणौ ॥ १० ॥

सभार्याविति। भार्याशब्दस्तु योषिन्मात्रवाची। कयाचन सहितौ। †अन्यस्तु छत्रिन्यायेन एकस्य सहायत्वेन उभयस्यापि सभार्यत्वमिति जल्पति। अथापि ध्वनिदोषो दुर्वारः आयाति ॥ १० ॥

कथं तापसयोर्वां च वासः प्रमदया सह।
अधर्मचारिणौ पापौ कौ युवां मुनिदूषणौ ॥ ११ ॥
अहं वनमिदं दुर्गं विराधो नाम राक्षसः।
चरामि सायुधो नित्यं ऋषिमांसानि भक्षयन् ॥ १२ ॥

---

*क्षीणजीवितौ प्रविष्टौ—क्षीणजीवितत्वादेव प्रविष्टौ—गो. †महेश्वरतीर्थः। 'द्वयोरेका भार्या' इति बुद्धिदोषात् तथोक्तमिति गोविन्दराजीयनिर्वादः स्वरसः।

[1] अभ्यधावत संक्रुद्धः—ङ. [2] पाणिनौ—ङ.

इयं नारी वरारोहा मम भार्या भविष्यति ।
युवयोः पापयोश्चाहं पास्यामि रुधिरं मृधे ॥ १३ ॥

वां—युवयोः वासः । वां चेति चकारः प्रमदया च सहेति व्यत्यस्य योजनीयः *। अन्यथा 'न च वाहे 'ति निषेधतः वामादेशाभावप्रसङ्गः । आर्ष एव च सम्बन्धप्रयोजक आदेशः । मुनिदूषणाविति—मुनिवेषविरुद्धशरचापादिधारणात् । अत एव पापयोरित्यप्याह । मृधे—युद्धे ॥ १३ ॥

तस्यैवं ब्रुवतो धृष्टं विराधस्य दुरात्मनः ।
श्रुत्वा सगर्वितं वाक्यं संभ्रान्ता जनकात्मजा ॥ १४ ॥
सीता प्रावेपतोद्वेगात् प्रवाते कदली यथा ॥ १५ ॥

सगर्वितं—भावे निष्ठा, सगर्वमिति यावत् । †उद्वेगात्—भयात् ॥ १५ ॥

तां दृष्ट्वा राघवः सीतां विराधाङ्कगतां शुभाम् ।
अब्रवील्लक्ष्मणं वाक्यं मुखेन परिशुष्यता ॥ १६ ॥

परिशुष्यता—शोकसङ्कुचितेन मुखेन उपलक्षितः ॥ १६ ॥

पश्य, सौम्य ! नरेन्द्रस्य जनकस्यात्मसम्भवाम् ।
मम भार्यां शुभाचारां विराधाङ्के [1] प्रवेशिताम् ॥ १७ ॥
अत्यन्तसुखसंवृद्धां राजपुत्रीं [2] यशस्विनीम् ।
यदभिप्रेतमस्मासु प्रियं वरवृतं च यत् ॥ १८ ॥

---

* प्रमदया सह वासश्च . . . वामादेश आर्षः—गो. † अशक्यनिरोधदुःखादिजन्यमनोवैक्लव्यं-उद्वेगः ।

[1] प्रवेपिताम्—ङ. झ. [2] मनस्विनीम्—ङ.

कैकेय्यास्तु सुसंवृद्धं क्षिप्रमद्यैव, लक्ष्मण !
या न तुष्यति राज्येन पुत्रार्थे * दीर्घदर्शिनी ॥ १९ ॥
ययाहं सर्वभूतानां हितः प्रस्थापितो वनम् ।
अद्येदानीं सकामा सा या माता मम † मध्यमा ॥ २० ॥
परस्पर्शात्तु वैदेह्या न [1] दुःखतरमस्ति मे ।
[2] पितुर्वियोगात्, सौमित्रे ! स्वराज्यहरणात् तथा ॥ २१ ॥

यदित्यादि । अस्मासु विषये कैकेय्याः यद्दुःखं वने सम्पादनीयतया अभिप्रेतं, अत एव यत् वरवृतं च तत् क्षिप्रं–द्राक्–अद्यैव, संवृद्धं–सिद्धं, या तु पुत्रार्थे–पुत्रप्रयोजननिमित्तं, राज्येन–राज्याभिषेकवरणमात्रेण न तुष्यति । सर्वभूतानां हितोऽप्यहं यया दीर्घदर्शिन्या वनमपि पुत्रराज्यस्थैर्याय प्रस्थापितः, या प्रसिद्धा मम मध्यमा माता सपुत्रा दशरथपत्नी, पत्नीनां मध्यवर्तित्वात् मध्यमा कैकेयी, सुमित्रायाश्च कनीयसी कैकेयी अद्य दिवसे अस्मिन् काले सकामा जाता ॥ २१ ॥

इति ब्रुवति काकुत्स्थे बाष्पशोक[3]परिप्लुते ।
अब्रवील्लक्ष्मणः क्रुद्धः [4] रुद्धो नाग इव श्वसन् ॥ २२ ॥

बाष्पशोकाभ्यां नेत्रचित्तगताभ्यां परिप्लुतः–पीडितः । काकुत्स्थ इति । कैकेयीं प्रति विरावं प्रत्यपीति शेषः । रुद्धो नाग इवेति—आहितुण्डिकेन मन्त्ररुद्धः पेटीरुद्धोऽपि वा सर्प इवेत्यर्थः । (निः)श्वसन्निति–रामविषाददर्शनात् ॥ २२ ॥

---

* सीतावियोगे नाहं जीवेयम्, तेन च भरतस्य राज्यं स्थिरं भवेत् । एवं मद्वनवासनियोगे सीताऽपि अनुगच्छेत्, वने च सीताविनाशः सुलभः—इत्याद्यालोचनावतीत्यर्थः । † मध्यमा—'स्यान्मध्यमा वृष्टरजाः'—प्रकृतेऽनिवृत्तरजा इत्यर्थः । तेन कौसल्यासुमित्रयोः वृद्धात्वं, कैकेय्याः तरुणीत्वं, तत्प्रयुक्तपतिबालभ्यादिकं सूच्यते ।

[1] दुःखान्तर–ङ. [2] पितुर्विनाशात्–ङ. [3] परिप्लुतः–ङ. [4] क्रुद्धो–ङ.

* अनाथ इव [1] भूतानां नाथस्त्वं वासवोपमः।
मया प्रेष्येण, काकुत्स्थ! किमर्थं परितप्यसे? ॥ २३ ॥

अनाथ इवेति। नाथसापेक्षः प्राणी नाथरहितः सन् यथा शोचति तद्वदित्यर्थः। अथ भूतानां नाथः—त्राता। तत्र हेतुः—वासवोपम इति। लक्ष्मणस्य तु वासवानुपचरितसर्वभूतनाथब्रह्मतत्त्वज्ञानं ऋषीणामिव नास्त्येव, रामस्यैव तथात्वज्ञानावरणे का कथाऽस्य? मया प्रेष्येणेति—सहित इति शेषः ॥ २३ ॥

शरेण निहतस्याद्य मया क्रुद्धेन रक्षसः।
विराधस्य गतासोर्हि मही पास्यति शोणितम् ॥ २४ ॥

किं त्वयेह क्रियेतेत्यतः—शरेणेत्यादि ॥ २४ ॥

† राज्यकामे मम क्रोधो भरते यो बभूव ह।
तं विराधे विमोक्ष्यामि वज्री वज्रमिवाचले ॥ २५ ॥

तं विराधे विमोक्ष्यामीति। भरतेन राज्यकामनायाः अप्रदर्शितत्वात् तत्र दुर्मोक्षमिति शेषः ॥ २५ ॥

---

* स्वयमेव सर्वशक्तस्य, शक्तपुरुषसहायकस्य च परितापः न युक्त इत्याशयः।

† अत्र—भरते दोषाभावस्य स्पष्टं ज्ञानेऽपि कथमेवमुक्तिः? इत्याशंक्य, 'व्यसनकाले लोको वाच्यमवाच्यं च न जानातीत्यमुमर्थं व्यञ्जयितुमेवमुक्तं' इति गोविन्दराजीये समाहितम्। वस्तुतस्तु 'भरते यो बभूव' इत्येवोक्तेः, चित्रकूटं प्रति भरतागमनवेलायां लक्ष्मणेन प्रथमं 'संपन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम्। आवां हन्तुं समभ्येति भरतः कैकयीसुतः॥' इत्युक्तया, अनन्तरं भरतभावज्ञानानन्तरं तादृशकोपस्य संहर्तव्यतायाः प्राप्तत्वात् निरवकाशं तं कोपं सीतापहारिणि विराधे प्रमोक्ष्यामीत्युच्यत इति न कश्चिद्दोषः॥

[1] लोकानां—ङ.

मम भुजबलवेगवेगितः
पततु शरोऽस्य महान् महोरसि ।
[1] व्यपनयतु [2] तनोऽथ जीवितं
पततु ततस्स मही विघूर्णितः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्वितीयः सर्गः

भुजबलवेगेन–धनुषः कर्षणवेगेन वेगितः–आहितवेगः, इतजन्तो वा । विघूर्णितः–सञ्जातभ्रमणः । चरु(२६)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्वितीयः सर्गः

तृतीयः सर्गः

[विराधकदनम्]

[3] अथोवाच * पुनर्वाक्यं विराधः पूरयन् वनम् ।
[4] आत्मानं पृच्छते ब्रूतं कौ युवां क्व गमिष्यथः ॥ १ ॥

अथ विराधेन सह युद्धविनोदः । अथोवाचेत्यादि । आत्मानं–युष्माकं स्वरूपं प्रकृते मह्यं ब्रूतम्, लोण्मध्यमद्विवचनम् । प्रश्नस्यैव प्रकारः—कावित्यादि ॥ १ ॥

तमुवाच ततो रामो [5] राक्षसं ज्वलिताननम् ।
पृच्छन्तं सुमहातेजाः इक्ष्वाकुकुलमात्मनः ॥ २ ॥

---

* एवं रामं प्रति लक्ष्मणवाक्यं श्रुत्वा पुनः वाक्यमुवाच ।

[1] व्यवसयतु–ङ. झ. [2] ततोऽस्य–ङ. [3] तावुवाच ततो भीमः–ङ. अस्य श्लोकस्य पूर्वं—इत्युक्त्वा लक्ष्मणः श्रीमान् राक्षसं प्रहसन्निव । को भवान् वनमभ्येत्य स्थास्यति यथासुखम् ॥ इत्यधिकं–ङ. [4] पृच्छतो मम हि ब्रूतं–ङ. [5] विराधं–ङ.

ज्वलिताननमिति। राक्षसत्वात् अग्निज्वालयेव ज्वलिताननत्वम्। आत्मनः इक्ष्वाकुकुलं—इक्ष्वाकुवंश्यत्वं उवाचेत्यन्वयः ॥ २ ॥

क्षत्रियौ वृत्तसम्पन्नौ विद्धि नौ वनगोचरौ।
त्वां तु वेदितुमिच्छावः कस्त्वं चरसि दण्डकान् ॥ ३ ॥

तद्वचनस्यैव प्रकारः—क्षत्रियावित्यादि। वनगोचरावितिबहुव्रीहिः। किञ्चिन्निमित्तत इति शेषः ॥ ३ ॥

तमुवाच विराधस्तु रामं सत्यपराक्रमम्।
हन्त! वक्ष्यामि ते, राजन्! निबोध मम, राघव! ॥ ४ ॥

मम निबोधेति। मम वचनात् मम स्वरूपमिति शेषः ॥ ४ ॥

पुत्रः किल [1] जयस्याहं मम माता शतह्रदा।
विराध इति मामाहुः पृथिव्यां सर्वराक्षसाः ॥ ५ ॥
तपसा चापि मे प्राप्ता ब्रह्मणो हि प्रसादजा।
* शस्त्रेणावध्यता लोकेऽच्छेद्याभेद्यत्वमेव च ॥ ६ ॥
उत्सृज्य प्रमदामेनां अनपेक्षौ यथागतम्।
त्वरमाणौ पलायेतां न वां जीवितमाददे ॥ ७ ॥

लोके तटस्थप्राणिषु येन केनापि शस्त्रेण—शस्त्रबलेन अवध्यता—अमारणीयता प्राप्ता। अपि च रज्ज्वादिवत् घटादिवद्वा अच्छेद्याभेद्यत्वं—प्राणवियोजनाय छेद्यभेद्याशक्यशिरस्त्वं च प्राप्तमिति विपरिणामः। यदेवं, अतः—उत्सृज्येत्यादि। † अनपेक्षौ—युद्धाशारहितौ ॥ ७ ॥

---

* प्राणवियोजनफलकच्छेदनभेदनानर्हत्वं विवक्षितम्। अथवा व्रणोत्पादनद्वैधीभावयोः अशक्यत्वं वा विवक्षितम्। न केवलं अवध्यत्वं, अपि तु व्यथाजननमप्यसंभवीति भावः। † प्रमदापेक्षारहितौ वा। तत्प्राप्तिप्रत्याशारहिताविति यावत्।

[1] जयस्याहं—ज. झ.

तं रामः प्रत्युवाचेदं कोपसंरक्तलोचनः।
राक्षसं विकृताकारं विराधं पापचेतसम् ॥ ८ ॥
क्षुद्र! धिक् त्वां तु *हीनार्थं मृत्युमन्वेषसे ध्रुवम्।
रणे संप्राप्स्यसे तिष्ठ न मे जीवन् गमिष्यसि ॥ ९ ॥

क्षुद्र धिक् त्वामिति। एवं धिक्कारहेतुः—हीनार्थमिति। परदारस्पर्शलक्षणजुगुप्सितव्यापारवृत्तामिति यावत्। मृत्युमन्वेषसे ध्रुवमिति। उक्तदुष्कर्मवशादिति शेषः। तं च मृत्युं रणे संप्राप्स्यसे। मे पुरतः क्षणं तिष्ठ। स त्वं जीवन् भूत्वा न गमिष्यसि ॥ ९ ॥

ततः सज्यं धनुः कृत्वा रामः सुनिशितान् शरान्।
सुशीघ्रमभिसन्धाय राक्षसं निजघान ह ॥ १० ॥
धनुषा ज्यागुणवता सप्तबाणान् मुमोच ह।
रुक्मपुङ्खान् महावेगान् सुपर्णानिलतुल्यगान् ॥ ११ ॥

ततः सज्यमित्याद्युक्तश्लोकस्यैव विवरणं—धनुषेत्यादि। ज्यागुणः—ज्यारूपरज्जुः। सुपर्णानिलाभ्यां तुल्यं गच्छन्तीति तथा; 'डोऽन्यत्रापि' इति डः ॥ ११ ॥

ते शरीरं विराधस्य भित्त्वा बर्हिणवाससः।
निपेतुः †शोणितादिग्धाः धरण्यां पावकोपमाः ॥ १२ ॥

बर्हिणवाससः इति। 'फलबर्हाभ्यां इनज्वक्तव्यः' इति इनच् स्वार्थे छान्दसः ‡बर्हवासस इति यावत्। शोणितेन रक्तेन आदिग्धाः इति, अतिशीघ्रादिति शेषः ॥ १२ ॥

---

* भवदभिमतं प्रयोजनं न सिद्ध्यतीति सूचनाय वा हीनार्थमिति। †आदिग्धाः—स्नाताः—रा. ईषल्लिप्ताः—गो. अच्छेद्यत्वाभेद्यत्वबलात् शस्त्राणां शोणितेन आदिग्धत्वं वा विवक्षितं स्यात्। वैदेहीपरित्यागस्तु स्वप्रवृत्तिप्रतिरोधजकोपात् रामलक्ष्मणगोवधार्थमपि स्यात्। ‡मयूरबर्हान्येव वासांसि—यस्येत्यर्थः।

स विद्धो न्यस्य वैदेहीं शूलमुद्यम्य राक्षसः ।
अभ्यद्रवत् सुसंक्रुद्धः तदा रामं सलक्ष्मणम् ॥ १३ ॥

स विद्धो न्यस्य वैदेहीमिति । स तु सप्तरामबाणेषु देहं भित्त्वा विनिर्गतेष्वपि शस्त्रेणावध्यत्ववरवैभवात् अगतासुः केवलं व्यथितः, व्यथावशात् वैदेहीं हित्वा शूलमुद्यम्याभ्यद्रवत् । एवं च अच्छेद्याभेद्यत्वमिति अव्यथनीयत्वमिति यः कश्चिदाह तद्व्यर्थम् । व्यथाभावे वैदेहीत्यागस्यासंभवात् । शब्दद्वयवैयर्थ्यात्, तथा अर्थे शब्दासामर्थ्याच्च ॥ १३ ॥

स विनद्य महानादं शूलं शक्रध्वजोपमम् ।
प्रगृह्याशोभत तदा व्यात्तानन इवान्तकः ॥ १४ ॥

महानादं विनद्येति । महानादं कृत्वेति यावत् । शक्रध्वजोपमित्यनेन शोभावत्त्वं दृष्टिप्रियत्वं च उपलभ्यते । व्यात्तं–विवृतं आननं यस्य स तथा । 'अच उपसर्गात्तः' इति तत्वं ददातेः तादौ किति ॥ १४ ॥

अथ तौ भ्रातरौ दीप्तं शरवर्षं ववर्षतुः ।
विराधे राक्षसे तस्मिन् * कालान्तकयमोपमे ॥ १५ ॥

कालोऽन्तको यमश्चेति प्राण-तनु-मनः-संहारप्रधानं मूर्तित्रय संहाररुद्रस्य, तदुपमः तथा ॥ १५ ॥

सप्रहस्य [1] महारौद्रः स्थित्वाऽजृम्भत राक्षसः ।
जृम्भमाणस्य ते बाणाः कायान्निष्पेतुराशुगाः ॥ १६ ॥

---

* अन्तकः–मृत्युः, कालः–तन्निमित्तं, यमः–तन्नियन्ता–रा. काले–संहारकाले अन्तकः–नाशकः यः यम.–गो.

[1] महारौद्रं–ङ.

स प्रहस्येति। किमर्थमेतौ मयि शरवर्षं कुरुतः? अहं तु शरावध्यः इत्युच्यमानावपीत्यतिहासः। ते बाणा इति। रामलक्ष्मण-विसृष्टाः कायान्निष्पेतुरिति–मुखद्वारा कायं प्रविश्य भित्त्वा कायान्निष्पेतुरित्यर्थः। आशु–शीघ्रं गच्छन्तीति तथा ॥ १६ ॥

*[1] स्पर्शात्तु वरदानेन प्राणान् संरोध्य राक्षसः।
विराधः शूलमुद्यम्य [2] राघवावभ्यधावत ॥ १७ ॥
प्राणान् संरोध्य–धृत्वा। अतिदुःखं प्राप्तोऽगीति शेषः ॥ १७ ॥

तच्छूलं वज्रसङ्काशं गगने ज्वलनोपमम्।
द्वाभ्यां शराभ्यां चिच्छेद रामः शस्त्रभृतां वरः ॥ १८ ॥
तच्छूलमिति–करस्थदशायामेवेति शेषः ॥ १८ ॥

तद्रामविशिखच्छिन्नं शूलं तस्य कराद्भुवि।
पपताशनिना च्छिन्नं मेरोरिव शिलातलम् ॥ १९ ॥
अशनिः–दम्भोलिः ॥ १९ ॥

तौ [3] खड्गौ क्षिप्रमुद्यम्य कृष्णसर्पोपमौ शुभौ।
तूर्णमाततस्तस्य तदा प्रहरतां बलात् ॥ २० ॥
प्रहरतां–प्राहरतामिति यावत् ॥ २० ॥

स वध्यमानः सुभृशं [4] भुजाभ्यां परिगृह्य तौ।
अप्रकम्प्यौ नरव्याघ्रौ रौद्रः प्रस्थातुमैच्छत ॥ २१ ॥
भुजाभ्यां परिगृह्येति—एकैकेन एकैकमिति यावत् ॥ २१ ॥

---

* स्पर्शात्–सम्बन्धात्–गो. ति. रा. अथ वा 'स्पृश बाधनस्पर्शनयोः' इति धातुप्रकृतिकत्वात् बाधनात: वरदानमहिम्ना प्राणान् संरोध्येत्यर्थः।

[1] बलात्तु वरदानस्य–ङ. झ. [2] राघवाय व्यसर्जयत्–ङ. [3] भुजौ–ङ. [4] बाहुभ्यां–ङ.

तस्याभिप्रायमाज्ञाय रामो लक्ष्मणमब्रवीत् ।
वहत्वयमलं तावत् पथाऽनेन तु राक्षसः ॥ २२ ॥

तस्याभिप्रायं—काननान्तर्नयनविषयकम् ॥ २२ ॥

यथा चेच्छति, सौमित्रे ! तथा वहतु राक्षसः ।
अयमेव हि नः पन्थाः येन याति निशाचरः ॥ २३ ॥

यथेच्छति तथा वहत्विति । *अनेन सुनिर्भयत्वं दर्शितम् ॥२३॥

स तु स्वबलवीर्येण समुत्क्षिप्य निशाचरः ।
बालाविव स्कन्धगतौ [1]चकाराति[2]बलौ ततः ॥ २४ ॥

स्कन्धगतौ चकोरेति । स्कन्धमारोपयामासेति यावत् ॥

तावारोप्य ततः स्कन्धं राघवौ रजनीचरः ।
विराधो निनदन् घोरं जगामाभिमुखो वनम् ॥ २५ ॥

वनं महामेघनिभं प्रविष्टः
द्रुमैर्महद्भिः विविधैरुपेतम् ।
नानाविधैः पक्षिशतैः विचित्रं
शिवायुतं व्यालमृगैः विकीर्णम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे तृतीयः सर्गः

शिवाभिः युतं—शिवायुतं, अस्य नित्यपिशिताशनत्वात् तदुच्छिष्टपिशितापेक्षया शिवानैर्बिड्यम् । तरु(२६)मानः सर्गः ॥२६॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे तृतीयः सर्गः

---

*इदमेव 'अपकम्प्यौ' (श्लो. २१) इति विशेषणेनोक्तमिति भावः ।

[1] चचारति—ङ. [2] बलोद्धतः—ङ. झ.

चतुर्थः सर्गः

[विराधखननम्]

ह्रियमाणौ तु तौ दृष्ट्वा वैदेही रामलक्ष्मणौ ।
उच्चैःस्वरेण चुक्रोश प्रगृह्य [1] सुभुजा भुजौ *॥ १ ॥

अथ विराधवधः । ह्रियमाणाविति । प्रगृह्य—उद्यम्य, एवमर्थेऽप्यस्य बहुशः इह प्रयोगः ॥ १ ॥

एष दाशरथी रामः सत्यवान् [2] शीलवान् शुचिः ।
रक्षसा [3] रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ २ ॥

चुक्रोशेत्युक्तक्रोशस्यैव प्रकारः—एष इत्यादि ॥ २ ॥

मां [4] वृकाः भक्षयिष्यन्ति शार्दूला द्वीपिनस्तथा ।
मां हरोत्सृज्य काकुत्स्थौ नमस्ते, राक्षसोत्तम ! ॥ ३ ॥

शार्दूलाः द्वीपिनः इति सबिन्द्वबिन्दुव्याघ्रौ ॥ ३ ॥

तस्याः तद्वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ ।
वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ ४ ॥

वेगं—त्वराम् ॥ ४ ॥

तस्य रौद्रस्य सौमित्रिः बाहुं सव्यं † बभञ्ज ह ।
रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ ५ ॥

बाहुं बभञ्जेति । नैतावता प्राणहानिरिति न वरदानविरोधः, अच्छेद्याभेद्यत्वस्य प्राणनाशक्षमावयवविश्लेषविषयतया व्याख्यातत्वाच्च ॥

---

* भुजौ प्रगृह्य—उद्यम्य । † बभञ्ज मुष्टिप्रहारेणेति शेषः । अभेद्याच्छेद्यत्ववरस्तु शस्त्रकरणकतद्विषय इत्यन्ये—ति.

[1] सुमहाभुजौ—ङ. ज. [2] बलवान्—ङ. [3] घोररूपेण—ङ.
[4] रक्षाः—ङ. ज.

स भग्नबाहुः संविग्नः निपपाताशु[1]राक्षसः।
धरण्यां मेघसङ्काशः वज्रभिन्न इवाचलः ॥ ६ ॥
संविग्नः—खिन्नः ॥ ६ ॥

मुष्टिभिः जानुभिः पद्भिः सूदयन्तौ तु राक्षसम् ।
उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ॥ ७ ॥
सूदयन्तौ—हिंसन्तौ ॥ ७ ॥

स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः ।
निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः ॥ ८ ॥
न ममारेति। वरमहिंस्रेति शेषः ॥ ८ ॥

तं प्रेक्ष्य रामः सुभृशं अवध्यमचलोपमम् ।
भयेष्वभयदः श्रीमान् इदं वचनमब्रवीत् ॥ ९ ॥
भयेष्विति। भयकालेषु, भीतानामिति शेषः ॥ ९ ॥

तपसा, पुरुषव्याघ्र! राक्षसोऽयं न शक्यते ।
शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे ॥ १० ॥
[2]कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य, लक्ष्मण!
वनेऽस्मिन् सुमहच्छ्वभ्रं खन्यतां रौद्रवर्चसः ॥ ११ ॥
इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ १२ ॥
निखनावहे—खनुविदारणे, उभयपदी, निखननं कुर्मः ॥१२॥

तच्छ्रुत्वा राघवेणोक्तं राक्षसः [3]प्रश्रितं वचः ।
इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम् ॥ १३ ॥

---

[1] मूर्छितः—ङ. [2] ११–१२ श्लोकद्वयं नास्ति—ङ. [3] प्रथितं—ङ.

तदिति–स्वखननमित्यर्थः । प्रश्रितमिति–स्ववरमपि तत्प्रसाध्य-प्राणवियोजनोपाये अकिञ्चित्करं मन्वानत्वात्, शापान्तकालस्य प्राप्तत्वाच्च प्रश्रयप्राप्तिः ॥ १३ ॥

*[1] हतोऽस्मि, पुरुषव्याघ्र! शक्रतुल्यबलेन वै ।
मया तु पूर्वं त्वं मोहात् न ज्ञातः, पुरुषर्षभ! ॥ १४ ॥

पूर्वमिति । प्राणान्तव्यापारप्रवृत्तेः पूर्वमित्यर्थः ॥ १४ ॥

कौसल्यासुप्रजाः, राम! तात! त्वं विदितो मया ।
वैदेही च महाभागा लक्ष्मणश्च [2] महायशाः ॥ १५ ॥

इदानीं वा कीदृशं ते ज्ञानं? इत्यतः—कौसल्यत्यादि । कौसल्यायाः सुप्रजाः – कौसल्यासुप्रजाः, बहुव्रीह्यधिकारेऽपि 'नित्य-मसिच् प्रजामेधयोः' इति तत्पुरुषे च छान्दसोऽसिच् । हे राम! त्वं कौसल्यासुप्रजा इति मया अविदितः ॥ १५ ॥

†[3] अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुम् ।
तुम्बुरुर्नाम गन्धर्वः शप्तो वैश्रवणेन ह ॥ १६ ॥

कथमेवं तेऽतीन्द्रियज्ञानशक्तिः? इत्याह — अभिशापादि-त्यादि । तुम्बुरुर्नाम–प्रसिद्धो गन्धर्वः ॥ १६ ॥

प्रसाद्यमानश्च मया सोऽब्रवीन्मां महायशाः ।
यदा दाशरथी रामः त्वां वधिष्यति संयुगे ॥ १७ ॥
तदा प्रकृतिमापन्नः भवान् स्वर्गं गमिष्यति ।
अनुपस्थीयमानो मां संक्रुद्धो व्याजहार ह ॥ १८ ॥

---

* रामपादस्पर्शेन प्रत्यभिजानन्नाह—हत इत्यादि–गो. अधिकपाठे 'आक्रम्य वपुषे पादेन' इत्युक्त्वादेवमुक्तम् । † अपि शापादिति पाठे—अपिः गर्हायाम् ।

[1] भक्तोऽस्मि–ङ. [2] महाबलः–ङ. [3] अपि–ङ.

[1]इति वैश्रवणो राजा रम्भासक्तं पुराऽनघ!
तव प्रसादान्मुक्तोऽहं [2]अभिशापात् सुदारुणात् ॥ १९ ॥
[3]भुवनं स्वं गमिष्यामि स्वस्ति वोऽस्तु, परन्तप! ॥

तस्य शापनिमित्तमाह—इतीत्यादि। 'स्वर्गं गमिष्यतीति स वैश्रवणो राजा अब्रवीदि'ति पूर्वेणान्वयः। 'इति संक्रुद्धो व्याजहार' इति अग्रेण चान्वयः। इतिशब्दः प्रकृतावमर्शकः। ततश्च इति व्याजहार—रक्षोयोनिं प्रविशेति क्रुद्धः शापवचनं व्याजहारेत्यर्थः। क्रोधहेतुमाह—अनुपस्थीयमान इति—यथाकालमकृतोपस्थान इत्यर्थः। तत्र च हेतुः रम्भासक्तमिति। रम्भा—प्रसिद्धाप्सराः। स्वं भुवनं—स्वलोकं, 'विष्टपं भुवनं जगत्'। "इति वैश्रवणो राजा रम्भासक्तं पुरानघ! अनुपस्थीयमानो मां संक्रुद्धो व्याजहार ह" इति पाठं पश्यामः। अत्र पाठान्तरं पठित्वा मिथ्याक्लेशमन्वभूत् योजने चान्यः* ॥ १९ ॥

इतो वसति धर्मात्मा शरभङ्गः प्रतापवान् ॥ २० ॥
अध्यर्धयोजने, तात! महर्षिः सूर्यसंनिभः।

अध्यारूढमर्धं यस्मिन् तदध्यर्धं। सार्धयोजन इति यावत्॥

तं क्षिप्रमभिगच्छ त्वं स †ते श्रेयो [4]विधास्यति॥ २१ ॥

---

* अत्र 'अनुपस्थीयमानः' इत्यर्धानन्तरं 'इति वैश्रवणः' इत्यर्धं गो. ती. पठयते। 'रम्भाऽऽसक्तं पुराऽनघ!' इतिस्थाने 'रम्भासक्तमुवाच ह' इति च। संक्रुद्धः राजा—वैश्रवणो राजा राक्षसो भवेति व्याजहार, प्रसाद्यमानश्च इत्यब्रवीत्—उक्तप्रकारेण शापावसानं चोवाच—इति च व्याख्यातम्। † ते—त्वत्तः श्रेयः—ब्रह्मलोकं विधास्यति—पोषयिष्यति। यद्वा ते श्रेयः—निवासस्थानप्रवेशनादिकम्—गो.

[1] अर्धयोः पौर्वापर्ये वैपरीत्यं—ङ्. [2] इह—ङ्. [3] भवनं—ङ्.
[4] भिऽधास्यति—ङ्. ज.

अवटे चापि मां, राम! प्रक्षिप्य कुशली व्रज।
रक्षसां [1] गतसत्त्वानां एष धर्मः सनातनः॥ २२॥
अवटे ये निधीयन्ते तेषां लोकाः सनातनाः।

गतसत्त्वानां—गतप्राणानां। एष धर्मः इति। अवटनिक्षेप धर्म इत्यर्थः। सनातन इति—तथा हि—यवनेषु कलियुगराक्षसेषु तद्धर्मप्रवृत्तिः सनातना। उक्तार्थस्यैव विवरणं—अवट इत्यादि। य इति—मृता राक्षसा इत्यर्थः। लोका इति निर्ऋतिलोका इति यावत्॥ २२॥

एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः॥ २३॥
***बभूव स्वर्गसंप्राप्तः न्यस्तदेहो महाबलः।**

न्यस्तदेह इति। अवटे निक्षिप्तदेह इत्यर्थः। तेन संस्कारेण स्वर्गं संप्राप्तः—'द्वितीयाश्रिते'ति नदन्तविध्याश्रयेण समासः छान्दसः॥ २३॥

तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह॥ २४॥
[2] कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य, लक्ष्मण!
[3] वनेऽस्मिन् सुमहत् श्वभ्रं खन्यतां रौद्रकर्मणः॥ २५॥

एवं बभूवेत्याद्यर्धेन संक्षिप्तस्यार्थस्य विस्तरोपदेशः—तच्छ्रुत्वेत्यादि। अवटनिक्षेपधर्मेण स्वर्गप्राप्तिवचनं श्रुत्वेत्यर्थः। कुञ्जरस्येवेति—दुर्गन्धपरिहाराय मृतकुञ्जरस्य खननार्थमिवेत्यर्थः॥ २५॥

---

* स्वर्गसंप्राप्तः—संप्राप्तप्राय इत्यर्थः—गो. बभूव—भवितुमुद्यतो बभूव—ति.

[1] हत—ङ. [2] २५—२६—श्लोकद्वयं नास्ति—झ. [3] महतः—ङ.

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति ।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान् ॥ २६ ॥

उक्तानुवादपूर्वं व्यापारान्तरोपदेशः—इत्युक्त्वेत्यादिपादेन । कण्ठप्रदेशे आक्रम्य तस्थाविति । खन्यमानश्चभ्रात् दूरे, परिलुठनव्यावृत्त्यर्थमिति शेषः ॥ २६ ॥

ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम् ।
अखनत् पार्श्वतः तस्य विराधस्य[1] महात्मनः ॥ २७ ॥

'विराधस्य महात्मनः' इति पाङ्क्तः पाठः । "आत्मा देहे धृतौ", महाशरीरस्येत्यर्थः । गन्धर्वत्वप्रत्यापत्त्यभिप्रायेण च कविना महात्मनः इति प्रयोगः । एवं स्थिते 'विराधस्य दुरात्मनः' इति श्रद्धाजडाः केचन पाङ्क्तपाठं नाशयन्ति ॥ २७ ॥

तं मुक्तकण्ठं[2] निष्पिष्य * शङ्कुकर्णं महास्वनम् ।
विराधं प्राक्षिपत् श्वभ्रे नदन्तं भैरवस्वनम् ॥ २८ ॥

तं मुक्तकण्ठमिति—श्वभ्रप्रक्षेपणार्थं रामेण मुक्तकण्ठाक्रमणमित्यर्थः । शङ्कुकर्णं—शङ्काकारौ शङ्कुवत् कठिनौ च कर्णौ यस्य सः, तथा । महास्वनमिति बहुव्रीहिः । एवंभूतं विराधं भैरवस्वनं—भयङ्करस्वनं यथा तथा नदन्तमेव सन्तं श्वभ्रे प्राक्षिपत् ॥ २८ ॥

[3] तमाहवे निर्जितमाशुविक्रमौ
[4] स्थिरावुभौ संयति रामलक्ष्मणौ ।
मुदाऽन्वितौ चिक्षिपतुर्भयावहं
नदन्तमुत्क्षिप्य[5] बिले तु राक्षसम् ॥ २९ ॥

---

* शङ्कुवत् अचलायमानौ कर्णौ यस्य—रा. शङ्कुः—कीलं, तत्सदृशकर्णं गर्दभाकारं वा । 'शङ्कुकर्णो गर्दभोष्ट्रौ' इति वाणः—गो.

[1] दुरात्मनः—ङ. [2] उत्क्षिप्य—ङ. [3] महाहवे दारुण—ङ. [4] स्थिता—ङ. [5] बलेन—ङ. झ.

आशुविक्रमौ–क्षिप्रकारिणौ । स्थिरौ–दृढचित्तौ ॥ २९ ॥

अवध्यतां प्रेक्ष्य[1] महासुरस्य तौ
शितेन शस्त्रेण तदा नरर्षभौ ।
[2]समर्थ्य चात्यर्थविशारदावुभौ
[3]बिलं विराधस्य वधं प्रचक्रतुः ॥ ३० ॥

अवध्यतामित्यादि । शस्त्रेणावध्यतां प्रेक्ष्य–विचार्य, बिलं समर्थ्य–संपाद्य, तत्र बिले विराधस्य वधं प्रचक्रतुः ॥ ३० ॥

*स्वयं विराधेन हि मृत्युरात्मनः
प्रसह्य रामेण [4]यथार्थमीप्सितः ।
निवेदितः काननचारिणा स्वयं
न मे वधः शस्त्रकृतो भवेदिति ॥ ३१ ॥

उक्तार्थस्यैव तूपसंहाररूपेण वादः—स्वयमित्यादि । यथार्थमिति पाङ्क्तः पाठः । योग्यतायामव्ययीभावः । यथार्थं–स्वप्रयोजनोचितं, रामेण प्रसह्य स्वयं साध्यो यो मृत्युरीप्सितः, तमात्मनो मृत्युं उद्दिश्य काननचारिणा विराधेन स्वयमेव शस्त्रकृतो वधो न भवेदिति निवेदितोऽभूत् । रामः इति शेषः ॥ ३१ ॥

तदेव रामेण निशम्य भाषितं
कृता मतिस्तस्य बिलप्रवेशने ।
बिलं च रामेण बलेन रक्षसा
प्रवेश्यमानेन वनं विनादितम् ॥ ३२ ॥

---

*न केवलं स्वनिश्चयः, विराधेन चानन्तरे तथोक्तमित्याह—स्वयमिति–गो.

[1] महाबलस्य–ङ्. [2] संमन्य–ङ्. [3] बिले–सर्वत्र. [4] यथार्थ–ङ्. झ.

तदेव भाषितमिति–विराधोक्तरूपमित्यर्थः। रामेण बलेन इति कर्तृकरणयोस्तृतीये ॥ ३२ ॥

* प्रहृष्टरूपाविव रामलक्ष्मणौ
विराधमुर्व्याः प्रदरे निहत्य तौ।
[1] ननन्दतुर्वीतभयौ महावने
शिलाभिरन्तर्दधतुश्च राक्षसम् ॥ ३३ ॥

प्रहृष्टरूपाविव – इवशब्दः इह एवार्थे॥ ३३ ॥

ततस्तु तौ काञ्चनचित्रकार्मुकौ
निहत्य रक्षः परिगृह्य मैथिलीम्।
विजह्रतुस्तौ मुदितौ महावने
दिवि स्थितौ † चन्द्रदिवाकराविव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चतुर्थः सर्गः

महावने दिवि स्थितौ चन्द्रदिवाकराविव विजह्रतुः इति। आकाशवत् वनस्य च नीलत्वात् अतिविशालत्वाच्च उपमा। लीला(३३)मानः (?) सर्गः ॥ ३४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुर्थः सर्गः

---

* वस्तुतः हर्षशोकौ अनयोर्न स्तः, किन्तु तन्नटनमात्रमिति इवशब्देन सूचयति–**गो.** इवशब्द एवार्थे–**रा.** † उभावपि चन्द्रवत् कलासंपन्नौ, सूर्यवत् प्रतापयुक्तौ–**ति.**

[1] अत्र 'शिलाभिरन्तर्दधतुश्च राक्षसम्' इति चतुर्थः पादः, एवं– 'ततस्तु तौ काञ्चनचित्रकार्मुकौ निहत्य रक्षः परिगृह्य मैथिलीम्। विजह्रतुस्तौ मुदितौ महावने' इति अनन्तरश्लोकाद्यपादत्रयं च कचित् न पठ्यते।

पञ्चमः सर्गः

[शरभङ्गदर्शनम्]

[1] अग्रे हत्वा भीमबलं विराधं राक्षसं वने ।
ततः सीतां परिष्वज्य समाश्वास्य च वीर्यवान् ॥ १ ॥
अब्रवील्लक्ष्मणं रामः भ्रातरं दीप्ततेजसम् ।

अथ रामस्य शरभङ्गदर्शनम्—अग्रे हत्वेत्यादि ॥ १ ॥

कष्टं वनमिदं दुर्गं न च स्मो वनगोचराः ॥ २ ॥
अभिगच्छामहे शीघ्रं शरभङ्गं तपोधनम् ।
आश्रमं शरभङ्गस्य राघवोऽभिजगाम ह ॥ ३ ॥

कष्टं—"स्यात् कष्टं कृच्छ्रम्"—पीडावहमिति यावत् । च—यस्मात् वयं वनगोचरा न स्मः, अतः वनं कष्टं अस्माकमिति पूर्वेणान्वयः । गच्छामहे इति—गच्छाम इति यावत् । इत्युक्तेति शेषः ॥ ३ ॥

तस्य देवप्रभावस्य तपसा * भावितात्मनः ।
समीपे शरभङ्गस्य ददर्श महदद्भुतम् ॥ ४ ॥
विभ्राजमानं वपुषा † सूर्य[2]वैश्वानरोपमम् ।

भावितः—सिद्धः आत्मा यस्य स तथा । अद्भुतं ददर्शेत्युक्तं, किं तदित्यपेक्षायामुच्यते—विभ्राजमानमित्यादि । वपुषा—वपुस्त्विषा ॥ ४ ॥

---

* भावितः—शुद्धः आत्मा यस्य । † वैश्वानरः—सूर्यव्यतिरिक्ततेजांसि, सूर्यादितेजस्समुदायोपममित्यर्थः—गो. वस्तुतस्तु—प्रकाशे सूर्योपमत्वम्, तादृशतेजसः निगूढत्वे वैश्वानरोपमत्वम् ॥

[1] हत्वा तु तं—सर्वत्र. [2] वैश्वानरप्रभम्—ङ .ञ.

[1] अवरुह्य रथोत्सङ्गात् सकाशे विबुधानुगम् ॥ ५ ॥
* असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् ।

रथोत्सङ्गादवरुह्यापि वसुधां अस्पृशन्तं, सकाशे—समीपे, विबुधानुगं—विबुधाः—देवाः, तद्रूपाः अनुगाः—अनुचराः यस्य स तथा, अत एव विबुधेश्वरम् ॥ ५ ॥

[2] सुप्रभाभरणं देवं विरजोम्बरधारिणम् ॥ ६ ॥
तद्विधैरेव बहुभिः पूज्यमानं [3] महात्मभिः ।

सुप्रभान्याभरणानि यस्य स तथा । विरजस्कं—निर्मलं अम्बरं धर्तुं शीलमस्येति स तथा । तद्विधैः—तद्विधाभरणादिमद्भिः ॥

† [4] हरिभिर्वाजिभिर्युक्तं अन्तरिक्षगतं रथम् ॥ ७ ॥
[5] ददर्शादूरतस्तस्य तरुणादित्यसंनिभम् ।

[6] हरिभिः—श्यामवर्णैः ॥ ७ ॥

पाण्डुराभ्रघनप्रख्यं चन्द्रमण्डलसंनिभम् ॥ ८ ॥
अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् ।
‡ चामरव्यजने चाग्र्ये रुक्मदण्डे महाधने ॥ ९ ॥
गृहीते वरनारीभ्यां धूयमाने च मूर्धनि ।

महाधने—महामूल्ये ॥ ८ ॥

---

* अभूमिस्पर्शस्य देवस्वभावत्वात्—गो. † हरिभिः—श्यामैः । यद्वा वाजिभिः—वेगवद्भिः हरिभिः—अश्वैः—गो. ‡ चामरव्यजने च अपश्यदित्यन्वयः ।

[1] रथप्रवरमारूढमाकाशे—ङ. ज. [2] संप्रभा—ङ. ज. [3] महर्षिभिः—ङ. [4] हरितैः—ङ. ज. [5] ददर्श दूरतः—ङ. [6] हरितैः—ट.

गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ॥ १० ॥

अन्तरिक्षगतं देवं वाग्भिरग्र्याभिरीडिरे ।
सह संभाषमाणे तु शरभङ्गेण वासवे ॥ ११ ॥

दृष्ट्वा शतक्रतुं तत्र रामो लक्ष्मणमब्रवीत् ।

वासवे—उक्तलक्षणे शरभङ्गेण संभाषमाणे तु तं शतक्रतुं इति रामो दृष्ट्वा—ज्ञात्वा अब्रवीत् ॥ ११ ॥

[1]रामोऽथ रथमुद्दिश्य [2]लक्ष्मणाय प्रदर्शयन् ॥ १२ ॥

तदेव प्रपञ्चयति—रामोऽथेत्यादि। उद्दिश्य—हस्तेन अपरोक्षं निर्दिश्येत्यर्थः ॥ १२ ॥

अर्चिष्मन्तं श्रिया जुष्टं अद्भुतं पश्य, लक्ष्मण!
प्रतपन्तमिवादित्यं अन्तरिक्षगतं रथम् ॥ १३ ॥

ये हयाः *पुरुहूतस्य पुरा शक्रस्य नः श्रुताः ।
अन्तरिक्षगताः दिव्याः त इमे हरयो ध्रुवम् ॥ १४ ॥

पुरु—बहु—अनेकयजमानैः यागायाहूतः इति पुरुहूतः ॥ १४ ॥

इमे च पुरुषव्याघ्राः ये तिष्ठन्त्यभितो [3]रथम् ।
शतं शतं कुण्डलिनः युवानः खड्गपाणयः ॥ १५ ॥

शतं शतमिति । अष्टदिक्ष्वपीति शेषः। शतशब्दोऽनेकवाची। कुण्डलिनः—कर्णाभरणवन्तः ॥ १५ ॥

---

*पुरूहूतस्य—बहुयागकर्तुः—रा.

[1] इदमर्धं नास्ति—झ. एतदारभ्य अर्धत्रयं नास्ति—झ. [2] भ्रातुर्दर्शयताऽनुम्—ङ. ज. [3] दिशम्—ङ. ज.

विस्तीर्णविपुलोरस्काः परिघायतबाहवः ।
[1] शोणांशुवसनाः सर्वे व्याघ्रा इव दुरासदाः ॥ १६ ॥

विस्तीर्णानि—विपुलानि—अतिशयेन विशालानि उरांसि येषां ते तथा । शोणांशूनि–शोणप्रभानि वसनानि येषां ते तथा । एवं पाङ्क्तः पाठः । शोणाश्मवसनानि च येषामित्याह * । परस्तु शोणाश्मवसना इत्युक्त्वा पद्मरागवसना इत्याह । अंशवः–किरणानि, तत्संबन्धो वस्त्राणां न समस्तीत्यादिदुर्मत्या पाङ्क्तपाठ-नाशनम् ॥ १६ ॥

उरोदेशेषु सर्वेषां हाराः ज्वलनसंनिभाः ।
रूपं बिभ्रति, सौमित्रे ! पञ्चविंशतिवार्षिकम् ॥ १७ ॥

हाराः ज्वलनसंनिभाः इति दीप्तिमत्त्वमात्रे तात्पर्यम् । बिभ्रति—अभ्यस्तत्वात् अदादेशः । पञ्चविंशतिः परिमाणमस्य, 'तदस्य परिमाणं' इति ठक्, 'वर्षस्याभविष्यति' इत्युत्तरपदवृद्धिः ॥

एतद्धि किल देवानां वयो भवति नित्यदा ।
यथेमे पुरुषव्याघ्राः दृश्यन्ते [2] प्रियदर्शनाः ॥ १८ ॥

एतद्धीति—पञ्चविंशतिवर्षप्रमाणकमित्यर्थः । यथेमे दृश्यन्ते एतद्धि इति पूर्वेणान्वयः । नित्यदेति बहुश इह प्रयोगः ॥ १८ ॥

इहैव सह वैदेह्या मुहूर्तं तिष्ठ, लक्ष्मण !
यावज्जानाम्यहं व्यक्तं क एष द्युतिमान् † रथे ॥ १९ ॥

---

* महेश्वरतीर्थः † 'रथे' इत्यनेन तदानीं रामं दृष्ट्वा रथमारूढ इत्यवगम्यते—गो. अत एव रामोपसर्पणात् पूर्वमेव इन्द्रस्य प्रस्थानमुच्यते समनन्तरमिति भावः ।

[1] शोणाश्मवसनाः—शोणाश्ववसनाः—ङ. [2] शुभदर्शनाः—ङ.

यावज्जानामीति। यावत्पुरेति लट्। व्यक्तं ज्ञास्ये इत्यर्थः। यद्यप्युक्तलिङ्गैः शतक्रतुरित्यनुमीयते, अथापि प्रत्यक्षतोऽवगमिष्यामीत्यर्थः॥ १९॥

तमेवमुक्त्वा सौमित्रिं इहैव स्थीयतामिति।
अभिचक्राम काकुत्स्थः शरभङ्गाश्रमं प्रति॥ २०॥

उक्तानुवादपूर्वं व्यापारान्तरोपदेशः—तमेवमित्यादि॥ २०॥

ततः समभिगच्छन्तं प्रेक्ष्य रामं शचीपतिः।
[1]शरभङ्गमनुप्राप्य विविक्त इदमब्रवीत्॥ २१॥
इहोपयानसौ रामः यावन्मां नाभिभाषते।
[2]निष्ठां [3]नयत तावत्तु ततो मा द्रष्टुमर्हति॥ २२॥

उपयान् असौ रामः यावत् नाभिभाषते तावत्तु—ततः प्रागेव मां निष्ठां—स्थानम्, 'आतश्चोपसर्गे' इत्यङ्। स्वर्गमिति यावत्, नयत—प्रापयत। तत एव हेतोः अस्मान् मा द्रष्टुमर्हतीति विबुधानब्रवीत्। स्वस्थानगमनेन अस्माभिः एतद्दर्शनं परिहर्तव्यम्। देवैतैः संभाषमाणे मनुष्यभावप्रतीतिभङ्गप्रसङ्गात्। रावणवधश्च मनुष्यभावैकसाध्यः। अतो नायं तद्दर्शनकाल इत्यर्थः* ॥ २२॥

[4]अथ वज्री तमामन्त्र्य मानयित्वा च तापसम्।
रथेन हरियुक्तेन ययौ दिवमरिन्दमः॥ २३॥

---

* विपदि स्थितेनैवंविधवैभवस्य दर्शनमनुचितमित्यर्थः-ति.

[1] शरभङ्गमनुज्ञाप्य विबुधानिदमब्रवीत्—ङ. ज. झ. [2] एतदनन्तरं—तावद्गच्छामहे क्षिप्रं यावन्मां नाभिभाषते। इत्यधिकं—ङ. जितवन्तं कृतार्थं च द्रष्टाऽहमचिरादिमम्। किमनेन कर्तव्यं महदन्यैः सुदुष्करम्। निष्पादयित्वा तत्कर्म ततो मां द्रष्टुमर्हति॥ इत्यधिकं—ङ. ज. झ. [3] नयतु—ङ. झ. [4] इति—ङ. ज.

अथ वज्रीति। वज्री तं आमन्त्र्य—वज्री देवान् इत्युक्त्वा तं—शरभङ्गं आमन्त्र्य दिवं ययौ। एवं स्थिते—"निष्ठां नयतु तावत्तु ततो मां द्रष्टुमर्हति" इत्येवं पठित्वा अनन्तरं—"जीवन्तं च कृतार्थं च द्रष्टाऽहमचिरादिमम्। कर्म ह्यनेन कर्तव्यं महदन्यैः सुदुष्करम्" इति च कंचन श्लोकं प्रक्षिप्य * कश्चिद् व्याकरोति। सर्वमेतदसङ्गतम्। उपागच्छद्रामस्य तत्कालदर्शनमात्रस्यैव तदानीं चिकीर्षितत्वात्, तावत एव कर्तव्यत्वाच्च। उपागच्छन् रामो यावन्मां नाभिभाषते तावत् निष्ठां—रावणवधकर्मनिष्पत्तिं नयतु, ततः—अनन्तरं मां द्रष्टुमर्हतीति च व्याकरोति। इदं व्याख्यानस्य प्रत्यक्षमिथ्यात्वं सुस्पष्टम् ॥ २३ ॥

प्रयाते तु सहस्राक्षे राघवः[1] सपरिच्छदः।
अग्निहोत्रमुपासीनं शरभङ्गमुपागमत् ॥ २४ ॥

सपरिच्छदः—सपरिकरः—स्त्रीभ्रातृसहित इति यावत् ॥ २४ ॥

तस्य पादौ च संगृह्य रामः सीता च लक्ष्मणः।
निषेदुः समनुज्ञाताः लब्धवासा ‡ निमंत्रिताः ॥ २५ ॥

समनुज्ञाताः—आसनावस्थानाय कृतानुमतिकाः, अत एव लब्धवासाः—लब्धस्थितयः, निमंत्रिताः—सत्कृताश्चाभवन्नित्यर्थः ॥ २५ ॥

---

* महेश्वरतीर्थः गोविन्दराजो वा। पाठस्योभयसम्मतत्वेऽपि उत्तरत्र प्रदर्श्यमान-व्याख्यायाः परिशीलने महेश्वरतीर्थमेव कटाक्षयतीति युक्तम् ॥ 'कृतार्थ—निस्तीर्णविपदं। जितवन्तं, रावणमिति शेषः। तदा वैभवयुक्तमिमं द्रक्ष्यामीति शेषः। कतकस्त्वेतत्पद्यं प्रक्षिप्तमित्याह—तद्वृथैव, मद्दीया व्याख्याने सर्वसामञ्जस्यात्'—ति. जितवन्तं-कृतरावण-वधं, शीघ्रमहं द्रक्ष्यामीति शेषः। एतेन रामसंभाषणे सति रावणः कोपं करोतीति इन्द्रस्य भीतिर्व्यञ्जिता—रा. ‡ निमन्त्रिताः—भोजनार्थं—ति.

[1] सपरिच्छदम्—ङ. सपरिच्छदे—झ.

ततः * शक्रोपयानं तु पर्यपृच्छत् स राघवः।
शरभङ्गश्च तत् सर्वं राघवाय न्यवेदयत् ॥ २६ ॥

शक्रोपयानं—शक्रोपागमनप्रयोजनमित्यर्थः ॥ २६ ॥

मामेष वरदः, राम! ब्रह्मलोकं निनीषति।
जितमुग्रेण तपसा दुष्प्राप[1]मकृतात्मभिः ॥ २७ ॥

न्यवेदयदिति कथमित्यतः—मामेष इत्यादि। एषः वरदः—देवेन्द्रः मां ब्रह्मलोकं निनीषति इति, श्रीमदादिगुरुब्रह्माज्ञयेति शेषः। कथं तथा निनीषेत्यत्राह—जितमुग्रेण तपसेति। अकृतात्मभिः दुष्प्रापं—असिद्धाकृतकभगवदनन्यतत्त्वात्मयोगैः प्राप्तुमशक्यं ब्रह्मलोकमिति संबन्धः ॥ २७ ॥

अहं † ज्ञात्वा, नरव्याघ्र! वर्तमानमदूरतः।
ब्रह्मलोकं न गच्छामि [2] त्वामदृष्ट्वा प्रियातिथिम् ॥ २८ ॥

ज्ञात्वेति। योगचक्षुषेति शेषः। न गच्छामीति—योगसिद्धतः स्वेच्छादेहत्यागात् ॥ २८ ॥

त्वयाऽहं, पुरुषव्याघ्र! धार्मिकेण महात्मना।
‡ समागम्य गमिष्यामि त्रिदिवं [3] देवसेवितम् ॥ २९ ॥

त्रिदिवं—अवरं परं चेत्यर्थः। परं—नाकादिसंज्ञो ब्रह्मलोकः ॥ २९ ॥

---

* शक्रोपयानं—इन्द्रागमननिमित्तं—गो. † ज्ञात्वा—योगचक्षुषा—गो. ति.
‡ समागम्य-सकृद्वा दर्शनानन्दं अनुभूयेति यावत्।

[1] मजितात्मभिः—ङ. [2] त्वां दृष्ट्वा च—ङ. [3] चावरं परम्—ङ.

अक्षयाः, नरशार्दूल ! मया लोका जिताः शुभाः ।
* ब्राह्म्याश्च नाकपृष्ठ्याश्च प्रतिगृह्णीष्व [1] मामकान् ॥ ३० ॥

अथ विशेषसत्कारार्थं ऋषिराह—अक्षया इत्यादि । के ते लोकाः जिताः इत्यतः—ब्राह्म्या इत्यादि । उभयत्र च तौ छान्दसौ । ब्राह्माः लोकाः, नाकपृष्ठाः लोकाश्च जिताः, मामकांस्तान् प्रतिगृह्णीष्व प्रीतेन मया प्रीतिदानत्वेन दीयमानानिति शेषः ॥ ३० ॥

एवमुक्तो नरव्याघ्रः सर्वशास्त्र [2] विशारदः ।
ऋषिणा शरभङ्गेण राघवो वाक्यमब्रवीत् ॥ ३१ ॥
† अहमेवाहरिष्यामि [3] सर्वलोकान्, महामुने !
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ ३२ ॥

प्रदिष्टमिति ! त्वयेति शेषः ॥ ३२ ॥

राघवेणैवमुक्तस्तु शक्रतुल्यबलेन वै ।
शरभङ्गो महाप्राज्ञः पुनरेवाब्रवीद्वचः ॥ ३३ ॥

---

* रामस्य राज्यभ्रंशं ज्ञात्वा वा एवमाह मुनिः । तिलके तु—'अनेन सर्वकर्मणां भगवदर्पणमकरोदिति सूचितम्' इत्युक्तम् । तीर्थे—गोविन्दराजीयेऽप्येयमेव । अनन्तर-श्लोकटिप्पणी द्रष्टव्या । † शरभङ्गप्रार्थनां अङ्गीचकारेत्युच्यतेऽनेन श्लोकेनेति—**ती. गो.** प्रभृतयः । परन्तु—सप्तमे सर्गेऽपि सुतीक्ष्णवाक्ये 'चित्रकूटमुपादाय राज्यभ्रष्टोऽसि मे श्रुतः । इहोपयातः काकुत्स्थ ! देवराजः शतक्रतुः । उपागम्य च मां देवः महादेवः सुरेश्वरः । सर्वान् लोकान् जितानाह मम पुण्येन कर्मणा । तेषु देवर्षिजुष्टेषु जितेषु तपसा मया । मत्प्रसादात् सभार्यस्त्वं विहरस्व सलक्ष्मणः । तमुग्रतपसा युक्तं महर्षिं सत्यवादिनम् । प्रत्युवाचात्मवान् रामः ब्रह्माणमिव काश्यपः । अहमेवाहरिष्यामि स्वयं लोकान् महामुने ! आवासं त्वहमिच्छामि प्रदिष्टमिह कानने' इति दर्शनात् रामस्य राज्यभ्रंशज्ञानादेवेदमुक्त-मिति स्पष्टमवगम्यते ॥

[1] राम तान्—ङ. [2] विदांवरः—ङ. [3] स्वयं लोकान्—ङ.

इह, राम! [1]महातेजाः सुतीक्ष्णो नाम धार्मिकः।
वसत्यरण्ये [2]धर्मात्मा स ते [3]श्रेयो विधास्यति ॥ ३४ ॥

इह अरण्ये वसतीति। अदूरे इति शेषः ॥ ३४ ॥

[4]सुतीक्ष्णमभिगच्छ त्वं शुचौ देशे तपस्विनम्।
रमणीये वनोद्देशे स ते वासं विधास्यति ॥ ३५ ॥
इमां मन्दाकिनीं, राम! प्रतिस्रोतामनुव्रज।
नदीं [5]पुष्पोडुपवहां * तत्र तत्र गमिष्यसि ॥ ३६ ॥

इमां मन्दाकिनीमिति। मन्दाकिनीशब्दः पुण्यनदीवाची। इह चित्रकूटस्थलेऽपि तथैवेति मन्यामहे †। प्रतिस्रोतां—आर्षमावन्तत्वम्, प्रतिस्रोतसं कृत्वा अनु—प्राप्य व्रज। नद्यां पुनः पूर्ववाहिन्यां पुरुषेण पश्चिमाभिमुखतया गमने प्रतिस्रोतस्त्वं भवति। ‡ पुष्पवत् लघु उडुपानि वहतीति तथा। "उडुपं तु प्लवः" ॥३६॥

एष पन्थाः, नरव्याघ्र! मुहूर्तं पश्य, तात! माम्।
[6]यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥ ३७ ॥

एष पन्था इति। उक्त इति शेषः। अथ ऋषिचिकीर्षितब्रह्मामेधप्रधानहविर्देवतात्वेन ब्रह्माग्नेरास्ये सन्निधानार्थमाह—मुहूर्तं तात मां पश्येति। अत्र तातशब्दस्य आन्तराशयः जगज्जनकेति ॥३७॥

---

* 'तत्र तत्र गमिष्यसि' इत्यनेन क्वचिन्नदीतीरे क्वचित् व्यवहिते च मार्गे व्यपदिश्यते। † दृश्यते च एवमेव तत्तत्प्रान्तेषु व्यवहारः ॥ गङ्गाप्रान्तवासिजनैः इतरा नद्यपि गङ्गेति, तथा कावेरीप्रान्तवासिजनैः इतराऽपि कावेरीति हि व्यवह्रियते ॥ ‡ उडुपाकारपुष्पचयावहामित्यर्थः—गो. रा.

[1] महाप्राज्ञः—ङ. [2] नियतः—ङ. ज्ञ. [3] वासं—ङ. [4] अयं श्लोकः कुण्डलितः—ज्ञ. [5] पुष्पोत्कर—ङ. [6] यावज्जुहोमि—ङ.

ततोऽग्निं सुसमाधाय हुत्वा चाज्येन [1]मन्त्रवित् ।
शरभङ्गो [2]महातेजाः प्रविवेश हुताशनम् ॥ ३८ ॥

ततोऽग्निं सुसमाधायेति । "यद्युत्कण्ठा(ऽऽत्मदेवासौ)तदावासौ ब्रह्ममेधा(नलं व्रजेत्)त जडं त्यजेत् । नाभिवक्त्रात्मगात्माग्नीन् अवरोप्य यथास्थलम् । संस्कारयेत्" इत्युपक्रम्य, "न्यासयोः सहकर्तृणां अश्वमेधशतायुतम् ॥" इत्यन्तोपनिषदुपदिश्यमानाध्वनेति शेषः । मन्त्रविदिति । उक्तोपनिषदुपदिश्यमानब्रह्ममेधमंत्रविदित्यर्थः । प्रविवेशेति । 'ब्राह्मणत्वेति स्वजीवज्योतिश्चमस इत्यालभ्य परम-महरुच्चैरोमिति प्रापुः' इत्युपनिषदुपदिश्यमानब्रह्मसिद्धान्तमूलमन्त्रेणेति शेषः ॥ ३८ ॥

तस्य रोमाणि केशांश्च ददाहाग्निर्महात्मनः ।
जीर्णां त्वचं तथाऽस्थीनि यच्च मांसं सशोणितम् ॥ ३९ ॥
[3]रामस्तु विस्मितो भ्रात्रा भार्यया च सहात्मवान् ।
स च पावकसङ्काशः कुमारः समपद्यत ।
उत्थायाग्नि[4]चयात् तस्मात् शरभङ्गो व्यरोचत ॥ ४० ॥

कुमारः समपद्यत उत्थायाग्निचयात् तस्मादिति । "अथ यद्ब्रां इत्यादित्ये जुहवुः तद् ब्रह्माग्निः नवब्रह्मर्षिहृदतिष्ठत् द्वे धूम भस्माभ्यां" इत्युपदिश्यमानरीत्या अग्नेर्भूमानन्दपदविद्यादेहात्मनो-त्थानम् ॥ ४० ॥

स लोकानाहिताग्नीनां ऋषीणां च महात्मनाम् ।
देवानां च व्यतिक्रम्य * ब्रह्मलोकं व्यरोहत ॥ ४१ ॥

---

* ब्रह्मात्मकं लोकं–गो.

[1] मन्त्रवत्–ङ. ज. [2] महाप्राज्ञः–ङ. [3] इदमर्धं कुण्डलितम्–ज. [4] चितात्–ङ.

अथ 'स लोकानाहिताग्नीनां' इत्यादिना 'परममहदुच्चैरोमिति प्रापुः' इत्युपदिष्टसाक्षाद्ब्रह्मसायुज्यलक्षणपरमापवर्गपटले उपदिष्टम्। आहिताग्नीनां लोकाः 'कर्मणा पितृलोकः' इति श्रुताः चन्द्रमण्डलयात्राः। ऋषयः उपासकाः तेषां लोकाः 'विद्यया देवलोकः' इति श्रुताः सौरमण्डलयात्राः। देवाः-भगवदिन्द्रियदेवाः त्रयस्त्रिंशत् आजानदेवाः सपत्नीकपञ्चब्रह्मविष्णुरुद्रविष्णुरूपाः तेषां लोकाः ब्रह्माः ध्रुवयात्राः। तान् सर्वांश्च व्यतिक्रम्य ब्रह्मलोकं—श्रीमदादिगुरुतुरीयब्रह्मलोकं व्यरोहत—आरूढवान् ॥ ४१ ॥

स पुण्यकर्मभवने द्विजर्षभः
*पितामहं सानुचरं ददर्श ह।
पितामहश्चापि समीक्ष्य तं द्विजं
ननन्द सुस्वागतमित्युवाच ह ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चमः सर्गः

पुण्यं—शुभं—जगत्पञ्चकृत्यप्रवर्तनरूपं कर्म यस्य स तथा, तस्य भवनं प्रागुक्तब्रह्मलोकः। त्रिब्रह्मणः पितरः, तेषां पितृत्वात् पितामहः—श्रीमदादिगुरुः। सानुचरं—अनुचराः समहेशाः त्रयस्त्रिंशत्कोटिदेवाः। ददर्शेति। 'मुक्तोपसृप्यत्वात्' इति सूत्रात् 'परात्परं पुरिशयं पुरुषमीक्षते' इति तद्विषयवाक्यतश्च मुक्तानुग्रहाय गृहीतमातृकामयदिव्यमङ्गलविग्रहत्वात्। स्वगतं—स्वस्य परात्परस्य

---

* पितामहं—ब्रह्मादित्रयसमष्टिरूपम्—ति. पितामहशब्दोऽपि सविग्रहपरमात्मपरः—गो.

[1] पुण्यकर्मा भुवने—ङ. ज.

आगतं साक्षात् प्राप्तिं स्वीकृत्य अनुमन्यते स्म इत्यर्थः । एवं ब्रह्ममेधे रामप्रतीक्षणात् भगवान् रामो ब्रह्मेति शिशोरपि स्पष्टम् । तथा अग्रेऽपि प्रदर्शयिष्यामः । रघु (४२) मानः सर्गः ॥४२॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चमः सर्गः

षष्ठः सर्गः

[रक्षोवधप्रतिज्ञा]

शरभङ्गे दिवं याते * मुनिसङ्घाः समागताः ।
अभ्यगच्छन्त काकुत्स्थं रामं ज्वलिततेजसम् ॥ १ ॥

अथ शरभङ्गाश्रमे समागतरक्षःपीडानिवृत्तिप्रार्थकदण्डकारण्य-ब्रह्मर्षीणां रक्षोवधप्रतिश्रवणम् । शरभङ्ग इत्यादि । दिवं यात इति । इह च प्रयोगात् ब्रह्मलोके परदिवाख्ये सर्वतः इह काव्ये स्वर्गपर्यायाणां प्रयोगो द्रष्टव्यः । स्वर्गादिशब्दाः सुखवाचिनः । ब्रह्मलोकस्य निरतिशयानन्दत्वात् कैमुतिकसिद्धं स्वर्गादिवाच्यत्वम् । अभ्यगच्छन्तेति । स्वरक्षासमर्थमहावैभवस्य शरभङ्गस्य ब्रह्मलोक-प्रस्थितत्वात् रक्षाप्रार्थनार्थमिति शेषः ॥ १ ॥

† वैखानसाः बालखिल्याः संप्रक्षाला मरीचिपाः
अश्मकुट्टाश्च बहवः पत्राहाराश्च [1] धार्मिकाः ॥ २ ॥

---

* शरभङ्गदर्शनार्थं प्राप्ता मुनिसङ्घाः-रा. † सदा शरीरं संप्रक्षालयन्तीति संप्रक्षालाः । मरीचीन्-चन्द्रसूर्यादिकिरणान् सदा पिबन्तीति मरीचिपाः, सदाऽन्तः किरणान् प्रवेशयन्तः विद्वेत्तास्या इत्यर्थः । अश्मभिरात्मशरीराणि कुट्टन्तीत्यश्मकुट्टाः-गो. अश्मकुट्टाः-अपक्वकुट्टितान्नभक्षकाः-ति. यद्वा प्रत्यहं जीवनसाधनं संपाद्य सर्वं तत् विनियुज्य ये वर्तन्ते ते वा संप्रक्षालाः-अभ्यस्तनिका इत्यर्थः-ती.

[1] तापसाः-ङ.

वैखानसा इति। 'ये नखाः। ते वैखानसाः। ये वालाः। ते वालखिल्याः।' इति भगवतः प्रजापतेः नखलोमभूताः, तज्जा ऋषयस्तु वैखानसवालखिल्याद्याः। भगवतः श्रीपादप्रक्षालनतीर्थजाः महर्षयः—संप्रक्षालाः। मरीचिपाः—चातकवत् चन्द्रकिरणमात्रजीवनाः, सौरकिरणमात्रजीवना वा। अश्मनः कुट्टयित्वा भक्षयन्तः अश्मकुट्टाः ॥ २ ॥

* दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे।
[1]गात्रशय्या अशय्याश्च तथैवा[2]नवकाशिकाः ॥ ३ ॥

दन्तव्यतिरिक्तस्वजीवनवस्त्ववहननसाधनरहिताः — दन्तोलूखलिनः। कण्ठदघ्नजले हेमन्तेषु स्थित्वा तपस्साधकाः—उन्मज्जकाः। गात्रमात्रेण शयनवन्तः नित्यमनास्तरणशायिनः—गात्रशय्याः। एकपादस्य स्थित्यवकाशप्रदानरहिताः एकपादस्थितिमन्तः—अनवकाशिकाः ॥ ३ ॥

मुनयः सलिलाहाराः वायुभक्षास्तथापरे।
आकाशनिलयाश्चैव तथा † स्थण्डिलशायिनः ॥ ४ ॥

---

* गात्रशय्याः—गात्रावयवानि व्याघ्रचर्मादीनि शय्या येषां ते। अशय्याः—आस्तरणरहितस्थितिमन्तः। अनवकाशिकाः—अहर्दिवं कर्मनिरतत्वात् अवकाशरहिताः—रा. गात्रशय्याः—अनास्तरणशायिनः। अशय्याः—निद्राहीनाः—ति. उन्मज्जकाः—शिरोमात्रमुद्धृत्य सदा जलावगाढाः। गात्रमेव शय्या येषां ते गात्रशय्याः, उरसि पृष्ठेऽसे वा शिरः कृत्वा शयानाः इत्यर्थः, अतो न 'स्थण्डिलशायिनः' इत्यनेन पुनरुक्तिः। अशय्याः—अनभ्रगात्राः। अभ्रावकाशकाः—वर्षवातातपादिष्वप्यनावृतदेश एव वर्तमानाः—गो. गात्रशय्यास्तु केवलं स्थले गात्रैरेव शेरते ये ते। ये कदाचिदपि न शेरते ते अशय्याः—ती.

† स्थण्डिले-कुशाद्यावृतभूतले शेरते—गो. ती.

[1] गतशय्याश्च आर्याश्च—ङ. [2] भ्रावकाशकाः—ङ. ज.

सर्वदा अनावृतप्रदेशनिलयाः आकाशनिलयाः। स्थण्डिल उपलिप्तानावृतक्रोडीकृतस्थलशयनाः स्थण्डिलशायिनः ॥ ४ ॥

[1]तथोर्ध्ववासिनो दान्ताः तथाऽऽर्द्रपटवाससः।
[2]संजपन्तः तपोनित्याः तथा पञ्चतपोऽन्विताः ॥ ५ ॥

वृक्षशाखागिरिशिखराद्यूर्ध्वप्रदेशनित्यवासशीलाः ऊर्ध्ववासिनः इति पाङ्क्तः। उपवासिनः इत्यन्यः *पठति, स तु साधारणधर्म इत्युपेक्ष्यः। आर्द्रपटनित्यवसनशीलाः आर्द्रपटवाससः। संजपन्तस्तु सदाजपपराः। तपोनित्यास्तु—"य एवं विद्वान् महारात्र उषस्युदिते व्रजंस्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा यावत् तरसं स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्यायः" इत्युपदिष्टतपोनित्यानुष्ठान-तत्पराः तपोनित्याः। पञ्चतपोऽन्विताः—ग्रीष्मे पञ्चाग्निमध्यस्थाः ॥

सर्वे ब्राह्म्या श्रिया जुष्टाः [3]दृढयोगसमाहिताः।
शरभङ्गाश्रमे रामं अभिजग्मुश्च तापसाः ॥ ६ ॥

ब्राह्म्या श्रिया—ब्रह्मविद्यानुष्ठानजनितब्रह्मवर्चसेन दृढभूतब्राह्मतंत्र-मंत्रज्ञानयोगसमाहिताः—योगैकाग्रचित्ताः ॥ ६ ॥

अभिगम्य च धर्मज्ञाः रामं धर्मभृतां वरम्।
ऊचुः परमधर्मज्ञं ऋषिसङ्घाः समाहिताः ॥ ७ ॥
त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च, महारथ!
प्रधानश्चासि नाथश्च †देवानां मघवानिव ॥ ८ ॥

---

*गोविन्दराजः, तीर्थो वा। अत्र तिलके "व्रतोपवासिनः इति पाठस्तु चिन्त्यः, तस्य साधारणधर्मत्वादिति कृतकः" इत्यनूदितम् ॥ †यथा देवेन्द्र इति शक्रस्य नाम, तथा रघुपतिरिति तव नामेत्यर्थः—गो.

[1] व्रतोपवासिनः—मासोपवासिनः—ङ. [2] सजपाश्च—ङ. [3] दृढयोगाः—ङ.

ऊचुरिति । किमूचुरित्यतः—त्वमित्यादि । इक्ष्वाकुकुलस्य प्रधानः, पृथिव्याः नाथः इति विभज्यान्वयः । देवानां मघवानिवेत्ययं यशआदिविश्रुतत्वेन ॥ ८ ॥

विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च ।
[1]पितृभक्तिश्च सत्यं च त्वयि धर्मश्च पुष्कलः ॥ ९ ॥
त्वमासाद्य महात्मानं धर्मज्ञं धर्मवत्सलम् ।
*अर्थित्वात्, नाथ! वक्ष्यामः तच्च नः क्षन्तुमर्हसि ॥ १० ॥

अर्थित्वात्—अर्थिभावेन, यद्वक्ष्यामः तत् क्षन्तुमर्हसीति योजना ॥

अधर्मस्तु महान्, तात! भवेत्तस्य महीपतेः ।
यो हरेत् बलिषड्भागं न च रक्षति पुत्रवत् ॥ ११ ॥
†[2]युञ्जानः स्वानिव प्राणान् प्राणैरिष्टान् सुतानिव ।
नित्ययुक्तः सदा रक्षन् सर्वान् विषयवासिनः ॥ १२ ॥

तदेवाह—अधर्मस्तु महानित्यादिना । प्रत्यवायाद्यनिष्टश्रवणपरिहाराय ‡बलये—पूजायै दत्तः यः षड्भागः—षष्ठांशः प्रजाभिः । तथा प्राणैरिष्टानिति—प्राणेभ्योऽधिकप्रियानित्यर्थः ॥ १२ ॥

प्राप्नोति शाश्वतीं, राम! कीर्तिं स बहुवार्षिकीम् ।
ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते ॥ १३ ॥

---

*अर्थिभावेन यत् क्रूरमपि वक्ष्यामः तत् क्षन्तुमर्हसि—ति. किमेते एवं पीडयन्तीति न भाव्यमिति भावः । †युञ्जानः प्रजारक्षणे यतमानः सर्वान् देशवासिनः स्वान् प्राणानिव प्राणैरिष्टान्—प्राणेभ्योऽप्यधिकप्रियान् सुतानिव—ति. स्वान् प्राणान्—सर्वेन्द्रियाणि युञ्जानः—प्रजारक्षणे नियोजयन्—रा. ‡बलिः—करो वा, 'भागधेयः करो बलिः' ।

[1] पितृभक्तत्वं—ङ. ज. [2] 'प्रजाः स्वानिव च प्राणान् स्वसुतानिव नित्यशः'—ङ.

एवं प्रजानामरक्षणे प्रत्यवायमुक्त्वा रक्षणे तु परमदुर्लभब्रह्मकुलमात्रलभ्यब्रह्मलोकावाप्तिरपीति चाहुः—नित्ययुक्ता इत्यादि। प्राप्नोतीति—इहेति शेषः। शाश्वतीं—नित्याम्। अत एव बहुवार्षिकीं—बहुवर्षव्यापिनीम् ॥ १३ ॥

*[1] यत्करोति परं धर्मं [2] मुनिर्मूलफलाशनः।
तत्र राज्ञः चतुर्भागः प्रजा धर्मेण [3] रक्षतः ॥ १४ ॥

ननु भवतु प्रजारक्षणं, तत् षष्ठांशग्रहात् कर्तव्यमेव। वनवासिभिरनुपकारात् कुतः तद्रक्षणं? इत्यत्राहुः—यत्करोतीत्यादि। प्रजाः इति। वानप्रस्थप्रजा इत्यर्थः ॥ १४ ॥

सोऽयं ब्राह्मणभूयिष्ठः वानप्रस्थगणो महान्।
त्वन्नाथोऽनाथवत् राम! राक्षसैः [4] वध्यते भृशम् ॥ १५ ॥

ब्राह्मणभूयिष्ठ इत्यनेन क्षत्रवैश्यवानप्रस्थाश्च केचिदिह सन्तीति गम्यते। त्वं नाथः—रक्षकः यस्य स तथा ॥ १५ ॥

एहि पश्य †शरीराणि मुनीनां भावितात्मनाम्।
[5] हतानां राक्षसैर्घोरैः बहूनां बहुधा वने ॥ १६ ॥

पम्पा[6]नदीनिवासानां अनुमन्दाकिनीमपि।
चित्रकूटालयानां च क्रियते कदनं महत् ॥ १७ ॥

हतानां शरीराणीति। अभक्षित्वा केवलं मारयित्वा त्यक्तानीति शेषः। सकलदण्डकारण्यक्रोडीकारेण पीडामाहुः—पम्पेत्यादि।

---

* यस्तु करप्रदानासमर्थो मुनिजनः तद्रक्षणं कुत इत्यत्राह—यदिति। यत् धर्मं—करोति, तत्र धर्मे राज्ञः चतुर्भागः—चतुर्थांशो भवति—गो. † शरीरपदं कङ्कालोपलक्षकं वा।

[1] यः करोति—ङ. [2] पर्णमूल—ङ. [3] रक्षितुम्—ङ. [4] हन्यते—ज. बाध्यते—ङ. [5] भीतानां—ङ. [6] वन—ङ.

अनुमन्दाकिनीमपीति । अनुर्लक्षणे कर्मप्रवचनीयः । मन्दाकिन्याः अत्रत्यायाः तटवनवासिनामित्यर्थः ॥ १७ ॥

[1]एवं वयं न मृष्यामः विप्रकारं तपस्विनाम् ।
क्रियमाणं वने घोरं रक्षोभिः [2]भीमकर्मभिः ॥ १८ ॥

न मृष्याम इति । सोढुमशक्ता इत्यर्थः । विप्रकारं–पीडाम् ॥

ततस्त्वां शरणार्थं च शरण्यं [3]समुपस्थिताः ।
परिपालय नः, राम! वध्यमानान् निशाचरैः ॥ १९ ॥

शरणार्थं–रक्षणार्थम् ॥ १९ ॥

परा त्वत्तो गतिः, वीर! पृथिव्यां नोपपद्यते ।
परिपालय नः सर्वान् राक्षसेभ्यः, नृपात्मज! ॥ २० ॥

गतिः–त्रातेति यावत् ॥ २० ॥

एतच्छ्रुत्वा तु काकुत्स्थः तापसानां तपस्विनाम् ।
इदं प्रोवाच धर्मात्मा सर्वानेव तपस्विनः ॥ २१ ॥

तापसानां तपस्विनामिति पाङ्क्तः पाठः । तपोबलयुक्तानामित्यर्थः ॥ २१ ॥

*नैवमर्हथ मां वक्तुं [4]आज्ञाप्योऽहं तपस्विनाम् ।
[5]केवलेनात्मकार्येण प्रवेष्टव्यं मया वनम् ॥ २२ ॥

---

* शरणागत्यैवाऽऽज्ञप्तोऽहम्, परिपालयेत्यादिकं वक्तुं नार्हथ । केवलेनात्मकार्येण–केवलात्मप्रयोजनत्वेन राक्षसैः क्रियमाणं भवतामिमं विप्रकारं अपाकृष्टुं–निवर्तयितुं मया वनं प्रवेष्टव्यं–प्रविष्टम्–गो.

[1] एवंविधं–ङ. [2] भीमविक्रमैः–ङ. [3] समुपागतान्–ङ. [4] आज्ञप्तो–ङ. [5] केवलेन स्वकार्येण–ङ. ज.

विप्रकारमपाक्रष्टुं राक्षसैः भवतामिमम् ।

नैवमर्हथ मां वक्तुमिति । अर्थित्वात् नाथेत्यादिना यद्रक्षणप्रार्थनारूपं वचनं, तत् वक्तुं नार्हथ । अपि तु अहं तपस्विनामाज्ञाप्यः । ज्ञप धातुः मित् ज्ञापने, ण्यन्तादस्मात् 'अचो यत्' इति यत्, ततः 'कृत्यानां कर्तरि वा' इति षष्ठी । तपस्विभिः एवं कुर्विति केवलं शिक्षणीयः, स्वपुत्रशिष्यादिवत् इत्यर्थः । केवलेन—उपाध्यन्तरप्रयुक्तिरहितेन, आत्मकार्येण—स्वकार्येण—स्वप्रयोजनेन पितुर्वचनपरिपालनात्मकेन अवश्यं मया वनं प्रवेष्टव्यमेव । अयमेव वनप्रवेशः दैवगत्या राक्षसैः क्रियमाणं भवतां इमं विप्रकारं अपाक्रष्टुमपि संपन्नः ॥ २२ ॥

* पितुस्तु निर्देशकरः प्रविष्टोऽहमिदं वनम् ॥ २३ ॥
भवतामर्थसिद्ध्यर्थं आगतोऽहं यदृच्छया ।
तस्य मेऽयं वने वासः भविष्यति [1] महाफलः ॥ २४ ॥
तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान् ।
पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ २५ ॥

उक्तश्लोकार्थ एव कविनापि श्लोकान्तरेण वर्ण्यते । एवमपि शैली कवेः । पितुस्त्वित्यादि । हन्तुमिच्छामीति यत् अतो मे वनवासो महाफलो भविष्यतीति स्वगतोऽयं विचारः । अथ प्रकाशमाह—पश्यन्त्वित्यादि । वीर्यमिति । रक्षोवधप्रयोजनप्रवृत्तमिति शेषः । हनिष्यामीति यावत् ॥ २५ ॥

---

* पितृवाक्यपरिपालनाय वनं प्रविष्टोऽसीति किंवदन्त्याः का गतिरित्यत्राह—पितुरिति । अहं भवतामर्थसिध्यर्थं आगतोऽस्मि, यदृच्छया—दैवगत्या पितुर्निर्देशकरः वनमिदं प्रविष्टोऽस्मि—गो.

[1] महोदयम्—ङ.

दत्त्वा [1] वरं चापि तपोधनानां
धर्मे धृतात्मा सह लक्ष्मणेन ।
तपोधनैश्चापि * [2] सहार्यवृत्तः
सुतीक्ष्णमेवाभिजगाम वीरः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षष्ठः सर्गः

दत्त्वा वरमिति । प्रागुक्तरूपवचनात्मनेति शेषः । धृतः—अवस्थितः आत्मा—चित्तं यस्य स तथा । आर्यं—पूज्यं वृत्तं यस्य स तथा । चरु (२६) मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणान्तर्गतकटीकायां अरण्यकाण्डे षष्ठः सर्गः

सप्तमः सर्गः

[सुतीक्ष्णसन्दर्शनम्]

रामस्तु सहितो भ्रात्रा सीतया च परंतपः ।
सुतीक्ष्णस्याश्रमपदं जगाम सह तैः द्विजैः ॥ १ ॥

अथ सुतीक्ष्णोपसृत्यनन्तरं तदाश्रमे तद्रजनीवासः । रामस्त्वित्यादि । तैः द्विजैः सहेति । शरभङ्गस्याश्रमोपसङ्गतवानप्रस्थैस्सहेत्यर्थः ॥

† स गत्वाऽदूरमध्वानं नदीस्तीर्त्वा बहूदकाः ।
[3] ददर्श [4] विमलं [5] शैलं [6] महामेघमिवोन्नतम् ॥ २ ॥

---

* सभाज्यवृत्तः—पूज्याचारः—गो. † अदूरमिति पदच्छेदः ; पूर्वं शरभङ्गेण 'इह राम महातेजाः' इति सुतीक्ष्णाश्रमस्यादूरत्वोक्तेः—गो.

[1] ऽभयं—ङ. ज. [2] सभाज्यवृत्तः—ङ. [3] एतदनन्तरं—ततस्तदिक्ष्वाकुवरौ सीतां विविधैः द्रुमैः । काननं तौ विविशतुः सीतया सह राघवौ ॥ प्रविष्टस्तु वनं घोरं बहुपुष्पफलद्रुमम् । ददर्शाश्रममेकान्ते चीरमालापरिष्कृतम् ॥ इत्यधिकं—सर्वत्र. [4] विपुलं—ङ. [5] रामः—ङ. [6] महामेरु—ङ. ज.

विमलं—पवित्रम्। महामेघमिव स्थितमिति। अयं वृक्ष-बाहुल्यमूलनैर्ऱ्यांशस्थौल्ययोः दृष्टान्तः। उन्नतमिति स्वरूपवर्णनम्॥

तत्र तापसमासीनं [1] मलपङ्कजधारिणम्।
रामः सुतीक्ष्णं विधिवत् [2] तपोवृद्धं * अभाषत॥ ३॥

तत्र—तन्महाशैलवर्तिनि आश्रमे। मलपङ्कजधारिणं—मलस्य—सर्वाघस्य शुद्धये पङ्कजं—पद्मासनं आस्थाय योगधारणशीलं। मध्यम-पदलोपी समासः। अथ "रागद्वेषयोगजाघात्" प्रसिद्धस्य मलमूल-कारणाघस्य क्षयाय पङ्कजे—हृदयपङ्कजे अकृतकभगवद्ब्रह्मानन्यता योगधारणशीलम्। एवं दिव्ययोगवत्त्वमेव अग्रे वक्ष्यमाणस्य देवराजेन ब्रह्मलोकप्रस्थानप्रार्थनस्य मूलम्। एवं पाङ्क्ते स्थिते महामेघमिवोन्नत-मित्यनन्तरं कंचन श्लोकद्वयं प्रक्षिप्य पठित्वा तस्य च कष्टपिष्टिक्रिया-व्याख्यानन्तर, मलपङ्कजटाधरं इति पठित्वा पाठं नाशयति † पाङ्क्त-पाठव्याख्यानाशक्त्या, तद्दोषं सोऽनुभवतु। विधिवदिति। उपगम्येति शेषः॥ ३॥

रामोऽहमस्मि, भगवन्! [3] भवन्तं द्रष्टुमागतः।
तन्माऽभिवद, धर्मज्ञ! महर्षे! सत्यविक्रम!॥ ४॥

तन्माऽभिवदेति। प्रागुक्तदिव्ययोगधारणे नित्यप्रतिष्ठितत्वेन नमस्कारादिव्यवहारानभिज्ञत्वात् एवं प्रार्थना॥ ४॥

---

*मीलितनयनत्वेन स्वाभिवादनापरिज्ञानात् भाषणम्—गो. †महेश्वरतीर्थः, गोविन्दराजो वा। तत्र—मलं नाम उद्वर्तनादिसंस्काराभावात् शरीरजन्यं, पङ्को नाम वनसञ्चारात् शरीरलग्नमिति भेदः—ती. नित्यनिश्चलतपोयोगेन वा वार्धकेन वा मलपङ्कजटानां धरं—गो.

[1] मलपङ्कजटाधरम्—ङः. [2] तपोधनं—ङः. [3] भद्रं त्वां—ङ.

स निरीक्ष्य ततो [1]वीरं रामं धर्मभृतां [2]वरम् ।
समाश्लिष्य च बाहुभ्यां इदं वचनमब्रवीत् ॥ ५ ॥

स निरीक्ष्येति । उक्तवचनतो योगात् उत्थाय रामं दृष्ट्वेत्यर्थः ॥

स्वागतं [3]खलु ते, वीर ! राम ! [4]धर्मभृतां वर !
*आश्रमोऽयं त्वयाऽऽक्रान्तः सनाथ इव सांप्रतम् ॥ ६ ॥

सनाथ इव–सस्वामिक इव सांप्रतमभूत् । आन्तराशयस्तु–आब्रह्मचर्याद्याश्रमव्यवहारार्होऽयं देहः त्वया–जीवात्मकत्वत्तेजसा आक्रान्तः, सोऽत्र 'आलोमभ्यः आनखेभ्यः सर्वस्स आज्ञ आप्यते' इति श्रुतेः यावत्परित्यागं नित्यव्याप्तः, अत एव त्वदेकसनाथः–प्रत्यक्तत्त्वभूतत्वदेकाधिष्ठेयः इत्याविवादात् तादृशोऽयं विशिष्य सांप्रतं सनाथः—बहिश्चक्षुषोऽपि अपरोक्षसिद्धत्वदनुभवत्वात् ; ब्रह्मलोक एव किल बहिश्चक्षुषाप्यनुभवः भगवतः तथा प्रादर्शि ॥ ६ ॥

प्रतीक्षमाणस्त्वामेव नारोहेऽहं, महायशः !
देवलोकमितः, वीर ! देहं त्यक्त्वा [5]महीतले ॥ ७ ॥

त्वामेवेति – ब्रह्मेषप्रधानहविर्देवतामित्यर्थः । महीतले–कर्मभूप्रतिष्ठावति † ब्रह्मेषमेधाग्नौ देहं त्यक्त्वा–हुत्वा इतः—देहलोकाभ्यां

*सनाथ इव–सनाथ एव । यद्वा सर्वदा त्वया सनाथत्वेऽपि, पामराणां सनाथत्वप्रतिभा इदानीं जातेत्यर्थः–गो. यतस्त्वयायमाश्रमः समाक्रान्तः, तस्मात् सांप्रतं–इदानीं सनाथ इवास्मीति शेषः–रा. स्वरसतस्तु सनाथपदं आश्रमविशेषणम् ।

† शरभङ्गेणाप्येवमेवोक्ताऽग्निप्रवेशकरणात् सुतीक्ष्णोऽप्यग्निं प्रविवेशेति मत्वा एवं व्याख्यातम् । परन्तु एकादशसर्गे 'रमतश्चानुकूल्येन ययुः संवत्सरा दश' 'सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह' (१८) 'सुतीक्ष्णः प्रत्युवाचेदं' (३६) इति च दर्शनात्, न शरभङ्गवत् सुतीक्ष्णः अग्निं विवेशेति गम्यते । अतः 'एतल्लोकं त्यक्त्वा देवलोकं न गतः' इति सामान्योक्तिरियमिति भाति ।

[1] धीरः–ङ. [2] वरः–ङ. [3] ते नरश्रेष्ठ–ङ. [4] सत्यभृतां–ङ. ज. [5] महीतलात्–ङ.

देवलोकं—आदिदेवस्य ब्रह्मणो लोकं अहं नारोहे—नारोहामि। ब्रह्ममेधानुष्ठानार्हब्रह्मयोगित्वात् अस्यापि ऐच्छिकदेहत्यागसामर्थ्यम् ॥ ७ ॥

* चित्रकूट[1] मुपादाय राज्य[2] भ्रष्टोऽसि मे श्रुतः।

चित्रकूटमित्यादि। यदा राज्यभ्रष्टः त्वं चित्रकूटं उपादाय—प्राप्य स्थितोऽसि तदाप्रभृति मे—मया श्रुतोऽसि। आन्तराशयस्तु—चित्रकूटं—अतिविचित्रहेतुफलमयसकलसंस्कारावासभूतं आन्तराद्युपग्रहत्रयं उपादाय—स्वीयतया परिगृह्य यतो राज्यभ्रष्टोऽसि 'ब्रह्मा त्वं राजन्' इत्यादिश्रुतिप्रसिद्धभूमानन्दब्रह्मराजभावात् प्रच्युतप्रत्यगात्मना स्थितोऽसि, अतो मया त्वदेकत्वेन अशेषवेदान्तैः मत्तत्वतया श्रुतोऽसि इति ॥ ७ ॥

† इहोपयातः, काकुत्स्थ! देवराजः शतक्रतुः ॥ ८ ॥
उपागम्य च मां देवः महादेवः सुरेश्वरः।
सर्वाल्लोकान् जितानाह मम पुण्येन कर्मणा ॥ ९ ॥
तेषु देवर्षिजुष्टेषु जितेषु तपसा मया।
मत्प्रसादात् सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥ १० ॥

अथ त्वत्प्रतीक्षया अहमिह स्थित इत्यत्र हेतुमाह—इहोपयात इत्यादि। शरभङ्गाद्धानानन्तरं इहाप्युपयातः—प्राप्तवानित्यर्थः। किं ततः इत्यतः—उपगम्येत्यादि। पूजावचनेषु न पौनरुक्त्यं शङ्कनीयं

---

* राज्यभ्रष्टः सन् चित्रकूटमुपादाय असि – वर्तसे इति मे श्रुतः। यद्वा, चित्रकूटप्राप्त्यनन्तरमेव राज्यभ्रष्टः श्रुतोऽसि। † कस्मात् श्रुत इत्यत आह—इहेति—रा.

[1] मनुप्राप्त.—ङ. [2] भ्रष्टो मया श्रुतः, भ्रंशो मया श्रुत.—ङ.

इति आदावेव वेदितम्। अतः—देवः, महादेवः, सुरेश्वरः इति प्रवृत्तिनिमित्तभेदः सुस्पष्टः, मम पुण्येन कर्मणा—शुद्धयोगानुष्ठानेन ब्रह्मलोकान्तसर्वलोकान् मे जितानाह। अत एव आरूढश्या इति चाह। यदेवं, अतः—तेष्वित्यादि। विहरस्वेति। विहरेति यावत् ॥ २० ॥

तमुग्र[1]तपसा युक्तं महर्षिं सत्यवादिनम्।
प्रत्युवाचात्मवान् रामः ब्रह्माणमिव [2]काश्यपः ॥ ११ ॥
अहमेवाहरिष्यामि स्वयं लोकान्, महामुने!
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १२ ॥

प्रदिष्टमिति। त्वयेति शेषः ॥ १२ ॥

भवान् सर्वत्र कुशलः सर्वभूतहिते रतः।
आख्यातः शरभङ्गेण गौतमेन महात्मना ॥ १३ ॥

सर्वत्रेति। सर्वपुरुषार्थसाधन इत्यर्थः। गौतमेन—गौतमगोत्रापत्येनेति यावत् ॥ १३ ॥

एवमुक्तस्तु रामेण महर्षिः लोकविश्रुतः।
अब्रवीन्मधुरं वाक्यं हर्षेण महताऽऽप्लुतः ॥ १४ ॥
अयमेवाश्रमः, राम! गुणवान् रम्यतामिह।
ऋषिसङ्घानुचरितः सदा मूलफलान्वितः ॥ १५ ॥

अयमिति। अस्मदीय इत्यर्थः ॥ १५ ॥

इममाश्रममागम्य मृगसङ्घाः, [3]महायशः!
*[4]अहत्वा प्रतिगच्छन्ति लोभयित्वाऽकुतोभयाः ॥ १६ ॥

---

* अहत्वा—हननमकृत्वा, लोभयित्वा—रूपकान्तिगतिविशेषैः चित्तक्षोभं कृत्वा गच्छन्तीत्यर्थः। अनेन भाविमारीचवृत्तान्तः सूचितः—ति. अदित्वा—इतस्ततः परिप्लुत्य, लोभयित्वा—समाधिभङ्गं जनयित्वा—गो.

[1] तपसं दीप्तं—ङ. ज. [2] वासवः—ङ. ज. [3] महीयसः—ङ. [4] अटित्वा—ङ.

नान्यो दोषो भवेदत्र मृगेभ्योऽन्यत्र विद्धि वै ।

अथ गुणमुक्त्वा दोषमप्याह—इममित्यादि । अहत्वेति । हननमकृत्वेत्यर्थः । अपि तु लोभयित्वा-चित्तक्षोभं कृत्वेत्यर्थः । स्वयं अकृतोभयाः—ऋषिभिः बाधाभावात् कुतश्चनापि भयरहिताः । 'नान्यो दोषो भवेदत्र' इत्यस्यैव विवरणं—मृगेभ्योऽन्यत्र विद्धि वै इति ॥

तच्छ्रुत्वा वचनं तस्य महर्षेः लक्ष्मणाग्रजः ॥ १७ ॥
उवाच वचनं धीरः * विकृष्य सशरं धनुः ।

तच्छ्रुत्वेति । मृगभयविषयकं वचनमित्यर्थः ॥ १७ ॥

तानहं, सुमहाभाग! मृगसङ्घान् समागतान् ॥ १८ ॥
हन्यां निशितधारेण शरेण[1] शनिवर्चसा ।

मृगसङ्घान् हन्यामिति प्रसक्तकाले लिङ्, यथाप्राप्तकालं अशेषमृगसङ्घहननं कुर्याम् ॥ १८ ॥

† [2] भवांस्तत्राभिषज्येत, किं स्यात् [3] कृच्छ्रतरं ततः ॥ १९ ॥
‡ [4] एतस्मिन् आश्रमे वासं चिरं तु न समर्थये ।

---

* विकृष्य सशरं धनुरिति स्वोत्साहप्रकटनम्—गो † यत्र—यदुपद्रवे भवान् अभिषज्येत—पंडयेत, ततः कृच्छ्रतरं—क्लेशाधिक्यं किं स्यात् । एतेन मुनीनां खेदहेतवः तदाज्ञया हन्तव्या एवेति रामाभिप्रायः सूचितः—रा. ‡ मृगवधवचनश्रवणानन्तरं तूष्णींभावादिना मृगवधस्य मुनेरनभिमतत्वं विज्ञायाह—एतस्मिन्निति—रा. वस्तुतस्तु—शरभङ्गाश्रमागतमुनिभिस्साकमेव सुतीक्ष्णाश्रमागमनात् (6–26, 7–1 श्लोकौ द्रष्टव्यौ), अनुपदं 'मुनयस्त्वरयन्ति नः' (८–५) इत्युक्तेश्च ऋषिभ्यो दत्तप्रतिज्ञैवात्र हेतुरिति प्रतिभाति ॥

[1] नतपर्वणा—ङ. [2] भवान् यत्रा—ज. [3] दुःखतरं—ङ. [4] एकस्मिन्—ङ.

नैवं कृत्वा इह मया स्थातुं शक्यमित्याह—भवांस्तत्रेति । मृगसंघवध इत्यर्थः । भवान् मया अभिषज्येत अभिपूर्वात् षञ्जेः कर्मणि लिङ्, "अभिषङ्गः पराभवः", मया कृतापराधो भवेत् । ततः परं मे कृच्छ्रतरं किं स्यात् ? न किमपि । यदेवं, अतः—एतस्मिन् इत्यादि । चिरं वासं तु न समर्थये—नेच्छामि । इह स्थितः मृगसङ्घपीडां सोढ्वा स्थातव्यं, हत्वाऽवस्थाने तु महर्षेरपचरः । अतः इह चिरवासो न रोचते मह्यमित्यर्थः ॥ १९ ॥

* तमेव[1]मुक्त्वा वरदं रामः संध्यामुपागमत् ॥ २० ॥

संध्यामुपागमदिति । संध्यां वन्दितु उपागतवानित्यर्थः ॥ २० ॥

अन्वास्य पश्चिमां संध्यां तत्र वासमकल्पयत् ।
सुतीक्ष्णस्याश्रमे[2] रम्ये सीतया लक्ष्मणेन च ॥ २१ ॥
ततः शुभं तापस[3]भोज्यमन्नं
स्वयं सुतीक्ष्णः पुरुषर्षभाभ्याम् ।
ताभ्यां सुसत्कृत्य ददौ महात्मा
संध्यानिवृत्तौ रजनीमवेक्ष्य ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्तमः सर्गः

संध्यानिवृत्तौ—संध्यारागनिवृत्तौ सत्यां रजनीं अभ्यवहारार्हां समीक्ष्येत्यर्थः । रुरु(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे सप्तमः सर्गः

---

* तमेवमुक्त्वोपरमामितिपाठे—उपरमं—उपरम्य । क्वचित् उपरम्येत्येव पाठः—ति. वरदमित्यनेन मुनिस्तथैवानुज्ञातवानिति गम्यते—गो.

[1] मुक्त्वोपरमं—ङ. च. [2] रामः—ङ. [3] योग्यमन्नं—ङ.

अष्टमः सर्गः

[सुतीक्ष्णाभ्यनुज्ञा]

रामस्तु सहसौमित्रिः सुतीक्ष्णेनाभिपूजितः ।
परिणाम्य निशां तत्र प्रभाते प्रत्यबुद्धयत ॥ १ ॥

अथ सुतीक्ष्णानुज्ञातेन रामेण मुनिभिः सह आश्रममण्डलप्रवेशः । रामस्त्विवत्यादि । परिणाम्येति । परिणामशब्दात् तत्करोतीति णिच्, अतिवाह्येति यावत् ॥ १ ॥

उत्थाय तु यथाकालं राघवः* सह सीतया ।
[1]उपास्पृशत् सुशीतेन जलेनोत्पलगन्धिना ॥ २ ॥

उत्पलस्य गन्धोऽस्यास्तीति तथा ॥ २ ॥

अथ तेऽग्निं† सुरांश्चैव वैदेही रामलक्ष्मणौ ।
काल्यं विधिवदभ्यर्च्य तपस्विशरणे वने ॥ ३ ॥

काल्यं—यथाकालप्राप्तं—उदयन्तमिति यावत् ॥ ३ ॥

‡उदयन्तं दिनकरं दृष्ट्वा विगतकल्मषाः ।
सुतीक्ष्णमभिगम्येदं श्लक्ष्णं वचनमब्रुवन् ॥ ४ ॥
सुखोषिताः स्म, भगवन् ! त्वया पूज्येन पूजिताः ।
आपृच्छामः प्रयास्यामः मुनयः त्वरयन्ति नः ॥ ५ ॥

---

* सह सीतयेत्यनेन पूर्वमेव सौमित्रिः स्नात इति व्यज्यते—गो. † सुरान्—नारायणम्, 'सह पत्न्या विशालाक्ष्या नारायणमुपागमत्' इति अयोध्याकाण्डे (स. ६, श्लो. २) उक्तेः । परिवारापेक्षया बहुवचनम्—गो. ‡ उदयन्तं—उद्यन्तम् । अनेन होमानन्तरमादित्योपस्थानोक्त्या अनुदितहोमपक्षसूचनात् कात्यायनसूत्रक्रमेण राघवाणामनुष्ठानमिति गम्यते—गो.

[1] उपस्पृश—ज.

[1]त्वरामहे वयं द्रष्टुं कृत्स्नमाश्रममण्डलम् ।
ऋषीणां पुण्यशीलानां दण्डकारण्यवासिनाम् ॥ ६ ॥
[2]त्वदनुज्ञातुमिच्छामः * सहैभिः मुनिपुङ्गवैः ।
धर्मनित्यैः तपोदान्तैः † विशिखैरिव पावकैः ॥ ७ ॥

त्वदनुज्ञातुमिच्छामः इति । भावे तुमुन्, त्वत्कर्तृकं गमनानुज्ञानं प्रार्थयाम इत्यर्थः । विशिखैः पावकैरिवेति । अङ्गारावस्थैरित्यर्थः ॥ ७ ॥

अविषह्यातपो यावत् सूर्यो नातिविराजते ।
अमार्गेणागतां लक्ष्मीं ‡ प्राप्येवान्वयवर्जिताः ॥ ८ ॥
§तावदिच्छामहे गन्तुं इत्युक्त्वा चरणौ मुनेः ।
ववन्दे सहसौमित्रिः सीतया सह राघवः ॥ ९ ॥

नातिविराजत इति । नात्युद्गच्छतीति यावत् । अमार्गेण—अन्यायेन आगतां लक्ष्मीं—ऐश्वर्यं प्राप्य अन्वयवर्जिताः—अन्वयः—सबन्धः, सद्गुरुसाधुजनसंबन्धरहितः दुष्प्रभुरिव यावदविषह्यप्रभावो भवेत्, ततः पूर्वं गन्तुमिच्छामहे—इच्छाम इति यावत् ॥ ९ ॥

तौ संस्पृशन्तौ चरणौ उत्थाप्य मुनिपुङ्गवः ।
गाढमालिङ्ग्य सस्नेहं इदं वचनमब्रवीत् ॥ १० ॥

---

* एवञ्च दण्डकारण्यवासिभिः ऋषिभिस्तैश्च रामः सुतीक्ष्णाश्रमात् प्रतस्थे । अत एव 'एषां तपस्विनामाश्रमपदं पश्य' (१२) इत्यनन्तरोक्तिरपि सुसङ्गता । † विशिखैः—विगतज्वालैः—गो. ‡ अन्वयवर्जिताः—पूर्वं नित्यं लक्ष्मीसम्बन्धशून्यः—रा. दुष्कुलजातः 'सन्ततिर्गोत्रजननकुलान्वयभिजान्वयौ'—ती. सत्संस्कारशून्य इति भावः । § 'तावदिच्छामहे गन्तुं' इत्यनेन रावणवधत्वरा व्यज्यते । अतो न हीनोपमादोषोऽपि—गो.

[1] इच्छामहे—ङ, [2] अभ्यनु, तदनु—ङ, ज.

अरिष्टं गच्छ पन्थानं, राम! सौमित्रिणा सह।
सीतया चानया सार्धं छाययेवानुवृत्तया ॥ ११ ॥

अरिष्टं—ऋषेः 'तीषसह' इति इडभावे निष्ठायां रिष्टं, न रिष्टं—अरिष्टं—अनुपद्रवमिति यावत् ॥ ११ ॥

पश्याश्रमपदं [1]रम्यं दण्डकारण्यवासिनाम्।
एषां तपस्विनां, [2]वीर! तपसा भावितात्मनाम् ॥ १२ ॥
सुप्राज्यफलमूलानि पुष्पितानि वनानि च।
प्रशस्तमृगयूथानि शान्तपक्षिगणानि च ॥ १३ ॥
फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च।
[3]कारण्डवातिकीर्णानि तटाकानि सरांसि च ॥ १४ ॥
द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च।
रमणीयान्यरण्यानि मयूराभिरुतानि च ॥ १५ ॥

पुष्पितानि वनानि च द्रक्ष्यसे इति अग्रेण संबन्धः। कारण्डवैः अत्यन्तं कीर्णानि ॥ १३–१५ ॥

गम्यतां, वत्स! सौमित्रे! भवानपि च गच्छतु।
*आगन्तव्यं च ते दृष्ट्वा पुनरेवाश्रमं मम ॥ १६ ॥

ते आगन्तव्यमिति। त्वयेति यावत् ॥ १६ ॥

एवमुक्तः तथेत्युक्त्वा काकुत्स्थः [4]सहलक्ष्मणः।
प्रदक्षिणं मुनिं कृत्वा प्रस्थातुमुपचक्रमे ॥ १७ ॥

---

* ते आश्रमं—इति वाऽन्वयः, 'आश्रमोऽयं त्वयाऽऽक्रान्तः सनाथ इव साम्प्रतम्' (८) इति पूर्वमुक्तम् ॥

[1] पुण्यं-ङ. [2] राम-ङ. [3] कारण्डवि-ङ. [4] सह सीतया-ङ.

*ततः शुभतरे तूणी धनुषी चायतेक्षणा।
ददौ सीता तयोर्भ्रात्रोः खड्गौ च[1] विमलौ ततः ॥ १८ ॥
आबध्य च शुभे तूणी [2]चापे चादाय † सस्वने।

खड्गौ च विमलौ ततः इति। ततः—धनुरादिदानानन्तरं, विमलौ—सुनिशातौ खड्गौ च ददावित्यन्वयः। चापे इति। चापशब्दो द्विलिङ्गः ॥ १८ ॥

निष्क्रान्तावाश्रमाद्गन्तुं उभौ तौ रामलक्ष्मणौ ॥ १९ ॥
[3]श्रीमन्तौ रूपसंपन्नौ दीप्यमानौ स्वतेजसा।
प्रस्थितौ दृढचापौ तौ सीतया सह राघवौ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टमः सर्गः

नर(२०) मानः सर्गः ॥ २० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे अष्टमः सर्गः

---

*ततः शुभतरेत्यादिनाऽयमर्थोऽवगम्यते—आश्रमप्रवेशे किमस्माकमायुधैरिति मन्यमाना सीता आयुधानि मुनिगृहे कचिन्निहितवती। अथ 'अमार्गेण' इत्यादिरामवाक्येन 'अरिष्टं गच्छ' इत्यादिमुनिवाक्येन च तयोः हृदयं विदित्वा स्वयमेवादाय पुनर्दत्तवतीति। अत एवोत्तरसर्गे स्वाशयं वक्ष्यति—**गो.** वस्तुतस्तु प्रयाणादिकाले गृहिणी—जनन्यादिकार्यमिदं सर्वानुभवसिद्धम्। † अनेन धनुषः सन्नद्धता सूच्यते।

[1] कनकस्सरू—**ङ.** [2] चापौ चादाय सस्वनौ—**सर्वत्र.** [3] शीघ्रं तौ—**ज.**

नवमः सर्गः

[सीताधर्मप्रतिबोधनम्]

* सुतीक्ष्णेनाभ्यनुज्ञातं प्रस्थितं रघुनन्दनम् ।
[1] हृद्यया स्निग्धया वाचा भर्तारमिदमब्रवीत् ॥ १ ॥

अथ सीतायाः जगन्मातृस्वभावत्वात् रामादपि परमदयाक्षमायुक्तत्वात् अनिर्वैरराक्षोवधं अन्याय्यमिव मन्यमाना तत्त्वबुभुत्सया कानिचिद्वचांसि सीता ब्रूते। सुतीक्ष्णेनेत्यादि। हृद्यया—उपपत्तिमत्त्वेन हृदयङ्गमया। स्निग्धया-स्नेहप्रवृत्तया ॥ १ ॥

† [2] अधर्मं तु सुसूक्ष्मेण विधिना प्राप्यते महान् ।
निवृत्तेन तु शक्योऽयं व्यसनात् कामजादिह ॥ २ ॥

इदमब्रवीदिति, किंतदित्यत आह—अधर्मं त्वित्यादि। महान्—महात्मा—महापुरुषः यद्यपि भवान्, अथापि सूक्ष्मेण विधिना-सूक्ष्म मार्गेण विचारे सति अधर्मं तु प्राप्यते, अपेः छान्दसः इयन्, कर्तरि यङ्वा छान्दसः; अधर्ममेव प्रयाति भवानित्यर्थः। अयं अधर्मस्तु कामजाद्व्यसनात् निवृत्तेन त्वया निवर्तितुं शक्यः ॥ २ ॥

त्रीण्येव व्यसनान्यत्र कामजानि भवन्त्युत ।
मिथ्या [3] वाक्यं ‡ परमकं तस्मात् गुरुतरावुभौ ॥ ३ ॥

---

* यदि त्वं सायुधो राक्षसभूयिष्ठे प्रदेशे प्रविष्टः स्याः, तर्हि तैस्साकं विरोधः स्यात्, तेनावयोर्विश्लेषः स्यात् .....अतो निधायायुधं अस्मामिर्वने गन्तव्यमित्याह.... रामेण ऋषिभ्यः प्रतिज्ञाकरणं, रामप्रतिज्ञाया दुरावरत्वं च बहुशो दृष्टत्वत्यपि, राक्षसैर्वैरे भर्तुः स्वविरहद्वारा महान् क्लेशो भवेदिति प्रेमान्धतया तथोक्तवती—गो. † महानयं धर्मः—त्वयाऽनुष्ठीयमानो मुनिधर्मः सुसूक्ष्मेण विधिना—मार्गेण प्राप्यते। अयं च धर्मः व्यसनात् निवृत्तेनैव शक्यः—गो. ‡ सामान्यतः श्रेष्ठं पापं। एतस्मादपि अन्यौ गुरुतरौ ॥

[1] वैदेही—ङ. [2] अयं धर्मः, यस्तु धर्मः—ङ. [3] वादं—ङ.

परदाराभिगमनं विना वैरं च रौद्रता ॥

किं तत् कामजं व्यसनम्? कश्चायमधर्मः तन्निवृत्त्या निवर्तनीयः? इत्यपेक्षायामाह—त्रीण्येवेति। कानि त्रीणि? अतः—मिथ्यावाक्यमित्यादि। स्वदेहस्त्रीपुत्रवित्तादिरागवशात् मिथ्यावाक्यप्रवृत्तिः पुंसो भवति परमव्यसनभूतम्, स्वार्थे कः। तस्मात् व्यसनादनन्तरं उभौ व्यसनविशेषौ गुरुतरौ—अत्यन्तव्यसनरूपौ। कौ तौ? इत्यतः—परदारेत्यादि। रौद्रता—रौद्रभावावलम्बनम् ॥ ३ ॥

मिथ्यावाक्यं न ते भूतं न भविष्यति, राघव! ॥ ४ ॥
[1] कुतोऽभिलषणं स्त्रीणां परेषां धर्मनाशनम्।
*** तव नास्ति, मनुष्येन्द्र! न चाभूत्ते कदाचन ॥ ५ ॥**
[2] मनस्यपि तथा, राम! न चैतद्विद्यते क्वचित्।

एवं व्यसनत्रयं निरूप्य प्रकृते अधर्मप्राप्तिपरिहाराय परिहार्यं व्यसनं परिशेषयितुं आह—त्रयेत्यादि। एतत्—उक्तव्यसनेषु यदेतत् परदाराभिमर्शनात्मकं व्यसनं उक्तम्, हे मनुष्येन्द्र! तत् तव नास्ति वर्तमानकालेऽपि, ते—तव नाभूत्, इतः प्राक्; अपिच, हे राम! मनसाऽपि तथा प्रसङ्गः क्वचिदपि परस्त्रीविषये न विद्यते ॥ ५ ॥

स्वदारनिरत[3] त्वं ते नित्यमेव, नृपात्मज! ॥ ६ ॥
धर्मिष्ठः सत्यसन्धश्च पितुर्निर्देशकारकः[4]।
† त्वयि सत्यं च धर्मश्च त्वयि सर्वं प्रतिष्ठितम् ॥ ७ ॥

---

* 'नास्ति' इति वर्तमानकाले, 'नाभूत्' इति भूतकाले 'मनस्यपि' इत्यादिना संभावना, तेन भविष्यत्काले च तन्निषिध्यते। † यतः त्वयि इदं सर्वं प्रतिष्ठितं, अतः—धर्मिष्ठ इत्यादि ॥

[1] कुतो हि धर्षणं—ङ. [2] मनसाऽपि—ङ. [3] स्त्वं च सत्यमेव—ङ.
[4] ततदनन्तरं—सत्यसन्ध महाभाग श्रीमन् लक्ष्मणपूर्वज—इत्यधिकं—ङ. ज.

हे नृपात्मज! ते नित्यमेव स्वदारनिरतत्वं च विद्यते। धर्मिष्ठः सत्यसन्धः पितुर्निर्देशकारकश्च भवसि। त्वयि धर्मः प्रतिष्ठितः। त्वयि सर्वं सत्यं प्रतिष्ठितम् ॥ ६–७ ॥

तच्च सर्वं, महाबाहो! [1] शक्यं [2] वा विजितेन्द्रियैः।
तव वश्येन्द्रियत्वं च जानामि, शुभदर्शन! ॥ ८ ॥

तच्च सर्वं—'तव नास्ति मनुष्येन्द्र' इत्युपक्रम्य उपदिष्टार्थजातं, विजितेन्द्रियैः अनुष्ठातुं शक्यं वा—शक्यमेव। तथाऽनुष्ठानसामर्थ्यरूपं तव वश्येन्द्रियत्वं च जानामि। अतो वश्येन्द्रियत्वात् मिथ्यावाक्यं च त्रैकालिकं नास्ति। वश्येन्द्रियत्वादेव सकलधर्मनाशनं परेषां स्त्रीणामभिमर्शनं, तत्सङ्गोऽपि वा कुतः? ॥ ८ ॥

* तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम्।
निर्वैरं क्रियते मोहात् तच्च ते समुपस्थितम् ॥ ९ ॥

एवं वश्येन्द्रियमात्रसुजयासत्यवाक्यपरदाराभिमर्शने वश्येन्द्रियतमे त्वयि प्रसक्तिरहिते एव। अपितु तृतीयव्यसनप्रसक्त्या प्राप्यते अधर्मः प्रथमप्रतिज्ञातः इत्याह—तृतीयमित्यादि। यदिदं परप्राणाभिहिंसनं तृतीयं रौद्रतारूपं व्यसनमस्ति, तच्च मोहात्, यतो निर्वैरं क्रियते; तच्चैतत् निर्वैररौद्रतारूपं अधर्मान्तरं ते समुपस्थितम्। एवं पाठः, व्याकृतश्च। एवं स्थिते—"अयं धर्मः सुसूक्ष्मेण विधिना-प्राप्यते महान्" इति प्रथमं पठित्वा—"निवृत्तेन तु शक्योऽयं

---

* नात्र वश्येन्द्रियत्वमुपयुज्यते, स्वतो जिघांसाऽभावेऽपि परार्थहिंसायां तस्यानुपयोगात्; किन्तु दयैवात्रापेक्ष्यत इत्याशयः। एतदेवोपोद्बलयति 'मोहात्' इति पदम्। यथा अन्यैः मोहात् क्रियते, तदेव भवतोऽपि प्राप्तम् इत्यर्थः॥

[1] सत्यं–ज. [2] वर्तुं–ङ. वोढुं–ज.

व्यसनात् कामजादिह" इति पठतः, कुतोऽयं धर्मः इति? प्रकृतो वक्ष्यमाणो वा—येनेदंशब्देन परामृश्यते। "निर्वैरं क्रियते मोहात् तच्च ते समुपस्थितम्।" इत्यधर्मप्राप्त्यापादनं च उपसंहारे स्पष्टम्। एवं असंगतं च प्रलप्य, पश्चात् पाङ्क्तं पाठं योजनाशक्त्या प्रामादिकमित्यजल्पत्*। जल्पतु यथेष्टम्॥ ९॥

प्रतिज्ञातस्त्वया, वीर! दण्डकारण्यवासिनाम्।
ऋषीणां रक्षणार्थाय वधः संयति रक्षसाम्॥ १०॥

ननु कुतो मे निर्वैरप्राणिपीडालक्षणतृतीयाधर्मसमुपस्थितिः? इत्यत्राह—प्रतिज्ञात इत्यादि॥ १०॥

एतन्निमित्तं [1] च वनं दण्डकाः इति विश्रुतम्।
प्रस्थितस्त्वं सह भ्रात्रा धृतबाणशरासनः॥ ११॥

ननु प्रतिज्ञामात्रमेव कृतं, न त्वनुष्ठितं; तत् कुतः संप्राप्तिः? इत्यत्राह—एतदित्यादि। एतन्निमित्तमेव—प्रतिज्ञातरक्षोवधानुष्ठानार्थमेव त्वं दण्डका इति विश्रुतं—प्रसिद्धं इदं वनं धृतबाणशरासनः सन् भ्रात्रा सह 'मुनयः त्वरयन्ति नः' इत्युक्त्वा सुतीक्ष्णाश्रमादपि प्रस्थितश्च। प्रस्थितस्त्वं करिष्यस्येवेति प्राप्तमेव तृतीयं पापमित्यर्थः॥ ११॥

ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः।
त्वद्वृत्तं चिन्तयन्त्या वै † भवेन्निःश्रेयसं [2] हितम् ‡॥१२॥

---

*महेश्वरतीर्थः। स एव गोविन्दराजस्यापि सम्मतः। कतकसम्मतपाठस्य तीर्थेनैव प्रदर्शनात् अत्र स एव विवक्षितः। व्याख्या तु द्वितीयश्लोकटिप्पण्यां द्रष्टव्या॥

† भवेदित्यनेन—चिन्तायाः स्वतः प्राप्तत्वमुच्यते। ‡ एवं वाऽस्यार्थः—भवद्धितचिन्तने ममापि दोषः स्यादेव, पतिक्षेमैकचिन्तात्वात् पत्न्याः। अतः त्वद्वृत्तं चिन्तयन्त्या मम हितरूपं निःश्रेयसमेव खलु भवेत्। न ह्येतच्चिन्ता मम दोषावहा—इति॥

[1] वचनं—ज. [2] हि तत्—ङ.

यदेवं—तत इत्यादि। तत एव हेतोः प्रस्थितं त्वां दृष्ट्वा, त्वद्वृत्तं च—सत्यप्रतिज्ञत्वलक्षणं चरित्रं च दृष्ट्वा, त्वन्निःश्रेयस—पारलौकिकसुखाहितं च विचिन्तयन्त्याः मे मनः चिन्ताकुलं भवेत्—भवति वै ॥ १२ ॥

न हि मे रोचते, वीर! गमनं दण्डकान् प्रति।
कारणं तत्र वक्ष्यामि वदन्त्याः श्रूयतां मम ॥ १३ ॥

यदेवं, अतः—न हि मे इत्यादि। अरुचौ हेतुमाह—कारणमिति। तत्र—दण्डकारण्यप्रवेशारुचौ। ममेति, सकाशादिति शेषः ॥ १३ ॥

त्वं हि बाणधनुष्पाणिः भ्रात्रा सह वनं गतः।
दृष्ट्वा वनचरान् [1]सर्वान् कचित् कुर्याः शरव्ययम् ॥ १४ ॥

हि—यस्मात् त्वं वनं गतः सर्वान् वनचरान् उद्दिश्य शरव्ययं कुर्याः कचित्—कुर्यात् किल, अतः इदमेव कारणं व्यर्थहिंसालक्षणा-धर्मप्राप्तौ ॥ १४ ॥

क्षत्रियाणां च हि धनुः हुताशस्येन्धनानि च।
*समीपतः स्थितं तेजोबलमुच्छ्रयते भृशम् ॥ १५ ॥

ननु शरमोक्षणमकृत्वैव स्थास्ये इत्यत्र, अशक्यार्थं एवायं वासनाप्राबल्यात् इति सेतिहासमाह—क्षत्रियाणां चेत्यादिना। तेजो-बलं—तेजोरूपं बलं प्राप्य समीपतः स्थितं उच्छ्रयते—व्याप्नोत्येव ॥ १५ ॥

---

* यत्समीपस्थितं, तस्य पुंसः तेजोबलं—तेजस आधिक्यं करोति, यथा वह्नेराधिक्य-मिन्धनानि—ति. तेजः—इतरप्रतापस्य बलं—आच्छादकतेज एव—रा. तेजोरूपं बलं वर्धयन्ति—ती. गो.

[1] घोरान्—ङ.

पुरा किल, महाबाहो! तपस्वी[1] सत्यवाक् शुचिः।
कस्मिंश्चिदभवत्पुण्ये वने रतमृगद्विजे ॥ १६ ॥

रतमृगद्विजे—उपशान्तमृगपक्षिके। तपस्तेपे इति शेषः ॥ १६ ॥

तस्यैव तपसो विघ्नं कर्तुमिन्द्रः शचीपतिः।
खड्गपाणिरथागच्छत् आश्रमं भटरूपधृत् ॥ १७ ॥

भटः—योधः ॥ १७ ॥

तस्मिंस्तदाश्रमपदे[2] निशितः खड्ग उत्तमः।
* सन्यासविधिना दत्तः पुण्ये तपसि तिष्ठतः ॥ १८ ॥

सन्यासविधिना—कालान्तरे आदानाय रक्षणार्थस्थापनकर्मणा ॥

स तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः।
वनं तं[3] विचरत्येव रक्षन् † प्रत्ययमात्मनः ॥ १९ ॥

आत्मनः प्रत्ययं—विश्वस्य स्थापितं वस्तु प्रत्ययाधीनशपथज्ञान-विश्वासहेतुषु रक्षन्नेव विचरति ॥ १९ ॥

यत्र गच्छत्युपादातुं मूलानि च फलानि च।
न विना याति तं खड्गं न्यासरक्षणतत्परः ॥ २० ॥

तदेव प्रदर्शयति—यत्रेत्यादि ॥ २० ॥

नित्यं शस्त्रं ‡ परिवहन् क्रमेण स तपोधनः।
चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयम् ॥ २१ ॥

---

* 'राजचोरादिकभयात् दायादानां च वञ्चनात्। स्थाप्यतेऽन्यगृहे द्रव्यं न्यासः स परिकीर्तितः॥'—गो. † आत्मनः प्रत्ययं रक्षन्—येन विश्वासेन न्यासो दत्तः तादृश-शस्त्रपरिरक्षणभारज्ञानाधीनमेतत्। ‡ परिवहन्—परितो वहन्, स्वेन साकं सर्वत्र वहन्।

[1] सत्यवान्—ज्ञ. [2] निहितः—ङ. [3] विहर—ङ.

परिवहन्–रक्षन् ॥ २१ ॥

ततः स रौद्रेऽभिरतः प्रमत्तो[1]ऽधर्मकर्शितः ।
तस्य शस्त्रस्य संवासात् जगाम नरकं मुनिः ॥ २२ ॥

अधर्मकर्शितः–पीडितः ॥ २२ ॥

एवमेतत् पुरावृत्तं * शस्त्रसंयोगकारणम् ।
† अग्निसंयोगवद्धेतुः शस्त्रसंयोग उच्यते ॥ २३ ॥

स्नेहाच्च बहुमानाच्च स्मारये त्वां [2]तु शिक्षये ।

बहुमानादिति । मदीयो भर्ता इत्येवंरूपः अभिमानः बहुमानः । स्मारये, पुरावृत्तमिति शेषः । अपि तु बहुमानात् त्वां तु शिक्षये ॥ २३ ॥

न कथंचन सा कार्या गृहीतधनुषा त्वया ॥ २४ ॥
बुद्धिर्वैरं विना हन्तुं राक्षसान् दण्डकाश्रितान् ।
अपराधं विना हन्तुं [3]लोकान्, वीर! न कामये ॥ २५ ॥

तदेव करोति—न कथंचनेत्यादि । एवं पाङ्क्ते, श्रद्धाजाड्यात् 'स्मारये त्वां न शिक्षये' इति पठित्वा कश्चित् व्याकरोति ‡, तत्तु साक्षादुत्तरवाक्यक्रियमाणशिक्षणव्याहतम् । शिक्षणे हेतुश्च बहुमानादित्युक्तमेव । वैरं विना हन्तुं बुद्धिर्न कार्या इत्ययमेवार्थः प्रपञ्च्यते—अपराधं विनेत्यादि ॥ २५ ॥

---

* शस्त्रसंयोगकारणमिति बहुव्रीहिः–ति. † शस्त्रसंयोगः अग्निसंयोग इव कार्यकारीति भाव. । ‡ महेश्वरतीर्थः, गोविन्दराजो वा। परन्तु 'सर्वं तु विदितं तुभ्यं' 'स्त्रीचापलादेतदुदाहृतं' इत्यादिवदन्त्याः सीतासदृश्याः धर्मपत्न्याः रामसदृशपतिशिक्षणे अमर्यादतामालोच्य तीर्थगोविन्दराजाभ्यां स एव प्राचीनः पाठः आदृतः । उत्तरवाक्यान्यपि स्मारणरूपाण्येव, न शिक्षणरूपाणीति लोकमर्यादयाऽपि ज्ञातुं शक्यते ।

[1] धर्मकर्शितः, धर्मदर्शने–ङ. , [2] न–ङ. [3] लोको वीर न मंस्यते–ङ.

*क्षत्रियाणां तु वीराणां वनेषु [1] नियतात्मनाम् ।
धनुषा कार्यमेतावत् आर्तानामभिरक्षणम् ॥ २६ ॥

ननु आर्तमुनिजनरक्षणार्थमेव अनपराधानामपि वधोऽस्तु इति सिद्धान्तमपि उपमर्द्यांह—क्षत्रियाणां त्वित्यादि । क्षत्रियाणां तु—क्षत्रधर्माईपदप्रतिष्ठितानामेव, अत एव वीराणां तु—राज्यरक्षणशेषतया युद्धादिप्रवृत्तिमतामेव वनेषु—अदेशवनेषु आर्तानां नियतात्मनां रक्षणमिति यत् एतावदेव धनुषा कार्यम् ॥ २६ ॥

क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च ।
†व्याविद्धमिद[2]मस्माभिः देशधर्मस्तु पूज्यताम् ॥ २७ ॥

न चास्माकं तत्प्रत्यधिकारः इत्याह—क्व च शस्त्रमित्यादि । क्षात्रं—क्षत्रपदराज्यप्रतिष्ठार्हं शस्त्रं क्व ? इदानीमस्माभिराश्रियमाणं वनं च क्व ? जटावल्कलादिधारणपूर्वमनुष्ठीयमानं तपश्च क्व ? अतः अस्माभिः इदानीं अनुतिष्ठासितं इदं वधादिकं व्याविद्धं-परस्परव्याहतमेव । देशधर्मस्तु—देशं प्राप्तः क्षत्रियधर्मस्तु भवद्भिरपि देशं गत्वैव पूज्यताम् ॥ २७ ॥

‡[3]कदर्यकलुषा बुद्धिः जायते शस्त्रसेवनात् ।
पुनर्गत्वा त्वयोध्यायां क्षत्रधर्मं चरिष्यसि ॥ २८ ॥

---

* वनेषु निरतात्मनां आर्तानां अभिरक्षणं वीराणां क्षत्रियाणां कार्यम्—गो. नियतात्मनामित्यपि क्षत्रियविशेषणम्—रा. 'परमपावने तपोवने परहिंसा न करणीया' इति कथनशैलीपरिशीलने—नियतात्मनां—तपस्विनां वनेषु—इत्यप्यन्वयः सुवचः । एवञ्च आर्तसंरक्षणमेव कर्तव्यम्, न तु निर्वैरवध इत्याशयः । † परस्परविरुद्धमिदं अस्माभिर्न पूज्यतां ; देशधर्मः—तपोवनधर्मः पूज्यताम्—गो. ‡ अत्र समासास्वारस्यं ; एतदपेक्षया—'तदार्य कलुषा' इति पाठः समीचीन इव ।

[1] निरता—ङ. [2] मस्माकं—ङ. [3] तदार्य कलुषा—ङ.

अत्र वने तु शस्त्रसेवनात् कदर्यकलुषा—कदर्याणां—कृपणानामिव कलुषा बुद्धिः जायते धर्मानुष्ठानविरोधिनी, अतः शस्त्रसेवनं वने तु न कर्तव्यमिति शेषः। 'देशधर्मस्तु पूज्यतां' इत्यत्र यः अर्थः अस्माभिरुक्तः स एवात्र प्रदर्श्यते—पुनर्गत्वेत्यादि ॥ २८ ॥

अक्षया तु भवेत् प्रीतिः * श्वश्रूश्वशुरयोर्मम।
यदि राज्यं[1] हि संन्यस्य भवेस्त्वं निरतो मुनिः ॥ २९ ॥

शस्त्रसेवनं न कर्तव्यमिति यदुक्तं, तदेव स्थिरीक्रियते—अक्षयेत्यादि। राज्यं हि—प्रसिद्धं संन्यस्य वर्तमानः निरतः—वननिरतः त्वं यदि मुनिः—मुनिवृत्तिः भवेः, तदा मम श्वश्रूश्वशुरयोरपि अक्षया प्रीतिर्भवेत्। श्वशुरस्य वनवासोचितधर्मानुष्ठानेन स्वर्गलाभजा प्रीतिः, श्वश्वास्तु युद्धादिक्लेशराहित्येन सुखवासजा प्रीतिः ॥ २९ ॥

धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।
धर्मेण[2] लभते सर्वं धर्मसारमिदं जगत् ॥ ३० ॥

अथ देशकालोचितो मुनिधर्म एव अस्माभिरनुष्ठेयः, न तु हिंसालक्षणाधर्मः इत्युपसंहारेणाह—धर्मादित्यादि ॥ ३० ॥

आत्मानं नियमैस्तैस्तैः कर्शयित्वा प्रयत्नतः।
प्राप्यते निपुणैर्धर्मः न सुखाल्लभ्यते सुखम् ॥ ३१ ॥

---

* श्वश्रूश्वशुरयोः—कैकेयीदशरथयोः—गो. अयं भावः—ताभ्यां हि तुभ्यं मुनिवृत्तिरवादिष्टा। यदि त्वं धनुर्गृहीत्वा स्वपराक्रमं प्रकटयेः, तदा तत् कथं निर्वर्तेत। त्वं तु सर्वं सर्वत्र साधितुं शक्तः। भवत्पराक्रमप्रकटनेऽत्रापि नूनमपि राज्यमेव स्थापयितुमपि शक्येत। एतत्तु मम श्वश्रूश्वशुरयोरादेशविरुद्धमेव। अतः क्षत्रधर्मं परित्यज्य मुनिधर्मे तिष्ठ—इति। एतदेवानन्तरश्लोकैः विव्रियते ॥

[1] परित्यज्य—ङ. [2] लभ्यते—ङ.

अथ जगतो धर्मसारत्वात् सर्वप्रयासेनापि स एव संपाद्य इत्याह—आत्मानमित्यादि। देहत्रयमित्यर्थः। निपुणैः—समर्थैः। सुखमिति। सुखसाधनधर्म इति यावत् ॥ ३१ ॥

नित्यं शुचिमतिः, [1]सौम्य ! चर धर्मं तपोवने।
सर्वं हि विदितं तुभ्यं त्रैलोक्यमपि तत्त्वतः ॥ ३२ ॥

उपसंहरति धर्मबोधनं—नित्यमित्यादि। त्रैलोक्यमपीति। त्रिलोकवर्तिप्रजापुमर्थापुमर्थतत्साधनकलाप इत्यर्थः ॥ ३२ ॥

*स्त्रीचापलादेतदुदाहृतं मे
धर्मं च वक्तुं तव कः समर्थः।
विचार्य बुद्ध्या तु सहानुजेन
यद्रोचते तत्कुरु मा चिरेण ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे नवमः सर्गः

अथ विनयार्थवादः—स्त्रीत्यादि। चिरेणेति विभक्तिप्रतिरूपकमव्ययम्। विलम्बो मास्तु इत्यर्थः। लीला(३३)मानः सर्गः ॥ ३३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे नवमः सर्गः

दशमः सर्गः

[रक्षोवधसमर्थनम्]

वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया।
श्रुत्वा [2]संवर्धितो रामः प्रत्युवाचाथ [3]मैथिलीम् ॥ १ ॥

*'सर्वं हि तुभ्यं विदितं' इति चेत् किमर्थमुच्यत इत्यत्राह—स्त्रीचापलादिति॥
[1] सम्यक्-ङ. [2] धर्मे स्थितो-ङ. झ. [3] जानकीम्-ङ.

एवं धर्मधिया सीतया बोधितरक्षोवधनिवर्तनो रामः तस्य धर्म्यतां तद्वाक्याविरोधेनैव दर्शयति । वाक्यमित्यादि । संवर्धितः—संवर्धितधर्मबोधः । एवं पाङ्क्तः* ॥ १ ॥

हितमुक्तं त्वया, देवि! स्निग्धया सदृशं वचः ।
†कुलं व्यपदिशन्त्या च [1]धर्मज्ञे! जनकात्मजे! ॥ २ ॥

कुलं व्यपदिशन्त्या चेति । 'क्षत्रियाणां हि वीराणां' इत्यादिना कुलधर्मं व्यपदिशन्त्या इत्यर्थः ॥ २ ॥

[2]किं तु वक्ष्याम्यहं, देवि! त्वयैवोक्तमिदं वचः ।
क्षत्रियैः धार्यते चापः नार्तशब्दो भवेदिति ॥ ३ ॥

इदं वचः इति इदंशब्दः क्षत्रियैर्धार्यते इत्यादिपरः । आर्तशब्दो न भवेदिति । रक्षकाभावेन आर्तानां शब्दो मा भूत् इत्येतदर्थमेव क्षत्रियैश्चापो धार्यते इतीदं अर्थतत्त्वमुद्दिश्य त्वयोक्तम्—'धनुषा कार्यमेतावत् आर्तानामभिरक्षणम्' इति वाक्येनेति शेषः ॥ ३ ॥

ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः ।
मां, सीते! ‡स्वयमागम्य [3]शरण्याः शरणं गताः ॥ ४ ॥

तद्वचनस्य चायमनुष्ठानकाल एवेत्याह—ते चेत्यादि । स्वयमागम्य शरणं गताः इति । एतेन न मया वीर्यगर्वादिदोषेण रक्षोवधार्थं प्रवर्त्यते इत्युक्तं भवति ॥ ४ ॥

---

* तीर्थगोविन्दराजीययोः 'धर्मे थितः' इति पाठः । संवर्धित इति पाठेऽपि 'जातोत्साहः' इत्यर्थः स्वरसः ॥ † कुलं व्यपदिशन्त्या—स्वमहाकुलीनत्वं प्रख्यापयन्त्या—गो. व्यपदेशार्हकुलप्रसूतया—सत्कुलप्रसूतया—इति परमतात्पर्यम् । ‡ स्वयमित्यनेन—अत्र न स्वार्थः कश्चिदित्युच्यते ।

[1] जनकस्य महात्मनः—ङ. [2] किं नु वक्ष्या—ज्ञ. [3] शरण्यं—ङ.

वसन्तः [1]कालकालेषु वने मूलफलाशनाः।
न लभन्ते सुखं [2]भीताः राक्षसैः [3]क्रूरकर्मभिः ॥ ५ ॥

कालकालेषु–सर्वकालेष्वपीत्यर्थः ॥ ५ ॥

[4]काले काले च निरताः नियमैः विविधैर्वने।
*भक्ष्यन्ते राक्षसैः भीमैः नरमांसोपजीविभिः ॥ ६ ॥
[5]ते भक्ष्यमाणा मुनयः दण्डकारण्यवासिनः।
†अस्मा[6]नभ्यवपद्येति मामूचुः द्विजसत्तमाः ॥ ७ ॥

अस्मानभ्यवपद्येति पदद्वयमावर्त्य, अस्मान् अभ्यवपद्य–अभिगम्य। अभ्यवपद्येति–पद्यतेः गतौ आर्षं परस्मैपदम्। अभ्यवपत्तिः–अनुग्रहः। अस्मान् दण्डकारण्यवासिनः अनुगृह्णाण इत्येवं मामूचुः ॥ ७ ॥

मया तु वचनं श्रुत्वा तेषामेवं मुखाच्च्युतम्।
कृत्वा ‡[7]वचनशुश्रूषां वाक्यमेतदुदाहृतम् ॥ ८ ॥

तेषां मुखादेवं च्युतमिति। रक्षेति च्युतमित्यर्थः। वचनशुश्रूषां–वचनानुष्ठानलक्षणशुश्रूषामित्यर्थः। कृत्वा–मनसि कृत्वा। एवं प्राचीनः पाङ्क्तः पाठः। योजनाशक्त्या चरणशुश्रूषामिति पठन्ति मृदवः पौराणिका§। एवमेव तैः बहुशः प्राचीनपाठनाशनम् ॥ ८ ॥

---

* एवं च अत्र आर्तिः स्वभक्षणमेव। तच्च भक्षकवधमन्तरा न परिहर्तुं शक्यं इति—आर्तेरक्षणार्थमेव रक्षोवधे प्रवृत्तिः, न तु निर्हेतुकतयेति भावः॥ † अभ्यवपद्येति। अनुगृह्णाणेत्यर्थः, लोण्मध्यमपुरुषैकवचनम्, आर्षं परस्मैपदम्। अभ्यवपत्तिः—अनुग्रहः–गो. ‡ क्रियाकैङ्कर्यनिर्वर्तनोपयोगितया वाचिककैङ्कर्यं कृत्वा इदं वाक्यमुदाहृतम्। अनेन करणद्वयनिष्ठा प्रतिपादिता॥ § गोविन्दराजीये तथैव पाठः॥

[1] धर्मनिरताः–ङ. [2] भीरु–ङ. [3] भीमकर्मभिः–ङ. [4] सर्वकालेषु–ङ. अयं श्लोकः नास्ति–झ. [5] तैः–ङ. [6] नभ्यवपद्यैते–ङ. [7] चरण–ङ. झ.

प्रसीदन्तु भवन्तो मे [1]ह्रीरेषा हि ममातुला।
यदीदृशैः अहं विप्रैः उपस्थेयैः उपस्थितः ॥ ९ ॥
किं करोमीति च मया व्याहृतं [2]द्विजसंनिधौ।

*ह्रीः—कीर्तिः। एषेति, किमित्यतः—यदीदृशैरित्यादि। उपस्थेयैरिति। अस्माभिरिति शेषः। उपस्थित इति। रक्षणार्थमिति शेषः। किं करोमीति, लोडर्थे लङ्व्यत्ययात्। युष्मभ्यं किं करवाणीति मया व्याहृतम् ॥ ९ ॥

सर्वैरतैः समागम्य वागियं समुदाहृता ॥ १० ॥

सर्वैरित्यादि। एवं मया व्याहृतैः एतैः सर्वैरित्यर्थः ॥ १० ॥

राक्षसैः दण्डकारण्ये बहुभिः कामरूपिभिः।
अर्दिताः स्म दृढं, राम! भवान् नः [3]तत्र रक्षतु ॥ ११ ॥

स्म—स्मः इति यावत्। तत्र—रक्षःपीडाविषये इत्यर्थः। रक्षत्विति भवच्छब्दप्रयोगात् ॥ ११ ॥

होमकालेषु संप्राप्ताः पर्वकालेषु, चानघ!
धर्षयन्ति सुदुर्धर्षाः राक्षसाः पिशिताशनाः ॥ १२ ॥

पर्वकालेषु—दर्शपूर्णमासकालेषु। धर्षयन्ति—अभिभवन्ति ॥

राक्षसैः धर्षितानां च तापसानां तपस्विनाम्।
गतिं मृगयमाणानां भवान् नः परमा गतिः ॥ १३ ॥

गतिं—त्रातारम् ॥ १३ ॥

---

*ह्रीः—लज्जा वा। स्वयं क्षत्त्रियेण विचार्यत्वे, भवद्भिर्वक्तव्यमापतितं खलु इति विलक्षतेत्यर्थः। अनन्तरार्धं अत्रैवानुकूलम् ॥

[1] श्रीरेषा—ङ. [2] मुनि—ङ. [3] त्रातुमर्हसि—ङ.

कामं तपःप्रभावेन शक्ताः हन्तुं निशाचरान् ।
चिरार्जितं तु नेच्छामः तपः खण्डयितुं वयम् ॥ १४ ॥
बहुविघ्नं तपो नित्यं दुश्चरं चैव, राघव !
तेन शापं न मुञ्चामः भक्ष्यमाणाश्च राक्षसैः ॥ १५ ॥

तेनेति । अतिप्रयासेन तपसस्साधितत्वेन हेतुना इत्यर्थः ॥१५॥

[1]तदर्द्यमानान् रक्षोभिः दण्डकारण्य[2]वासिभिः ।
[3]रक्ष नस्त्वं सह भ्रात्रा त्वन्नाथा हि वयं वने ॥ १६ ॥

त्वन्नाथा इति । त्वमेव नाथो येषां अस्माकं ते तथा ॥ १६ ॥

मया चैतद्वचः श्रुत्वा कात्स्न्र्येन परिपालनम् ।
ऋषीणां दण्डकारण्ये संश्रुतं, जनकात्मजे ! ॥ १७ ॥

कात्स्न्र्येन परिपालनमिति सार्वभौमतः कृत्स्नदेशस्वामित्वाभिप्रायेण । कात्स्न्र्येन—वनजनपदाविशेषेण परिपालनं संश्रुतम् । एवं च क्षत्रपदप्रतिष्ठानाभावः ममाद्याप्यसिद्धः । *न ह्यहं पित्रा राज्यपदात् सर्वथा प्रच्यावितः, अपि तु चतुर्दशसमाः वनवासमात्रकाल एव । अतः अस्त्येवाद्यापि शरणागतरक्षणे अधिकारः इत्युक्तं वेदितव्यम् । एवमाशयेनैव वालिवधोऽपि ॥ १७ ॥

संश्रुत्य च न शक्नोमि †जीवमानः प्रतिश्रवम् ।
मुनीनां अन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥ १८ ॥

जीवमान इति । जीवन्निति यावत् । न शक्नोमीत्यत्र हेतुः—सत्यमिष्टमित्यादि ॥ १८ ॥

---

*अयं भावः—यद्यपि मह्यं मुनिवत् वृत्तिरादिष्टा, न तु सन्यासाश्रमस्वीकारः, अतो मम राज्यस्थापनं राज्यभोगो वा सर्वथा नाद्यापिलषितम्, अपि तु अर्तानामार्तिपरिहारार्थमेव धनुर्गृह्णामि । अतः श्वश्रूश्वशुरयोरादेशस्य न कोऽपि विरोधः—इति ॥

† जीवमानः मुनीनां प्रतिश्रवं—मुनिसम्बन्धिप्रतिज्ञां अन्यथा कर्तुं न शक्नोमि ॥

[1] तद्वन्यमानान्—ङ्. [2] वासिनः—ङ्. [3] रक्षकस्त्वं—ङ्.

*अप्यहं जीवितं जह्यां त्वां वा, सीते! सलक्ष्मणाम् ।
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥ १९ ॥
तदवश्यं मया कार्यं ऋषीणां परिपालनम् ।
अनुक्तेनापि, वैदेहि! प्रतिज्ञाय तु किं पुनः ॥ २० ॥

अनुक्तेनापीति । ऋषिभिरिति शेषः ॥ २० ॥

[1]मम स्नेहाच्च सौहार्दात् इदमुक्तं त्वयाऽनघे!
परितुष्टोऽस्म्यहं, सीते! न ह्यनिष्टोऽनुशिष्यते ॥ २१ ॥

स्नेहः—प्रीतिः । सौहार्दं—सुहृद्भावः । न ह्यनिष्टोऽनुशिष्यत इति । यस्मिन् यस्य प्रीतिः नास्ति, नासौ अनुशिष्यते हितं, उपेक्ष्यत एवेत्यर्थः ॥ २१ ॥

सदृशं [2]चानुरूपं च कुलस्य तव [3]चात्मनः ।
सधर्मचारिणी [4]मे त्वं प्राणेभ्योऽपि गरीयसी ॥ २२ ॥

इत्येवमुक्त्वा वचनं महात्मा
सीतां प्रियां मैथिलराजपुत्रीम् ।
रामो धनुष्मान् सह लक्ष्मणेन
जगाम रम्याणि तपोवनानि ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे दशमः सर्गः

गुरु(२३)मानः सर्गः ॥ २३ ॥

इति श्रीमद्रामायणामृतकटीकायां अरण्यकाण्डे दशमः सर्गः

---

*'आत्मानं सततं रक्षेत् दारैरपि धनैरपि' इत्युक्तं जीवितमपि जह्याम् । 'भ्राता स्वा मूर्तिरात्मनः' इत्युक्तं लक्ष्मणमपि जह्याम् । किं पुनः—'अर्धो वा एष आत्मनो यत्पत्नी' इत्युक्तां त्वां—गो.

[1] मयि—ङ. [2] चानुकूलं—ङ. [3] शोभने—ज. [4] नित्यं—ङ.

एकादशः सर्गः

[आश्रममण्डलवासः]

*अग्रतः प्रययौ रामः सीता मध्ये सुमध्यमा।
पृष्ठतस्तु धनुष्पाणिः लक्ष्मणोऽनु जगाम ह ॥ १ ॥

अथ मार्गे माण्डकर्णिकथाश्रवणपूर्वं आश्रममण्डलं प्राप्तस्य दशवर्षवासानन्तरं पुनः सुतीक्ष्णं प्राप्य तद्वचनात् अगस्त्याभ्यर्णगस्त्याश्रमसंप्राप्तिः। अग्रत इत्यादि ॥ १ ॥

तौ पश्यमानौ विविधान् शैलप्रस्थवनानि च।
नदीश्च विविधा रम्याः जग्मतुः सह सीतया ॥ २ ॥
सारसांश्चक्रवाकांश्च नदीपुलिनचारिणः।
सरांसि च सपद्मानि युक्तानि जलजैः खगैः ॥ ३ ॥
[1]यूथबन्धांश्च पृषतां मदोन्मत्तान् विषाणिनः।
महिषांश्च वराहांश्च नागांश्च †द्रुमवैरिणः ॥ ४ ॥

जलजाः खगाः—दात्यूहादयः। यूथबन्धान्-यूथतया बन्धः संबन्धः तथा। पृषतामिति षष्ठी। विषाणिनः महिषान् इति विशेषणविशेष्यभावेनान्वयः ॥ ४ ॥

---

* यद्यप्ययोध्याकाण्डे वनप्रवेशवेलायां 'अग्रतो गच्छ सौमित्रे! सीता त्वामनुगच्छतु। पृष्ठतोऽहं गमिष्यामि त्वां च सीतां च पालयन्॥' (५२–९६) इत्युक्तम्। अत्र तु 'अग्रतः प्रययौ रामः....लक्ष्मणोऽनुजगाम ह' इति वैचित्र्यमस्ति—परन्तु 'अवेक्ष्य रक्षणं कार्यं अदृष्टे विजने वने' (५२–९५) इति तत्रत्यं पूर्वतनवाक्यं, 'जगाम रम्याणि तपोवनानि' (१०-२२) इति अत्रत्यं पूर्वतनवाक्यं चावधेयम्। अत्र हि शरभङ्गाश्रमप्राप्तमुनिभिराहूतः तैः सह तेषामाश्रमाणि खलु गच्छति रामः। अत एवानुपदं स्वानुयायिधर्मभृन्नामकमुनिना संवादः (श्लो. ८)। अतोऽत्र स्वस्यैव पुरतो गमनम्। अधिकं परस्तात् ॥

† द्रुमभञ्जकत्वात् तद्वैरित्वं गजानाम्।

[1] यूथबद्धांश्च पृषतान्—ङ.

ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ।
ददृशुः सहिता रम्यं तटाकं योजनायतम् ॥ ५ ॥

दिवाकरे लम्बमान इति–सायाह्ने इत्यर्थः । योजनायतं–चतुर्दिग्योजनप्रमाणविस्तारम् ॥ ५ ॥

* पद्मपुष्करसंबाधं गजयूथैरलङ्कृतम् ।
सारसैः हंस[1]कादम्बैः सङ्कुलं जल[2]जातिभिः ॥ ६ ॥

पद्मानां पुष्करे–जले संबाधः–नैबिड्यं यस्मिन् तत्तथा । गजयूथैरलङ्कृतमिति । तीरप्रदेश इति शेषः । हंसाः–राजहंसाः । कादम्बाः–कलहंसाः । जले जातिः–जन्म येषां ते तथा, मत्स्यादिजलजन्तवः इत्यर्थः । एवं पाङ्कः । जलचारिभिरिति पौराणिकेच्छा ॥६॥

प्रसन्नसलिले रम्ये तस्मिन् सरसि शुश्रुवे ।
गीतवादित्रनिर्घोषः न तु कश्चन दृश्यते ॥ ७ ॥

गीतोपेतानां वादित्राणां–चतुर्विधवाद्यानां निर्घोषः तथा । न तु कश्चन–गीतादिकर्तेत्यर्थः ॥ ७ ॥

ततः कौतूहलाद्रामः लक्ष्मणश्च [3]महाबलः ।
मुनिं † धर्मभृतं नाम प्रष्टुं समुपचक्रमे ॥ ८ ॥

धर्मेण भृतः धर्मभृतः इति अकारान्तः, क्विबन्तो वा ॥ ८ ॥

---

* पद्मानि–रक्तानि, पुष्करं–पुण्डरीकं–ति. रा. पद्मैः पुष्करैः–सर्पैः–गो.
† सहागतेषु मुनिष्वन्यतमम्–गो. शरणागतेष्वनुयायिष्वेकम्–ति.

[1] कारण्डैः–ङ. [2] चारिभिः–ङ. [3] महारथः–ङ.

इदमत्यद्भुतं श्रुत्वा सर्वेषां नः, महामुने!
[1]कौतूहलं महज्जातं किमिदं साधु कथ्यताम् ॥ ९ ॥
तेनैवमुक्तो धर्मात्मा राघवेण मुनिस्तदा।
प्रभवं सरसः कृत्स्नं आख्यातुमुपचक्रमे ॥ १० ॥
इदं पञ्चाप्सरोनाम तटाकं सार्व[2]कालिकम्।
निर्मितं तपसा, राम! मुनिना [3]माण्डकर्णिना ॥ ११ ॥

पञ्च अप्सरसां क्रीडासाधनत्वात् पञ्च अप्सरोनाम प्रसिद्धम्। सर्वकालोदकपूर्त्यादिगुणकं सार्वकलिकम् ॥ ११ ॥

स हि तपे तपस्तीव्रं माण्डकर्णिर्महामुनिः।
दशवर्षसहस्राणि *वायुभक्षो [4]जलाश्रयः ॥ १२ ॥
ततः प्रव्यथिताः सर्वे देवाः साग्निपुरोगमाः।
अब्रुवन् वचनं सर्वे परस्परसमागताः ॥ १३ ॥

अग्निरूपेण पुरोगमेन सहिताः साग्निपुरोगमाः ॥ १३ ॥

अस्माकं कस्यचित् स्थानं एष प्रार्थयते मुनिः।
इति संविग्नमनसः सर्वे ते त्रिदिवौकसः ॥ १४ ॥

इति संविग्नमनसः, अभूवन्निति शेषः ॥ १४ ॥

---

*स्वनिर्मिततडाकजलावगाढः—गो. वायुभक्ष इति कथनात्—जलाश्रय इत्यत्राधारत्वं विवक्षितम्। 'जलाशये' इति पाठे तु अर्थः स्पष्टः।

[1] एतदनन्तरं 'वक्तव्यं यदि चेत् विप्र! नातिगुह्यमपि प्रभो!' इत्यधिकं—ङ.
[2] कामिकम्—ङ. [3] माण्डुकर्णिना—ङ. [4] जलाशये—ङ. झ.

तत्र कर्तुं तपोविघ्नं देवैः सर्वैः नियोजिताः।
प्रधानाप्सरसः पञ्च *[1] विद्युच्चलितवर्चसः ॥ १५ ॥

ततः उद्विग्नैः सर्वदेवैः नियोजिताः—तपोविघ्नाय नियुक्ताः। विद्युच्चलितेति आहिताग्न्यादिः, चलितविद्युद्वर्चस इत्यर्थः। प्रधानाप्सरसः पञ्च इत्यनेन तत्परिवारभूताः अन्याश्च सन्तीति गम्यते। ता आगता इति शेषः ॥ १५ ॥

अप्सरोभिस्ततस्ताभिः मुनिः दृष्टपरावरः।
नीतो मदनवश्यत्वं सुराणां कार्यसिद्धये ॥ १६ ॥

दृष्टपरावरशब्दः शतशो व्याकृतचरः ॥ १६ ॥

ताश्चैवाप्सरसः पञ्च मुनेः पत्नीत्वमागताः।
तटाके निर्मितं तासां अस्मिन् अन्तर्हितं गृहम् ॥ १७ ॥

निर्मितमिति। क्रीडार्थमिति शेषः। गृहं निर्मितमित्यनुकर्षः ॥

तथैवाप्सरसः पञ्च निवसन्त्यो यथा सुखम्।
रमयन्ति †तपोयोगात् मुनिं यौवनमास्थितम् ॥ १८ ॥
तासां संक्रीडमानानां एष वादित्रनिःस्वनः।
श्रूयते भूषणोन्मिश्रः गीतशब्दो मनोहरः ॥ १९ ॥

भूषणोन्मिश्र इति। वलयादिभूषणध्वनिमिश्र इति यावत् ॥ १९ ॥

---

*विद्युत इव तरलतेजसः—गो. †तपोरूपोपायात् यौवनमास्थितं—गो.

[1] विद्युत्सदृश—ङ.

आश्चर्यमिति तस्यैतत् वचनं भावितात्मनः ।
राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥ २० ॥
[1]एवं कथयमानस्य ददर्शाश्रममण्डलम् ।
कुशचीरपरिक्षिप्तं ब्रह्मलक्ष्म्या समावृतम् [2]॥ २१ ॥

ब्रह्मलक्ष्म्या—ब्रह्मविद्यानुष्ठानजा लक्ष्मीः तथा । ब्रह्मवर्चसमिति यावत् ॥ २१ ॥

तथा तस्मिन् स काकुत्स्थः श्रीमत्याश्रममण्डले ।
उषित्वा तु सुखं तत्र पूज्यमानो महर्षिभिः ॥ २२ ॥
*जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम् ।
येषामुषितवान् पूर्वं सकाशे स महास्त्रवित् ॥ २३ ॥

आश्रममण्डले उषित्वेति । एकस्याश्रम इति शेषः । एवं पर्यायेण सर्वेषां तपस्विनां आश्रमांश्च जगाम । अपि च येषामृषीणां सकाशे पूर्वं उषितवान्, पुनरपि तेषामाश्रमान् जगाम, तद्भक्त्यतिशयवशात् । यथा सुतीक्ष्णाश्रमं प्रति पुनरागमनम् ॥ २२-२३ ॥

---

* शरभङ्गाश्रमादारभ्यैव यैः सह एतावन्तं कालमुषितवान् (यैश्चार्यं आहूतः अत्यर्थसिद्धम्) तेषां तपस्विनामाश्रमान् पर्यायेण-क्रमतः जगाम—इत्यर्थः । एवञ्च सर्वेषामाश्रमाणां पर्यायेण—द्वितीयपर्यायेण जगामेति न व्याख्यानक्लेशः । एवं सत्येव पूर्वं सुतीक्ष्णेन—'आगन्तव्यं च ते दृष्ट्वा पुनरेवाश्रमं मम' (8. 16) इति, 'सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह' इति च स्वरसतः सङ्गच्छेत । अत एवात्रापि—'येषां आश्रमे पूर्वं' इत्यनुक्त्वा, 'येषां सकाशे पूर्वं' इत्युक्तिरपि स्वरसा ॥

[1] एतदर्धस्थाने 'एवं कथयमानस्य सह भ्रात्रा महामुनेः । अग्रतो रमणीयं च ददर्शाश्रममण्डलम्' इति पाठः—ङ. [2] एतदनन्तरं 'प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः । उवास मुनिभिः सर्वैः पूज्यमानो महायशाः ॥' इत्यधिकं—ङ. झ.

* क्वचित् परिदशान् मासान् एकं संवत्सरं क्वचित्।
क्वचिच्च चतुरो मासान् पञ्च षट् चापरान् क्वचित् ॥ २४॥
अपरत्राधिकं मासादप्यर्धमधिकं क्वचित्।
त्रीन् मासान् अष्ट मासांश्च राघवो न्यवसत् सुखम् ॥ २५॥

एवं एकत्र वासाभावादेव क्वचित्परिदशानित्यादि। 'संख्याव्ययासन्न'ति समासः। 'बहुव्रीहौ संख्येये' इति डच् समासान्तः।

---

* 'राघवः—रामः क्वचिदाश्रमे परिदशान्—परिगताः दश येषां ते परिदशाः—त्रयोदशमासानित्यर्थः —क्वचिदाश्रमे चतुरो मासान्, क्वचित् पञ्च मासान्, क्वचित् षण्मासान्, क्वचिदपरान्—षड्भ्योऽन्यान् सप्तमासान् सुखं न्यवसत्। 'पञ्च षट् च तथा क्वचित्' इति पाठे—तथा पुनः क्वचित् षण्मासानित्यर्थः। परिदशानित्यत्र चतुर्दशमासानित्यर्थः। अपरत्राश्रमे मासादधिकं सुखं न्यवसत्। अधिकशब्देनात्र मासचतुर्थांशो विवक्षितः, एकमासं मासपादं चेत्यर्थः। 'अपरत्राधिकं मासं' इति पाठे मासं अधिकं तत्पादं चेत्यर्थः। अपिशब्दः सर्वत्र मासानुकर्षणार्थः। क्वचिदाश्रमे अर्धमधिकं च न्यवसत्, पादोनमासमित्यर्थः। तथा चैतदव्यवहितपूर्वाश्रमवासदिनैर्द्वौ मासौ संवृत्तौ। एकत्र—सपादमासः, अपरत्र पादोनमास इत्याहत्य मासद्वयसंभवात्। 'अध्यर्धमधिकं क्वचित्' इति पाठे अध्यर्ध—अर्धाधिकं—अर्धमासाधिकमित्यर्थः। अधिकं—पूर्वोक्तपादमासमेकाधिकं, तथा च त्रिपादमासमित्यर्थः। क्वचित् त्रीन् मासान् न्यवसत्, क्वचिदष्टमासान् न्यवसत्, एवं षष्टिः मासाः सिद्धाः। केचिदाहुः—परिदशान्—दशाधिकानिति वक्ष्यमाणेष्वष्टसु स्थानेषु अन्वेति। तथा चायमर्थः—एवं संवत्सरं क्वचिदित्यत्र द्वाविंशतिमासानित्यर्थः। क्वचिच्च चतुरो मासानित्यत्र चतुर्दशमासानित्यर्थः। पञ्च षट् चापरान् क्वचिदित्यत्र क्वचित् पञ्चदशमासान्, क्वचित् षोडशमासानित्यर्थः। अपरानधिकं—मासादप्यर्धमधिकं क्वचिदित्यत्र प्रथमाधिकशब्दः अर्धमासरूपाधिकांशपरः। तथा च अपरान् परिदशान् अधिकं चेत्यन्वये अर्धाधिकदशमासानित्यर्थः। मासादप्यर्धमित्यादेः अयमर्थः—क्वचित् परिदशान् मासान्, तदुपरि मासादधिकमर्धमपि चेति, तथा चार्धाधिकैकादशमासानित्यर्थः। त्रीन् मासानष्टमासांश्चेत्यत्र त्रयोदशमासान् अष्टादशमासांश्चेत्यर्थः। तथा च विंशत्युत्तरशतमासा लब्धाः—इति। तस्मिन् पक्षे प्राथमिकक्वचित्पदमासपदानर्थक्यं, पूर्वग्रन्थविरोध इत्यादि द्रष्टव्यम्—गो. वस्तुतस्तु, 'यथासौकर्यं अत्र कतिपयमासान्, तत्र कतिपयमासान् उवास' इति लोकोक्तिरीत्यनुसरणे न कस्यापि क्लेशस्यावकाश इति भाति॥

परिगताः दश—परिदशाः, दशसंख्याकान् मासान् इत्यर्थः। अधिकं मासमिति, वत्सरादिति शेषः ॥ २४-२५ ॥

तथा संवसतः तस्य मुनीनामाश्रमेषु वै।
रमतश्चानुकूल्येन ययुः संवत्सरा दश ॥ २६ ॥

रमतः—रममाणस्येति यावत् ॥ २६ ॥

[1]प्रतिश्रुत्य च धर्मज्ञः राघवः सह सीतया।
सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह ॥ २७ ॥

प्रतिश्रुत्य चेति। यस्मात् 'आगन्तव्यं पुनः' * इत्युक्तवन्तं सुतीक्ष्णं प्रति 'तथास्तु' इति प्रतिश्रुत्य गतः, तस्मादेव सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम। प्रतिश्रुत्येति प्राचीनः पाङ्क्तः ॥ २७ ॥

स तमाश्रममासाद्य मुनिभिः प्रतिपूजितः।
तत्रापि न्यवसद्रामः किंचित् कालमरिन्दमः ॥ २८ ॥
अथाश्रमस्थो विनयात् कदाचित् तं महामुनिम्।
उपासीनः स काकुत्स्थः सुतीक्ष्णमिदमब्रवीत् ॥ २९ ॥
अस्मिन् अरण्ये [2]भगवान् अगस्त्यो मुनिसत्तमः।
वसतीति मया नित्यं कथाः †कथयतां श्रुतम् ॥ ३० ॥

कथयतां श्रुतमिति। सकाशादिति शेषः ॥ ३० ॥

न तु जानामि तं देशं वनस्यास्य महत्तया।
कुत्राश्रममिदं पुण्यं महर्षेः तस्य धीमतः ॥ ३१ ॥

---

* पूर्वं ८-२६ श्लोको द्रष्टव्यः। † कथयत्सु-गो. कथयद्भ्यः-रा.

[1] परिवृत्य-ङ. परिसृत्य-ङ, झ. [2] भगवन्-ङ.

[1]प्रसादात् तत्रभवतः सानुजः सह सीतया ।
अगस्त्यमभिगच्छेयं अभिवादयितुं मुनिम् ॥ ३२ ॥

तत्रभवतः—पूज्यस्य ॥ ३२ ॥

मनोरथो महानेषः हृदि मे परिवर्तते ।
यद्यहं तं मुनिवरं शुश्रूषेयमपि स्वयम् ॥ ३३ ॥

मनोरथस्याभिनयः—यद्यहमित्यादि ॥ ३३ ॥

इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ।
सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजम् ॥ ३४ ॥
अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणम् ।
अगस्त्यमभिगच्छेति सीतया सह, राघव ! ॥ ३५ ॥

एतदेवेत्येतच्छब्दार्थः—अगस्त्यमित्यादि ॥ ३५ ॥

दिष्ट्या त्विदानीमर्थेऽस्मिन् स्वयमेव ब्रवीषि माम् ।
अहमाख्यामि ते, [2]वत्स ! यत्रागस्त्यो महामुनिः ॥ ३६ ॥

अस्मिन्नर्थे इति । मदुपदिदिक्षितार्थे इत्यर्थः ॥ ३६ ॥

योजनादाश्रमादस्मात् अभि चत्वारि वै ततः ।
दक्षिणेन महान् श्रीमान् अगस्त्यभ्रातुराश्रमः ॥ ३७ ॥

'योजनादाश्रमादस्मात् अभि चत्वारि वै ततः' इति पाङ्क्तः*।
अस्मादाश्रमात् योजनादभि—अधिकं चत्वारि वै योजनानि—पञ्च

---

* 'योजनान्याश्रमादस्मात् तथा (अभि) (याहि) चत्वारि वै ततः' इति—ती. गो. 'अस्मादाश्रमात दक्षिणेन तथेति हस्तेन निर्देशः । चत्वारि योजनानि अभियाहीति शेषः—गो.

[1] प्रसादार्थ—ङ. झ. [2] राम—ङ, ज.

योजनानीति यावत्। दक्षिणेन गन्तव्यानीति शेषः। ततः महान् श्रीमान् अगस्त्यभ्रातुः आश्रमो भवति ॥ ३७ ॥

* स्थलीप्राये वनोद्देशे पिप्पलीवनशोभिते।
बहुपुष्पफले रम्ये नानाशकुनिनादिते ॥ ३८ ॥

स्थलीप्रायवनोद्देशत्वादि च तस्याश्रमस्य चिह्नत्वेनोपदेशः ॥३८॥

पद्मिन्यो विविधास्तत्र प्रसन्न[1]सलिलाः शिवाः।
हंसकारण्डवाकीर्णाः चक्रवाकोपशोभिताः ॥ ३९ ॥

तत्रेति। आश्रमप्रदेशे इत्यर्थः ॥ ३९ ॥

† तत्रैकां रजनीं व्युष्य प्रभाते, राम! गम्यताम्।
दक्षिणां दिशमास्थाय वनषण्डस्य पार्श्वतः ॥ ४० ॥
तत्रागस्त्याश्रमपदं गत्वा योजनमन्तरम्।
रमणीये वनोद्देशे बहुपादपसङ्कुले ॥ ४१ ॥

दक्षिणां दिशमास्थाय योजनमन्तरं—योजनावकाशं गत्वा तत्र अगस्त्याश्रमपदं द्रक्ष्यसीति शेषः ॥ ४०-४१ ॥

रंस्यते तत्र वैदेही लक्ष्मणश्च त्वया सह।
स हि रम्यो वनोद्देशः बहुपादपसङ्कुलः ॥ ४२ ॥

---

* निबिडारण्यवर्जिते इति, समस्थलप्राय इति वाऽर्थः। † तत्र—अगस्त्यभ्रात्राश्रमे। इध्मवाहेत्यस्य नाम। 'अगस्त्यः प्राक् दुहितरं उपयेमे धृतव्रताम्। यस्यां दृढव्रतो जातः इध्मवाहात्मजो मुनिः' इति भागवतं तु 'देवराच्च सुतोत्पत्तिः' इति व्याचक्षत्येके—ति.

[1] सलिलाशयाः—ङ. ञ.

यदि बुद्धिः कृता द्रष्टुं अगस्त्यं तं महामुनिम् ।
* अद्यैव गमने बुद्धिं रोचयस्व, महायशः! ॥ ४३ ॥

इति रामो मुनेः श्रुत्वा सह भ्रात्राभिवाद्य च ।
प्रतस्थेऽगस्त्यमुद्दिश्य सानुजः सीतया सह ॥ ४४ ॥

मुनेः श्रुत्वा इति । वचनमिति शेषः ॥ ४४ ॥

पश्यन् वनानि रम्याणि पर्वतांश्चाभ्रसंनिभान् ।
सरांसि सरितश्चैव पथि मार्गवशानुगान् ॥ ४५ ॥

अगस्त्यमुद्दिश्य—अगस्त्याश्रममुद्दिश्येति यावत् ॥ ४५ ॥

सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखम् ।
इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् । ४६ ॥

एतदेवाश्रमपदं नूनं तस्य महात्मनः ।
अगस्त्यस्य मुनेः भ्रातुः दृश्यते पुण्यकर्मणः ॥ ४७ ॥

यथा हि मे वनस्यास्य ज्ञाताः पथि सहस्रशः ।
सन्नताः †फलभारेण पुष्पभारेण च द्रुमाः ॥ ४८ ॥

नूनमेतदेवेत्यत्र हेतुमाह—यथा हीत्यादि । यथा हि मे पथि चिह्नतया वनं श्रुतं, तथैवास्य वनस्य फलभारेण पुष्पभारेण च सन्नताः सहस्रशो द्रुमाः ज्ञाताः ज्ञायमानाः वर्तन्ते ॥ ४८ ।

---

* राक्षसवधाय अगस्त्यसकाशात् वैष्णवधनुःप्रभृतीनां (१२-३२) गृहीतव्यत्वात्, तज्ज्ञानन् सुतीक्ष्णः स्वयमेव राममगस्त्याश्रमं गन्तु विवक्षुरासीत् इति 'अहमप्येतदेव त्वां वक्तुकामः' इत्यत्र सूचितम् । परन्तु प्रियातिथिं प्रति स्वयं प्रस्थानं वक्तुमनिच्छन्नासीत्, यदा च रामेणैव पृष्टं, तदा स एव त्वरयति—अद्यैवेति ॥ † 'बहुपुष्पफले' (३०) इति सूक्तं पूर्वम् ।

पिप्पलीनां च पक्वानां वनादस्मादुपागतः।
गन्धोऽयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥ ४९ ॥

अथ साधारणोपदिष्टलिङ्गं चानुभूयते इत्याह—पिप्पलीनामित्यादि। पक्वानां पिप्पलीनामिति। तत्फलानामित्यर्थः। कटुकोदयः—कटुकरसस्य उदयः-अभिव्यक्तिः आनुमानिकी येन स तथा तादृशो गन्धः समुपागतः ॥ ४९ ॥

*तत्र तत्र च दृश्यन्ते संक्षिप्ताः काष्ठसञ्चयाः।
लूनाश्च पथि दृश्यन्ते दर्भा वैदूर्यवर्चसः ॥ ५० ॥
एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमम्।
पावकस्याश्रमस्थस्य धूमाग्रं संप्रदृश्यते ॥ ५१ ॥

कृष्णाभ्रं-नीलाभ्रं शिखरं—पर्वतशिखरं च उपमा यस्य स तथा ॥ ५१ ॥

†विविक्तेषु च [1]तीर्थेषु कृतस्नाना द्विजातयः।
[2]पुष्पोपहारं कुर्वन्ति कुसुमैः ‡स्वयमार्जितैः ॥ ५२ ॥

विविक्तेषु—एकान्तेषु—निर्मलेषु चेत्यर्थः। स्वयमार्जितैरिति। देवं पूजयितुमिति शेषः ॥ ५२ ॥

तत् सुतीक्ष्णस्य वचनं यथा, सौम्य! मया श्रुतम्।
अगस्त्यस्याश्रमो भ्रातुः नूनमेष भविष्यति ॥ ५३ ॥

यथाश्रुतं तथैव तदुक्तलिङ्गानां अनुभवादिति शेषः ॥ ५३ ॥

---

* इदं मुनीनां समीपवासं सूचयति। † विविक्तेषु—पूतेषु, 'विविक्तौ पूतविजनौ' इत्यमरः—गो. ‡ 'समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरत्' इति स्मरणात्—गो.

[1] तीरेषु—ङ. [2] पुष्पोपहारं—ङ.

निगृह्य [1] तरसा मृत्युं लोकानां हितकाम्यया ।
यस्य भ्रात्रा कृतेयं दिक् * शरण्या पुण्यकर्मणा ॥ ५४ ॥

मृत्युं निगृह्य शरण्या कृता—शरणं—आवासः, तद्योग्या संपादितेत्यर्थः ॥ ५४ ॥

इहैकदा किल क्रूरः वातापिरपि चेल्वलः ।
भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥ ५५ ॥

कोऽसौ मृत्युः अगस्त्येन निगृहीतो लोकानुग्रहायेत्यतः सा आख्यायिकोच्यते—इहेत्यादि । वने इत्यर्थः । एकदेति—कस्मिंश्चित् पूर्वस्मिन् काले इत्यर्थः । ब्राह्मणघ्नौ इति । 'अमनुष्यकर्तृके चेति' ठक् ॥ ५५ ॥

धारयन् ब्राह्मणं रूपं इल्वलः संस्कृतं वदन् ।
आमन्त्रयति विप्रान् स्म [2] श्राद्धमुद्दिश्य निर्घृणः ॥ ५६ ॥

रूपं—वेषं, ब्राह्मणमिव—ब्राह्मणरूपमिव धारयन्—परिगृह्णन् । संस्कृतं वदन्, ब्राह्मणवदिति शेषः । उभयं विश्वासार्थम् ॥ ५६ ॥

भ्रातरं संस्कृतं [3] कृत्वा ततस्तं मेषरूपिणम् ।
तान् द्विजान् भोजयामास श्राद्धदृष्टेन कर्मणा ॥ ५७ ॥

संस्कृतं—श्राद्धोचितपाकसंस्कारसंस्कृतं कृत्वेत्यर्थः ॥ ५७ ॥

ततो भुक्तवतां तेषां विप्राणामिल्वलोऽब्रवीत् ।
वातापे! निष्क्रमस्वेति स्वरेण महता वदन् ॥ ५८ ॥

---

* शरण्या—संश्रयितुं योग्या—गो.

[1] तपसाङ्. [2] श्राद्धकर्मणि—ङ्. [3] भ्राता—ङ्.

ततो भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन्।
भित्त्वा भित्त्वा शरीराणि ब्राह्मणानां विनिष्पतत् ॥ ५९ ॥
ब्राह्मणानां सहस्राणि *तैरेवं कामरूपिभिः।
विनाशितानि [1]संहत्य नित्यशः पिशिताशनैः ॥ ६० ॥

मेषवत् नदन् इति। मृतसंजीविनीवैभवात् उदरान्तरिति शेषः। विनिष्पतत् इति। अडभावः आर्षः। विनिर्गतवानिति यावत्। संहत्य-समेत्य ॥ ६० ॥

अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा।
अनुभूय किल श्राद्धे भक्षितः स महासुरः ॥ ६१ ॥

देवैः प्रार्थितेन-प्रार्थितासुरद्वयसंहारेण महर्षिणा अगस्त्येन, श्राद्धे-श्राद्धव्यापारमनुभूय भक्षितः, सः महासुरः-वातापिः ॥ ६१ ॥

तदा संपन्नमित्युक्त्वा दत्त्वा [2]हस्तोदकं ततः।
भ्रातरं निष्क्रमस्वेति चेल्वलः सोऽभ्यभाषत ॥ ६२ ॥

तदा-श्राद्धान्ते, संपन्नमित्युक्त्वा ततः हस्तोदकं च दत्त्वा भ्रातरं निष्क्रमम्वेत्यभाषत ॥ ६२ ॥

स तं तथा भाषमाणं भ्रातरं विप्रघातिनम्।
अब्रवीत् प्रहसन् धीमान् अगस्त्यो मुनिसत्तमः ॥ ६३ ॥

तमिति-इल्वलमित्यर्थः ॥ ६३ ॥

---

* तैरिति बहुवचनं परिवारामिप्रायं-गो.

[1] संहत्य-ङ. ज. [2] हस्तावसेचनम्-ङ. हस्तेऽवनेजनम्-ङ. ज.

कुतो निष्क्रमितुं शक्तिः मया जीर्णस्य रक्षसः।
भ्रातुस्ते मेषरूपस्य गतस्य यमसादनम् ॥ ६४ ॥

मया जीर्णस्येति। भुक्तेति शेषः ॥ ६४ ॥

अथ तस्य वचः श्रुत्वा भ्रातुः* निधन[1]संश्रयम्।
प्रधर्षयितुमारेभे मुनिं क्रोधात् निशाचरः ॥ ६५ ॥

प्रधर्षयितुं—हिंसितुम् ॥ ६५ ॥

[2]सोऽभिद्रवन्मुनिश्रेष्ठं, मुनिना दीप्ततेजसा।
चक्षुषाऽनलकल्पेन निर्दग्धो निधनं गतः ॥ ६६ ॥

चक्षुषा—चक्षुर्वीक्षणेन। अनलकल्पेन। कल्पप् प्रत्ययः। ६६।

तस्यायमाश्रमो भ्रातुः तटाकवनशोभितः।
विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम् ॥ ६७ ॥

तटाकोपेतं वनम् ॥ ६७ ॥

एवं कथयमानस्य तस्य सौमित्रिणा सह।
रामस्यास्तं गतः सूर्यः संध्याकालोऽभ्यवर्तत ॥ ६८ ॥

तथा कथयमानस्येति। 'णिचश्च' इत्यात्मनेपदम् ॥ ६८ ॥

उपास्य पश्चिमां सन्ध्यां सह भ्रात्रा यथाविधि।
प्रविवेशाश्रमपदं तमृषिं सोऽभ्यवादयत् ॥ ६९ ॥
सम्यक् प्रतिगृहीतश्च मुनिना तेन राघवः।
न्यवसत् तां निशामेकां प्राश्य मूलफलानि च ॥ ७० ॥

---

* निधनसंश्रयं वचः श्रुत्वा।

[1] संश्रितम्—ङ. ज. [2] सोऽभ्यद्रव—ङ. ज.

तस्यां रात्र्यां व्यतीतायां विमले सूर्यमण्डले।
भ्रातरं तमगस्त्यस्य ह्यामन्त्रयत राघवः ॥ ७१ ॥
अभिवादये त्वा, भगवन्! सुखमध्युषितो निशाम्।
आमन्त्रये त्वां गच्छामि गुरुं ते द्रष्टुमग्रजम् ॥ ७२ ॥

अभिवादये त्वां भगवन्निति। अभिवादये त्वा इति पदयोः अन्यथा प्रयोगासंभवात् अक्षराधिक्य पादस्य ॥ ७२ ॥

गम्यतामिति तेनोक्तः जगाम रघुनन्दनः।
यथोद्दिष्टेन मार्गेण वनं तच्चावलोकयन् ॥ ७३ ॥
नीवारान् पनसांस्तालान् वञ्जुलान् तिमिशान् धवान्।
[1] चिरिबिल्वान् मधूकांश्च [2] बिल्वानपि च तिन्दुकान् ॥७४॥

नीवारः—जलकदम्बकः। निचुलः—वञ्जुलः अशोकः। तिमिशः—धवलः अर्जुनः। चिरिबिल्वः—नक्तमालः। तिन्दुकाः—स्फूर्जकाः॥

पुष्पितान् पुष्पिताग्राभिः लताभिरनुवेष्टितान्।
ददर्श रामः शतशः तत्र कान्तारपादपान् ॥ ७५ ॥
हस्तिहस्तैः विमृदितान् वानरैरुपशोभितान्।
मत्तैः शकुनिसङ्घैश्च [3] शतशश्च प्रणादितान् ॥ ७६ ॥

विमृदितान्, मृदेः निष्ठा ॥ ७६ ॥

ततोऽब्रवीत् ममीपस्थं रामो राजीवलोचनः।
पृष्ठतोऽनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनम् ॥ ७७ ॥

---

[1] चीरबिल्वान्—ङ. [2] प्रकीर्यानपि किंशुकान्—ङ. [3] शतशः प्रतिनादितान् ङ.

*स्निग्धपत्रा यथा वृक्षाः यथा शान्तमृगद्विजाः ।
आश्रमो नातिदूरस्थः महर्षेः भावितात्मनः ॥ ७८ ॥

यथा श्रुनाः, तथा स्निग्धपत्राः वृक्षाः दृश्यन्ते इति शेषः । तथा अग्रेऽपि योजना ॥ ७८ ॥

अगस्त्य इति विख्यातः लोके स्वेनैव कर्मणा ।
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ७९ ॥

[1] प्राज्यधूमाकुलवनः चीरमालापरिष्कृतः ।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ८० ॥

स्वेनैव कर्मणा अगस्त्य इति विख्यातः । अगं—विंध्यं स्तंभयतीति, पृषोदरादित्वेन स्तंभशब्दस्य स्त्यादेशे अगस्त्य इति प्रसिद्ध इत्यर्थः । परिश्रान्तानां श्रमं अपहन्तीति तथा, 'अपे क्लेशतमसोः' इति क्लेशपर्यायेऽपि डः । प्राज्यैः—भूरिभिः धूमैः—यज्ञपाकयज्ञधूमैः आकुलं वनं यस्मिन् स तथा ॥ ८० ॥

[2] निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
दक्षिणा दिक् कृता येन शरण्या पुण्यकर्मणा ॥ ८१ ॥

† निगृह्येत्यादिः गतार्थः ॥ ८१ ॥

---

* मनुष्यसञ्चारात् भीतैर्वन्यमृगैरविमृदितत्वात् स्निग्धपत्राः । † ५४ श्लोकेनेति यावत् ।

[1] आज्य—ङ. [2] इदमर्धं कुण्डलितम्—ज.

तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः ।
* दिगियं दक्षिणा त्रासात्[1] दूरतो नोप[2]भुज्यते ॥ ८२ ॥

दक्षिणा दिगिति । अगस्त्याश्रमप्रदेशवर्तिनीति शेषः । तथा अग्रेऽपि । केवलं दूरतः त्रासात्–महर्षिनिमित्तभीत्या । नोपभुज्यते–न स्वदेशत्वेन परिगृह्य अनुभूयते इत्यर्थः ॥ ८२ ॥

यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।
† तदाप्रभृति निर्वैराः प्रशान्ताः रजनीचराः ॥ ८३ ॥

निर्वैराः इति । गजसिंहमृगव्याघ्रादयः इति शेषः । प्रशान्ताः–क्रूरकृत्यरहिताः ॥ ८३ ॥

‡ नाम्ना चेयं भगवतो दक्षिणा दिक् प्रदक्षिणा ।
प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥ ८४ ॥

एवं भगवतो महिम्ना दक्षिणा–निर्वैरत्वादिसंपादनसमर्था इयं दिक्–एतद्दिग्वर्त्याश्रमः इति यावत्, अत एव नाम्ना प्रदक्षिणा इति त्रिषु लोकेषु प्रथिता ॥ ८४ ॥

---

* त्रासात् दृश्यते, न तु प्राचीनकाल इवोपभुज्यते–**गो**. दृश्यते केवलं, त्रासात् महर्षिभीत्या नोपभुज्यते–**ति**. राक्षसैर्दृश्यते, भुज्यते तु न–**रा**. अस्य प्रभावात् राक्षसैः न दृश्यते, अस्य त्रासात् नोपभुज्यते–**ती**. † निर्वैराः—वैरप्रवर्तनाशक्ताः–**गो**. निर्वैराः प्राणिषु–**ति**. 'दक्षिणा दिक् दुर्धर्षा क्रूरकर्मभिः' इत्यनन्तरश्लोकोक्तेः, 'त्रासात्' इति पूर्वश्लोकोक्तेश्च गोविन्दराजीयोक्तं सम्यगेव। ननु तर्हि रामेण साध्यं किमस्ति? इति चेत्, अगस्त्याश्रितदिग्भिन्नदिश्यपि रक्षःपीडापरिहारस्य, तन्निर्मूलनस्य च रामैकसाध्यत्वान्न दोषः ॥ ‡ नाम्ना—भगवतोऽगस्त्यस्य दिक् इति प्रसिद्धा–**गो. ति**. प्रदक्षिणा—सज्जनाभिगम्या–**ती**. अतिकुशलवती–**रा**.

[1] दृश्यते–**सर्वत्र**. [2] युज्यते–**ङ**.

मार्गं निरोद्धुं निरतो भास्करस्याचलोत्तमः ।
निदेशं पालयन् यस्य विन्ध्यः शैलो न वर्धते ॥ ८५ ॥

भास्करस्य मार्गं निरोद्धुं इति । किंचित् स्पर्धतः । महामेरुस्पर्धयेति शेषः । न वर्धते इति । अद्यापीति शेषः ॥ ८५ ॥

अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः ।
अगस्त्यस्याश्रमः श्रीमान् विनीतजनसेवितः ॥ ८६ ॥
एष लोकार्चितः साधुः हिते नित्यरतः सताम् ।
अस्मानभिगतानेषः * श्रेयसा योजयिष्यति ॥ ८७ ॥
आराधयिष्याम्यत्राहं अगस्त्यं तं महामुनिम् ।
शेषं च वनवासस्य, सौम्य ! वत्स्याम्यहं, [1] प्रभो ! ॥ ८८ ॥

प्रभो इति सर्वकोशेषु संबुध्यन्ततया पाङ्क्तः पाठः † । हे समर्थ ! शुश्रूषणचतुरेति यावत् ॥ ८८ ॥

अत्र देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
अगस्त्यं [2] नियताहारं सततं पर्युपासते ॥ ८९ ॥
नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ।
नृशंसः [3] कामवृत्तो वा मुनिरेष ‡ तथाविधः ॥ ९० ॥

तथाविध इति । दुर्वृत्तासहिष्णुरिति यावत् ॥ ९० ॥

---

* वैष्णवधनुःप्रदानादिश्रेयसा योजयिष्यति । † महेश्वरतीर्थस्य 'प्रभोः' इति पाठः । प्रभोः—अगस्त्यस्य वाक्यात् वनवासस्य शेषं—अवशिष्टकालं वत्स्यामि—स्थास्यामि—ती. प्रभो इत्युक्तिः लक्ष्मणस्यापि राजपुत्रत्वात् । प्रभोरिति पाठे प्रभोः—अगस्त्यस्य नियोगादिति शेषः—गो. ‡ तथाविधः—तादृशप्रभावविशिष्टः, यः स्वाश्रितान् सर्वानपि स्वानिव करोतीत्यर्थः ।

[1] प्रभोः—ङ. [2] नियताहाराः—ङ. [3] पापवृत्तो—ङ.

अत्र देवाश्च यक्षाश्च नागाश्च * पतगैः सह ।
वसन्ति नियताहाराः धर्ममाराधयिष्णवः ॥ ९१ ॥

पतगाः—गरुडजातयः । † धर्मं—स्वाश्रमधर्मम् ॥ ९१ ॥

अत्र सिद्धाः महात्मानः विमानैः सूर्यसन्निभैः ।
[1] त्यक्तदेहाः नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९२ ॥

नवैः देहैः—दिव्यदेहैरित्यर्थः ॥ ९२ ॥

यक्षत्वममरत्वं च राज्यानि विविधानि च ।
अत्र देवाः प्रयच्छन्ति भूतैः आराधिताः ‡[2] शुभैः ॥ ९३ ॥

अत्र आराधिताः देवाः—इन्द्रादयः प्रयच्छन्तीति । आश्रमवैभवात् अल्पकालेनेति शेषः ॥ ९३ ॥

आगताः स्माश्रमपदं, सौमित्रे ! प्रविशाग्रतः ।
§ निवेदयेह मां प्राप्तं ऋषये सीतया सह ॥ ९४ ॥

इत्यार्षे श्रीमद्रामायण वाल्मीकीये अरण्यकाण्डे एकादशः सर्गः

वन(९४)मानः सर्गः ॥ ९४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकादशः सर्गः

---

* पतगैः—गरुडजातिभिः—गो. † धर्मं—स्वर्गादिजनकं—ति. स्वस्वधर्मं वा ।
‡ शुभैः—सत्कर्मनिरतैः—गो. सत्कर्मभिः—ति. § अग्रतः प्रवेशादेशे हेतुः—निवेदयेति ।

[1] त्यक्त्वा देहान्—ङ. [2] शुभाः—ङ.

द्वादशः सर्गः

[अगस्त्यसन्दर्शनम्]

स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः।
अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥ १ ॥

अथ अगस्त्यमुपसंपन्नस्य सत्कारपूर्वं धनुरादिप्राप्तिः। स प्रविश्येत्यादि ॥ १ ॥

राजा दशरथो नाम ज्येष्ठः तस्य सुतो *बली।
रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया ॥ २ ॥
लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः।
[1]अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः ॥ ३ ॥

यदि ते श्रोत्रमागतः इति। यदिशब्दः संभावनायाम्। अस्माभिरिह दण्डकारण्ये ऋषिभिः सह बहुकालं वासात् ऋषिमुखेन त्वयाऽपि रामः अहं च श्रुतौ भवेः, श्रुतवान् इत्यर्थः ॥ ३ ॥

ते वयं [2]वनमत्युग्रं प्रविष्टाः पितृशासनात्।
द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेद्यताम् ॥ ४ ॥

द्रष्टुमिच्छामहे भगवन्तं; अतो दर्शनार्थं आगताः इति निवेद्यतामित्यर्थः ॥ ४ ॥

तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः।
तथेत्युक्त्वाऽग्निशरणं प्रविवेश निवेदितुम् ॥ ५ ॥

अग्निशरणं—अग्निहोत्रगृहम् ॥ ५ ॥

---

* अनेन वनवासस्य स्वेच्छाङ्गीकृतत्वमुच्यते।

[1] अनुरक्तश्च—ङ. [2] वनमव्यग्रं—ङ.

स प्रविश्य मुनिश्रेष्ठं तपसा [1]दुष्प्रधर्षणम् ।
कृताञ्जलिरुवाचेदं [2]रामागमनमञ्जसा ।
यथोक्तं लक्ष्मणेनैव शिष्योऽगस्त्यस्य संमतः ॥ ६ ॥

संमतः—इष्टः ॥ ६ ॥

[3]पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च ।
प्रविष्टावाश्रमपदं सीतया सह * भार्यया ॥ ७ ॥
द्रष्टुं भवन्त[4]मायातौ शुश्रूषार्थं[5]मरिन्दमौ ।
यदत्रानन्तरं † तत्त्वं आज्ञापयितुमर्हसि ॥ ८ ॥

द्रष्टुं, दर्शनानन्तरं कियत् कालं शुश्रूषार्थं—सेवार्थं च आयातौ। अनन्तरं तत्त्वं—इतिकर्तव्यतत्त्वमित्यर्थः ॥ ८ ॥

ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणम् ।
वैदेहीं च महाभागां इदं वचनमब्रवीत् ॥ ९ ॥
दिष्ट्या रामः चिरस्याद्य द्रष्टुं मां समुपागतः ।
मनसा कांक्षितं ह्यस्य [6]मयाऽभ्यागमनं प्रति ॥ १० ॥

अस्याभ्यागमनं प्रति—उद्दिश्य ॥ १० ॥

गम्यतां सत्कृतो रामः सभार्यः सहलक्ष्मणः ।
प्रवेश्यतां समीपं मे ‡ किं चासौ न प्रवेशितः ॥ ११ ॥

---

* भार्ययेति औचित्यात् राम एवान्वेति। प्रथमान्तपाठे तु न क्लेशः ॥
† तत्त्वं—तस्य भावं—प्रकारम्—गो. तत् त्वं इति वा पदम् ॥ ‡ प्रीत्यतिशयजन्यत्वरयाऽऽह—किञ्चेत्यादि। रामस्य निर्निरोधत्वाच्च।

[1] द्योतितप्रभम्—ङ. [2] वचनं व्यक्तया गिरा—ङ. [3] पुत्रो दशरथस्यासौ रामो नाम महायशाः। सह भ्रात्राऽऽश्रमपदं—ङ. [4] मायातः—ङ. [5] मरिन्दमः—ङ. [6] मयाऽभ्यागमनं—ङ.

सत्कृत इति। आचारोपचारव्यवहारैः इति शेषः। किं चासौ न प्रवेशितः इति। कस्माद्धेतोः विलम्बः कृतः इत्यर्थः॥ ११॥

एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना।
*अभिवाद्याब्रवीत् शिष्यः तथेति नियताञ्जलिः॥ १२॥

अभिवाद्येति। गमननियोगप्रयुक्तं पुनश्चाभिवादनं कृत्वेत्यर्थः॥

ततो निष्क्रम्य संभ्रान्तः शिष्यो लक्ष्मणमब्रवीत्।
क्वासौ रामो मुनिं द्रष्टुं एतु प्रविशतु स्वयम्॥ १३॥

स्वयं प्रविशत्विति। नास्य शिष्यमुखापेक्षा, भगवता अवगतरामवृत्तत्वादिति शेषः॥ १३॥

ततो गत्वाऽऽश्रमद्वारं शिष्येण सह लक्ष्मणः।
दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम्॥ १४॥

काकुत्स्थं दर्शयामास। आश्रममिति शेषः। 'गतिबुद्धि' इत्यादिना द्विकर्मकत्वम्॥ १४॥

तं शिष्यः प्रश्रितो वाक्यं अगस्त्यवचनं ब्रुवन्।
प्रावेशयद्यथान्याय्यं सत्कारार्हं सुसत्कृतम्॥ १५॥

उच्यते इति वचनं, अगस्त्यवचनं—अगस्त्योक्तं वाक्यं ब्रुवन्॥

प्रविवेश ततो रामः सीतया सहलक्ष्मणः।
प्रशान्तहरिणाकीर्णं आश्रमं ह्यवलोकयन्॥ १६॥

---

*'किञ्चासौ न प्रवेशितः' इति ऋषिणाऽधिक्षिप्तत्वादभिवादनादिकम्।' अत एव उत्तरत्र 'संभ्रान्तः' 'प्रविशतु स्वयम्' इत्युक्तिः॥

* स तत्र ब्रह्मणः स्थानं अग्नेः स्थानं तथैव च ।
विष्णोः स्थानं [1] महेन्द्रस्य स्थानं चैव विवस्वतः ॥ १७ ॥
सोमस्थानं [2] भगस्थानं स्थानं कौबेरमेव च ।
धातुः विधातुः स्थाने च वायोः स्थानं तथैव च ॥ १८ ॥
नागराजस्य च स्थानं [3] अनन्तस्य महात्मनः ।
स्थानं तथैव गायत्र्याः वसूनां स्थानमेव च ॥ १९ ॥
स्थानं च पाशहस्तस्य वरुणस्य महात्मनः ।
कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ॥ २० ॥

स तत्र ब्रह्मणः स्थानमिति । तत्र—आश्रमे प्रथमं ब्रह्मणः स्थानं, श्रीहिरण्यगर्भब्रह्मणः कुलदैवतस्यालयं व्यलोकयत् इत्यनुषङ्गः । अथ अग्नेः स्थानं— चतुर्मुखरुद्रस्य स्थानम् । अथ विष्णोः—श्रीप्रदेशविष्णोः । अथ यथोक्तत्रिब्रह्माङ्गदेवतानां आलयोपदेशः । महेन्द्रस्य विवस्वतः । भगः—मण्डस्थूलसंनिवेशाभिमानी । धाता—कार्यप्रजापतिः । विधाता—विश्वकर्मा ।

---

* ब्रह्मणः—चतुर्मुखस्य, अग्नेः—पावकस्य, भगः देवताविशेषः । पाशहस्तस्येत्यादि-विशेषणानि तत्र मुनेर्भक्तिविशेषद्योतनार्थम् । इमे ब्रह्मादयः पूर्वसर्गे फलप्रदत्वेनोक्ताः । एते ब्रह्मविष्णुमहेन्द्रविवस्वत्सोमभगकुबेरधातृविधातृवाय्वनन्तगायत्रीवसुवरुणकार्तिकेय-धर्माख्याः सप्तदश देवाः 'यो वै सप्तदशं' इत्यनुवाकोक्तसप्तदशाक्षरदेवताः याज्ञूकेन मुनिना पूजार्थं प्रतिष्ठिता इति बोध्यम् । अत्र पूज्यदैवतेषु रुद्रस्यानुग्रहादनाद्यपूज्यत्वमुक्तम् । अधुना कैश्चिज्जनैः पूज्यमानता तु तामसशास्त्रानुरोधेनेति बोध्यम् । ननु 'विष्णोः स्थानं महेशस्य' इति पाठात् स्थानानुक्तथसंभव इति चेत्, तदा पूर्वं रामेण 'अगस्त्यं नियताहारं सततं पर्युपासते' इत्युक्तावपि स्थाननिर्देशे उपास्योपासकयो-रुभयोरपि निर्देशो न विरुध्यते । यद्वा उपासनं—समीपावस्थानम्, न त्वाराधनम्, 'धर्म-माराधयिष्यवः' इत्युक्तेः । धर्मस्याराधनं परिपालनमेव—गो.

[1] महेशस्य—ङ. [2] शिवस्थानं—ङ. [3] गरुडस्य तथैव च—ङ.

गायत्रीत्युपलक्षणं सरस्वतीसावित्र्योरपि। एवं इह ब्रह्मादिधर्मान्तसप्तदशदेवानां 'यो वै सप्तदशं प्रजापतिं' इत्यनुवाकोपदिष्टयज्ञयज्ञेश्वरयजमानश्रीमद्यक्षमूर्तिभगवत्प्रजापतिमूलमंत्रसप्तदशाक्षरीदेवानां इहोपदिष्टानां 'अगस्त्यो विश्वाध्वरेश्वर' इति क्रान्तिपूर्तिः, विद्यान्तर्गतानामशेषयज्ञविद्यासाधकमहार्षित्वात् स्वयज्ञदेवतानां स्वाश्रमे प्रतिष्ठापूर्वकं नित्यविशेषसमाराधनं अगस्त्यस्य भगवतः। एवं च ब्रह्मादिब्रह्मकुलकुलदेवतानां सर्वेषां स्वस्वगृहे अर्चायां अर्चनीयत्वं सुस्पष्टम्। अन्ततः आद्यन्तमध्यदेवतात्रयस्य श्रीहिरण्यगर्भगायत्रीधर्मलक्षणस्य च ब्रह्मकुलमात्रस्यार्चायामर्चनं आवश्यकम्। श्रीमद्यज्ञविद्योपासकस्य तु तच्चक्रे अग्न्यादितद्विद्याक्षरदेवताभिः सहोपदिश्यमानाः तदक्षराधिदेवताश्च अर्चनीयाः ॥ २० ॥

ततः शिष्यैः परिवृतः मुनिरप्यभिनिष्पतत्।
तं ददर्शाग्रतो रामः मुनीनां दीप्ततेजसाम् ॥ २१ ॥

मुनिरप्यभिनिष्पतदिति। अडभावः आर्षः। अभ्युत्थानं कृतवानिति यावत्। मुनीनामग्रतः स्थितं * तं ददर्श ॥ २१ ॥

अब्रवीद्वचनं [1] वीरः लक्ष्मणं लक्ष्मिवर्धनम्।
एषः, लक्ष्मण! निष्क्रामति अगस्त्यो भगवानृषिः।
† औदार्येणावगच्छामि [2] निधानं तपसामिमम् ॥ २२ ॥

औदार्येण—औन्नत्येन—तेजोविशेषजनितेन ॥ २२ ॥

---

* अभिनिष्पतदित्युक्तत्वात् स्वपुरत एवागतमिति वाऽर्थः। अत एव 'एषः' इति प्रदर्शनं अनन्तरश्लोके। † औदार्य—सरलता वा; महान्त एव किल सरला भवितुं अर्हन्ति।

[1] रामः—ङ. [2] निदानं—ङ.

एवमुक्त्वा महाबाहुः अगस्त्यं सूर्यवर्चसम् ।
[1]जग्राह परमप्रीतः तस्य पादौ परंतपः ॥ २३ ॥
अभिवाद्य तु धर्मात्मा तस्थौ *रामः कृताञ्जलिः ।
सीतया सह वैदेह्या †तदा रामः सलक्ष्मणः ॥ २४ ॥
[2]प्रतिजग्राह काकुत्स्थं अर्चयित्वाऽऽसनोदकैः ।
कुशलप्रश्नमुक्त्वा च ह्यास्यतामिति चाब्रवीत् ॥ २५ ॥

अर्चयित्वा प्रतिजग्राहेति, स्वीयतयेति शेषः ॥ २५ ॥

अग्निं हुत्वा प्रदायार्घ्यं अतिथीन् प्रतिपूज्य च ।
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २६ ॥

अर्चयित्वेत्याद्युक्तार्थस्यैव विस्तरेणोपदेशः—अग्निं हुत्वेत्यादि । अतिथीन्—रामादीन् ॥ २६ ॥

प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः ।
उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २७ ॥

आसीनमिति । पश्चादासीनमित्यर्थः ॥ २७ ॥

[3]अग्निं हुत्वा प्रदायार्घ्यं अतिथिं प्रतिपूजयेत् ।

---

* रामः अभिवाद्य तस्थाविति अन्वयः—गो. † आरामः—सर्वाभिरामदाता रामः—रा. गोगूढिभ्यां रामशब्दद्वयापौनरुक्त्यम्—ति. ती.

[1] जग्राहापततस्तस्य—ङ. [2] प्रतिगृह्य च—ङ. [3] इदमर्धं नास्ति—ङ. ज.

* अन्यथा खलु, काकुत्स्थ! तपस्वी समुदाचरन्।
दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥ २८ ॥

किमुवाचेत्यतः, धर्ममूलत्वात् जगतः प्रकृतं धर्ममेव कर्तव्यमुपदिशतीत्याह—अग्निं हुत्वेत्यादि। वैश्वदेवहोमं कृत्वेत्यर्थः। अन्यथा समुदाचरन् इति। वैश्वदेवपूजनं अतिथिपूजनं च अकुर्वन् इत्यर्थः। दुःसाक्षी—कूटसाक्षी ॥ २८ ॥

राजा सर्वस्य लोकस्य धर्मचारी महारथः।
पूजनीयश्च मान्यश्च भवान् प्राप्तः प्रियातिथिः ॥ २९ ॥

एवं उपदेशः, बालोऽपि राजा सन् धार्मिकोऽपि अतिथित्वेन प्राप्ततः पूजनीयोऽद्य, अतः परं त्वयैव आराधनीयोऽपीत्येतदर्थः ॥ २९ ॥

एवमुक्त्वा फलैर्मूलैः पुष्पैरन्यैश्च [1] राघवम्।
पूजयित्वा यथाकामं पुनरेव ततोऽब्रवीत् ॥ ३० ॥
इदं दिव्यं महच्चापं हेम[2]वज्रविभूषितम्।
वैष्णवं, पुरुषव्याघ्र! निर्मितं विश्वकर्मणा ॥ ३१ ॥

हेम्ना वज्रेण—रत्नेन च विभूषितं तथा। वैष्णवं धनुरिति। परशुरामात् गृहीत्वा वरुणहस्ते दत्तं यत् रामेण तदेव वरुणादादाय महेन्द्रः अगस्त्ये निक्षिप्तवानित्यवगन्तव्यम्, न तु विश्वकर्मनिर्मितं

---

* एवं क्षत्रियपूजाऽनुचितेत्याशङ्क्य समाधित्सुः प्रकृतं धर्ममुवाचेत्याह—अन्यथेति—ति. अयं रामव्याजेन सीतां प्रत्युपदेशः। धर्मकोविदमित्युक्तस्य रामस्य हि नेदं वक्तव्यम्। अत एव सीता रावणं सत्करिष्यति—गो.

[1] पार्थिवम्—ङ. [2] रत्न—ङ.

वैष्णवं धनुर्द्वयमस्ति। शार्ङ्गं तु मूरुमूर्त्तावेवास्ते। नापि तद्विश्वकर्म-निर्मितम् ॥ ३१ ॥

अमोघः सूर्यसङ्काशः * ब्रह्मदत्तः शरोत्तमः।
[1]दत्तौ मम † महेन्द्रेण तूणी चाक्षयसायकौ ॥ ३२ ॥
संपूर्णौ निशितैः बाणैः ज्वलद्भिरिव पावकैः।
महारजतकोशोऽयं असिः हेमविभूषितः ॥ ३३ ॥

ब्रह्मणा दत्तः—ब्रह्मदत्तः, अत एव तदाख्यश्च। तूणी चेत्यनेन धनुश्शरयोरपि इन्द्रदत्तत्वं गम्यते। महारजतं—सुवर्णम् ॥ ३३ ॥

अनेन ‡ धनुषा, राम! हत्वा संख्ये महासुरान्।
आजहार श्रियं दीप्तां पुरा विष्णुः दिवौकसम् ॥ ३४ ॥
तद्धनुः तौ च तूणीरौ § शरं खड्गं च, मानद!
[2]जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३५ ॥

वज्रं वज्रधरो यथा इत्यनेन तावकं वस्तु त्वयैव विराजा ब्रह्मणा स्वीक्रियत इति द्योत्यते ॥ ३५ ॥

---

* बालरामायणे ऐन्द्रं शरासनमिति इन्द्रदत्तत्वोक्तिस्तु छत्रिन्यायात्—गो. 'दत्तो मम महेन्द्रेण' इति पाठे ब्रह्मदत्तनामकः महेन्द्रेण दत्तः इति, आदौ विष्णवे ब्रह्मणा दत्तः, मह्यं महेन्द्रेण दत्त इति वाऽर्थः। 'विष्णोर्दत्तं सुरोत्तमैः' (75–13) इति किलोक्तं बालकाण्डे। † योगेन महेन्द्रपदेन वरुण एवेत्यन्ये—ति. ‡ धनुषा—धनुरादिना—गो. § शरं खड्गं च, वैष्णवाविति शेषः। वज्रं वज्रधरो यथेत्यनेन तावकं त्वमेव गृहाणेत्युक्तम्—गो.

[1] दत्तो—ङ. च. [2] एतदनन्तरं—इदं च ते तनुत्राणमभेद्यं मघवा ददौ। रणेष्वानुपमं वीर! प्रतिगृह्णीष्व मानद! जये च संशयं प्राप्य चिन्तयिष्यसि विह्वलन्। इदमुग्रं रथं दिव्यमुपनेष्यति मातलिः—इत्यधिकम्—झ.

एवमुक्त्वा महातेजाः समस्तं तद्वरायुधम् ।
[1]दत्त्वा रामाय भगवान् अगस्त्यः पुनरब्रवीत् ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्वादशः सर्गः

वरायुधं—वरस्य विष्णोः आयुधं, उत्तमायुधमित्यपि ॥ ३६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्वादशः सर्गः

---

[1] एतदनन्तरं—ङ. झ. पुस्तकयोरेवमधिकपाठो दृश्यते :—

(ततो रामं महाबाहुं महर्षिरिदमब्रवीत्—झ.) सुखं स्वप महाबाहो! ससीतः सहलक्ष्मणः । रविरस्तंगतः सौम्य ! सन्ध्याकालोऽप्युपागमत ॥ एते निशाचरा राम! निलीना मृगपक्षिणः । नगाग्रेषु भृशं लीनाः दृश्यन्ते सुसमाहिताः ॥ नैशेन तमसा व्याप्तमप्रकाशं नभःस्थलम् । एवमुक्तो महाबाहुरगस्त्येन महात्मना ॥ उपास्य पश्चिमां सन्ध्यां रामः सौमित्रिणा सह । अभिवाद्य महात्मानं अगस्त्यमृषिसत्तमम् ॥ सुष्वाप रजनीमेकां पूजितः परमर्षिणा । सुखोषितस्तदा रामः सन्ध्यामन्वास्य सानुजः ॥ कृतपूर्वाह्णिकस्तस्थौ स्नात्वा हुतहुताशनः । लक्ष्मणेन सह भ्रात्रा सीतया च परंतपः ॥ उपागच्छदमेयात्मा अगस्त्यं सूर्यवर्चसम् । स दृष्ट्वा राघवं श्रीमान् अगस्त्यः संयताञ्जलिम् ॥ प्रतिपूज्य यथान्यायमिदं वचनमब्रवीत् । कच्चित्सुखा निशा राम ! व्यतीता रघुनन्दन ॥ तव सभ्रातृभार्यस्य ममाश्रमपदे शुभे । अगस्त्येनैवमुक्तस्तु काकुत्स्थो वाक्यमब्रवीत् ॥ मानिताश्च यथान्यायं त्वया पूज्येन पूजिताः । शयनासनदानेन भोजनाच्छादनैः शुभैः ॥ राज्ञो दशरथस्यैव पुरस्यान्तःपुरे यथा । सुखोषिताः स्म भगवन् ! सर्वकामैरुपस्थिताः ॥ (उपविश्याप्यगस्त्यस्तु निषीदध्वमुवाच ह । सर्वानेवाभ्यनुज्ञाप्य ये तत्रासन् समागताः । झ.) सुखोपविष्टे रामे तु सहसीते सलक्ष्मणे । स तेन ऋषिसङ्घेन अगस्त्यो वाक्यमब्रवीत् ॥ कालोऽयं गतभूयिष्ठः यः कालस्तव राघव ! समयो यो नरेन्द्रेण कृतो दशरथेन ते ॥ तीर्णप्रतिज्ञः काकुत्स्थ ! सुखं राम ! निवत्स्यसि । धन्यस्ते जनको राम! स राजा रघुनन्दन ! यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः। एवमुक्तस्ततो रामः प्रत्युवाच कृताञ्जलिः ॥ प्रीतः प्रीततरं वाक्यं प्रत्युवाच महायशाः । धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गवः ॥ प्रीयमाणस्य सुप्रीतः नास्ति धन्यतरो मम । मया न तारितो राजा स्वगुणैरेव तारितः ॥ स्वर्गं दशरथः प्राप्तः स्वकृतैः पुण्यकर्मभिः । अयं तु देशो निखिलः सर्व एव महातपः ॥

त्रयोदशः सर्गः

[पञ्चवटीगमनम्]

***राम! प्रीतोऽस्मि, भद्रं ते, परितुष्टोऽस्मि, लक्ष्मण!**
अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ॥ १ ॥

---

* एतादृशस्थले सर्गविच्छित्तिर्नास्तीति प्रतीयते, कथाया अपर्यवसानात्—गो.

अशरण्यः शरण्योऽभूत् यथैव विनिवेशितः। तथाऽऽख्याह्यर्थतत्त्वेन परं कौतूहलं मम ॥
श्रुत्वा तु वचनं तस्य रामस्य मधुराक्षरम्। प्रत्युवाच ततो राममगस्त्यो भगवानृषिः ॥
शृणु राघव! तत्त्वेन देशस्यास्य यथातथम्। दण्डकेन परित्यक्तो ह्ययं देशो महात्मना ॥
भार्गवस्य च शापेन निर्मानुष्यमृगोऽभवत्। वृक्षगुल्मलताहीनं तापसैरपि वर्जितम् ॥
कान्तारमभवत् तात! घोरं परमदारुणम्। योजनार्धसहस्रं तु विन्ध्यपादस्तु दक्षिणः ॥
नानुवर्षति पर्जन्यः नानुवाति सुखोऽनिलः। रक्षः(रूक्षं) प्रतिभयं घोरमासीत्परमदारुणम् ॥
बहून्यब्दसहस्राणि ह्येतदासीदमानुषम्। गन्धर्वैः ऋषिसङ्घैश्च देवैश्च परिवर्जितम् ॥
कस्यचित्त्वथ कालस्य दैवयोगादहं नृप! हिमवच्छिखरात् श्वेतात् इह प्राप्तोऽस्मि मानद!
ततो मया समाहूतः पर्जन्यो जलदैः सह। स्वच्छन्दवर्षश्च कृतः कञ्चित्कालमरिन्दम!
यमस्य चैव चारास्तु बहून्यब्दशतानि वै। तेजसा मृत्युदूताश्च व्याधयश्च निराकृताः ॥
हिमवत्पादजा वृक्षाः चिन्तिता मनसाऽऽगताः। प्रवृत्ताश्च पुनर्नद्यः फुल्लपङ्कजमण्डिताः ॥
तटाकानि च रम्याणि सरितश्च सरांसि च। (नीरजस्कं सुगन्धं च सुखशीतजलानिलम्—झ.)
प्रवृद्धवनषण्डं तु स्फीतसस्यवनाकुलम् ॥ अचिरेणाभवद्रम्यं सर्षिसङ्घानुसेवितम् ॥
केवलं त्वमिशापेन तस्यैव रघुनन्दन! सोपद्रुतमिवाप्येतत् राक्षसैरुग्रकर्मभिः ॥
यदाप्रभृति चापि त्वं चित्रकूटमुपागतः। तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान् ॥
ऋषीणामभयं वीर! दातुमर्हसि मानद! अस्माद्धि कारणाद्राम! दण्डकारण्यवासिनाम् ॥
त्राणार्थमिह संप्राप्तः त्रातुमर्हसि नो भवान्। समर्थो ह्यसि काकुत्स्थ! त्रैलोक्यस्यापि रक्षणे ॥
किं पुनर्वीर! रक्षांसि द्विज(तव)मन्युहतानि वै। अयमिक्ष्वाकुपुत्रेण दण्डकेन महाबल!
देशो निराकृतो राजन्! शापदोषेण राघव! दण्डकारण्यमखिलं दर्शनादेव राघव!
शापस्यान्ताय काकुत्स्थ! प्राप्तस्त्वमरिमर्दन! स त्वमद्य पुरावृत्तैः पितृभिः सन्निराकृतम्।
(यस्य दोषादिदं राम! दण्डकारण्यमुच्यते—झ.) आश्चर्यमिदमाख्यानं देशस्यास्य यथातथम्॥

अथ अगस्त्यनियोगेन पञ्चवट्याश्रमप्राप्तिः । गमेत्यादि । लक्ष्मण! तुभ्यं च परितुष्टोऽस्मीत्यन्वयः । स्थः इति अस्तेर्लटि मध्यमद्विवचनम् ॥ १ ॥

*अध्वश्रमेण वां खेदः बाधते प्रचुरश्रमः ।
व्यक्तमुत्कण्ठते चापि मैथिली जनकात्मजा ॥ २ ॥

खेदः—दुःखं अध्वश्रमेण वां दुःखं वर्तते, प्रचुरश्रमः अध्वश्रमः, बाधते, मैथिलीमिति शेषः । अत एव इयं व्यक्तं उत्कण्ठते चापि, क्वचित् विश्रान्तिमिति शेषः ॥ २ ॥

एषा हि सुकुमारी च दुःखैश्च न विमानिता ।
प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ ३ ॥

न विमानितेति—न पीडितेति यावत् । प्राज्यः दोषः अस्मिन् तत् तथा । "प्रभूतं प्रचुरं प्राज्यं" ॥ ३ ॥

यथैषा रमते, राम! इह सीता तथा कुरु ।
दुष्करं कृतवत्येषा वने त्वामनुगच्छती ॥ ४ ॥
एषा हि प्रकृतिः स्त्रीणां आसृष्टेः, रघुनन्दन!
समस्थ[1]मनुरज्यन्ति विषमस्थं त्यजन्ति च ॥ ५ ॥
शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ।
गरुडानिलयोः शैघ्र्यं अनुगच्छन्ति योषितः ॥ ६ ॥

---

* अध्वश्रमेण—मार्गायासेन प्रचुरः श्रमः—श्रमजलं येन सः प्रचुरश्रमः खेदः वां बाधते—गो. अध्वश्रमेण खेदः वां बाधते किमिति शेषः । प्रचुरश्रमः, मैथिलीमिति शेषः—तो. वस्तुतस्तु लोकरीत्या आदरात् 'अध्वश्रमेण वां खेदः!', 'प्रचुरश्रमः वां बाधते' इति वाक्यद्वयमिति युक्तम् ॥

[1] मनुरज्यन्ति—ङ.

एषा दुष्करं कृतवतीत्येतत्प्रतिपादनशेषतया लोकव्यवहारोक्तिः—एषेत्यादि। आसृष्टेः सृष्टिमारभ्य। 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी। समस्थं—धनधान्यादिमत्तया सम्यगवस्थितमित्यर्थः। विषमस्थः—दरिद्र इति यावत्। शतह्रदानामित्यादिवचनं कैकेय्यभिप्रायेण * ॥ ५-६ ॥

†इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता।
श्लाघ्या च व्यपदेश्या च यथा [1]देवी ह्यरुन्धती ॥ ७ ॥

व्यपदेश्या—साद्भिः कीर्तनीया ॥ ७ ॥

‡अलङ्कृतोऽयं देशश्च यत्र सौमित्रिणा सह।
वैदेह्या चानया, राम! वत्स्यसि त्वमरिन्दम ॥ ८ ॥

यत्रेति। यत्रास्मिन् देशे इत्यर्थः। वत्स्यसि-वासं करिष्यसि ॥ ८ ॥

एवमुक्तः स मुनिना राघवः संयताञ्जलिः।
उवाच प्रश्रितं वाक्यं ऋषिं दीप्तमिवानलम् ॥ ९ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गवः।
गुणैः सभ्रातृभार्यस्य [2]वरदः परितुष्यति ॥ १० ॥

---

* वस्तुतस्तु—उत्सर्गोऽयम्। अत एवानन्तरश्लोके अपवादः प्रदर्श्यते। † एवं सीतायाः प्रशंसनं वक्ष्यमाणदेवबन्दीमोचनोत्साहनाय—गो. ‡ अयं देशः—आश्रम-प्रदेशः—गो'. अयं देशः—मदाश्रमरूपः आगमनमात्रेणालङ्कृतः—यत्र देशे इतः परं वत्स्यसि सोऽप्यलङ्कृतो भविष्यतीति किं वक्तव्यमित्यर्थः—ति. यत्र वैदेह्या सह निवत्स्यसि सोऽयं देशः अलङ्कृतो भविष्यतीति शेषः—रा. वस्तुतस्तु—'अध्वश्रमेण वा खेदः' (२) 'किं तु व्यादिश मे देशं' (११) 'ध्यात्वा मुहूर्तं धर्मात्मा' (१२) इत्यादि पूर्वापरपरामर्शेन, अगस्त्यः स्वाश्रमे रामनिवासाभिप्रायेणैवेदमुक्तवानिति स्वरसम्।

[1] देवेष्वरुन्धती, देवीष्वरुन्धती—ङ. ज. [2] गुरुर्नः—ङ. ज.

किं तु व्यादिश मे देशं सोदकं * बहुकाननम् ।
यत्राश्रमपदं कृत्वा वसेयं निरतः सुखम् ॥ ११ ॥

किं तु व्यादिशेति । अस्मिन् त्वदधिष्ठितदेशे वत्स्यामीत्येव, अथापि उदकादिसौकर्ययुतदेशं मे व्यादिश ॥ ११ ॥

ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य तद्वचः ।
ध्यात्वा मुहूर्तं धर्मात्मा [1] धीरो धीरतरं वचः ॥ १२ ॥

ध्यात्वेति–वासोचितदेशमित्यर्थः ॥ १२ ॥

इतो द्वियोजने, तात! बहुमूलफलोदकः ।
देशो बहुमृगः श्रीमान् पञ्चवट्यभिविश्रुतः ॥ १३ ॥
[2] तत्र गत्वाऽऽश्रमपदं कृत्वा सौमित्रिणा सह ।
[3] रंस्यसे त्वं, पितुर्वाक्यं यथोक्तमनुपालयन् ॥ १४ ॥

पञ्चानां वटानां समाहारः पञ्चवटी, तदुपलक्षितत्वात् पञ्चवटीत्यभिविश्रुतः तथा ॥ १४ ॥

---

* अगस्त्याश्रमात् बहुदूरदेशः अपेक्ष्यते । अगस्त्याश्रमः खलु स्थलीप्रायवनोद्देशे आसीत् (11–38)। रक्षसां निर्मूलनस्य चिकीर्षितत्वेन, अगस्त्याश्रमप्रान्ते भयात् राक्षसैरनागमनेन, मनुष्यसञ्चाररहितं स्थानं विवक्षितम् । अत एव अगस्त्योऽपि 'ध्यात्वा मुहूर्तं' 'तपसश्च प्रभावेन' इत्यादि वदति ॥

[1] ततोवाच वचश्शुभम्–ङ. [2] एतदनन्तरं–'वैदेह्या चानया राम वत्स्यसि त्वमरिंदम' इत्यधिकं–ङ. [3] एतदनन्तरं–काल ऽयं गतभूयिष्ठः यः कालस्तव, राघव! समयो यो नरेन्द्रेण कृतो दशरथेन ते। तीर्णप्रतिज्ञः, काकुत्स्थ! सुखं राज्ये निवत्स्यसि । धन्यस्ते जनको, राम! स राजा, रघुनन्दन! यस्त्वया ज्येष्ठपुत्रेण ययातिरिव तारितः ॥ इत्यधिकं–ङ. ञ. झ.

विदितो ह्येष वृत्तान्तः मम सर्वः तवानघ!
तपसश्च प्रभावेन * स्नेहात्, दशरथस्य च ॥ १५ ॥

एष वृत्तान्तः इति। पितुर्वचनपरिपालनाय वनवासवृत्तान्त इत्यर्थः। स्नेहादिति। स्नेहात् विचिचायिषितो वृत्तान्तश्च तपसः प्रभावेन विदितः इत्यन्वयः। दशरथस्य चेति। वरदानादिमरणान्तो वृत्तान्तश्च विदितः इत्यनुकर्षः ॥ १५ ॥

† हृदयस्थश्च ते छन्दः विज्ञातस्तपसा मया।
[1] इह वासं प्रतिज्ञाय मया सह तपोवने ॥ १६ ॥
अतश्च त्वामहं ब्रूमि गच्छ पञ्चवटीमिति।

ते हृदयस्थः छन्दोऽपि मया विज्ञातः इति ऋषेः अनपराधेन अग्निकल्पस्यास्य अपराधपरिहाराय आसन्नदेश एव स्थातव्यमित्येवंरूपं अभिप्रायं जानामि। अत एव इह मया सहवासं प्रतिज्ञाय—अलङ्कृतश्च देशोऽयमित्यादि वचनेन अनुज्ञाय स्थितेनापि मया त्वदाशयानुरोधेन अद्य पञ्चवटीं गच्छेत्यपि ब्रूमि, ईडभावः आगमानित्यत्वात् ॥ १६ ॥

स हि रम्यो वनोद्देशः मैथिली तत्र रंस्यते ॥ १७ ॥
स देशः श्लाघनीयश्च नातिदूरे च, राघव!
गोदावर्याः समीपे च मैथिली तत्र रंस्यते ॥ १८ ॥

---

* तपःप्रभावेण पर्यालोचनकरणे निमित्तमाह—स्नेहादिति—गो. † अलङ्कृतोऽयं देशश्च' इति मयेह वासे प्रस्तुते 'किं तु व्यादिश मे देशं' इति त्वदुक्तया चेत्यर्थः। अभिप्रायवेदनकार्यमाह—इहेति। यस्मात् त्वदभिप्रायो मया विदितः, अतो हेतोः इह तपोवने मया सह वासं प्रतिज्ञाय—अनुज्ञाय, तदनन्तरमेव त्वां 'पञ्चवटीं गच्छ' इति ब्रूमि—गो.

[1] एतदनन्तरं—वसन्तं त्वां जनास्सर्वे ज्ञास्यन्ति रघुनन्दन—इत्यधिकम्—ङ.

प्राज्यमूलफलश्चैव नानाद्विजगणायुतः ।
विविक्तश्च, महाबाहो ! पुण्यो रम्यस्तथैव च ॥ १९ ॥
भवानपि *[1] सदाचारः शक्तश्च परिरक्षणे ।
अपि चात्र वसन्, राम ! तापसान् पालयिष्यसि ॥ २० ॥

परिरक्षण इति । तापसानामिति शेषः । भवानपीत्यपिशब्देन स्वीयं तापसरक्षणसामर्थ्यं आवेदितम् । अपि चात्रेति । पञ्चवट्याश्रमे इत्यर्थः ॥ २० ॥

एतदालक्ष्यते, वीर ! मधूकानां महद्वनम् ।
उत्तरेणास्य गन्तव्यं न्यग्रोधमभि गच्छता † ॥ २१ ॥
ततः ‡ स्थलमुपारुह्य पर्वतस्याविदूरतः ।
ख्यातः पञ्चवटीत्येव नित्यपुष्पितकाननः ॥ २२ ॥

अस्योत्तरेण गन्तव्यमिति । अस्येति । मधुकवनस्येत्यर्थः । न्यग्रोधं अभि–उद्दिश्य गच्छता त्वया स्थलमुपारुह्य—निर्वणं देशं प्राप्य ततः पश्चात् कस्यचित् पर्वतस्य अविदूरतः पञ्चवटीत्येवान्वर्थ-नामतया ख्यातः नित्यपुष्पितकाननोद्देशो भवतीति शेषः ॥ २२ ॥

अगस्त्येनैवमुक्तस्तु रामः सौमित्रिणा सह ।
सत्कृत्यामन्त्रयामास तमृषिं सत्यवादिनम् ॥ २३ ॥

सत्कृत्य–प्रदक्षिणनमस्कारादिलक्षणं सत्कारं कृत्वा ॥ २३ ॥

---

* सदारश्चेति पाठे–सदारोऽपि परिरक्षणे शक्तः इत्यर्थः । † अत्र न्यग्रोधमिति पञ्चवटी वा विवक्षिता । 'न्यग्रोधो बहुपाद्वटः' इत्यमरः । पञ्चवटीमुद्दिश्य गच्छता एतन्मधूकवनस्योत्तरेण गन्तव्यमित्यर्थः । ‡ स्थलं–समभूमिं–रा.

[1] सदारश्च–ङ. ज.

तौ तु तेनाभ्यनुज्ञातौ कृतपादाभिवन्दनौ ।
[1]तदाश्रमात् पञ्चवटीं जग्मतुः सह सीतया ॥ २४ ॥
गृहीतचापौ तु नराधिपात्मजौ
*[2]विषक्ततूणी समरेष्वकातरौ ।
यथोपदिष्टेन पथा महर्षिणा
प्रजग्मतुः पञ्चवटीं समाहितौ ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रयोदशः सर्गः

विषक्ते तूणी ययोः तौ विषक्ततूणी । अत्र पूर्वपदस्य पुंवद्भावः, उत्तरपदस्य 'गोस्त्रियोः' इति ह्रस्वे द्विवचने सति, 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घः ॥ २५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रयोदशः सर्गः

चतुर्दशः सर्गः

[जटायुस्सङ्गमः]

अथ पञ्चवटीं गच्छन् अन्तरा रघुनन्दनः ।
आससाद महाकायं गृध्रं भीमपराक्रमम् ॥ १ ॥

अथ पञ्चवटीं प्रयातस्य मध्येमार्गं जटायुस्सङ्गमः । अथ पञ्चवटीमित्यादि । अन्तरा—मध्ये ॥ १ ॥

---

* विषक्ततूणौ—अकारान्तोऽपि तूणशब्दः—गो.

[1] तमाश्रमं—ङ. ज. [2] विषक्ततूणौ—ङ.

तं दृष्ट्वा तौ महाभागौ [1] वटस्थं रामलक्ष्मणौ ।
*मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति ॥ २ ॥

तं पक्षिं–पक्षिणमिति यावत् । राक्षसं मेनाते–विज्ञातवन्तौ । अथ तं पक्षिं राक्षसं ब्रुवाणौ तौ, को भवान्? इति पप्रच्छतुरिति शेषः ॥ २ ॥

स तौ मधुरया वाचा [2] सौम्यया प्रीणयन्निव ।
उवाच, वत्स! मां विद्धि वयस्यं पितुरात्मनः ॥ ३ ॥

आत्मनः पितुरिति–रामस्य तव पितुरित्यर्थः ॥ ३ ॥

स तं पितृसखं [3] बुद्ध्वा पूजयामास राघवः ।
स तस्य कुलमव्यग्रं †अथ पप्रच्छ नाम च ॥ ४ ॥

अथ तस्येति–पक्षिण इत्यर्थः ॥ ४ ॥

रामस्य वचनं श्रुत्वा ‡[4] सर्वभूतसमुद्भवम् ।
आचचक्षे द्विजस्तस्मै [5] कुलमात्मानमेव च ॥ ५ ॥

रामस्य वचनं श्रुत्वेति–वंशनामप्रश्नविषयकं वचनमित्यर्थः । आत्मानं–आत्मनाम चेत्यर्थः । सर्वभूतसमुद्भवं आचचक्षे इति प्रसङ्गादिति शेषः । आत्मानं–आत्मना वेत्यर्थः ॥ ५ ॥

---

* को भवानिति ब्रुवाणौ–पृच्छन्तौ तौ तं पक्षिं राक्षसं मेनाते–इति वाऽन्वयः । प्रश्नभावनयोः समकालत्वात्, राक्षसत्वसंशयस्य पाश्चात्यत्वाद्वा एवमुक्तिः । † अपितृसखत्वज्ञानात् अव्यग्रं–अनाकुलं यथा तथा पप्रच्छ । ‡ सर्वभूतसमुद्भवं–सृष्टिप्रकारमिति यावत् ।

[1] वनस्थं–ङ. ज. [2] स्निग्धया–ङ. [3] मत्वा–ङ. ज. [4]–[5] पादयोर्विपरिणामः–ङ. ञ.

पूर्वकाले, महाबाहो! ये प्रजापतयोऽभवन्।
तान्मे निगदतः सर्वान् आदितः शृणु, राघव! ॥ ६ ॥

पूर्वकाल इति। भगवतो विराजो ब्रह्मणः अहरादिसर्गकाले इत्यर्थः। तानिति–प्रजापतीनित्यर्थः ॥ ६ ॥

*कर्दमः प्रथमस्तेषां [1]विक्रीतस्तदनन्तरः।
शेषश्च [2]संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥ ७ ॥
स्थाणुर्मरीचिरत्रिश्च क्रतुश्चैव महाबलः।
पुलस्त्यश्चाङ्गिरश्चैव प्रचेताः पुलहस्तथा ॥ ८ ॥
दक्षो विवस्वानपरोऽरिष्टनेमिश्च, राघव।
काश्यपश्च महातेजाः तेषामासीच्च पश्चिमः ॥ ९ ॥

विराजः कारणप्रजापतेः यज्ञाख्यमूलविद्यायाः एकैकाक्षर-प्राधान्यजाः सप्तदश प्रजापतयः कर्दमाद्याः ॥ ७-९ ॥

प्रजापतेस्तु दक्षस्य बभूवुरिति [3]विश्रुतम्।
षष्टिर्दुहितरो राम! यशस्विन्यः, महायशः! ॥ १० ॥

षष्टिः दुहितरः बभूवुरित्यन्वयः। महायशः इति रामसंबुद्धिः ॥

[4]काश्यपः प्रतिजग्राह तासामष्टौ †सुमध्यमाः[5]।
अदितिं च दितिं चैव [6]दनुमप्यथ कालिकाम् ॥ ११ ॥

---

*कर्दमाद्याः सप्तदश प्रजापतयः–ति. सप्तदशः पश्चिमः–पश्चाज्जातः कश्यप आसीत्–रा. अरिष्टनेमिरिति कश्यपविशेषणम्–गो. †अष्टावित्युपलक्षणम्, 'कश्यपाय त्रयोदश' इत्यन्यत्रोक्तेः, वक्ष्यमाणसन्तानोपयोगिन्योऽष्टाविति वा–ति. यद्यपि 'कश्यपाय त्रयोदश' इति भागवतेनेदं विलुप्यते, तथापि वक्ष्यमाणवंशोपयोगिनीत्वेन अष्टावेवात्र विवक्षिता इति न तद्विरोधः–रा.

[1] विश्रुत–विकृत–ङ. ज. [2] संश्रित–ङ. [3] विश्रुतः, नः श्रुतः–ङ. [4] कश्यपः–ज. [5] एतदनन्तरं–'अङ्गिरास्त्वपरा राम कन्याः प्रत्यग्रहीत्तदा' इत्यधिकम्–रा. [6] दनूमपि च–ङ.

ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि ।
दक्षकन्यानां काश्यपपत्नीनां सप्तानां नामानि अदितिमित्यादि॥

तास्तु कन्याः ततः प्रीतः[1] काश्यपः पुनरब्रवीत् ॥ १२ ॥
पुत्रान् त्रैलोक्यभर्तॄन् वै जनयिष्यथ मत्समान् ।
*अदितिस्तन्मनाः, राम ! दितिश्च, [2] मनुजर्षभ ! ॥
कालिका च, महाबाहो ! शेषास्त्वमनसोऽभवन् !
तन्मनौ इति । तत्सदृशोर्ध्वस्रोतःपुत्रोत्पादनाभिलाषवतीत्यर्थः ॥

†अदित्यां जज्ञिरे देवाः त्रयस्त्रिंशदरिन्दम ! ॥ १४ ॥
आदित्या वसवो रुद्रा ह्यश्विनौ च, परन्तप ।
अश्विनौ चेति । आहत्य त्रयस्त्रिंशत् ॥ १४ ॥

दितिस्त्वजनयत् पुत्रान् दैत्यांस्तात ! यशस्विनः ॥
तेषामियं वसुमती पुराऽऽसीत् सवनार्णवा ।
तेषामिति । दितिपुत्राणामित्यर्थः । वनैः अर्णवैश्च सहिता सवनार्णवा ॥ १५ ॥

दनुस्त्वजनयत् पुत्रं अश्वग्रीवमरिन्दम ! ॥ १६ ॥

---

*तन्मनाः – तद्वचनदत्तावधाना–गो. तन्मनाः – कश्यपोक्तिविषयकप्रीतिमती अभवत् । शेषास्तु अमनसः – तदुक्तिविषयकप्रीत्यभाववत्यः अभवन् । एतेन तासां पुत्रेषु न प्रीतिरिति ध्वनितम्, अत एवासां कन्यैव वंशो वक्ष्यते–रा. †भर्तृवचनादरानादरफले दर्शयति—अदित्यामित्यादिना–गो.

[1] कश्यपः–ङ. ज. [2] मनुरेव च–ङ. दनुरेव च–ज.

नरकं [1] कालकं चैव [2] कालिकाऽपि व्यजायत ।
क्रौञ्चीं [3] भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीम् ॥ १७ ॥
[4] ताम्राऽपि सुषुवे कन्याः पञ्चैता लोकविश्रुताः ।

ताम्रापुत्रीणां क्रौञ्चयादीनां सन्तानोपदेशः—क्रौञ्चीमित्यादि ॥

उलूकान् जनयत् क्रौञ्ची भासी भासान् व्यजायत ॥ १८ ॥
श्येनी श्येनांश्च गृध्रांश्च व्यजायत सुतेजसः ।
धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ॥ १९ ॥
चक्रवाकांश्च, * भद्रं ते, विजज्ञे सापि भामिनी ।
शुकी नतां विजज्ञे तु नताया विनता सुता ॥ २० ॥

चक्रवाकांश्च भद्रं ते इति । संबोधनायाश्च मध्ये 'भद्रं ते' इति प्रयोगः कवेः शैली सर्वत्र । हे राम ! ते भद्रमस्तु, शृणु इति शेषः । शुकी—पञ्चमी ताम्रापुत्री नतारूयां विजज्ञे । अन्तर्भावितणिः । जनयति स्म ॥ २० ॥

[5] दश क्रोधवशा, राम ! विजज्ञे ह्यात्मसंभवाः ।
मृगीं च मृगमन्दां च हरिं भद्रमदामपि ॥ २१ ॥
[6] मातङ्गीमपि शार्दूलीं श्वेतां च सुरभिं तथा ।
सर्वलक्षणसंपन्नां सुरसां कद्रुकामपि ॥ २२ ॥

क्रोधवशा तु काश्यपषष्ठपत्नी । तस्याः दशापत्यान्याह—मृगीं चेत्यादि ॥ २२ ॥

---

* अप्रसक्तवृत्तान्तानादरप्रतिषेधाय मध्ये 'भद्रं ते' इत्युक्तिः—गो.

[1] कालिकं—ङ. [2] कालका—ङ. ज. [3] हंसीं—ङ. [4] नाम्रा तु—ङ.
[5] ततः क्रोशवशा—ङ. [6] मातङ्गा—ङ.

अपत्यं तु मृगाः सर्वे मृग्याः, नरवरोत्तम !
ऋक्षाश्च मृगमन्दायाः सृमराः चमरास्तथा ॥ २३ ॥
हर्याश्च हरयोऽपत्यं वानराश्च [1] तरस्विनः ।

सृमराः–(செவரிமான்) । चमराः–(சாமரமான்) हरयः–सिंहाः ॥ २३ ॥

ततस्त्वरावतीं नाम जज्ञे भद्रमदा सुताम् ॥ २४ ॥
तस्यास्त्वैरावतः पुत्रः लोकनाथो महागजः ।
मातङ्गास्त्वथ मातङ्ग्याः अपत्यं मनुजर्षभ ! ॥ २५ ॥
गोलाङ्गूलांश्च शार्दूली व्याघ्रांश्चाजनयत् सुतान् ।
दिशागजांश्च, काकुत्स्थ ! श्वेताप्यजनयत् सुतान् ॥

गोलाङ्गूलः–(மூசுறு) ॥ २६ ॥

ततो दुहितरौ, राम! सुरभिः द्वे व्यजायत ।
रोहिणीं नाम, भद्रं ते, गन्धर्वीं च यशस्विनीम् ॥ २७ ॥
रोहिण्यजनयत् [2] गा वै गन्धर्वी वाजिनः सुतान् ।
सुरसाजनयन्नागान् *, राम ! कद्रूस्तु पन्नगान् ॥ २८ ॥

रोहिणी गाः अजनयत् । नागाः–निर्विषोरगविशेषाः । पन्नगाः–सर्पाः वासुक्यादयः ॥ २८ ॥

मनुर्मनुष्यान् जनयत्, [3] राम! पुत्रान् यशस्विनः ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्च, मनुजर्षभ ! ॥ २९ ॥

---

* नागाः–बहुफणाः सर्पाः, पन्नगाः–केवलसर्पाः–गो. ती.

[1] तपस्विनः–ज. [2] गावः–ङ. ज. [3] काश्यपस्य महात्मनः–ङ.

[1]मुखतो ब्राह्मणा जाताः *[2]उरसः क्षत्रियास्तथा।
[3]ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा [4]इति श्रुतिः ॥ ३० ॥
सर्वान् †[5]पुण्यफलान् वृक्षान् अनलोऽपि व्यजायत[6]।

मनुष्यान् जनयदिति। अजनयदिति यावत्। वृक्षान् अनलोऽपि व्यजायतेत्यन्तेन दक्षसुतानां अष्टानां काश्यपपत्नीनां सन्तानानि उक्तानि ॥ ३० ॥

विनता च शुकीपौत्री कद्रूश्च सरसा स्वसा।
‡[7]कद्रूर्नागं सहस्रास्यं विजज्ञे धरणीधरम् ॥ ३१ ॥
द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च।
तस्माज्जातोऽहमरुणात् संपातिस्तु ममाग्रजः ॥ ३२ ॥
जटायुरिति मां विद्धि श्येनीपुत्रं, अरिन्दम!

अथ स्ववंशप्रदर्शनायाह—विनता चेत्यादि। शुकीपौत्रीति। शुकी नतापुत्री, तस्याश्च विनता पुत्रीत्युक्तत्वात्। कद्रूश्च सुरसा-स्वसेति, उभे अपि ताम्रायाः इति शेषः। कद्रूः नागमिति। पन्नग-

---

* उरसः—बाहुमध्यात्। क्वचित्तु 'बाहुभ्यां' इति पाठः—ति. † पुण्यफलान्—पाकफलान्। 'पिण्डफलान्' इति पाठे पिण्डाकारफलानित्यर्थः—गो. ‡ अत्र कद्रूा उपादानं स्वप्रतिपक्षकुलत्वेनेति केचित्। वस्तुतस्तु धरणीधरशेष-सर्पकत्वेन स्वकुलतुल्यत्वं वक्तुं 'कद्रूर्नागं सहस्रास्यं विजज्ञे धरणीधरम्' इत्युक्तम्। श्येनीपुत्रमिति। श्यं च श्येनीं पूर्वोक्ताया अन्या। यद्वा काश्यपसुता श्येनीमाता, काश्यपस्य पञ्चमोऽरुणः, पिता काश्यपप्रजापतिः कूटस्थ इति स्वीयवंशप्रभावो निवेदितः। विभिन्नपत्योः तिर्यङ्क्ष्वभावात् न मातृपुत्रयोः एकवंश्यत्वादिदोषः। अयं च सृष्टिक्रमः वैवस्वतमन्वन्तरप्रकारः, अतो न पुराणान्तरविरोधः—गो.

[1] अयं श्लोकः कुण्डलितः—ङ. [2] शिरसः—ङ. [3] बाहुभ्यां—ङ. [4] इति श्रुतिः—ङ. [5] पिण्डफलान्—ङ. [6] एतदनन्तरं—'जज्ञे, राम! महाबाहो! तान् सर्वान् महीरुहान्'—इत्यधिकं—ङ. [7] कद्रूर्नागसहस्रं च—ङ.

मिति यावत्। कद्रूस्तु पन्नगानिति विशिष्योक्तत्वात्। श्येनीपुत्रं, श्येनी तु ताम्राया: काश्यपपञ्चमपत्न्याः पुत्री। ननु श्येनी शुक्र्यौ तु ताम्रापुत्र्यौ भगिन्यौ, शुकीपौत्र्यास्तु सुतः अरुणः, तस्य कथं श्येनी भार्या? उच्यते—श्येनीसन्तानपरम्परापतिता काचन श्येनी भविष्यतीत्यदोषः। विधिनिषेधयोः मनुष्याधिकारत्वाच्च अदोषः ॥ ३२ ॥

सोऽहं [1] वाससहायस्ते भविष्यामि यदीच्छसि ॥ ३३ ॥
इदं दुर्गं हि कान्तारं मृगराक्षससेवितम्।
सीतां च, तात! रक्षिष्ये *त्वयि याते सलक्ष्मणे ॥ ३४ ॥

वाससहाय इति। वासस्थले सीतायाः रक्षणे सहायभूतः इति यावत्। यदीच्छसीति। उक्तार्थमिति शेषः। सीतारक्षणे स्वस्याप्युपकारमाह—इदं दुर्गमित्यादि। त्वयि यात इति। श्राद्धाय मृगयादिप्रयोजनाय आश्रमादिति शेषः ॥ ३४ ॥

जटायुषं तं प्रतिपूज्य राघवः
मुदा परिष्वज्य च सन्ननोऽभवत्।
पितुर्हि शुश्राव सखित्वमात्मवान्
जटायुषा संकथितं पुनः पुनः ॥ ३५ ॥
†स तत्र [2] सीतां परिदाय मैथिलीं
सहैव तेनातिबलेन पक्षिणा।

---

*सलक्ष्मणे त्वयि याते–कन्दमूलाद्यर्थं क्वचिद्गते सति सीतां रक्षिष्ये इत्यर्थः। अनेन जटायुषः त्रिकालज्ञत्वं सूचितम्–रा. †सः–राघवः मैथिलीं सीतां परिदाय–जटायुषः परिपाल्यत्वेन स्वीकृत्य–रा. परिधाय–परिवार्य–ती. तत्र परिदाय–तदानीमेव न्यासीकृत्येति भावः। पितृसखत्वात् स्नुषायाः श्वशुर इव तस्मिन् न्यासीकृत्येति यावत्।

[1] राम–ङ. [2] रामः परिदाय मैथिलीं, सीतां परिधाय मैथिलीं, सीतासहितो रघूत्तमः–ङ.

जगाम तां पञ्चवटीं सलक्ष्मणः
रिपून् दिधक्षन् [1]शलभानिवानलः ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चतुर्दशः सर्गः

सीतां परिदायेति । रक्षणार्थमिति शेषः । ताल(३६)मानः सर्गः ॥ ३६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुर्दशः सर्गः

पञ्चदशः सर्गः

[पञ्चवटीनिवासः]

ततः पञ्चवटीं गत्वा नानाव्यालमृगायुताम् ।
उवाच भ्रातरं रामः सौमित्रिं *दीप्ततेजसम् ॥ १ ॥

अथ पञ्चवट्यां आश्रमनिर्माणपूर्वं वासः । ततः पञ्चवटीमित्यादि । "व्यालः श्वापदसर्पयोः" । मृगाः—हरिणादयः ॥ १ ॥

आगताः स्म यथोद्दिष्टं [2]यं देशं मुनिरब्रवीत् ।
अयं पञ्चवटीदेशः सौम्यः पुष्पित[3]पादपः ॥ २ ॥

यं देशममुं मुनिरब्रवीत् यथोद्दिष्टं तं देशमिति योजना ॥ २ ॥

सर्वतः चार्यतां दृष्टिः कानने, निपुणो ह्यसि ।

दृष्टिः चार्यतामिति—प्रेक्ष्यतामिति यावत् । निपुणः इति । आश्रमोचितस्थलपरिज्ञान इति शेषः ॥ २ १/२ ॥

---

*दीप्ततेजसं सौमित्रिं प्रति 'रामं दशरथं विद्धि' इति सुमित्रानियोगेन रामकैङ्कर्योचितदेशलाभेन सन्तुष्टमित्यर्थः—गो.

[1] सवनानि पालयन्—ङ., च. [2] अमुं देशं महर्षिणा—ङ. [3] काननः—ङ

आश्रमः कतरस्मिन् नः देशे भवति संमतः ॥ ३ ॥
रमते यत्र वैदेही त्वमहं चैव, लक्ष्मण !
तादृशो दृश्यतां देशः संनिकृष्टजलाशयः ॥ ४ ॥
* वनरामण्यकं यत्र स्थलरामण्यकं तथा ।
संनिकृष्टं च यत्र स्यात् समित्पुष्प[1]कुशोदकम् ॥ ५ ॥
वनस्य रामण्यकं रमणीयता तथा ॥ ५ ॥

एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः ।
† सीतासमक्षं काकुत्स्थं इदं वचनमब्रवीत् ॥ ६ ॥
संयताञ्जलिरिति–बद्धाञ्जलिपुटः इति यावत् ॥ ६ ॥

परवानस्मि, काकुत्स्थ ! ‡ त्वयि वर्षशतं स्थिते ।
स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७ ॥
त्वयि वर्षशतं स्थित इति । चिरकालं भूष्णौ सतीत्यर्थः ॥ ७ ॥

सुप्रीतः तेन वाक्येन लक्ष्मणस्य [2]महात्मनः ।
[3]विमृशन् रोचयामास देशं सर्वगुणान्वितम् ॥ ८ ॥

---

* वनरामण्यकं कुसुमामिलाषिण्याः सीताया रतिहेतुः । स्थलरामण्यकं सुखशयनादिकाङ्क्षिणो रामस्य । सन्निकृष्टसमिदादिमत्त्वं शुश्रूषमाणस्य सौमित्रेः–गो. † 'न च सीता त्वया हीना न चाहमपि, राघव! मुहूर्तमपि जीवावः जलान्मत्स्याविवोद्धृतौ ।' इति आत्मनः सीतावत् पूर्णशेषत्वानुसन्धानसूचनायेदम् । ‡ त्वयि वर्षशतं स्थित इति शतशब्द आनन्त्यवचनः, सार्वकालिकं मम पारतन्त्र्यमिति भावः । एवं पारतन्त्र्यस्यैव मत्स्वरूपत्वेन तदनुकूलतया त्वया आज्ञापनं कर्तव्यमित्याह—स्वयमिति–गो. त्वयि स्थिते सत्यहं परवानस्मि । अतः स्वयमेव रुचिरे देशे 'क्रियतां पर्णशाला' इति शेषः । इति वर्षशतमनेकखण्डविस्तारकं मां वद–रा.

[1] जलोदकं–ङ्क. [2] महाद्युतिः–ङ. [3] सदृशं–ङ्क.

इदं वचनं चिरकालं स्वस्य शुश्रूषासिद्धिप्रार्थनहेतुत्वेन विमृशन्–पर्यालोचयन् ॥ ८ ॥

स तं रुचिरमाक्रम्य* देशमाश्रमकर्मणि ।
[1]हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ ९ ॥

हस्तेन–स्वहस्तेन, हस्ते–लक्ष्मणस्य हस्तप्रदेशे इत्यर्थः । अयं भावः स्नेहस्यान्तरङ्गस्य स्वामिभावस्य च प्रदर्शकः ॥ ९ ॥

अयं देशः समः श्रीमान् पुष्पितैः तरुभिः वृतः ।
इहाश्रमपदं, [2]सौम्य ! यथावत् कर्तुमर्हसि ॥ १० ॥
†इयमादित्यसङ्काशैः पद्मैः सुरभिगन्धिभिः ।
अदूरे दृश्यते [3]रम्या पद्मिनी पद्म[4]शोभिता ॥ ११ ॥

आदित्यसङ्काशैः–तद्वत् ज्वलनैः । पद्मशोभिता पद्मया–श्रिया शोभिता–विराजमाना ॥ ११ ॥

यथाख्यातमगस्त्येन मुनिना भावितात्मना ।
इयं गोदावरी रम्या पुष्पितैः तरुभिर्वृता ॥ १२ ॥

---

* आक्रम्य–स्वीयत्वेनाभिमन्य–गो. परिक्रम्येति वा । † आदित्यसंकाशैः–सूर्यसदृशैः, रक्तैरित्यर्थः । पद्मशोभिता–नीलकमलादिभिः शोभिता–रा. आदित्यसंकाशैः–आदित्यविकसितैः, तद्वदुज्वलैर्वा, ' तुलसीकाननं यत्र यत्र पद्मवनानि च । वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः ' इत्युक्तरीत्या नित्यसन्निहितहरिमिरिति वा, पद्मया शोभिता–पद्मशोभिता, ' ङ्याप्नोः संज्ञाछन्दसोः ' इति ह्रस्वः, हरिसान्निध्येन तन्नित्यानपायिन्या श्रिया च युक्तेत्यर्थः–गो. पद्मैः–रक्तपद्मैः, पद्मसेविता–श्वेतपद्मयुक्ता–ती. पद्मशोभिता पद्मिनी आदित्यसंकाशैः सुरभिगन्धिभिः पद्मैः रम्या अदूरे दृश्यते इति वा । आदौ पद्मशोभितेति सामान्यतो गृहीता पद्मिनी–विशिष्यानिरूपणेन रूपसौगन्ध्यादिभिः रम्या दृश्यत इति–वाचः प्रवृत्तिः स्यात् ।

[1]हस्तौ–ङ्. [2]रम्यं–ङ्. पुण्या–ज. [4]सेविता–ङ्.

हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ।
*नातिदूरे न चासन्ने मृगयूथनिपीडिता ॥ १३ ॥

यथा आख्यातं तथा इयं गोदावरी दृश्यते इति अविपरिणामेनान्वयः । मृगयूथनिपीडितेति । निबिडेति यावत् । पानार्थमागतैरिति शेषः ॥ १३ ॥

मयूरनादिता रम्याः प्रांशवो बहुकन्दराः ।
दृश्यन्ते गिरयः, [1]सौम्य ! [2]फुल्लैः तरुभिरावृताः ॥ १४ ॥

प्रांशवः—उन्नताः । फुल्लैः, 'अनुपसर्गात् फुल्ल' इति निपातितः ॥

†सौवर्णैः राजतैः ताम्रैः देशे देशे च धातुभिः ।
गवाक्षिता इवाभान्ति गजाः परमभक्तिभिः ॥ १५ ॥

सौवर्णैरिति । सुवर्णादिभिरिति यावत् । गवाक्षिता इति । (चिता इति ?) भक्तिभिः गवाक्षिता गजा इवेत्यन्वयः । भक्तयः—अलङ्कारविशेषाः ॥ १५ ॥

‡सालैः तालैः तमालैश्च खर्जूरपनसाम्रकैः ।
नीवारैः [3]तिमिशैश्चैव पुन्नागैश्चोपशोभिताः ॥ १६ ॥
चूतैरशोकैः तिलकैः चम्पकैः केतकैरपि ।
पुष्पगुल्मलतोपेतैः तैस्तैः तरुभिरावृताः ॥ १७ ॥

---

* अस्याः गोदावर्या गिरिभिश्चान्वयः काकाक्षिन्यायात् । मृगेत्यादि गिरिविशेषणम्—गो. तीर्थदृश्यापि नातिदूरेत्यादिपादत्रयमेकं वाक्यम् । †सुवर्णादिसदृशैः धातुभिः उपलक्षिताः गजाः गवाक्षिता इवाभान्ति । गजानां हि गवाक्षाकाराः भक्तीः कुर्वन्ति—गो. सौवर्णादिधातुभिरुपलक्षिताः गिरयः परमभक्तिभिः—नीलपीतादिवर्णरचनाभिः गवाक्षिताः—चित्रिताः, अलकृता इति यावत्, गजा इवाभान्ति—ती. ‡सालादिभिरुपलक्षिता गिरयो दृश्यन्त इत्यन्वयः ।

[1] सौम्याः—ङ. ञ. [2] पुष्पितैस्तरुभिर्वृताः—ङ. [3] तिनिशैः—ङ. ञ.

चन्दनैः स्पन्दनैः नीपैः [1] पर्णासैः लिकुचैरपि ।
धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥ १८ ॥

खर्जूरः–(பேரசை), नीवारः–(கடம்பை), पुन्नागः–(புன்னை), स्पन्दनः–तिमिशभेदः । नीपः–(கடம்பை), पर्णासः–पिणिज्जकः । लिकुचः–"लकुचो लिकुचो डहुः" । धवः–(ஞமை), अश्वकर्णः–सर्जः–(மூள்முருது) ॥ १८ ॥

इदं पुण्यं इदं [2] मेध्यं इदं बहुमृगद्विजम् ।
इह वत्स्यामि, सौमित्रे! सार्धमेतेन पक्षिणा ॥ १९ ॥

एतेन पक्षिणेति–जटायुषेति यावत् ॥ १९ ॥

एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
* अचिरेणाश्रमं भ्रातुः चकार सुमहाबलः ॥ २० ॥
† पर्णशालां सुविपुलां तत्र [3] सङ्घातमृत्तिकाम् ।
सुस्तम्भां मस्करैः दीर्घैः कृतवंशां सुशोभनाम् ॥ २१ ॥
शमीशाखाभिरास्तीर्य दृढपाशावपाशिताम् ।
कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥ २२ ॥
समीकृत [4] तलां रम्यां चकार लघुविक्रमः [5] ।
निवासं राघवस्यार्थे [6] प्रेक्षणीयमनुत्तमम् ॥ २३ ॥

सङ्घातमृत्तिकाः–भित्त्यात्मना सङ्घाता मृत्तिका यस्यां सा तथा । मस्कराः–वेणवः । कृतवंशां कृतवंशपरिक्षेपवतीम् । शमीशाखाभि-

---

* आश्रमं–अङ्गणादि विस्तारवदाश्रमप्रदेशम्–गो. † तत्र–आश्रमप्रदेशे पर्णशालां–तदर्थं–पर्णशालारूपं निवासं चकारेत्यन्वयः–गो. आश्रमकरणप्रकारमाह– पर्णशालामित्यादिभिः । पर्णशालां, तत्र राघवस्यार्थे–राघवस्थित्यर्थं–निवासं च चकार–रा.

[1] पनसैः–ङ. ज. [2] रम्यं–ज. [3] संघात–ङ. [4] वर्त्म–झ. [5] शमीशाखेत्यादिभेदत्रयं झ पुस्तके नास्ति. [6] चकार लघुविक्रमः–झ.

रास्तीर्येति । तिर्यग्वंशपरिक्षेपोपरीति शेषः । तदान्तरैः दृढपाशैरव-पाशिताम्—संजातपाशबन्धां कृत्वेत्यर्थः । काशः—(காணல்), शरः—(கொற்கை) ॥ २३ ॥

स गत्वा लक्ष्मणः श्रीमान् नदीं गोदावरीं तदा।
स्नात्वा पद्मानि चादाय *[1] सफलः पुनरागतः ॥ २४ ॥

स गत्वेति । एवं संपादनानन्तरमिति शेषः ॥ २४ ॥

ततः †[2] पुष्पबलिं कृत्वा शान्तिं च स यथाविधि।
दर्शयामास रामाय तदाश्रमपदं कृतम् ॥ २५ ॥

यथाविधीति । स्वयमेव कृत्वेत्यनुकर्षः ॥ २५ ॥

स तं दृष्ट्वा कृतं सौम्यं आश्रमं सह सीतया ।
राघवः पर्णशालायां हर्षमाहारयत्[3] भृशम् ॥ २६ ॥
सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ।
‡अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥ २७ ॥

आहारयत्—प्राप्तवान् ॥ २७ ॥

प्रीतोऽस्मि ते महत्कर्म त्वया कृतमिदं, प्रभो!।
प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २८ ॥

प्रभो—समर्थ ! यन्निमित्तं—यदाश्रमनिर्माणनिमित्तं प्रदेयः पारितोषिकोऽस्ति, तन्निमित्तं परिष्वङ्ग एवाद्य मया कृतः । अन्यस्य कस्यचित् इह दातव्यवस्तुनोऽभावात् ॥ २८ ॥

---

* पूजार्थं आहारार्थं वा आनीतैः फलैः सहितः । † पुष्पबलिं—वास्तुपूजां—गो.
‡ परिष्वङ्गक्रियाविशेषणमिदं द्वयम् ।

[1] सजलः—ङ. [2] पुष्पाञ्जलिं—ङ. [3] परम्—ङ. ज.

भावज्ञेन कृतज्ञेन धर्मज्ञेन च, लक्ष्मण !
त्वया *[1] पुत्रेण धर्मात्मा † न संवृत्तः पिता मम ॥ २९ ॥

न संवृत्तः इति । न संस्कृत इति यावत् ॥ २९ ॥

एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्धनः ।
तस्मिन् देशे बहुफले न्यवसत् सुसुखं वशी ॥ ३० ॥
कंचित् कालं स धर्मात्मा सीतया लक्ष्मणेन च ।
अन्वास्यमानो न्यवसत् स्वर्गलोके यथाऽमरः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चदशः सर्गः

लय(३१)मानः सर्गः ॥ ३१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चदशः सर्गः

षोडशः सर्गः

[हेमन्तवर्णनम्]

[2] वसतः तस्य तु सुखं राघवस्य महात्मनः ।
शरद्व्यपाये हेमन्तः ऋतुरिष्टः ‡ प्रवर्तते ॥ १ ॥

---

* नाथेन—पालकेन—**ती.** † न संवृत्तः—न मृतः, किन्तु जीवत्येव ; पितृवदेव त्वया स्वन्मुखेन पित्रा मम सर्वाभिलषितपूरणात् मम पिता न संवृत्तः—**गो.** पिता न संवृत्तः—परिपालनादिति भावः—**ति.** किञ्चित्कार्यार्थं स्मृतः । एतेन सकलं कार्यं त्वया साधितमिति सूचितम्—**रा.** ‡ इष्टः—कामिनीनां, कामिनाम्—**ती.** तपस्विनां तपस्साधनायेष्टः, रामस्य तु खरादिराक्षसविजयमूलशूर्पणखागमनहेतुतयेष्टः—**गो.** परन्तु 'प्रियो यस्ते' (४) इत्यनुपदं वक्ष्यमाणं अवधेयमत्र ।

[1] नाथेन—**ङ.** [2] अत्रादौ —स सीतया लक्ष्मणेन पक्षिराजा जटायुषा । न्यवसत् पञ्चवट्यां वै पूज्यमानो महर्षिभिः—इत्यधिकं—**झ.**

अथ भाविशूर्पणखादर्शनानर्थकालप्रदर्शनशेषतया हेमन्तर्तुवर्णनं कवेः। वसतस्तस्येत्यादि। इष्ट इति। तपस्साधनेष्टः, रामस्य चेष्ट इत्यर्थः ॥ १ ॥

स कदाचित् * प्रभातायां शर्वर्यां रघुनन्दनः।
प्रययावभिषेकार्थं रम्यां गोदावरीं नदीम् ॥ २ ॥
प्रह्वः कलशहस्तस्तं सीतया सह वीर्यवान्।
पृष्ठतोऽनुव्रजन् भ्राता सौमित्रिरिदमब्रवीत् ॥ ३ ॥

तं अनुव्रजन् इत्यन्वयः ॥ ३ ॥

अयं स कालः संप्राप्तः प्रियो यस्ते, प्रियंवद!
† अलङ्कृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥

येन–हेमन्तकालेनेत्यर्थः ॥ ४ ॥

नीहारपरुषो ‡ लोकः पृथिवी सस्य[1]शालिनी।
जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ॥ ५ ॥

नीहारपरुषः इति। नीहारेण परुषत्ववान् इत्यर्थः। सुभगः इति। इष्ट इत्यर्थः ॥ ५ ॥

§ नवाग्रयणपूजाभिः अभ्यर्च्य पितृदेवताः।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥

---

* प्रभातायां विरामोन्मुखायां–गो. † येन हेमन्तेन सुपक्वसस्यादिसंपन्नेन शुभरसत्वयं संवत्सरः अलङ्कृतो यद्यपि, तथाऽपि तव अतिसुकुमारस्य प्रिय इवाभाति किमिति योजना। यः हेमन्तकालः ते प्रियः, येन हेमन्तेन संवत्सरः शुभरसन् अलंकृत इवाभाति अयं कालः संप्राप्त इति योजना–ती. ‡ लोकः-जनः नीहारेण–हिमेन परुषः–परुषत्वक्–गो. § आग्रयणं नाम कश्चित् हविर्यज्ञः नूतनधान्यभोजनस्यादावनुष्ठेयः–आग्रयणरूप-पूजाभिः पितृदेवता अभ्यर्च्य कृताग्रयणकाः, न तु कृताग्रयणप्रतिनिधयः–गो. कृतानि-पूर्वकालेषु संपादितानि आग्रयणानि यैस्ते–रा.

[1] मालिनी–ङ.

नवेत्यादि । काले—आग्रयणकर्मानुष्ठानकाले कृताग्रयणकाः—कृताग्रयणकर्माणः—'आग्रयणकाले नवानां सवनीयानां निर्वपेयुः' इति आश्वलायनोपदिष्टं नवान्नप्राशनाय कर्तव्यं कर्म, एवं नवान्नप्राशनार्थं यदाग्रयणं तज्जाः पूजाः तथा, ताभिः पितृदेवताः अभ्यर्च्य सन्तः—साधवः विगतकल्मषाः भवन्त्यद्य ॥ ६ ॥

* प्राज्यकामाः जनपदाः संपन्नतरगोरसाः ।
विचरन्ति महीपालाः [1] यात्रास्था विजिगीषवः ॥ ७ ॥

प्राज्यं—भूरि संपन्नः अन्नप्राप्तिकामः येषां ते तथा ॥ ७ ॥

सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ।
विहीनातिलकेव स्त्री नोत्तरा दिक् प्रकाशते ॥ ८ ॥
प्रकृत्या हिमकोशाढ्यः दूरसूर्यश्च सांप्रतम् ।
यथार्थनामा † सुव्यक्तं हिमवान् हिमवान् गिरिः ॥ ९ ॥

प्रकृत्या स्वभावेन । हिमकोशैः—घनीभूतहिमसमूहैः आढ्यः । दूरे—दूरदेशे सूर्यः यस्य स तथा ॥ ९ ॥

अत्यन्तसुखसञ्चाराः मध्याह्ने [2] स्पर्शतः सुखाः ।
दिवसाः सुभगादित्याः ‡ छायासलिलदुर्भगाः ॥ १० ॥

मध्याह्ने सुखसञ्चाराः मध्याह्ने स्पर्शतः सुखाः । छायाः सलिलानि च दुर्भगानि अनिष्टानि येषु ते तथा ॥ १० ॥

---

* प्राज्यकामाः—समृद्धभोगाः, समृद्धभोगसाधना वा । गोरसः—दधिक्षीरादि । † यथार्थनामा—भवेदिति शेषः, न हि चित्रकूटस्थस्य तद्दर्शनसंभवः । ‡ छायाः सलिलानि च दुर्भगानि—असेव्यानि—ति. रा. दुर्भगच्छायासलिला', आहिताग्न्यादित्वात परनिपातः- गो.

[1] यात्रार्थ—ङ. ज. झ. [2] पश्यतः—ङ.

मृदुसूर्याः[1] सनीहाराः पटुशीताः[2] समारुताः ।
*शून्यारण्याः हिमध्वस्ताः दिवसा भान्ति सांप्रतम् ॥

शून्यारण्याः—हिमवशबर्बरपर्णतः निःशोभाः इत्यर्थः । हिमध्वस्ताः—हिमनाशितपङ्कजादिमन्तः ॥ ११ ॥

निवृत्ताकाशशयनाः †पुष्यनीता हिमारुणाः ।
शीतवृद्धतरायामाः त्रियामा यान्ति सांप्रतम् ॥ १२ ॥

निवृत्तं आकाशे—अनावृतप्रदेशे शयनं यासु त्रियामासु ताः तथा । पुष्ययुक्तपौर्णमासीं नीताः—गताः, हिमारुणाः—हिमधूसराः, अरुणशब्दः सर्वतः इह कपोतकवर्णे प्रयुज्यते । शीतं वृद्धतरं यासु ताः तथा शीतवृद्धतराः आयामाः—दीर्घाश्च तथा ॥ १२ ॥

‡रविसंक्रान्तसौभाग्यः तुषारारुणमण्डलः ।
निःश्वासान्ध इवादर्शः चन्द्रमाः न प्रकाशते ॥ १३ ॥

रवौ संक्रान्तं सौभाग्यं—उपभोग्यत्वं यस्य स तथा । तुषारेण अरुणः—धूसरः मण्डलः यस्य स तथा । अत एव निःश्वासेन अन्धः—मलिनः आदर्शः—मुकुर इव न प्रकाशते ॥ १३ ॥

---

* आरण्याः—वनचराः, तैः शून्याः ; आवरणरहितत्वेन शीतपीडिताः न बहिः सञ्चरन्तीत्यर्थः । हिमध्वस्ताः हिमध्वस्तजनवन्तः, शैत्येन पिण्डीभूतशरीरजना इत्यर्थः—गो.

† पुष्यनीताः—पुष्यनक्षत्रबोधितरात्रिकालपरिमाणाः—ति. रा. पुष्ययुक्ता पौर्णमासी पुष्यं—तत्प्रधाना इत्यर्थः । यद्वा पुष्यं—पुष्यमासः, तेन नीताः—पुष्यमाससन्निहिता इत्यर्थः—गो. ‡ इतरकाले यथा चन्द्रः सर्वसेव्यः, तथा हेमन्ते सूर्य एव सर्वसेव्यः तथा च जनैः असेव्यमान इति भावः ।

[1] सुनीहाराः—ङ. ज. [2] समाहिताः—ङ. ज.

ज्योत्स्ना तुषारमलिना पौर्णमास्यां न राजते ।
***सीतेव चातपश्यामा लक्ष्यते न तु शोभते ॥ १४ ॥**

ज्योत्स्नेति भिन्नं पदम् । आतपेन श्यामा—श्यामीभूतवर्णा तथा । यथा तथा लक्ष्यते केवलं सत्तामात्रेणेत्यर्थः ॥ १४ ॥

†प्रकृत्या शीतलस्पर्शः हिमविद्धश्च सांप्रतम् ।
प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५ ॥

प्रकृत्या शीतलस्पर्श इति । अनुष्णाशीतस्पर्शत्वात् शीतलस्पर्श इत्युपचर्यते । पश्चिमो वायुरिति पश्चिमयामवायुरित्यर्थः । काले—प्रातःकाले ॥ १५ ॥

[1]बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥ १६ ॥

बाष्पच्छन्नानि—बाष्पः—ऊष्मा, यथा हिमकाले प्रातः कूपोदकेष्वनुभूयते शुभा ॥ १६ ॥

खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किञ्चि[2]दानम्राः शालयः कनकप्रभाः[3] ॥ १७ ॥

---

* सीतेव लक्ष्यते, किन्तु सीतावन्न शोभते । व्यतिरेकालङ्कारः—**गो.**

† वायौ शीतस्पर्श एव स्वभावः उष्णस्पर्शस्त्वागन्तुक इति हृदयम्—**गो.** यद्वा—सांप्रतं—हेमन्ते प्रकृत्या—स्वत एव शीतलस्पर्शो वायुः काले—प्रातःकाले द्विगुणशीतलः प्रवातीत्यर्थः । शैत्यस्य ऋतुधर्मत्वात् तदा वायुः प्रकृत्यैव शीत इति कथने न हि विरोधः । अथ वा शीतलस्पर्शः—अनुष्णस्पर्शः । तेन मध्यस्थत्वं उच्यते । एवञ्च—स्वयं प्रकृत्या मध्यस्पर्शः, सांप्रतं—हेमन्ते हिमविद्धः काले—प्रातः द्विगुणशीतल इत्यर्थः ॥

[1] शष्प—**ङ.** [2] दालम्बाः—**ङ. ज.** [3] एतदनन्तरं—निम्नाः कर्णिकारेषु सुकेसरा कनकपिङ्गलैः । गन्धान् केदारपद्मानां जिघ्रन्ति वनशालयः—इत्यधिकं—**झ.**

खर्जूरपुष्पाकृतिभिरिति । पीतवर्णैरित्यर्थः । कनकप्रभा इति । परिणतनालपत्रत्वात् ॥ १७ ॥

मयूखैरुपसर्पद्भिः * हिमनीहारसंवृतैः ।
दूर[1]मभ्युदितः सूर्यः शशाङ्क इव लक्ष्यते ॥ १८ ॥

हिमातिशयात्मको नीहारः वृक्षपर्वताद्यदर्शनसंपादनक्षमः ॥

†[2] अग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः ।
[3] संरक्तः किञ्चिदापाण्डुः आतपः शोभते क्षितौ ॥ १९ ॥

अवश्यायनिपातेन किञ्चित् प्रक्लिन्नशाद्वला ।
वनानां शोभते भूमिः निविष्टतरुणातपा ॥ २० ॥

अवश्यायः—हिम् ॥ २० ॥

‡ स्पृशंस्तु विपुलं शीतं उदकं द्विरदः सुखम् ।
अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् ॥ २१ ॥

प्रतिसंहरत इति । स्पर्शशैत्यवशादिति शेषः ॥ २१ ॥

एते हि §समुपासीनाः विहगा जलचारिणः ।
नावगाहन्ति सलिलं अप्रगल्भा इवाहवम् ॥ २२ ॥

---

* हिमनीहारैः—शीतलनीहारैः—गो. हिमैर्नीहारैश्च—रा. हिमबिन्दुभिः—ती.

† आग्राह्यवीर्यः—ईषद्ग्राह्योष्णः—ति. अग्राह्यवीर्यः—अग्राह्योष्ण्यः ; सुखमुद्दिश्य स्पृशन्नपि—रा. ईषदर्थे वा नञ्, अनुदरा कन्येतिवत्—गो.

‡ विपुलं—भृशं शीतलं उदकं स्पृशन् वन्यो द्विरदः करं सुखं प्रतिसंहरते। तृषाशमनापेक्षयाऽपि करप्रतिसंहार एव वरमिति भावनया—'सुखं' इत्युक्तिः।

§ समुपासीनाः, जलसमीपदेशमिति शेषः—ति.

[1] मभ्यु—ङ. ज. [2] आग्राह्य—ङ. ज. [3] संसक्तः—ङ. ज.

समुपासीना इति । जलमिति शेषः । अवगाहन्ति—अवगाहन्ते इति यावत् । आहवं—युद्धम् ॥ २२ ॥

* अवश्यायतमोनद्धाः नीहारतमसावृताः ।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पाः वनराजयः ॥ २३ ॥

अवश्यायतमोभ्यां नद्धाः तथा । राज्यामिति शेषः । नीहारतमसावृताः इति । प्रत्यूष इति शेषः ॥ २३ ॥

बाष्पसंछन्नसलिलाः † रुतविज्ञेयसारसाः ।
हिमार्द्रवालुकैः तीरैः सरितो [1] भान्ति साम्प्रतम् ॥ २४ ॥

बाष्पः व्याकृतः ॥ २४ ॥

तुषारपतनाच्चैव मृदुत्वात् भास्करस्य च ।
शैत्या[2]दगाग्रस्थमपि प्रायेण ‡ रसवज्जलम् ॥ २५ ॥

अगाग्रस्थं—पर्वताग्रस्थम् ॥ २५ ॥

जरा[3]जर्झरितैः पद्मैः शीर्णकेसर[4]कर्णकैः ।
नालशेषैः हिमध्वस्तैः न भान्ति कमलाकराः ॥ २६ ॥

जरया कालकृतया, जर्झरितानि पर्णानि येषां ते तथा ॥ २६ ॥

---

* अवश्यायः हिमसलिलं, स एव तमः—नीहारः—अजलवर्षिमहाहिमम्—गो. अवश्यायतमोभ्यां नद्धा रात्रौ, नीहारतमसाऽऽवृताः प्रत्यूषे—रा. ति. † क्रमक्रमशः श्रुतिपथपक्षिणां सलिलेऽवतीर्णत्वसंभवात् २२ तमश्लोकेन न विरोधः । सारसव्यतिरिक्त-जलचरा वा विवक्षितास्तत्र । ‡ रसवत्—विषवत्, 'रसो रागे विषे द्रव्ये शृङ्गारादौ परागमे' इति वाणः—गो. रसवत्—स्वादुविशिष्टमित्यर्थः । प्रायेणेत्यनेन विषवृक्षादि-समभिव्याहृतस्य तदभाववत्त्वं ध्वनितम्—रा.

[1] यान्ति—ङ. [2] दगार, दगाध—ङ. [3] कर्करितैः, मर्मरितैः—ङ. [4] पाण्डुभिः—ङ.

अस्मिंस्तु पुरुषव्याघ्रः काले दुःखसमन्वितः ।
तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २७ ॥
त्यक्त्वा राज्यं च * मानं च भोगांश्च विविधान् बहून् ।
तपस्वी नियताहारः शेते शीते महीतले ॥ २८ ॥
सोऽपि वेलामिमां नूनं अभिषेकार्थमुद्यतः ।
वृतः प्रकृतिभिः नित्यं प्रयाति सरयूं नदीम् ॥ २९ ॥
अत्यन्तसुखसंवृद्धः सुकुमारः [1] सुखोचितः ।
कथं न्वपररात्रेषु सरयूमवगाहते ॥ ३० ॥
पद्मपत्रेक्षणो वीरः श्यामो निरुदरो महान् ।
धर्मज्ञः सत्यवादी च † ह्रीनिषेधः जितेन्द्रियः ॥ ३१ ॥
प्रियाभिभाषी मधुरः दीर्घबाहुरिरिन्दमः ।
संत्यज्य विविधान् भोगान् आर्यं सर्वात्मना श्रितः ॥३२॥

निरुदर इति । अतुन्दिल इत्यर्थः । ह्रीनिषेधः—ह्रिया—लज्जया अन्यस्त्र्यादिविषये निषेधः—चक्षुरादीन्द्रियनिवर्तनं यस्य स तथा । तत्रैव हेतुः—जितेन्द्रिय इति । आर्यं—पूज्यम्, ज्येष्ठं त्वामित्यर्थः ॥ ३२ ॥

जितः स्वर्गः तव भ्रात्रा भरतेन महात्मना ।
‡ वनस्थमपि तापस्ये यस्त्वामनु [2] विधीयते ॥ ३३ ॥

जित इति पृथक् पदम् । उच्यमानविशेषणैकेन भरतेन स्वर्गो निर्जित एव । कुतः इत्यतः—वनस्थमित्यादि । यो भरतः

---

* मानं—राजाऽहमित्यभिमानम् । † अनेन प्रकृतेरेव अधर्मवैमुख्यमुक्तम् ।
‡ अत्यन्तपरोक्षे वने, तत्रापि तापस्ये विद्यमानं त्वां समग्रभोगसाधने नगरे वर्तमान एव यतोऽनुकरोति, अतो जितः स्वर्गो भरतेनेति ।

[1] हिमार्दितः—ङ. [2] विधास्यते—ङ.

वनस्थमपि त्वां तापस्ये—तापसकृत्ये स्थित्वा अनुविधीयते अनुकरोति—सेवते इत्यर्थः ॥ ३३ ॥

*न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ।
ख्यातो लोकप्रवादोऽयं भरतेनान्यथा कृतः ॥ ३४ ॥

पित्र्यं—पितृस्वभावम् । द्वे पदे येषां ते द्विपदाः—ऊर्ध्वस्रोतसः पित्र्यं नानुवर्तन्ते, अपि तु मातृकं—मातृस्वभावमेव अनुवर्तन्ते इति ख्यातो लोकप्रवादः भरतेन अन्यथा कृतः, न मातुः इत्यर्थः ॥

भर्ता दशरथो यस्याः साधुश्च भरतः सुतः ।
कथं नु साऽम्बा कैकेयी तादृशी क्रूर[1]दर्शिनी ॥ ३५ ॥

एवं भरतमुपश्लाघ्य कैकेयीं परिवदति—भर्तेत्यादि ॥ ३५ ॥

इत्येवं लक्ष्मणे वाक्ये †स्नेहात् ब्रुवति धार्मिके ।
परिवादं जनन्यास्तं असहन् राघवोऽब्रवीत् ॥ ३६ ॥

स्नेहादिति । भरतस्नेहादित्यर्थः ॥ असहन्निति । असहमान इति यावत् ॥ ३६ ॥

---

* यद्यपि पूर्वं 'सत्यश्चाय प्रवादोऽयं लौकिकी प्रतिभाति मा । पितॄन् समनुजायन्ते नरा मातरमङ्गनाः' (अयो. 35–27) इत्युक्तम्, अथापि तत्र 'जायन्ते' इति कथनात् जन्मना साकमागतधर्मविषयकं तत्; अत्र तु 'अनुवर्तन्ते' इति कथनात् लालनपोषणादीनां मात्रधीनत्वेन तस्याः प्रभावः पुत्रे स्यात्, एवं मातरि पक्षपातश्च स्यादित्येतद्विषयकमिदमिति न विरोधः । अधिकमन्यत्र । † स्नेहात्—रामे स्नेहात् । अत एव खलु रामानुकूलं भरतं प्रशंसति, रामप्रतिकूलां कैकेयीं निन्दति ।

[1] शीलिनी—ङ. च.

न तेऽम्बा * मध्यमा [1]तात! गर्हितव्या [2]कथंचन।
तामेवेक्ष्वाकुनाथस्य † भरतस्य कथां कुरु ॥ ३७ ॥

मध्यमेति। व्याकृतचरः ॥ ३७ ॥

[3]निश्चिताऽपि हि मे बुद्धिः वनवासे दृढव्रता।
भरतस्नेहसंतप्ता ‡ बालिशीक्रियते पुनः ॥ ३८ ॥

निश्चिता—निश्चितस्वभावा—कदापि कुत्रापि संशयरहिता। बालिशीक्रियते—च्व्यन्तः, अबालिशस्वभावाऽपि तत्स्वभावा संपाद्यते; स्नेहेनेति शेषः ॥ ३८ ॥

संस्मराम्यस्य वाक्यानि प्रियाणि मधुराणि च।
हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ॥ ३९ ॥
कदा न्वहं समेष्यामि भरतेन महात्मना।
शत्रुघ्नेन च वीरेण § त्वया च, रघुनन्दन! ॥ ४० ॥

तमेव स्नेहं प्रकाशयति—संस्मरामीत्यादि ॥ ३९-४० ॥

इत्येवं ‖ विलपंस्तत्र प्राप्य गोदावरीं नदीम्।
चक्रेऽभिषेकं काकुत्स्थः सानुजः सह सीतया ॥ ४१ ॥

---

*मध्यमा—सर्वदशरथपत्न्यपेक्षया, कथञ्चन प्रासङ्गिककथायामपि मध्यमाम्बेति स्वाभिमानद्योतनाय—गो. शिष्टं अन्यत्र द्रष्टव्यम्। † इक्ष्वाकुनाथस्य—राजनि स्वर्गं गते, अस्मासु च वनं गतेषु पूर्वतरासत्कुलमर्यादास्थापकस्य—गो. ‡ दुर्बलीक्रियते—प्रतिज्ञातरणात् पूर्वमेव भरतदर्शनेऽतीवोत्कण्ठा जायते ममेति भावः। § इदानीं केवलं त्वया समेतोऽहं, त्वया तैश्च कदा समेष्यामीति भावः। ‖ विलपन्—विविधं कथयन्—रा.

[1] वत्स—ङ. [2] कदाचन—ङ. ज. [3] सुनिश्चिताऽपि—ङ.

तर्पयित्वाऽथ सलिलैः ते पितॄन् दैवतानि च ।
*स्तुवन्ति स्मोदितं सूर्यं देवताश्च [1] समाहिताः ॥ ४२ ॥

कृताभिषेकः स रराज रामः
सीताद्वितीयः सह लक्ष्मणेन ।
[2] कृताभिषेको गिरिराजपुत्र्या
†रुद्रः [3] सनन्दी भगवानिवेशः ॥ ४३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षोडशः सर्गः

वेग(४३)मानः सर्गः ॥ ४३ ॥

इति श्रीमद्रामायणभूषणकटीकायां अरण्यकाण्डे षोडशः सर्गः

सप्तदशः सर्गः

[शूर्पणखाऽऽगमः]

‡कृताभिषेको रामस्तु सीता सौमित्रिरेव च ।
तस्मात् गोदावरीतीरात् ततो जग्मुः स्वमाश्रमम् ॥ १ ॥

---

* स्तुवन्ति स्म—उपतस्थिरे, 'मित्रस्य' इत्यादिमन्त्रैः, सीता तु अमन्त्रेण—**गो.**
† रुद्रः सनन्दीत्युपमया दुष्प्रधर्षणत्वमुच्यते । 'रुद्रः सविष्णुर्भगवानिवेशः' इति न क्वचिदपि कोशे दृश्यते। कश्चित्तु दृश्यत इत्याह। तदा अभूतोपमेति युक्तम्—**गो.** रुद्रोपमया संहाराविष्टचित्तत्वं दर्शयति—**ति.** ‡ एवं रामतपोविशेषद्योतनाय हेमन्तं प्रथमप्रवृत्तमुपवर्ण्य ततस्त्रिषु संवत्सरेष्वतीतेषु कदाचित् चैत्रमासे प्रवृत्ते भाविसकलराक्षसवधनिदानत्वेन शूर्पणखावृत्तान्तमुपक्षिपति—**गो.** 'एवं संवसतस्तस्य मुनीनामाश्रमेषु वै । रमतश्चानुकूल्येन ययुः संवत्सरा दश' (अर. 11-28) इति कथितत्वात्, सीतापहरणकाले वनवासस्य एकवत्सरमात्रपरिशेषावगमाच्च 'ततः त्रिषु संवत्सरेष्वतीतेषु' इत्युक्तम् ।

[1] तथाऽनघाः—**ङ. ज.** [2] कृताभिषेकस्त्वगराज—**ङ. ज.** [3] सविष्णुः—**ज. झ.**

अथ शूर्पणखासमागमः । कृताभिषेक इत्यादि । ततः—अनन्तरम् ॥ १ ॥

आश्रमं तमुपागम्य राघवः सहलक्ष्मणः ।
कृत्वा पौर्वाह्णिकं [1]कर्म पर्णशालामुपागमत् ॥ २ ॥
उवास [2]सुखितः तत्र पूज्यमानो महर्षिभिः ।
[3]लक्ष्मणेन सह भ्रात्रा *चकार विविधाः कथाः ॥ ३ ॥
स रामः पर्णशालायां आसीनः सह सीतया ।
विरराज महाबाहुः चित्रया चन्द्रमा इव ॥ ४ ॥

चित्रया—चित्रानक्षत्रेण ॥ ४ ॥

[4]तथाऽऽसीनस्य रामस्य कथासंसक्तचेतसः ।
तं देशं राक्षसी [5]काचित् आजगाम यदृच्छया ॥ ५ ॥
सा तु शूर्पणखा नाम दशग्रीवस्य रक्षसः ।
†भगिनी राममासाद्य ददर्श त्रिदशोपमम् ॥ ६ ॥

शूर्पणखेति । 'नखमुखात् संज्ञायाम्' इति ङीब्निषेधः ॥ ६ ॥

[6]सिंहोरस्कं महाबाहुं पद्मपत्रनिभेक्षणम् ।
आजानुबाहुं दीप्तास्यं अतीव प्रियदर्शनम् ॥ ७ ॥

दीप्तास्यमिति । कान्तिमन्मुखमित्यर्थः ॥ ७ ॥

---

*चकार—उवाचेत्यर्थः—गो. †राममासाद्य ददर्श—रामं दृष्ट्वाऽऽससादेत्यर्थः—गो. अथ वा रामसमीपमागत्य ददर्शेत्यर्थः ; तेन रामसौन्दर्यानुभवसंभवः कथितो भवति ॥

[1] सर्व—ङ. [2] सहितः—ङ. [3] इदमर्धं कुत्रचित् 'विरराज' (४) इत्यास्यार्धानन्तरं दृश्यते—ङ. ज. [4] तदा—ङ. ज. [5] कामात्—ङ. [6] अयं श्लोकः—ज पुस्तके कुण्डलितः । एतदर्धद्वयस्थाने 'दीप्तास्यं च महाबाहुं पद्मपत्रायतेक्षणम्' इति च पाठः—ज.

गजविक्रान्तगमनं जटामण्डलधारिणम् ।
सुकुमारं महासत्त्वं पार्थिवव्यञ्जनान्वितम् ॥ ८ ॥
राममिन्दीवरश्यामं कन्दर्प[1]सदृशप्रभम् ।
बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ९ ॥

गजस्येव विक्रान्तेन—पादविक्षेपेण गमनं यस्य स तथा । व्यञ्जनं—लक्षणं, प्रीतिरूपसन्तोषकरस्वरूपमित्यर्थः ॥ ९ ॥

सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ।
विशालाक्षं विरूपाक्षी सुकेशं ताम्रमूर्धजा ॥ १० ॥
*[2] प्रीतिरूपं विरूपा सा सुस्वरं भैरवस्वरा ।
तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ॥ ११ ॥
न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ।
शरीरजसमाविष्टा राक्षसी [3]वाक्यमब्रवीत् ॥ १२ ॥

तरुणं वृद्धा, दारुणा घृणावन्तमिति शेषः । दक्षिणं—सुभाषितसमर्थम् । वामभाषिणी—कटुभाषणशीला । शरीरजः—कामः ॥

†जटी तापस[4]रूपेण सभार्यः शरचापधृत् ।
आगतस्त्वमिमं देशं कथं राक्षससेवितम् ॥ १३ ॥
किमागमनकृत्यं ते तत्त्वमाख्यातुमर्हसि ।
तत्त्वं यथा तथेत्यर्थः ॥ १३ ॥

एवमुक्तस्तु राक्षस्या ‡शूर्पनख्या परन्तपः ॥ १४ ॥

---

* प्रीतिरूपं—प्रीयत इति प्रीतिः, प्रियरूपम्—गो. †मुनिवेषस्य शरचापाद्यानानुरूपत्वमभिमतम् । ‡यौगिकार्थविवक्षाभिप्रायेण एवमुक्तिः । अन्यथा हि नञ्त्वेन भाव्यम् ।

[1] सदृशं प्रभम्—ङ. [2] प्रियरूपं—ङ. ज. [3] राम—ङ. ज. [4] वेषेण—ङ. ज.

ऋजुबुद्धितया सर्वं आख्यातुमुपचक्रमे ।
[1] अनृतं न हि रामस्य कदाचिदपि संमतम् ॥ १५ ॥
विशेषेणाश्रमस्थस्य समीपे स्त्रीजनस्य च ।
आसीद्दशरथो नाम राजा त्रिदशविक्रमः ॥ १६ ॥
तस्याहमग्रजः पुत्रः रामो नाम जनैः श्रुतः ।
भ्राताऽयं लक्ष्मणो नाम यवीयान् मामनुव्रतः ॥ १७ ॥
इयं भार्या च वैदेही मम सीतेति विश्रुता ।
नियोगात्तु नरेन्द्रस्य पितुर्मातुश्च यन्त्रितः ॥ १८ ॥
* धर्मार्थं धर्मकांक्षी च वनं वस्तुमिहागतः ।

यन्त्रितः–नियमितः ॥ १८ ॥

त्वां तु वेदितुमिच्छामि [2] कथ्यतां काऽसि † कस्य वा ॥
‡ [3] त्वं हि तावन्मनोज्ञाङ्गी राक्षसी प्रतिभासि मे ।
इह वा किं निमित्तं त्वं आगता ब्रूहि तत्त्वतः ॥ २० ॥

मनोज्ञाङ्गीति कामरूपवत्त्वादेव । रामदर्शनकाले तथात्वम् ॥

---

* धर्मकाङ्क्षी–पितृवाक्यनिर्वहणरूपधर्माभिलाषी, धर्मार्थं–तस्यैव धर्मस्य परिपालनाय–**ती.** पितृवाक्यपरिपालनरूपधर्मकाङ्क्षी, धर्मार्थं–तपोरूपधर्मसिद्ध्यर्थम्–**गो.** नरेन्द्रस्य पितुः, मातुश्च धर्मार्थं नियोगात्–आज्ञातः–धर्मकाङ्क्षी–**रा.** अथ वा–वनवासस्य धर्मार्थत्वं, तस्य स्वेच्छासंपादितत्वं च पदद्वयेन कथ्यते । † कस्य वा–कस्य वा सम्बन्धिनी-पुत्री ? भार्या वा ? इत्यर्थः । ‡ मनोज्ञाङ्गत्वस्य कामरूपत्वं विनाऽसंभवात्, कामरूपत्वं च राक्षसीत्वं विना नेति भावः–**ति.** मनोज्ञाङ्गी–राक्षसानां मनोहारिणी–**रा.** तावत्—कात्स्न्र्येन मनोज्ञाङ्गी न भवसि, मां प्रति राक्षसी प्रतिभासि । यद्वा 'राक्षससेविते' इति तद्वचनात् राक्षसीत्वमित्याशंक्य परिहरति—'मनोज्ञाङ्गी त्वं राक्षसीति न प्रतिभासि' इति । रामदर्शनकाले तथा रूपं कृतवती, कामरूपत्वात् । दुर्मुखीत्यादिकं वास्तवमिप्रायेण मुनिनोक्तमिति ज्ञेयम्–**गो.** वस्तुतस्तु पूर्वापरपरामर्शे 'मनोज्ञाङ्गी, अत एव, राक्षसी न प्रतिभासि' इति नर्मोक्तिरिति युक्तम् ।

[1] अयश्लोकः–**ज.**, पुस्तके कुण्डलितः । [2] कस्य त्वं–**ज.** [3] न हि–**ङ. ञ.**

साऽब्रवीत् वचनं श्रुत्वा राक्षसी मदनार्दिता ।
श्रूयतां, राम! वक्ष्यामि तत्त्वार्थं वचनं मम ॥ २१ ॥
अहं शूर्पणखा नाम राक्षसी *कामरूपिणी ।
अरण्यं विचरामीदं एका सर्वभयङ्करा ॥ २२ ॥
†रावणो नाम मे भ्राता [1] बलीयान् राक्षसेश्वरः ।
[2] वीरो विश्रवसः पुत्रः यदि ते श्रोत्रमागतः ॥ २३ ॥

यदि ते श्रोत्रमागतः इति । प्रायेण तं श्रुतवान् भवेः इत्यर्थः ॥

प्रसिद्धनिद्रश्च सदा कुम्भकर्णो महाबलः ।
‡विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः ।
प्रख्यातवीर्यौ च रणे भ्रातरौ खरदूषणौ ॥ २४ ॥

सदा प्रसिद्धनिद्रः । भ्रातरौ खरदूषणाविति । त्रिशिरसः उपेक्षणं विभीषणवत् अराक्षसस्वभावत्वात् ॥ २४ ॥

तानहं समतिक्रान्ता, राम! त्वा पूर्वदर्शनात् ।
समुपेताऽस्मि §भावेन भर्तारं पुरुषोत्तमम् ॥ २५ ॥
अहं ‖प्रभावसंपन्ना स्वच्छन्दबलगामिनी ।
¶चिराय भव मे भर्ता सीतया किं करिष्यसि ॥ २६ ॥

प्रायेण तान् रावणादीन् भ्रातॄन् समतिक्रान्ता, त्वदभिसरणे तन्निमित्तभयरहितेत्यर्थः । अत्रैव वाक्ये तत्रापि हेतुः—तानहं समतिक्रान्ता—वीर्यादिना तेभ्योऽधिकेत्यर्थः । हे राम! त्वा—त्वां

---

* सर्वभयंकरेति वक्ष्यमाणरतिप्रतिबन्धकनिवारणक्षमता उक्ता—गो. † काऽसीति प्रश्नस्योत्तरमुक्ता कस्येत्यस्य प्रश्नस्योत्तरमाह—रावण इत्यादिना—गो. ‡ इदमर्धं क्वचित् स्थलेऽपि गोविन्दराजीयरामायणशिरोमणिसम्मतम् । § भावेन—हृदयेन, रत्याख्यभावेन वा । ‖ प्रभावसंपन्ना—प्रकृष्टेन भावेन—शृङ्गारेण संपन्ना—ति. ¶ चिराय—बहुकालपर्यन्तम् ।

[1] यदि ते श्रोत्रमागतः—ज. [2] सोऽयं—ङ. ज.

पूर्वदर्शनात्–प्रथमदर्शनक्षणमारभ्य । अपूर्वदर्शनात् इत्यपि पदम् । अपूर्वदर्शनात्–देवदानवमर्त्येषु इतः प्राक् अदृष्टदिव्यस्वरूपदर्शनाद्धेतोः । भर्तृभावेन समुपेताऽस्मि । स्वच्छन्दबलगामिनी–स्वच्छन्दतया–स्वेच्छयैव बलेन स्वबलेन भ्रातृबलेन च सर्वलोकगमनशीला । यदेवं अतः—चिरायेत्यादि ॥ २६ ॥

विकृता च विरूपा च न चेयं सदृशी तव ।
अहमेवानुरूपा ते * भार्या रूपेण पश्य माम् ॥ २७ ॥

विकृतेत्यादिना सीतायाः दूषणं, स्वस्याः देवयोनिभेदत्वेन अभिमतरूपग्रहणसामर्थ्यात् ॥ २७ ॥

† इमां विरूपामसतीं करालां निर्णतोदरीम् ।
अनेन ते सह भ्रात्रा भक्षयिष्यामि मानुषीम् ॥ २८ ॥
ततः पर्वतशृङ्गाणि वनानि विविधानि च ।
पश्यन् सह मया, कान्त ! दण्डकान् विचरिष्यसि ॥२९॥

निर्णतं–निरतिशयनिम्नं उदरं यस्याः सा तथा ॥ २९ ॥

इत्येवमुक्तः काकुत्स्थः प्रहस्य मदिरेक्षणाम् ।
इदं वचनमारेभे वक्तुं वाक्यविशारदः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्तदशः सर्गः

नड(३०)मानः सर्गः ॥ ३० ॥

इति श्रीमद्रामायणाभूतकतकटीकायां अरण्यकाण्डे सप्तदशः सर्गः

---

* भार्यारूपेण—स्वभार्यात्वेन–रा. रूपेण अहमेव ते अनुरूपा भार्या इति स्वरसोऽन्वयः । † कुरूपाणामपि मनुष्याणां मनः, स्वस्मिन्नेव सुरूपं, इतरेषु कुरूपम्, परेषु विद्यमानगुणानपि दोषत्वेन च मनुत इति लोकसाधारणमिदं, आसुरप्रकृतीनां तु कैमुतिकसिद्धम् । एवञ्च 'निर्णतोदरीं' इत्यपि 'निर्णतोदरी' (18–13) इति शूर्पणखाविषयकपदसमानार्थकमेव भवितुमर्हति ।

अष्टादशः सर्गः

[शूर्पणखाविरूपणम्]

ततः शूर्पणखां रामः कामपाशावपाशिताम् ।
स्वच्छया श्लक्ष्णया वाचा स्मितपूर्वमथाब्रवीत् ॥ १ ॥

अथ कामपरवशायाः शूर्पणखायाः विरूपकरणम् । तत इत्यादि । कामपाशेन अवपाशितां–संजातपाशबन्धाम् ॥ १ ॥

कृतदारोऽस्मि, भवति! भार्येयं दयिता मम ।
त्वद्विधानां तु नारीणां सुदुःखा *ससपत्नता ॥ २ ॥

भवतीति संबुद्धिः । ससपत्नतेति । सपत्नीसहिता ससपत्नी, तस्या भावः ससपत्नता, 'त्वतलोर्गुणवचनस्य' इति पुंवद्भावः । ननु शुक्लाया भावः शुक्लता इतिवत् अविवादगुणवचनत्वाभावात् कथं पुंस्त्वम् ? उच्यते गुणशब्देन कर्त्र्या भावः कर्त्रीत्वमित्यादिद्रव्यव्यावृत्तिः । अत्र च सपत्नीसाहित्यलक्षणधर्मप्रधानोऽयं शब्दः । अत एवमादौ भवति ॥ २ ॥

अनुजस्त्वेष मे भ्राता शीलवान् प्रियदर्शनः ।
श्रीमान् †अकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३ ॥
[1]अपूर्वी भार्यया चार्थी तरुणः प्रियदर्शनः ।
अनुरूपश्च ते भर्ता रूपस्यास्य भविष्यति ॥ ४ ॥

---

*ससपत्नता–सशत्रुता, आर्षः पुंवद्भावः–ति. †अकृतदारः–असहकृतदार इत्यर्थः । 'न वितथा परिहासकथास्वपि' इत्युक्तेः, 'अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन' इत्युक्तेश्च अकृतदार इति नार्थः–गो. न कृताः–वने स्वीकृताः दाराः येन–रा. परिहासादौ मिथ्याभाषणे न दोषः–ति. अत एव उत्तरत्र 'विशालाक्षि', 'वरारोहे' इत्यादिकमपि स्वरसतः संगच्छते ।

[1] अपूर्वभार्यया चार्थी, अपूर्वभावो भार्यार्थी–ङ.

अकृतदारश्चेत्यत्र अकृतपरदारपरिग्रहः इत्यान्तराशयः। न हि रामो मिथ्या भाषते। अपूर्वीति। पूर्वं भार्यासुखं ज्ञातमनेनेति पूर्वी, 'पूर्वादिनिः' इति इनिः, न पूर्वी अपूर्वी। अत एव भार्यया अर्थी—प्रयोजनवांश्च। इदमपि वचनद्वयं स्वभार्याविषयकाऽऽन्तराशयेन प्रयुक्तम्। 'अनुरूपश्च ते भर्ता' इत्यत्रापि अभर्तेति पदच्छेदेनाऽऽन्तराशयः। एवंविधो विवादः स्वस्मिन् काममोहतः प्राप्तायाः स्त्रियः द्राक् धिक्कारेण [illegible] मा भूदिति घृणया ॥ ३-४ ॥

एनं भज, *विशालाक्षि! भर्तारं भ्रातरं मम।
असपत्ना, वरारोहे! मेरुं अर्कप्रभा यथा ॥ ५ ॥

अर्कप्रभाः यथा भजन्ति तथेति योजना ॥ ५ ॥

इति रामेण सा प्रोक्ता राक्षसी काममोहिता।
विसृज्य रामं सहसा ततो लक्ष्मणमब्रवीत् ॥ ६ ॥
अस्य रूपस्य ते युक्ता भार्याऽहं वरवर्णिनी।
मया सह सुखं सर्वान् दण्डकान् विचरिष्यसि ॥ ७ ॥
एवमुक्तस्तु सौमित्रिः राक्षस्या वाक्यकोविदः।
ततः [1]शूर्पनखीं स्मित्वा लक्ष्मणो [2]युक्तमब्रवीत् ॥ ८ ॥

शूर्पनखीं स्मित्वेति। अत्र शूर्प इव नखः यस्याः सा इति, संज्ञाविवक्षणाभावात् 'स्वाङ्गाच्चोपसर्जनात्' इति ङीप्। असंज्ञात्वादेव 'पूर्वपदात् संज्ञायामगः' इति णत्वाभावश्च ॥ ८ ॥

---

* वर्तुलतया विशालाक्षीत्वं—गो.

[1] शूर्पणखां—ङ. [2] वाक्य—ङ.

कथं दासस्य मे दासी भार्या भवितुमिच्छसि ?
सोऽहमार्येण परवान् भ्रात्रा, *कमलवर्णिनि ! ॥ ९ ॥

दासस्य मे भार्या भूत्वा कथं दासी भवितुमिच्छसीति योजना ॥ ९ ॥

समृद्धार्थस्य सिद्धार्था †मुदिता[1]ऽमलवर्णिनी ।
आर्यस्य त्वं विशालाक्षि ! भार्या भव यवीयसी ॥ १० ॥

अमलवर्णिनी—शुभरूपवती ॥ १० ॥

एनां विरूपामसतीं करालां निर्णतोदरीम् ।
भार्यां वृद्धां परित्यज्य त्वामेवैष भजिष्यति ॥ ११ ॥

एनां विरूपामित्यादिलक्ष्मणवचनस्य आन्तराशयः व्यङ्ग्योक्त्या ॥

को हि रूपमिदं श्रेष्ठं सन्त्यज्य, वरवर्णिनि !
मानुषीषु, वरारोहे ! [2]कुर्याद्भावं विचक्षणः ॥ १२ ॥
इति सा लक्ष्मणेनोक्ता कराला निर्णतोदरी ।
मन्यते तद्वचः [3]तथ्यं परिहासाविचक्षणा ॥ १३ ॥

परिहासाविचक्षणा—परिहासत्वज्ञानरहिता ॥ १३ ॥

सा रामं पर्णशालायां उपविष्टं परंतपम् ।
सीतया सह दुर्धर्षं अब्रवीत् काममोहिता ॥ १४ ॥

---

* अकमलवर्णिनीत्यपि पदच्छेदः—गो. † मुदिता सती त्वं भव—रा. मुदिता—गो.

[1] वरवर्णिनि—ङ. [2] रतिं कुर्यात्—ङ. [3] पथ्यं—ङ.

एनां विरूपामसतीं करालां निर्णतोदरीम् ।
वृद्धां भार्यामवष्टभ्य मां न त्वं बहुमन्यसे ॥ १५ ॥

अद्येमां भक्षयिष्यामि पश्यतस्तव मानुषीम् ।
त्वया सह चरिष्यामि *[1] निःसपत्ना यथासुखम् ॥ १६ ॥

पश्यतस्तव इति अनादरे षष्ठी ॥ १६ ॥

इत्युक्त्वा मृगशाबाक्षीं अलातसदृशेक्षणा ।
अभ्यधावत् सुसंक्रुद्धा महोल्का रोहिणीमिव ॥ १७ ॥

तां मृत्युपाशप्रतिमां आपतन्तीं महाबलः ।
†[2] निगृह्य रामः कुपितः ततो लक्ष्मणमब्रवीत् ॥ १८ ॥

निगृह्येति । वाचेति शेषः ॥ १८ ॥

क्रूरैः अनार्यैः, सौमित्रे! परिहासः कथञ्चन ।
न कार्यः, पश्य वैदेहीं कथंचित्, सौम्य! जीवतीम् ॥

इमां विरूपामसतीं अतिमत्तां महोदरीम् ।
राक्षसीं, पुरुषव्याघ्र! विरूपयितुमर्हसि ॥ २० ॥

अनार्यैः परिहासो न कार्यः इत्यत्र अनुभवमेव प्रमाणयति—पश्य वैदेहीमिति । भक्षयितुमुद्युक्तां, अस्मत्कृतपरिहासदोषादिति शेषः वस्तुतस्तु—रामस्य इदमेव मूलाविद्यायां मायाबीजावेशपरिहासानृतवच सर्वानर्थमूलमिति सुस्पष्टम् । कथंचिदित्यादि । हे सौम्य! कथंचि जीवतीमेव सतीं स्वतो विरूपामिमां इतोऽपि विरूपयितुमर्हसि ॥ २०

---

* 'त्वद्विधानां तु नारीणां सुदुःखा ससपत्नता' (२) इति पूर्वोक्तं स्मरन्त्याह—निःसपत्नेति । † निगृह्य—हुंकारेण प्रतिषिध्य—गो.

[1] निःसपत्नी—ङ० [2] प्रगृह्य—ङ.

इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो * रामस्य [1] पार्श्वतः।
उद्धृत्य खड्गं चिच्छेद [2] कर्णनासे महाबलः † ॥ २१ ॥

पार्श्वत इति। स्थितमिति शेषः। कर्णनासे इति सर्वतः पाङ्क्तः। कर्णश्च नासा च कर्णनासे। 'सर्वो द्वन्द्वो विभाषैकवत्' इति वार्तिके सर्वशब्दस्य 'द्वन्द्वश्च प्राणि' इत्यादिना नित्यविहितैकवद्भावद्वन्द्वस्थलेऽपि पाक्षिकत्वप्रापणप्रयोजनत्वात् एकवद्भावाभावः॥ २१ ॥

निकृत्तकर्णनासा तु विस्वरं सा विनद्य च।
यथाऽऽगतं प्रदुद्राव घोरा शूर्पणखा वनम् ॥ २२ ॥
सा विरूपा महाघोरा राक्षसी शोणितोक्षिता।
ननाद विविधान् नादान् यथा प्रावृषि तोयदः ॥ २३ ॥
सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना।
प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनम् ॥ २४ ॥

प्रगृह्येति। इह सर्वत्र उद्यमार्थः प्रग्रहशब्दः। उद्यम्य ॥ २४ ॥

ततस्तु सा राक्षससंघसंवृतं
खरं जनस्थानगतं विरूपिता।
उपेत्य तं भ्रातरमुग्र [3] दर्शनं
पपात भूमौ गगनाद्यथाऽशनिः ॥ २५ ॥

यथा अशनिः—अशनिरिव गगनात् भूमौ पपात ॥ २५ ॥

---

* रामस्य पश्यतः चिच्छेद—रा. † रामे बद्धभावाया अपि शूर्पणखायाः तदीयाचारेण हानिर्जातेत्यनुसन्धेयम्—गो. वस्तुतस्तु 'शरीरजसमाविष्टा' (17-12) इति पूर्वं कथनात् शूर्पणखायाः भावः केवलभौतिकः आसुर एवेति च तस्याः रामाप्राप्तिः, खण्डप्राप्तिश्च।

[1] पश्यतः—ङ. ज. [2] कर्णनासं—ङ. [3] तेजसं—ङ. ज.

ततः सभार्यं भयमोहमूर्च्छिता
सलक्ष्मणं राघवमागतं वनम् ।
विरूपणं चात्मनि शोणितोक्षिता
शशंस सर्वं भगिनी खरस्य सा* ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टादशः सर्गः

अथास्याः वृत्तान्तकथनं कविः संक्षिप्याह—तत इत्यादि । भयजो मोहः—विसंज्ञता, तया मूर्च्छिता—व्याप्ता तथा । उच्यमान-विशेषणं रामं वनमागतं शशंस, आत्मविरूपणं च शशंस ; कृतमिति शेषः । चार(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतककटीकायां अरण्यकाण्डे अष्टादशः सर्गः

एकोनविंशः सर्गः

[खराक्रोशः]

तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षिताम् ।
भगिनीं क्रोधसंतप्तः खरः पप्रच्छ राक्षसः ॥ १ ॥

अथ पूर्वसर्गान्तसंक्षिप्तकथितार्थस्यैव प्रपञ्चः—तां तथेत्यादि ॥

---

* अत्रेदं बोध्यम्—दशवर्षगमनोत्तरं पुनः सुतीक्ष्णाश्रमगमनं रामस्य । तत्र च वर्षाकालापगमपर्यन्तं स्थित्वा किञ्चिच्छिष्टे एकादशेऽगस्त्याश्रमगमनम् । ततो वर्षाकालारम्भे पञ्चवट्यां वासः, 'मयूरनादिता रम्या' इति तत्रोक्तेः । एवं वसतस्तस्य शरद्व्यपाये हेमन्तर्तुः प्रविष्ट इत्युक्तेः अत्र द्वादशवर्षपूर्तिः । 'पञ्चमे पञ्चमे वर्षे द्वौ द्वावधिकमासकौ' इत्युक्तेः मार्गशुक्लैकादश्यां त्रयोदशारम्भः । अन्ये तु त्रयोदशे किञ्चिदवशिष्टे शूर्पणखाऽऽगमनम् । ततो माघे सीतापहरणमित्याहुः—इति.

उत्तिष्ठ तावदाख्याहि प्रमोहं जहि संभ्रमम् ।
व्यक्तमाख्याहि, केन त्वं [1]एवंरूपा विरूपिता ॥ २ ॥

प्रमोहः—विसंज्ञता । संभ्रमः—चित्ताप्रतिष्ठा, तत्सहितं कर्म च तथा । एवंरूपा त्वं एवं केन विरूपिता इति योजना ॥ २ ॥

कः कृष्णसर्पमासीनं आशीविषमनागसम् ।
तुदत्यभिसमापन्नं अङ्कुल्यग्रेण लीलया ॥ ३ ॥

आशिषि—दंष्ट्रायां विषं यस्य स तथा, पृषोदरादित्वात् साधुः । "आशीरुरगदंष्ट्रायां प्रियवाक्याभिषङ्गयोः" ॥ ३ ॥

कः कालपाशमासज्य कण्ठे मोहान्न बुद्ध्यते ।
यस्त्वामद्य समासाद्य पीतवान् विषमुत्तमम् ॥ ४ ॥

उत्तमं विषमिति । त्वद्विरूपणतालक्षणमिति शेषः ॥ ४ ॥

बलविक्रमसंपन्ना कामगा कामरूपिणी ।
इमामवस्थां नीता त्वं केनान्तकसमा [2]गता * ॥ ५ ॥

इमामवस्थामित्यादि । अन्तकसमा त्वं गता—कस्य समीपं गता, केन इमामवस्थां नीता ॥ ५ ॥

देवगन्धर्वभूतानां ऋषीणां च महात्मनाम् ।
कोऽयमेवं विरूपां त्वां महावीर्यः चकार ह ॥ ६ ॥

महात्मनामिति । मध्य इति शेषः ॥ ६ ॥

---

* इतो गता त्वं केनेमामवस्थां नीतेत्यन्वयः—**गो.** अन्तकसमागता—कालसमत्वं प्राप्ता त्वं इमामवस्थां केन नीता—**रा.** अन्तकसमा त्वं कस्य समीपं गता, येनेमामवस्थां गता । अन्तकसमा त्वं केनेमामवस्थां नीता अत्रागतेति वा—**ति.** अन्तकसमा त्वं केनेमामवस्थां नीता— प्रापिता सती आगता, अत्रेति शेषः—**ती.**

[1] एवंरूपविरूपिता—**ङ.** [2] मता—**ङ.**

*न हि पश्याम्यहं लोके यः कुर्यात् मम विप्रियम् ।
[1]अन्तरेण सहस्राक्षं महेन्द्रं पाकशासनम् ॥ ७ ॥

अथ संभावितमरिं स्वयमेव निश्चित्याह—न हीत्यादिना ॥ ७ ॥

अद्याहं मार्गणैः प्राणान् आदास्ये जीवितान्तकैः ।
सलिले क्षीरमासक्तं निष्पिबन्निव सारसः ॥ ८ ॥

तृषया निष्पिबन् सारसो हंसः सलिले आसक्तं संबद्धं क्षीरमिव प्राणानादाम्ये इत्यन्वयः ॥ ८ ॥

निहतस्य मया संख्ये शरसंकृत्तमर्मणः ।
सफेनं रुधिरं रक्तं मेदिनी कस्य पास्यति ॥ ९ ॥

शरेण संकृत्तानि मर्माणि यस्य स तथा । सफेनमिति—प्राणवियोगकालप्रवृत्तफेनसहितं, अपि च कर्णकर्तनक्षणे दीर्घधारं रक्तं सफेनं सोष्णं च भवति । रक्तं—'रञ्ज रागे' निष्ठा । 'अनिदितां' इति नलोपः । भुवि सक्तं इत्यर्थः ॥ ९ ॥

कस्य †पत्ररथाः कायात् मांसमुत्कृत्य सङ्गताः ।
प्रहृष्टा भक्षयिष्यन्ति निहतस्य मया रणे ॥ १० ॥

सङ्गताः—परस्परसमेताः ॥ १० ॥

तं न देवा न गन्धर्वा न पिशाचाः न राक्षसाः ।
‡मयाऽपकृष्टं कृपणं शक्तास्त्रातुमिहाहवे ॥ ११ ॥

---

*अत्र तमित्यध्याहार्यम् । तस्य गर्वविशेषद्योतनाय इन्द्रस्य विशेषणद्वयम्—गो.

†पत्ररथाः—पक्षिणः गृध्रादयः । ‡इह अद्यैव आहवे अपकृष्टं—आकृष्टम् ।

[1] अमरेषु—ङ. ज.

*उपलभ्य शनैः संज्ञां तं मे शंसितुमर्हसि ।
येन त्वं दुर्विनीतेन वने [1]विक्रम्य निर्जिता ॥ १२ ॥

विक्रम्य—शौर्यं कृत्वा ॥ १२ ॥

इति भ्रातुः वचः श्रुत्वा क्रुद्धस्य च विशेषतः ।
ततः शूर्पणखा वाक्यं सबाष्पमिदमब्रवीत् ॥ १३ ॥
†तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १४ ॥
फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ।
पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ [2] ॥ १५ ॥
गन्धर्वराजप्रतिमौ पार्थिवव्यञ्जनान्वितौ ।
‡देवौ वा [3]मानुषौ वा तौ न तर्कयितुमुत्सहे ॥ १६ ॥

देवौ वा इति । यद्यपि दशरथस्य सुताविति ताभ्यां श्रुतं, अथापि तौ मानुषौ देवौ वेति तर्कयितुं नोत्सहे ॥ १६ ॥

§तरुणी रूपसंपन्नान् सर्वाभरणभूषिता ।
दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा ॥ १७ ॥

---

*'भयमोहमूर्छितां' (18-26) इति पूर्वं कथितत्वात् तदीयदुरवस्थां विलोक्य खरः एवं वदति । †एतादृशदुस्थितावपि रामसौन्दर्यपरवशा वदति—तरुणाविल्यादि । ‡'पुत्रौ दशरथस्यास्तां' इति रामवाक्यस्मरणात् । स्वबुद्धया तु—देवौ वेत्यादि । §पूर्वं असूयादिना सीतासौन्दर्याप्रकटनेऽपि, अत्र रामस्य पुरतोऽभावात्, सीतासौन्दर्याकृष्टत्वात् अवशतः सीतां वर्णयति । अथापि 'तस्याः स्थितत्वादेव किल रामो मां तिरश्चकार' इति कोपात्—तस्याश्चानृजुवृत्ताया इति अनुपदं निन्दति । एवं खरस्य सीतायां चापल्योत्पादनायापि तद्वर्णनं स्यात् । अत एव 'तौ हत्वा च तां दुर्वृत्तां आनयितुमर्हथ' इति खरवचनमपि ।

[1] निष्क्रम्य—ङ्. [2] एतदनन्तरं—'शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम्' इत्यधिकम्—झ्. [3] दानवौ—ङ्.

ताभ्यामुभाभ्यां संभूय * प्रमदामधिकृत्य ताम् ।
इमामवस्थां नीताऽहं यथाऽनाथाऽसती यथा ॥ १८ ॥

ताभ्यामित्यादि । तां प्रमदां अधिकृत्य–निमित्तीकृत्य, ताभ्यां उभाभ्यां संभूय—एकनियुक्तया एकेन, इमां अवस्थां यथा अनाथा असती–कुलटा नीता भवति तथा अहं नीता ॥ १८ ॥

तस्याश्चानृजुवृत्तायाः तयोश्च हतयोरहम् ।
सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥ १९ ॥
एष मे प्रथमः कामः कृतः, स्तात! त्वया भवेत् ।
तस्याः तयोश्च रुधिरं पिबेयमहमाहवे ॥ २० ॥

तस्याश्चेति । हताया इति विपरिणामः । उक्तार्थस्यैव उत्कण्ठाद्योतनाय पुनर्वचनं—एष म इत्यादि ॥ २० ॥

इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ।
व्यादिदेश खरः क्रुद्धः राक्षसान् अन्तकोपमान् ॥ २१ ॥
मानुषौ शस्त्र संपन्नौ चीरकृष्णाजिनाम्बरौ ।
प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह [1] ॥ २२ ॥
तौ हत्वा तां च दुर्वृत्तां † [2] उपावर्तितुमर्हथ ।
इयं च रुधिरं तेषां भगिनी मम पास्यति ॥ २३ ॥

इयं च भगिनीत्यन्वयः ॥ २३ ॥

---

* स्वेन तस्या अपहरणादेव विरूपकरणात् तां निमित्तीकृत्येत्युक्तिः । अथ वा 'स्वापेक्षया सीतायाः सुन्दरीत्वात् किल तस्या हरणे प्रवृत्ताऽहं विरूपिता' इति भावो वा । एवं सति सीतासौन्दर्यवर्णनमपि प्रकृतं युज्यते । † अपवर्तितुं–आनेतुम् । आनयनप्रयोजनमाह—इयं चेति–गो. उपावर्तितुं–हन्तुं–रा. मत्समीपं प्रापयितुं वा । अनृजुवृत्ताया इति शूर्पणखया उक्तत्वात्–दुर्वृत्तामिति ।

[1] एतदनन्तरं–'युष्माभिस्तौ निहन्तव्यौ सहसा तापसाविमौ'–इत्यधिकम्–झ.
[2] अपावर्तितुं–ङ.

*मनोरथोऽयमिष्टोऽस्याः भगिन्या मम, राक्षसाः!
शीघ्रं संपाद्यतां तौ च प्रमथ्य स्वेन तेजसा[1] ॥ २४ ॥
इति प्रतिसमादिष्टाः राक्षसास्ते चतुर्दश।
तत्र जग्मुः तया सार्धं घना वातेरिता यथा ॥ २५ ॥
†[2]ततस्तु ते तं समुदग्रतेजसं
[3]तथाऽपि तीक्ष्णप्रदराः निशाचराः।
न शेकुरेनं सहसा प्रमर्दितुं
वनद्विपा दीप्तमिवाग्निमुत्थितम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकोनविंशः सर्गः

तीर्ण(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकोनविंशः सर्गः

विंशः सर्गः

[चतुर्दशरक्षोवधः]

ततः शूर्पणखा घोरा राघवाश्रममागता।
रक्षसामाचचक्षे तौ भ्रातरौ ‡सह सीतया ॥ १ ॥

---

* अस्या अयं मनोरथः मम च इष्टः—संमत इत्यर्थः—गो. हे राक्षसाः! मम भगिन्याः इष्टोऽयं मनोरथः शीघ्रं संपाद्यताम्—रा. †प्रदराः—बाणाः 'प्रदरा भङ्गनारी-रवणाः' इत्यमरः। तथा तीक्ष्णप्रदरा अपीति योज्यम्। तमेनमित्यन्वयः। उत्थितं—राक्षसान् दृष्ट्वा अभिमुखमुद्गतमिति रामविशेषणम्। उत्तरसर्गसंग्रहोऽयं श्लोकः—गो. अस्य श्लोकस्य अनन्तरसर्गाद्यश्लोकविरुद्धत्वात् उत्तरसर्गसंग्रहोऽयं श्लोक इत्युक्तम्। दृश्यते च बहुषु सर्गेष्वेवम्। ‡तौ भ्रातरौ सीतां च तेभ्यो दर्शयामासेति तात्पर्यम्।

[1] एतदनन्तरं-'युष्माभिर्निहतौ दृष्ट्वा तावुभौ भ्रातरौ रणे। इयं प्रहृष्टा मुदिता रुधिरं मुखि पास्यति॥' इत्यधिकम्—ङ. ज. झ. [2] अयं श्लोकः झ. पुस्तके नास्ति. [3] तथा सुतीक्ष्ण—ङ.

अथ खरेण प्रभुत्वात् रामे मानुषबुद्धित्वाच्च प्रेषितानां चतुर्दश-प्रधानानां सेनानीनां संहारः। ततः शूर्पणखेत्यादि ॥ १ ॥

ते रामं पर्णशालायां उपविष्टं महाबलम्।
ददृशुः सीतया सार्धं *[1] वैदेह्या लक्ष्मणेन च ॥ २ ॥
[2] तान् दृष्ट्वा राघवः श्रीमान् [3] आगतां तां च राक्षसीम्।
अब्रवीत् भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥ ३ ॥
मुहूर्तं भव, सौमित्रे! सीतायाः प्रत्यनन्तरः।
इमां†नस्याः वधिष्यामि पदवीमागतानिह ॥ ४ ॥

प्रत्यनन्तरः—प्रत्यासन्नः—रक्षक इति यावत् ॥ ४ ॥

वाक्यमेतत् ततः श्रुत्वा रामस्य विदितात्मनः।
तथेति लक्ष्मणो वाक्यं रामस्य प्रत्यपूजयत् ॥ ५ ॥
राघवोऽपि महच्चापं चामीकरविभूषितम्।
चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥ ६ ॥
पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ।
प्रविष्टौ सीतया सार्धं दुश्चरं दण्डकावनम् ॥ ७ ॥
फलमूलाशनौ दान्तौ तापसौ [4] धर्मचारिणौ।
वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ‡ ॥ ८ ॥

किमर्थमुपहिंसथेति। हिंसिः श्ने, वा णौ च। णिजभावपक्षे यथाप्राप्तशबेव, न तदपवादः श्नः। नौ इति शेषः ॥ ८ ॥

---

* वैदेह्या इति सीताविशेषणम्। † अस्याः पदवीमागतानित्यन्वयः। शूर्पणखेत्य अस्मान् बाधितुमागतानिति भावः। अनयाऽऽनीतानिति वाऽर्थः। ‡ अनपराधिहिंसनं अधर्म इति भावः। यद्यपि शूर्पणखाविरूपणप्रतीकारकरणार्थमेते आगताः; तथाऽपि राक्षससमुदायोद्देशेनेयमुक्तिः। शूर्पणखा हि अकारणमेव रामादीन् पीडयामास ॥

[1] लक्ष्मणेनापि सेवितम्—ज. [2] 'तां दृष्ट्वा राघवः श्रीमान् आगतांस्तां राक्षसान्'—ज. [3] आगतान्—ङ. [4] ब्रह्मचारिणौ—ज.

*युष्मान् पापात्मकान् हन्तुं विप्रकारान् महाहवे।
ऋषीणां तु नियोगेन प्राप्तोऽहं सशरायुधः ॥ ९ ॥
† तिष्ठतैवात्र [1] संतुष्टा [2] नोपावर्तितुमर्हथ।
यदि प्राणैरिहार्थो [3] वा निवर्तध्वं, निशाचराः! ॥ १० ॥

अनपकारास्मदुपहिंसनार्थं युष्मत्प्रवर्तितोऽस्मदपेक्षितः युष्मद्विषयकवधः संपन्ननिमित्तोऽद्य संवृत्तः इत्याह—युष्मानित्यादि। विप्रकारान्—मत्वर्थीयाजन्तः, अस्मासु अस्मदीयेषु ऋषिषु च वृथा वैरवतः युष्मान्। ऋषीणां तु नियोगेन युष्मान् हन्तुमेव सशरायुधः संप्राप्तोऽहमद्य प्राप्तनिमित्तः। अतस्तु संतुष्टाः, अन्तर्भावितणिः, मे प्रापितयुद्धसंतोषाः यूयं अत्रैव तिष्ठतैव, नोपावर्तितुमर्हथ। इहार्थः—इह लोके देहे चेत्यर्थः ॥ १० ॥

तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश।
ऊचुर्वाचं सुसंक्रुद्धाः ब्रह्मघ्नाः शूलपाणयः [4] ॥ ११ ॥

ब्रह्मघ्ना इति। बहुलं छन्दसीति किबभावे, 'अमनुष्यकर्तृके च' इति टक् ॥ ११ ॥

---

* अनपकारिणामस्माकं हिंसया ऋषिवचनाङ्गीकरणनिवर्तनमपि सुशकमभूदिति—'अपराधं विना हन्तुं लोकान् वीर! न कामये' (9–25) इति सीतावाक्यं स्मरन्नेवमाह। † अत्र—संग्रामे यदि सन्तुष्टाः यूयं, तर्हि तिष्ठत। उपावर्तितुं—पलायितुं नार्हथ। यदि च इह—लोके वः—युष्माकं प्राणैः अर्थः—प्रयोजनं तर्हि निवर्तध्वम्—रा. अत्रैव सन्तुष्टाः—अभीता इति यावत्, तिष्ठत। नोपावर्तितुमर्हथ मा पलायध्वमित्यर्थः। यदि वा प्राणैः अर्थः—प्रयोजनं—प्राणापेक्षाऽस्ति चेन्निवर्तध्वमित्यर्थः—गो. उपसर्पितुमिति पाठे—दूरे तिष्ठत, अत्र निर्भयं मा गम्यतामित्यर्थः।

[1] संदुष्टाः—ङ [2] नोपसर्पितु, नोपासर्पितु—ङ. [3] वः—ज. [4] एतदनन्तरं—'संरक्तनयना घोराः रामं संरक्तलोचनम्। पश्यं मधुराभाषं हृष्टा दृष्टपराक्रमम्'—बलधिकम्—ङ. ज.

क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः।
त्वमेव हास्यसे प्राणान् अद्यास्माभिर्हतो युधि ॥ १२ ॥
का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥ १३ ॥
स्थातुमपि का हि ते शक्तिरिति योजना ॥ १३ ॥

एहि बाहुप्रयुक्तैर्नः परिघैः शूल[1]पट्टिशैः।
प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥ १४ ॥
इत्येवमुक्त्वा[2] संक्रुद्धाः राक्षसास्ते चतुर्दश[3]।
चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् ॥ १५ ॥
तानि शूलानि काकुत्स्थः * समस्तानि चतुर्दश।
तावद्भिरेव चिच्छेद शरैः काञ्चनभूषणैः ॥ १६ ॥
तावद्भिरेवेति। युगपत् चतुर्दशरक्षोविमुक्तचतुर्दशशूलसंख्याकै-रित्यर्थः ॥ १६ ॥

ततः पश्चान्महातेजाः † नाराचान् सूर्यसंनिभान्।
जग्राह परमक्रुद्धः चतुर्दश शिलाशितान् ॥ १७ ॥
शिलाशितान्—शाणोपलसुनिघृष्टानित्यर्थः ॥ १७ ॥

गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान्।
मुमोच राघवो बाणान् वज्रानिव शतक्रतुः ॥ १८ ॥

---

* समस्तानि—युगपदागतानि—रा. एतेन रामहस्तलाघवं वर्णितं भवति। † नाराचान्—अफलकान् बाणान्, शिलाशितान्—शिलास्वपि शितान्—शिलानिर्भेद-क्षमानित्यर्थः—गो.

[1] पट्टसैः—ङ. [2] संरब्धाः—ङ. [3] एतदनन्तरं—उद्यतायुधनिस्त्रिंशाः राममेवाभि॥ दुद्रुवुः—त्यधिकम्—ङ. ज.

रुक्मपुङ्खाश्च विशिखाः दीप्ताः हेमविभूषिताः[1]।
ते भित्त्वा रक्षसां वेगात् वक्षांसि रुधिराप्लुताः ॥ १९ ॥
विनिष्पेतुः तदा भूमौ न्यमज्जन्ताशनिस्वनाः।
विनिष्पेतुः—निष्पत्य भूमौ च वेगवशात् न्यमज्जन्त ॥ १९ ॥

[2]ते भिन्नहृदयाः भूमौ छिन्नमूला इव द्रुमाः ॥ २० ॥
निपेतुः शोणितार्द्राङ्गाः विकृताः विगतासवः।
[3]तान् दृष्ट्वा पतितान् भूमौ राक्षसी क्रोधमूर्छिता ॥ २१ ॥
[4]परित्रस्ता पुनस्तत्र व्यसृजत् भैरवस्वनान्।
सा नदन्ती पुनर्नादं जवात् शूर्पणखा पुनः ॥ २२ ॥
उपगम्य खरं सा तु किंचित् संशुष्कशोणिता।
पपात पुनरेवार्ता सनिर्यासेव सल्लकी ॥ २३ ॥
सनिर्यासेवेति। किञ्चित् संशुष्कशोणितत्वात् उपमा ॥ २३ ॥

भ्रातुः समीपे शोकार्ता [5]ससर्ज निनदं मुहुः[6]।
*सस्वरं मुमुचे बाष्पं [7]विवर्णवदना तदा ॥ २४ ॥
†निपातितान् [8]दृश्य रणे तु राक्षसान्
प्रधाविता शूर्पणखा [9]पुनस्ततः।
वधं च तेषां निखिलेन रक्षसां
शशंस सर्वं भगिनी खरस्य सा ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे विंशः सर्गः

---

* सस्वरं—सविलापमिति यावत्। † पुनः सर्गार्थं संक्षेपेणाह—निपातितानिति—गो.
[1] एतदनन्तरं 'अन्तरिक्षे महोल्कानां बभूवुस्तुल्यदर्शनाः' इति अधिकम्—झ.
[2] तेभिन्नहृदयाः—ङ. ज. [3] अयं श्लोकः झ पुस्तके नास्ति। [4] अयं श्लोकः ज पुस्तके कुण्डलितः। [5] नष्टसंज्ञाऽभवन्मुहुः—झ. [6] एतदनन्तरं—'भूमौ शयाना दुःखार्ता नष्टसंज्ञाऽभवत्पुनः'—इत्यधिकं—झ. [7] विषण्ण—ङ. [8] प्रेक्ष्य—ङ. [9] पुनःपुनः—ङ.

* अत्रापि वृत्तान्तस्य संक्षेपतः कवेः कथनं—निपातितानि-त्यादि। दृश्य—दृष्ट्वा। शर(२५)मानः सर्गः ॥ २५ ॥

इति श्रीमद्रामायणसूतकतकटीकायां अरण्यकाण्डे विंशः सर्गः

एकविंशः सर्गः

[खरसन्धुक्षणम्]

स पुनः पतितां दृष्ट्वा क्रोधात् शूर्पणखां [1] खरः।
उवाच व्यक्तया वाचा तामनर्थार्थमागताम् ॥ १ ॥

अथ वृत्तान्तकथनपूर्वं शूर्पणखया खरप्रोत्साहनम्। स पुनरित्यादि। अनर्थार्थमिति। स्वकुलस्येति शेषः ॥ १ ॥

[2] मया त्विदानीं शूरास्ते राक्षसाः रुधिराशनाः।
त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः ॥ २ ॥
भक्ताश्चैवानुरक्ताश्च [3] हिताश्च मम नित्यशः।
† [4] घ्नन्तोऽपि न निहन्तव्याः न न कुर्युः वचो मम ॥ ३ ॥

न कुर्युरिति न ॥ ३ ॥

किमेतत् श्रोतुमिच्छामि कारणं यत्कृते पुनः।
हा नाथेति विनिर्दन्ती सर्पवल्लुठसि क्षितौ ॥ ४ ॥

---

* अत्रापीत्यनेन पूर्वसर्गान्तिमश्लोकोऽप्येतद्व्याख्यातृसम्मत इति स्पष्टम्। † परैर्हन्यमाना अपि ये न हन्यन्ते—न हन्तुं शक्यन्ते—ति. एतेन तत्कर्मकवधशङ्का नास्तीति सूचितम्—रा. एतद्व्याख्ययोः 'हन्यमाना न हन्यन्ते' इति पाठः सम्मतः। यथाश्रुतपाठे—परान् घ्नन्तोऽपि तैः हन्तुं न शक्या इत्यर्थः।

[1] पुनः—ज. [2] गतास्त्विदानीं—ङ. [3] मीताश्च—ङ. [4] हन्यमाना तु हन्यन्ते—ज.

अनाथवद्विलपसि नाथे तु मयि संस्थिते ।
उत्तिष्ठोत्तिष्ठ मा भैषीः वैक्लव्यं त्यज्यतामिह ॥ ५ ॥
इत्येवमुक्ता दुर्धर्षा खरेण परिसान्त्विता ।
[1]विमृज्य नयने [2]सास्रे खरं भ्रातरमब्रवीत् ॥ ६ ॥
*अस्मीदानीमहं प्राप्ता हृतश्रवणनासिका ।
शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता ॥ ७ ॥

अस्मीत्यादि । हृतश्रवणनासिका शोणितौघपरिक्लिन्ना अहमिदानीं पुनश्च त्वत्समीपं प्राप्ताऽस्मि, त्वया परिसांत्विता चास्मि, अतो वृत्तान्तं वक्ष्यामीति शेषः ॥ ७ ॥

प्रेषिताश्च त्वया, वीर! राक्षसास्ते चतुर्दश ।
निहन्तुं राघवं [3]क्रोधात् मत्प्रियार्थं सलक्ष्मणम् ॥ ८ ॥
ते तु रामेण सामर्षाः शूलपट्टसपाणयः ।
समरे निहताः सर्वे सायकैः मर्मभेदिभिः ॥ ९ ॥
तान् दृष्ट्वा पतितान् भूमौ †क्षणेनैव महाबलान् ।
रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम ॥ १० ॥

क्षणेनैवेति । न तु चिरकालयुद्धक्लेशपूर्वमित्यर्थः ॥ १० ॥

[4]अहमस्मि समुद्विग्ना विषण्णा च, निशाचर!
शरणं त्वां पुनः प्राप्ता ‡सर्वतो भयदर्शिनी ॥ ११ ॥

सर्वतो भयदर्शिनीति । सर्वतो रामप्रतिभासनादिति शेषः ॥

---

* अहं प्राप्ताऽस्मीत्यन्वयः । अस्मि-जीवामि इति अतिनिर्वेदसूचनं वा । एवञ्च 'हृतश्रवणनासिका' इत्याद्युत्कीर्तनमपि सरसम् । † गतसर्ग २६ श्लोकटिप्पण्युक्तदिशा रामहस्तलाघवादिकमत्र विवक्षितम् । ‡ रामनिमित्तं भयमत्र विवक्षितं वा ।

[1] विवृत्य–ङ. [2] साऽऽस्ये–ङ. [3] घोरं–ञ. [4] साऽस्मि भीता–ञ.

विषादनक्राध्युषिते परित्रासोर्मिमालिनि ।
*किं मां न त्रायसे मग्नां विपुले शोकसागरे ॥ १२ ॥
एते च निहता †भूमौ रामेण निशितैः शरैः ।
येऽपि मे पदवीं प्राप्ताः राक्षसाः पिशिताशनाः ॥ १३ ॥

ये च मे पदवीं प्राप्ताः त एते राक्षसाः भूमौ स्थितेन पदातिना रामेण निहताः ॥ १३ ॥

मयि ते यद्यनुक्रोशः ‡ यदि रक्षःसु तेषु च ।
[1]रामेण यदि ते §शक्तिः तेजो वाऽस्ति, निशाचर! ॥
दण्डकारण्यनिलयं जहि राक्षसकण्टकम् ।

रामेण यदि ते शक्तिरिति । योद्धुमिति शेषः ॥ १४ ॥

यदि रामं [2]ममामित्रं न त्वमद्य वधिष्यसि ॥ १५ ॥
तव चैवाग्रतः प्राणान् त्यक्ष्यामि ‖ निरपत्रपा ।

निरपत्रपेति । छिन्ननासिकत्वादित्याशयः ॥ १५ ॥

बुद्ध्याऽह[3]मनुपश्यामि न त्वं रामस्य संयुगे ॥ १६ ॥
स्थातुं प्रतिमुखे शक्तः [4]सबलश्च महात्मनः ।

---

* एतेन—खरः तेषां रक्षसां क्षणेनैव वधं श्रुत्वा भयविह्वलोऽभूदिति सूच्यते । अत एव शूर्पणखा खरं परुषाक्षरं वदति । अनन्तरसर्गारंभे च 'एवमाधर्षितः' इत्यप्यवलोकनीयम् । अथ वा क्रोधमूर्छितः खरः क्षणं तूष्णीमास । शूर्पणखा तु तं त्रस्तं जानन्ती उद्वेजयामासेति वा ज्ञेयम् । †भूमौ निहता इति—मृताः सन्तो भूमौ पतिता इत्यर्थकं भयसंरंभमूलकं वचनं वा । अनुपदमेव हि 'तान् दृष्ट्वा पतितान् भूमौ' इत्युक्तम् । ‡ अनुक्रोशः—दया । §शक्तिरिति । तुल्येति शेषः—गो. ‖ निरपत्रपा—वैरानिर्यातनात् ।

[1] रामे वा—ङ्. [2] अमित्रं—ज्ञ. [3] मनुशोचामि—ङ्. [4] सचापस्य—ङ्.

अथ खरस्य क्रोधोत्पत्त्यर्थं आह—बुद्ध्येत्यादि। सबलः—बलोपेतोऽपीत्यर्थः ॥ १६ ॥

शूरमानी न शूरस्त्वं मिथ्याऽऽरोपितविक्रमः ॥ १७ ॥
मानुषौ यौ न शक्नोषि हन्तुं तौ रामलक्ष्मणौ।

मिथ्या—मृषैव स्वस्मिन् आरोपितो विक्रमः येन स तथा। तत्र हेतुमाह—मानुषावित्यादि ॥ १७ ॥

रामेण यदि ते शक्तिः तेजो वाऽस्ति, निशाचर!॥ १८ ॥
*दण्डकारण्यनिलयं [1]जहि त्वं, कुलपांसन!
निःसत्त्वस्याल्पवीर्यस्य वासस्ते कीदृशस्त्विह ॥ १९ ॥
अपयाहि जनस्थानात् त्वरितः सहबान्धवः।

जहि त्वमिति। राममिति शेषः। अन्यथा तु हे कुलपांसन! त्वं सहबान्धवः जनस्थानात् अपयाहि। निर्वीर्यत्वादिगुणकस्य ते इह कीदृशो वासः? अतिजुगुप्सित एवेत्यर्थः। कुलपांसनेत्येव पाङ्क्तः। दुर्योजनत्वात् पौराणिकानां इह यथेष्टाः पाठाः ॥

रामतेजोऽभिभूतो हि त्वं क्षिप्रं विनशिष्यसि ॥ २० ॥
स हि तेजःसमायुक्तः रामो दशरथात्मजः।
भ्राता चास्य महावीर्यः येन चासि विरूपिता ॥ २१ ॥

अपयाहीत्यत्र हेतुमाह—रामतेज इत्यादि ॥ २०—२१ ॥

---

* व्याख्यादृष्ट्या-'जहि त्वं समरे मूढाऽन्यथा तु कुलपांसन!'—इति पाठः स्यादिति भाति ॥

[1] जहि तं—ङ्.

एवं विलप्य बहुशः राक्षसी विततोदरी[1] ।
कराभ्यामुदरं हत्वा रुरोद भृशदुःखिता ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकविंशः सर्गः

खर(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतटीकायां अरण्यकाण्डे एकविंशःसर्गः

द्वाविंशः सर्गः

[खराभिषेणनम्]

एवमाधर्षितः शूरः शूर्पनख्या खरस्तदा ।
उवाच रक्षसां मध्ये खरः खरतरं वचः ॥ १ ॥

अथ शूर्पणखाप्रोत्साहितस्य युद्धसंनाहः । एवमाधर्षितः इत्यादि । आधर्षितः—कोपादवमानितः इत्यर्थः । खरतरं—क्रूरतरम् ॥

तवा*वमानप्रभवः क्रोधोऽयमतुलो मम ।
न शक्यते धारयितुं †लवणाम्भ[2] इवोत्थितम् ॥ २ ॥

लवणाम्भ इति । लवणसमुद्राम्भः इत्यर्थः ॥ २ ॥

न रामं गणये वीर्यात् मानुषं[3] क्षीणजीवितम् ।
‡आत्मदुश्चरितैः प्राणान् हतो योऽद्य विमोक्ष्यति ॥ ३ ॥

---

* अवमानं—विरूपणरूपम् । † लवणाम्भ इवोत्थणं—व्रण इति शेषः । व्रणे निक्षिप्तं लवणयुक्तमंभ इव धारयितुं न शक्यते—ती. उत्थितं—पर्वणि उत्थणम्—गो. ‡ आत्मनः दुश्चरितैः—स्वद्विरूपणादिभिः ।

[1] एतदनन्तरं—'भ्रातुः समीपे शोकार्ता नष्टसंज्ञा बभूव ह'—इत्यधिकं—ङ. ज.
[2] इवोत्थणम्—ज. [3] क्षणजीवितम्—ङ.

आत्मदुश्चरितैः स्वयं हतो योऽद्य प्राणान् विमोक्ष्यते, तं रामं न गणये इत्यन्वयः ॥ ३ ॥

बाष्पः संहियतामेषः संभ्रमश्च विमुच्यताम् ।
अहं रामं सह भ्रात्रा नयामि यमसादनम् ॥ ४ ॥
परश्वधहतस्याद्य मन्दप्राणस्य [1] संयुगे ।
रामस्य रुधिरं रक्तं उष्णं पास्यसि, [2] राक्षसि ! ॥ ५ ॥

परश्वधहतस्येति । तस्य परश्वधं मुख्यं आयुधम् ॥ ५ ॥

सा प्रहृष्टा वचः श्रुत्वा खरस्य वदनात् च्युतम् ।
प्रशशंस पुनर्मौर्ख्यात् * भ्रातरं रक्षसां वरम् ॥ ६ ॥

मौर्ख्यात्–अव्यवस्थचित्ततालक्षणात् । पुनः प्रशशंस च–त्वत्समो वीरो नास्तीत्यादिना ॥ ६ ॥

तया परुषितः पूर्वं पुनरेव प्रशंसितः ।
अब्रवीत् दूषणं नाम खरः सेनापतिं तदा ॥ ७ ॥

अयमेवार्थः विव्रियते—तयेत्यादि ॥ ७ ॥

चतुर्दश सहस्राणि मम चित्तानुवर्तिनाम् ।
रक्षसां भीमवेगानां समरेष्वनिवर्तिनाम् ॥ ८ ॥
[3] नीलजीमूतवर्णानां घोराणां [4] क्रूरकर्मणाम् ।
लोकहिंसाविहाराणां बलिनामुग्रतेजसाम् ॥ ९ ॥

---

* मौर्ख्यात्–स्वाज्ञानात्–रा.

[1] भूतले–ज. [2] कांक्षितम्–ङ. [3] एतदर्धद्वयस्थाने 'नीलजीमूतवर्णानां लोकहिंसाविहारिणाम्' इतिमात्रम्–ङ. [4] कामरूपिणाम्–ङ.

[1]तेषां शार्दूलदर्पाणां महास्यानां महौजसाम् ।
सर्वोद्योगमुदीर्णानां रक्षसां, सौम्य ! कारय ॥ १० ॥

लोकस्य—त्रैलोक्यस्य प्राणिनः पीडारूपो विहारः यैरेवासाधारण्येन, ते तथा । सर्वोद्योगमिति । सर्वप्रकारेण चतुरङ्गबलोपेततया सर्वायुधसामग्रीसमेततया च यः उद्योगः तादृशं उद्योगं कारय ॥ १० ॥

उपस्थापय मे क्षिप्रं रथं, सौम्य ! धनूंषि च ।
[2]शरांश्चित्रांश्च खड्गांश्च शक्तीश्च विविधाः शिताः ॥ ११ ॥

*अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनाम् ।
वधार्थं दुर्विनीतस्य रामस्य [3]रणकोविदः ॥ १२ ॥

पौलस्त्यानां—राक्षसानां अग्रे रामस्य वधार्थं निर्यातुमिच्छामीति योजना ॥ १२ ॥

इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथम् ।
सदश्वैः [4]शबलैः युक्तं आचचक्षेऽथ दूषणः ॥ १३ ॥

शबलैः—चित्रवर्णैः । आचचक्ष इति । उपस्थितमिति शेषः ॥ १३ ॥

तं मेरुशिखराकारं तप्तकाञ्चनभूषणम् ।
हेमचक्रमसंबाधं वैडूर्यमयकूबरम् ॥ १४ ॥
मत्स्यैः पुष्पैः द्रुमैः शैलैः चन्द्रसूर्यैश्च काञ्चनैः ।
[5]मङ्गल्यैः पक्षिसङ्घैश्च ताराभिरभिसंवृतम् ॥ १५ ॥

---

* शूर्पणखयाऽवमानितत्वात्—अहमेव प्रथमं गच्छामीत्याह ।

[1] इदमर्धं क्वचित् कुण्डलितम्—ङ. [2] रथांश्चित्रांश्च—ङ. [3] रणमूर्धनि—ङ.
[4] सबलैः—ङ. [5] मंगलैः—ङ.

ध्वजनिस्त्रिंशसंपन्नं किङ्किणीकविराजितम् ।
सदश्वयुक्तं सोऽमर्षात् आरुरोह खरो रथम् ॥ १६ ॥

वैडूर्यमयौ कूबरौ यस्य स तथा । "कूबरस्तु युगन्धरः" । मङ्गल्यैः—मङ्गलप्रयोजनैः अलङ्कारप्रयोजनैः काञ्चनैः—स्वर्णनिर्मितैः । उक्तविशेषणद्वयं मत्स्यादौ सर्वत्र योज्यम् । "किङ्किणी क्षुद्रघण्टिका ॥ १४-१६ ॥

[1]निशाम्य तु रथस्थं तं राक्षसाः भीमविक्रमाः ।
तस्थुः संपरिवार्यैनं दूषणं च महाबलम् ॥ १७ ॥

*[2]खरस्तु तन्महत् सैन्यं रथवर्मायुधध्वजम् ।
निर्यातेत्यब्रवीत् प्रेक्ष्य दूषणः सर्वराक्षसान् ॥ १८ ॥

'खरस्तु तन्महत् सैन्यं रथवर्मायुधध्वजम् । निर्यातेत्यब्रवीत् प्रेक्ष्य दूषणः सर्वराक्षसान्' इति पाङ्क्तः पाठः ॥ १८ ॥

ततस्तद्राक्षसं सैन्यं घोरवर्मायुधध्वजम् ।
निर्जगाम जनस्थानात् महानादं महाजवम् ॥ १९ ॥

ततस्तदिति । उभयनियोगानन्तरमित्यर्थः । रक्षसामिदं राक्षसम् ॥ १९ ॥

मुद्गरैः पट्टसैः शूलैः सुतीक्ष्णैश्च परश्वधैः ।
खड्गैः चक्रैश्च हस्तस्थैः भ्राजमानैश्च तोमरैः ॥ २० ॥

---

* तन्महत्सैन्यं प्रेक्ष्य तत् प्रतिनिर्यातेत्यब्रवीत् । दूषणः—दूषणश्चेत्यर्थः—ति. खरो दूषणश्च रथादिविशिष्टं सैन्यं सर्वराक्षसांश्च प्रेक्ष्य निर्यातेत्यब्रवीत्—रा.

[1] अयं श्लोकः ज पुस्तके कुण्डलितः । [2] खरस्तु तान् महेष्वासान् घोरवर्मायुधध्वजान् । निर्यातेत्यब्रवीद्दृष्ट्वा रथस्थः सर्वराक्षसान्—ङ. झ.

शक्तिभिः परिघैः घोरैः अतिमात्रैश्च कार्मुकैः ।
गदाऽसिमुसलैः वज्रैः गृहीतैः भीमदर्शनैः ॥ २१ ॥
राक्षसानां सुघोराणां सहस्राणि चतुर्दश ।
निर्यातानि जनस्थानात् खरचित्तानुवर्तिनाम् ॥ २२ ॥

मुद्गरः–लोहमयी गदा । पट्टसः–பட்டயம் । तोमरः–வளயம் । शक्तिः–சட்டி । परिघः–உழல்தடி । वज्रं–वज्रमित्यष्टाश्रमायुधम् ॥ २०–२२ ॥

[1] तांस्त्वभिद्रवतो दृष्ट्वा राक्षसान् भीमविक्रमान् ।
खरस्यापि रथः * किञ्चित् जगाम तदनन्तरम् ॥ २३ ॥

खरस्य रथोऽपि सेनाप्रस्थानात् किञ्चिदनन्तरं–सर्वसेनानिर्याणं किञ्चित् प्रतीक्ष्य–अनन्तरं जगामेत्यर्थः ॥ २३ ॥

ततः तान् शबलान् अश्वान् तप्तकाञ्चनभूषितान् ।
खरस्य [2]मतमास्थाय सारथिः समचोदयत् † ॥ २४ ॥

मतमास्थायेति । अभीष्टं ज्ञात्वेत्यर्थः ॥ २४ ॥

स चोदितो रथः ‡ शीघ्रं खरस्य रिपुघातिनः ।
शब्देनापूरयामास दिशश्च प्रदिशस्तदा ॥ २५ ॥

---

* किञ्चित्तदनन्तरमित्यन्वयः । † किञ्चिद्विलम्ब्य प्रस्थितत्वात्–पुरतः प्रस्थितं सैन्यं प्राप्तुं अश्वान् समचोदयदित्यर्थः । ‡ शीघ्रं चोदित इत्यन्वयः ।

[1] तांस्तु निर्धावतः–ज. [2] मतिमास्थाय–ज.

प्रवृद्धमन्युस्तु खरः खरस्वनः
रिपोर्वधार्थं त्वरितः यथाऽन्तकः ।
अचूचुदत् सारथिमुन्नदन् घनं
* महाबलो मेघ इवाश्मवर्षवान् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्वाविंशः सर्गः

† सर(२७)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्वाविंशः सर्गः

त्रयोविंशः सर्गः

[उत्पातदर्शनम्]

‡ [1] तस्मिन् याते जनस्थानात् अशिवं शोणितोदकम् ।
§ अभ्यवर्षन्महा [2] मेघाः तुमुलाः गर्दभारुणाः ॥ १ ॥

अथ युद्धाय प्रस्थितस्य खरस्य महोत्पाताः वर्ण्यन्ते—तस्मिन्नित्यादि । अभ्यवर्षन्निति पदम् । गर्दभारुणाः—धूसरवर्णाः ॥ १ ॥

---

* महाबलः—झञ्झामारुतः 'झञ्झावातो महाबलः' इति निघण्टुः, तद्वान्; अर्श आद्यच् । झञ्झामारुतप्रेरित इत्यर्थः । महानिल इत्यपि पाठः । अश्मवर्षवान्—अश्मवर्षोयुक्त इत्यर्थः । घनं—उपरितनमेघम्-गो. अन्तकश्च अश्मवर्षवान्—उपलवर्षणशीलः, उन्नदन् मेघ इव च सारथिं पुनः अचूचुदत्—रा. अश्मवर्षः—वर्षोपलवर्षणं वा—घनं यथा तथा वर्षोपलवर्षणशीलो मेघ इवेति वाऽर्थः ॥ 'उन्नदन् पुनः' इति पाठे, पुनः अचूचुददित्यन्वयः । † व्याख्यादृष्ट्या एकः श्लोको न दृश्यते । ‡ 'तत्प्रयातं बलं घोरं' इति (ति) पाठे—प्रयातं बलं मेघाः शोणितोदकं अभ्यवर्षन्—इत्यन्वयः । § 'अभ्यवर्षन्महाघोरः तुमुलो गर्दभारुणः' इति (ति) पाठे— मेघ इति शेषः ।

[1] तत्प्रयातं बलं घोरं—च. ज. [2] घाराः—च. ज.

*निपेतुः तुरगास्तस्य रथयुक्ताः महाजवाः ।
समे † बाष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥

रथयुक्ताः—रथे युक्ताः । बाष्पैः चितः—निबिडः तथा ॥ २ ॥

श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् ।
अलातचक्रप्रतिमं ‡[1] परिगृह्य दिवाकरम् ॥ ३ ॥

रुधिरः—रक्तवर्णः पर्यन्तः यस्य तत् तथा । अलातचक्रप्रतिमं इति वृत्तज्वालत्वोपमानम् ॥ ३ ॥

ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितम् ।
समाक्रम्य महाकायः तस्थौ गृध्रः सुदारुणः ॥ ४ ॥
जनस्थानसमीपे तु[2] समागम्य खरस्वनाः ।
विस्वरान् विविधांश्चक्रुः मांसादाः मृगपक्षिणः ॥ ५ ॥

खरस्वनाः—परुषशब्दाः ॥ ५ ॥

[3] व्याजह्रुश्च § प्रदीप्तायां दिशि वै भैरवस्वनम् ।
‖ अशुभं यातुधानानां शिवा घोरा महास्वनाः ॥ ६ ॥

प्रदीप्तायां दिशीति । उत्पातवशात् जाज्वल्यमानायामित्यर्थः । यातुधानानां अशुभं व्याजह्रुः इत्यन्वयः ॥ ६ ॥

---

* निपेतुः—स्खलनादिना भूम्यां पतिता अभवन् । † पुष्पचिते—पुष्पयुते, अनेन पातनिमित्तराहित्यमुक्तम्—ति. 'बाष्पचिते' इति पाठे—बाष्पः—ऊष्मा । पूर्वं 'बाष्पच्छन्नान्यरण्यानि' (16.16) इत्युक्तं स्मरणीयमत्र । ‡ परिगृह्य—परितो व्याप्य—गो. § प्रदीप्तायां दिशि—सूर्यसन्निहितदिशीत्यर्थः—गो. ‖ राक्षससैन्यस्य पुरत एवोत्पातदर्शनात्—यातुधानानामशुभमित्युक्तम् ।

[1] प्रतिगृह्य—च. ज. [2] समाक्रम्य—ज. [3] व्याजह्रुरभिदीप्तायां—च.

* प्रभिन्न[1]गजसंकाशाः तोयशोणितधारिणः ।
आकाशं † तदनाकाशं चक्रुः भीमा बलाहकाः ॥ ७ ॥

प्रभिन्नाः—मत्ताः । तोयमिव शोणितमेव धरन्तीति तथा । 'सुपसुपा' इति समासः । 'उक्तानामप्रयोगः' इति इवैवशब्दयोः निवृत्तिः । काशनं काशः प्रकाशः, अनाकाशं—अप्रकाशं—छन्नं चक्रुरित्यर्थः ॥ ७ ॥

बभूव तिमिरं घोरं ‡ उद्धतं रोमहर्षणम् ।
दिशो वा विदिशो वाऽपि न च व्यक्तं चकाशिरे ॥ ८ ॥
क्षतजार्द्रसवर्णाभा संध्या § कालं विना बभौ ।

क्षतजेन—रक्तेन आर्द्रस्य पटादिवस्तुनः सवर्णाभा—समानवर्णा, संध्या कालं विनैव बभौ । मेघेष्विति शेषः ॥ ८ ॥

‖ खरस्याभिमुखा नेदुः तदा घोरमृगाः खगाः ॥ ९ ॥
कङ्कगोमायुगृध्राश्च चुक्रुशुः भयशंसिनः[2] ।

कंकः—(கழுகு), गोमायुः—(நரி), गृध्रः—(பரந்து) ॥ ९ ॥

[3] नित्याशिवकरा युद्धे शिवाः ¶ घोरनिदर्शनाः ॥ १० ॥
नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः ।

युद्धे नित्यमेवाशिवकराः—अशुभशंसिनः ॥ १० ॥

---

* 'प्रभिन्नगिरिसंकाशः' इति गो. पाठः । प्रभिन्नाः—इन्द्रच्छिन्नपक्षाः । † अनाकाशं—अवकाशरहितं, प्रकाशरहितं वा—रा. ‡ उद्धतं—सान्द्रं—गो. अप्रभूतं वा । § कालं विना—स्वकालं विना—गो. ‖ पूर्वं सूर्याधिष्ठितदिशि शिवाश्रुतमुक्तं, अधुना खरस्याभिमुखमुच्यते—गो. ¶ घोरनिदर्शनाः—भयंकरदर्शनाः ।

[1] गिरि—ङ. [2] एतदनन्तरं—"चक्रिरे विस्वरान् घोरान् मांसादा वनगोचराः"—इत्यधिकम्—ङ. [3] नित्याशुभ—ङ.

*कबन्धः परिघाभासः दृश्यते भास्करान्तिके ॥ ११ ॥
जग्राह सूर्यं स्वर्भानुः अपर्वणि †महाग्रहः ।
‡प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ॥ १२ ॥
उत्पेतुश्च विना रात्रिं ताराः खद्योत[1]सप्रभाः ।

उत्पेतुः—उद्गता बभूवुः । खद्योतसमप्रभाः इत्यनेन निस्तेजस्त्वं तारल्यं च लक्ष्यते ॥ १२ ॥

संलीनमीनविहगाः नलिन्यः शुष्कपङ्कजाः ॥ १३ ॥
तस्मिन् क्षणे बभूवुश्च §विना पुष्पफलैः द्रुमाः ।
उद्भूतश्च विना वातं रेणुः ‖जलधरारुणः ॥ १४ ॥
वीचीकूचीति वाश्यन्तः बभूवुः तत्र शारिकाः ।

उद्भूतः—उत्क्षिप्तः । जलधरारुणः—मेघधूसरः । वीचीकूचीति शब्दानुकारः । वीचीकूचीति वाश्यन्तः ; न तु शिक्षितं सवर्णसुशब्दमित्यर्थः ॥ १४ ॥

¶उल्काश्चापि [2]सनिर्घाताः निपेतुः घोरदर्शनाः ॥ १५ ॥

---

*परिघवत्—परिघायुधवत् आभासत इति परिघाभासः, कबन्धः—शिरश्शून्यमनुष्यकायः भास्करान्तिके—सूर्यस्य समीपे दृश्यते—अदृश्यत । तथोक्तं कामन्दकीये—'सूर्यदृष्टकबन्धादिरकस्मान्मूढवाहनः'—इति । कबन्धाकारमेघखण्ड इति यावत्—गो. † महान् आग्रहः यस्य, सः महाग्रहः स्वर्भानुः राहुः । अपर्वणि—प्रतिपद्दर्शसन्धिः पर्व, तस्मादन्यस्मिन्नपि काले सूर्यं जग्राह । तदाह वराहमिहिरः—'अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः' —इति—गो. ‡ प्रवाति—प्रतिकूलो वाति—गो. § पुष्पफलैर्विना बभूवुः—गलितपुष्पादिका बभूवुरित्यर्थः—गो. ‖ जलधरारुणः—मेघवद्धूसरः—गो. रा. ¶ उल्कानिर्घातौ—ज्योतिर्वायुविशेषौ । अत्र वराहमिहिरः—" उल्का शिरसि विशाला निपतन्ती वर्धते तनुप्रभया । पवनाभिहता गगनादवनौ च यदा समापतति । भवति तदा निर्घातः स च पापो दीर्घडगविरुतः ॥ " इति—गो.

[1] सन्निभाः—ङ. [2] सनिर्घोषाः—ज.

प्रचचाल मही सर्वा सशैलवनकानना ।
खरस्य च रथस्थस्य नर्दमानस्य धीमतः ॥ १६ ॥

प्राकम्पत भुजः सव्यः स्वरश्चास्यावसज्जत ।
सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः ॥ १७ ॥

ललाटे च *रुजा जाता न च मोहात् न्यवर्तत ।
तान् समीक्ष्य महोत्पातान् [1]उत्थितान् †रोमहर्षणान् ॥
अब्रवीत् राक्षसान् सर्वान् ‡प्रहसन् [2]स खरस्तदा ।

तान् उत्थितान् महोत्पातान् समीक्ष्यापि मोहात्—अज्ञानात् न न्यवर्तत । युद्धयात्राया इति शेषः ॥ १८ ॥

महोत्पातानिमान् सर्वान् [1]उत्थितान् घोरदर्शनान् ॥१९॥
न चिन्तयाम्यहं वीर्यात् बलवान् §दुर्बलानिव ।
तारा अपि शरैः तीक्ष्णैः पातयामि नभःस्थलात् ॥ २०॥
मृत्युं मरणधर्मेण संक्रुद्धो योजयाम्यहम् ।
राघवं तं बलोत्सिक्तं भ्रातरं चास्य लक्ष्मणम् ॥ २१ ॥
अहत्वा सायकैः तीक्ष्णैः नोपावर्तितुमुत्सहे ।
सकामा भगिनी मेऽस्तु पीत्वा तु रुधिरं तयोः ॥ २२ ॥

---

* रुजा—पीडा—गो. रा. †रोमहर्षणान्—रोमाञ्चकरान्—भयजनकानित्यर्थः । तदुक्तं साहित्यचिन्तामणौ— "उल्कानिपातनिर्घातव्यालव्याघ्रादिदर्शनैः । उत्पन्नः सहसा चित्तविक्षोभस्त्रास इष्यते । नेत्रसंमीलनोत्कम्पगात्रसङ्कोचगद्गदैः । वैवर्ण्यस्वेदरोमाञ्च-साम्भाद्यैरनुभूयते"—इति—गो. ‡प्रहसन्नित्यनेन गर्वः सूच्यते । अग्रे तत्कार्यप्रतिज्ञा-माह—महोत्पातानिति । तथोक्तं चिन्तामणौ—"कुलरूपवयोविद्याबलैश्वर्यधनादिभिः । यो भवेदात्मनः श्लाघा स गर्व इति कथ्यते । उद्भावावेक्षणाज्ञाप्रतिज्ञातिभेदेह"—इति—गो. §यथा बलवान् पुरुषः दुर्बलान् स्वप्रतिपक्षभूतान् न गणयेत् तथेत्यर्थः ।

[1] उदितान्—ङ. [2] वाहिनीपतिः—ङ. [3] उदितान्—ङ.

यन्निमित्तस्तु रामस्य लक्ष्मणस्य विपर्ययः ।
न क्वचित् प्राप्तपूर्वो मे [1]संयुगेषु पराजयः ॥ २३ ॥
युष्माकमेतत् प्रत्यक्षं नानृतं कथयाम्यहम् ।
देवराजमपि क्रुद्धः मत्तैरावत[2]यायिनम् ॥ २४ ॥
वज्रहस्तं रणे हन्यां किं पुनस्तौ कुमानुषौ ।
सा तस्य गर्जितं श्रुत्वा राक्षसस्य महाचमूः ॥ २५ ॥
प्रहर्षमतुलं लेभे मृत्यु[3]पाशावपाशिता ।
समीयुश्च महात्मानः युद्धदर्शनकांक्षिणः ॥ २६ ॥
ऋषयो देवगन्धर्वाः सिद्धाश्च सह चारणैः ।
समेत्य चोचुः सहिताः तेऽन्योन्यं पुण्यकर्मणः ॥ २७ ॥
स्वस्ति गोब्राह्मणेभ्योऽस्तु *लोकानां [4]येऽपि संमताः ।
जयतां राघवः संख्ये [5]पौलस्त्यान् रजनीचरान् ॥ २८ ॥
चक्रहस्तो यथा युद्धे सर्वान् असुरपुङ्गवान् ।
एतच्चान्यच्च बहुशः ब्रुवाणाः परमर्षयः ॥ २९ ॥
जातकौतूहलास्तत्र विमानस्थाश्च देवताः ।
ददृशुः वाहिनीं तेषां राक्षसानां †गतायुषाम् ॥ ३० ॥

एतदिति । न मे पराजयोऽभूत् इत्युक्तार्थतत्त्वमित्यर्थः ॥३०॥

‡रथेन तु खरो वेगात् [6]सैन्यस्याग्रात् विनिःसृतः ।
[7]तं दृष्ट्वा [8]राक्षसं भूयः राक्षसाश्च विनिःसृताः ॥ ३१ ॥

---

*ये लोकानां संमताः—गोब्राह्मणव्यतिरिक्ताः तेभ्यश्च स्वस्तीत्यर्थः—ति. ये लोकसमताः—ल.केप्सिताः, तेभ्यः गोब्राह्मणेभ्यः स्वस्त्यस्तु—रा. †अल्पायुष इतिवत् गतायुष इति निन्दावाक्यम् । ‡पूर्वं सैन्यसम्बद्ध एव तदग्रभागे स्थितः, इदानीं तु सेनां बहुदूरे पृष्ठतः त्यक्त्वा स्वयमेवाग्रे गत इत्यर्थः—ति.

[1] संग्रामेषु—ङ. [2] गामिनम्—ज. [3] पाशवशं गता—ङ. [4] येऽभिसंमताः—ङ. [5] सर्वानसुरसत्तमान्—ङ. [6] उग्रसैन्यात्—ङ. [7] इदमर्धं नास्ति—ज. [8] निस्सृतं—ङ.

श्येनगामी [1]पृथुग्रीवः यज्ञशत्रुः [2]विहङ्गमः ।
दुर्जयः [3]करवीराक्षः परुषः कालकार्मुकः ॥ ३२ ॥
[4]मेघमाली [5]महामाली सर्पास्यो रुधिराशनः ।
द्वादशैते महावीर्याः प्रतस्थुः अभितः खरम् ॥ ३३ ॥
महाकपालः स्थूलाक्षः प्रमाथी त्रिशिरास्तथा ।
चत्वार एते सेनान्यः दूषणं पृष्ठतो ययुः ॥ ३४ ॥
श्येनगाम्यादयः द्वादश खरस्यामात्याः ॥ ३४ ॥

सा भीमवेगा समराभि[6]कामा
[7]महाबला राक्षसवीरसेना ।
तौ राजपुत्रौ सहसाभ्युपेता
माला ग्रहाणामिव चन्द्रसूर्यौ ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रयोविंशः सर्गः

तौ राजपुत्रौ सा सेना सहसाऽभ्युपेतेत्यन्वयः । मल(३५)मानः सर्गः ॥ ३५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रयोविंशः सर्गः

चतुर्विंशः सर्गः

[रामसमुद्यमः]

आश्रमं प्रतियाते तु खरे खरपराक्रमे ।
*तानेवौत्पातिकान् रामः सह भ्रात्रा ददर्श ह ॥ १ ॥

---

* तानेवेत्यनेन तादृशोत्पातदर्शनेन न स्वस्वीयेषु अनिष्टापत्तिः शङ्किताऽभूदिति लक्ष्यते । अत एव च वक्ष्यति 'समुत्थितान् महोत्पातान् संहर्तुं सर्वराक्षसान्'। (३) इति।

[1] पृथुश्यामः—ङ. [2] महाविषः—ङ. [3] परवीराक्षः—ङ. [4] हेममाली—ज. [5] महाबाहुः—ज. [6] काङ्क्षिणी—ज. [7] सुदारुणा—ज.

अथ रामस्य सीतारक्षणाय लक्ष्मणनियोगपूर्वं युद्धसंनाहः । आश्रममित्यादि । तानेवेति । ये पूर्वसर्गवर्णिताः तानेवेत्यर्थः । औत्पातिकान्, स्वार्थे ठक् ॥ १ ॥

*तानुत्पातान् महाघोरान् [1] उत्थितान् रोमहर्षणान् ।
†प्रजानामहितान् [2] दृष्ट्वा [3]ऽमर्षणो वाक्यमब्रवीत् ॥ २ ॥

अमर्षणः—अस्वस्थचित्तः ॥ २ ॥

इमान् पश्य, महाबाहो! ‡सर्वभूतापहारिणः ।
समुत्थितान् महोत्पातान् संहर्तुं सर्वराक्षसान् ॥ ३ ॥

सर्वभूतापहारिण इति । तत्सूचकानिति यावत् । प्रकृते सर्वराक्षसान् संहर्तुं तत्सूचनं कर्तुं समुत्थितान् ॥ ३ ॥

§अमी रुधिरधारास्तु [4] विसृजन्तः खरस्वनान् ।
व्योम्नि मेघा [5] विवर्तन्ते परुषाः गर्दभारुणाः ॥ ४ ॥

---

* अत्र 'तानुत्पातान् महाघोरान् रामो दृष्ट्वाऽत्यमर्षणः' इति **ति.** पाठः । अत्यमर्षणः—मुनिखेदासहिष्णुः उत्पातान् दृष्ट्वा—अवलोक्य, दृष्ट्वा—विचार्य—**रा.**

† यद्यपि राक्षसानामेवाहितं भविष्यति, तथाऽपि तेषामपि प्रजात्वतः, युद्धसम्बन्धिफलपरंपराणां सर्वोपरि पतनसंभवाच्च सामान्यतः, 'प्रजानामहितान्' इत्युक्तं स्यात । 'सर्वभूतापहारिणः' इत्यप्येवमेव । अधिकं तत्रैव ।

‡ सर्वभूतापहारिणः राक्षसान् संहर्तुं समुत्थितान्—**रा.** 'सर्वभूतापहारिणः' इति उत्पातविशेषणम् । तादृशोत्पाताः सकललोकानर्थावहा इति तेषां स्वरूपदृष्ट्या । प्रकृतफलदृष्ट्या च 'सर्वराक्षसान् संहर्तुं' इति ।

§ अत्र खरस्वनाः इति पाठान्तरम् । रुधिरधाराः विसृजन्तः मेघाः—**रा.** रुधिरमय्यः धाराः येषां ते—रुधिरधाराः । खरस्वनान्—घोरस्तनितानि विसृजन्तः विवर्तन्ते—सञ्चरन्ति—**गो.**

[1] रामो दृष्ट्वाऽत्यमर्षणः—**ज.** [2] घोरान्—**ङ.** [3] लक्ष्मणं—**ङ. ज.**
[4] विसृजन्ते—**ज.** [5] निवर्तन्ते—**ङ.**

* सधूमाश्च शराः सर्वे मम युद्धाभिनन्दिनः ।
रुक्मपृष्ठानि † चापानि [1] विचेष्टन्ते च, लक्ष्मण ! ॥ ५ ॥

सधूमाः—उत्पातवशतः धूमसंबद्धाः विचेष्टन्ते—तूणीरे चलन्ति ॥ ५ ॥

यादृशा इह [2] कूजन्ति पक्षिणो वनचारिणः ।
‡ अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च ॥ ६ ॥
संप्रहारस्तु सुमहान् भविष्यति न संशयः ।

अग्रतः—पुरस्तात्—आसन्नकाले इत्यर्थः ॥ ६ ॥

अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ ७ ॥
संनिकर्षे तु नः, शूर ! जयं, शत्रोः पराजयम् ।

एवं भयेष्वपि स्वस्याभयसूचकस्वनिमित्तसत्त्वमाह—अयमित्यादि । स्फुरमाणः—स्फुरन् इति यावत् । दक्षिण इति शेषः । सन्निकर्षे—आसन्नकाले ॥ ७ ॥

§ [3] सुप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते ॥ ८ ॥

---

* सधूमा इति । प्रतापानलोद्भुक्ता इति भावः—**गो.** लोके एकस्य कार्यस्य तीव्रतया बहिः स्फोटनात् पूर्वं 'इदानीं आयत्तीक्रियते, भविष्यत्यचिरात् स्पष्टं' इत्यर्थे एवं 'सधूमः' इति प्रयोगः अनुभवसिद्ध एव । † आत्मनश्चापद्वयं, लक्ष्मणस्यैकमिति बहुवचनम्—**गो.** ‡ नः अभयं प्राप्तं, जीवितस्य—राक्षसानां जीवनस्य संशयश्च प्राप्तः—**रा. ती.** 'अव्यवस्थौ हि विद्येते युद्धे जयपराजयौ' इति सामान्यलोकोक्त्या एवमुक्तिः । अत एव समनन्तरश्लोके स्वस्य जयः कथ्यते । § स्वमुखप्रसादादेः स्वयं द्रष्टुमशक्यत्वेन स्वसमानसुखे लक्ष्मणे निदर्शयति—सप्रभमिति—**गो.** अयं भावः—रामस्य मुखं यदि निष्प्रभं स्यात् तदा तत्र पश्यतो लक्ष्मणस्यापि मुखं निष्प्रभमेव स्यात् । लक्ष्मणमुखं यदा सप्रभं तदा स्वमुखे न काचित् विक्रिया स्यादिति रामाशय इति ।

[1] विचेष्टन्ते—**ङ.** [2] गर्जन्ति—**ङ.** [3] सप्रभं—**ङ.**

उद्यतानां हि युद्धार्थं येषां भवति, लक्ष्मण!
निष्प्रभं वदनं तेषां भवत्यायुःपरिक्षयः ॥ ९ ॥

न केवलं ममैवं लक्षणोपेतत्वं, अपि तु तवापीत्याह– सुप्रभमित्यादि। येषां आयुःपरिक्षयो भवति तेषां वदनं निष्प्रभं भवति। नैवमस्माकमिति शेषः ॥ ८-९ ॥

रक्षसां नर्दतां घोरः श्रूयते च महाध्वनिः।
आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः ॥ १० ॥
अनागतविधानं तु कर्तव्यं[1] शुभमिच्छता।
*[2] आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ ११ ॥

अनागतस्य, अपि तु आजिगमिषितस्य अनिष्टस्य विधानं—प्रतिविधानं–परिहारः तथा। उक्तवाक्यस्यैव विवरणं–आपदमित्यादि ॥

तस्माद्गृहीत्वा वैदेहीं †शरपाणिः धनुर्धरः।
गुहामाश्रय शैलस्य दुर्गां पादपसंकुलाम् ॥ १२ ॥

शैलस्य गुहामिति। आश्रमं हित्वेति शेषः ॥ १२ ॥

प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया।
‡शापितो मम पादाभ्यां गम्यतां,[3] वत्स! मा चिरम् ॥

---

* आपदं शङ्कमानेन शुभमिच्छता विपश्चिता पुरुषेण अनागतविधानं तु कर्तव्यम्–इति एकमेव वाक्यं युक्तम्। † 'तत्रापि त्वया जागरूकेणैव भाव्य'मित्याशयेनाह—शरपाणिर्धनुर्धर इति। ‡ 'मया शापितोऽसि' इति वक्तव्ये 'मम पादाभ्यां' इत्युक्तिः लक्ष्मणव्यवहारानुसारेण–गो. स्वयं युद्धे प्रोत्साहवतः लक्ष्मणस्याशयं ज्ञात्वाऽह एवम्। अत एव समनन्तरश्लोकोऽपि स्वरसः।

[1] जय–ङ. [2] आपदा–ज. [3] तत्र–ङ.

इदानीं मया उच्यमानं इदं वाक्यं त्वया प्रतिकूलितुं–त्वत्कर्तृक-प्रातिकूल्यवर्तनं नेच्छामि, आर्षः तुमुन् अभिन्नकर्तृके, उक्तमेव कुरु इत्यर्थः। भगवान् कार्यगौरवं विज्ञाय लक्ष्मणस्य * तत्र प्रविवक्षां वारयति आज्ञापुरःसरं अविलम्बाय––शापित इत्यादि ॥ १३ ॥

† त्वं हि शूरश्च बलवान् हन्या ह्येतान् न संशयः।
[1]स्वयं तु हन्तुमिच्छामि सर्वानेव निशाचरान् ॥ १४ ॥
एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया।
शरानादाय चापं च गुहां दुर्गां समाश्रयत् ॥ १५ ॥

दुर्गां गुहामिति। इतरैः गन्तुमशक्यां गिरिगुहामित्यर्थः ॥

तस्मिन् प्रविष्टे तु गुहां लक्ष्मणे सह सीतया।
‡ हन्त![2] निर्युक्तमित्युक्त्वा रामः कवच[3]माविशत् ॥ १६ ॥

हन्त हर्षे। निर्युक्तं हन्त––शीघ्रं अस्मदुक्तं निगूढं संपादितमित्युक्त्वा रामः कवचं आविशत्––प्रतिमुक्तवान् इति यावत् ॥ १६ ॥

स तेनाग्निनिकाशेन कवचेन विभूषितः।
बभूव रामः § तिमिरे [4]विधूमोऽग्निरिवोत्थितः ॥ १७ ॥

---

* तत्र–युद्धे इत्यर्थः। † त्वन्निवर्तनं न त्वदशक्त्या, किन्तु मुनिभ्यः प्रतिज्ञानात्तस्यैव तद्वधः कर्तव्य इत्याशयेनाह–त्वं हीति–गो. यद्यपि इन्द्रजिद्वधः लक्ष्मणेनैव, तथापि दण्डकारण्यस्थमुनिभ्यः तत्रत्यराक्षसवधस्यैव प्रतिज्ञानात् एवमुक्तिरिति तस्य आशयः ॥ ‡ हन्तेति हर्षे। निर्युक्तं––निश्चयेन उपायश्चिन्तित इत्यर्थः–गो. 'निश्चिन्तं' इति वार्थः। § तिमिरेऽग्निरिवेत्यन्वयः। तेन प्रकाशाधिक्यं, तिमिरवत् रामेण रक्षसां नाशश्च कथ्यते।

[1] अहं तु–ङ. [2] निर्यामि चेत्युक्त्वा–ङ. [3] मादधत्–ङ. [4] महानग्नि–ज्ञ.

स चापमुद्यम्य महत् शरानादाय वीर्यवान् ।
बभूवावस्थितस्तत्र ज्यास्वनैः पूरयन् दिशः ॥ १८ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च सह चारणैः ।
समेयुश्च महात्मानः युद्धदर्शनकांक्षिणः ॥ १९ ॥
ऋषयश्च महात्मानः * लोके ब्रह्मर्षिसत्तमाः ।
समेत्य चोचुः सहिताः अन्योन्यं पुण्यकर्मणः ॥ २० ॥

लोके ब्रह्मर्षिसत्तमाः — त्रैलोक्येऽपि ब्रह्मर्षित्वेन प्रसिद्धाः ऋषयः भृग्वादय इत्यर्थः ॥ २० ॥

स्वस्ति गोब्राह्मणानां तु † लोकानां येऽभिसङ्गताः ।
जयतां राघवो युद्धे पौलस्त्यान् रजनीचरान् ॥ २१ ॥
‡ चक्रहस्तो यथा युद्धे सर्वान् असुरपुङ्गवान् [1] ।
एवमुक्त्वा पुनः प्रोचुः आलोक्य च परस्परम् ॥ २२ ॥
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ।
एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ? ॥ २३ ॥

गोब्राह्मणानामित्यादौ संबन्धसामान्ये षष्ठी आर्षी ॥ २३ ॥

§ इति ॥ राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः ।
जातकौतूहलाः तस्थुः विमानस्थाश्च देवताः ॥ २४ ॥

सगणाः—विद्याधरादिदशदेवयोनिगणसहिताः ॥ २४ ॥

---

* 'लोके' इति इतरत्राप्यन्वेति । † ये लोकानां अभिसङ्गताः—अनुकूलाः, तेभ्योऽपि स्वस्त्यस्तु—गो. ‡ चक्रहस्तः— इत्यत्र विष्णुरिति विशेष्यम् । तैः रामस्वरूपपरिज्ञानात् देवरहस्यस्य गोपनीयत्वात् नाधिकं किञ्चिदुक्तं विशेष्यादिकम् । § इति प्रोचुरित्यन्वयः । ॥ राजर्षयः— देवत्वं प्राप्ताः । यद्वा—वानप्रस्थीभूताः—गो.

[1] एतदनन्तरं—"एतच्चान्यच्च बहवः ब्रुवाणाः परमर्षयः" इत्यधिकं—ङ.

आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् ।
दृष्ट्वा सर्वाणि भूतानि भयात् विव्यथिरे तदा ॥ २५ ॥

आविष्टं तेजसेति । वैराजेन वैष्णवेन क्षात्रेण तेजसा इति यावत् । एतेन सहजस्वभावः भगवतः ब्राह्म एव, क्षात्रस्तु स्वेच्छया कार्याय भगवता स्वीक्रियते इति स्पष्टम् । अत एव भूतानि भयात् विव्यथिरे इति ॥ २५ ॥

रूपमप्रतिमं तस्य *रामस्याक्लिष्टकर्मणः ।
बभूव रूपं क्रुद्धस्य रुद्रस्येव [1]पिनाकिनः ॥ २६ ॥
इति संभाष्यमाणे तु देवगन्धर्वचारणैः ।
ततो गम्भीरनिर्ह्रादं घोर[2]वर्मायुधध्वजम् ॥ २७ ॥
अनीकं यातुधानानां समन्तात् [3]प्रत्यदृश्यत ।
[4]सिंहनादं विसृजतां अन्योन्यमभिगर्जताम् ॥ २८ ॥
चापानि विष्फारयतां जृम्भतां च पुनः पुनः ।
†विप्रघुष्टस्वनानां च दुन्दुभींश्चापि निघ्नताम् ॥ २९ ॥
तेषां [5]सुतुमुलः शब्दः पूरयामास तद्वनम् ।

जृम्भतां च पुनः पुनरिति । देहचिन्ताराहित्येन युद्धप्रवृत्तये मदकरद्रव्यस्वीकारजं जृम्भणम् । विप्रघुष्टेति । अविशब्दनार्थत्वात् अनिट् ॥ २९ ॥

---

* न क्लिष्टं—कस्मैचित् खेदप्रदं कर्म—व्यापारः यस्य—रा. अनायासेनैव महदपि कर्म साधयत इति वाऽर्थः । न क्लिष्टं कर्म यस्येति विग्रहः ॥ † घोषः—गुजनाख्यध्वनिविशेषः 'घोषो गुजनमज्जने' इति वैजयन्ती—गो.

[1] महात्मनः—ज. [2] चर्मा—च. ज. [3] प्रत्यपद्यत—च. ज.
[4] वीराणाम्—च. ज. [5] सुविपुलः—च. ज.

तेन शब्देन वित्रस्ताः श्वापदा वनचारिणः ॥ ३० ॥
*दुद्रुवुर्यत्र निःशब्दं पृष्ठतो नावलोकयन् ।

पृष्ठतो नावलोकयन् इति । पृष्ठभागानवलोकनं भीतिवशात्, †प्रद्रवन्तः श्वापदाः इत्यनुकर्षः ॥ ३० ॥

[1]तत्त्वनीकं महावेगं रामं समुपसर्पत ॥ ३१ ॥
धृतनानाप्रहरणं गम्भीरं सागरोपमम् ।
रामोऽपि चारयन् चक्षुः ‡सर्वतो रणपण्डितः ॥ ३२ ॥
ददर्श खरसैन्यं तत् युद्धाभिमुखमुत्थितम् ।
§[2]वितत्य च धनुर्भीमं तूण्योश्चोद्धृत्य सायकान् ॥ ३३ ॥
क्रोधमाहारयत् तीव्रं ॥वधार्थं सर्वरक्षसाम् ।

क्रोधं आहारयत्—प्रासवानित्यर्थः । तथाऽत्र सर्वत्र ॥ ३३ ॥

दुष्प्रेक्षः सोऽभवत् क्रुद्धः युगान्ताग्निरिव ज्वलन् ॥ ३४ ॥
तं दृष्ट्वा तेजसाऽऽविष्टं प्राव्यथन् वनदेवताः ।

प्राव्यथन्—प्राव्यथन्तेति यावत् ॥ ३४ ॥

तस्य [3]क्रुद्धस्य रूपं तु रामस्य ददृशे तदा ॥ ३५ ॥

---

* यत्र निःशब्दं—शब्दाभावः—तं देशं दुद्रुवुरित्यन्वयः—गो. रा. यत्र वने क्षणे वा, वनचारिणः निःशब्दं—भीत्या शब्दमप्यकुर्वन्तः दुद्रुवुः—इति क्रियाविशेषणं वा। † प्रद्रवन्त इत्यर्थानुकर्षणम्। ‡ चक्षुः सर्वतश्चारयन्नित्यन्वयः। § वितत्य—किञ्चिद्बाण-विसर्पणं कृत्वेत्यर्थः, 'वितनं संहितस्येषोः किञ्चिदेव विसर्पणम्' इति वैजयन्ती—गो. ॥ सर्वरक्षसां वधार्थं—सर्वरक्षोवधद्वारत्वादस्य युद्धस्येति भावः—ति.

[1] गत्वानीकं—ङ. [2] विनम्य च, सज्यं कृत्वा—ङ. [3] क्रुद्धस्य—च. ज.

*दक्षस्येव क्रतुं हन्तुं उद्यतस्य पिनाकिनः ।
आविष्टं तेजसा रामं संग्रामशिरसि स्थितम् ॥ ३६ ॥
दृष्ट्वा सर्वाणि भूतानि भयार्तानि प्रदुद्रुवुः ॥
तत्कार्मुकैः आभरणैः ध्वजैश्च
तैः वर्मभिश्चाग्निसमानवर्णैः ।
बभूव सैन्यं पिशिताशनानां
सूर्योदये †नीलमिवाभ्र[1]वृन्दम् ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चतुर्विंशः सर्गः

नीलाभ्रवृन्दस्थानीयाः राक्षसाः, सूर्योदयः सूर्यकिरणसंबन्धः, तत्स्थानीयः कार्मुकादिसंबन्धः । साल(३७)मानः सर्गः ॥ ३७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुर्विंशः सर्गः

पञ्चविंशः सर्गः

[खरसैन्यविध्वंसनम्]

‡अवष्टब्धधनुं रामं क्रुद्धं च रिपुघातिनम् ।
ददर्शाश्रममागम्य खरः सह पुरःसरैः ॥ १ ॥

अथ राक्षसैः रामस्य तुमुलं युद्धम् । अवष्टब्धधनुमित्यादि । उकारान्तोऽप्यस्ति धनुश्शब्द इति आदावेवोक्तम् ॥ १ ॥

---

* दक्षस्येति क्रोधातिशयमात्रे दृष्टान्तः—गो. † नीलाभ्राणां रक्षसां च कार्मुकवत्त्वं ध्वजवत्त्वं च तुल्यम् ; मेघे उत्पातध्वजसंभवात्—गो. ‡ अवष्टब्धधनुं—संपूर्णस्वाधीनधनुष्मन्तमिति भावः ।

[1] जालम्—च. ज.

तं दृष्ट्वा [1]सशरं चापं उद्यम्य * खर निःस्वनम् ।
रामस्याभिमुखं सूतं †[3]चोद्यतामित्यचोदयत् ॥ २ ॥
स खरस्याज्ञया सूतः तुरगान् समचोदयत् ।
यत्र रामो महाबाहुः एको धून्वन् स्थितो धनुः ॥ ३ ॥
तं तु निष्पतितं दृष्ट्वा सर्वे ते रजनीचराः ।
[4]नर्दमाना महानादं [5]सचिवाः पर्यवारयन् ॥ ४ ॥

सचिवाः पर्यवारयन्निति । श्येनगाम्यादयः प्रागुक्ताः सचिवाः ॥

स तेषां यातुधानानां मध्ये रथगतः खरः ।
बभूव मध्ये ताराणां लोहिताङ्ग [6]इवोदितः ॥ ५ ॥

लोहिताङ्गः—भौमः ॥ ५ ॥

ततः शरसहस्रेण राममप्रतिमौजसम् ।
अर्दयित्वा महानादं ननाद समरे खरः ॥ ६ ॥
ततस्तं ‡ भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ।
रामं नानाविधैः शस्त्रैः अभ्यवर्षन्त दुर्जयम् ॥ ७ ॥
मुद्गरैः [7]पट्टिसैः शूलैः प्रासैः खड्गैः परश्वधैः ।
राक्षसाः समरे रामं निजघ्नू §रोषतत्पराः ॥ ८ ॥

---

* खरनिस्वनमिति चापविशेषणम् । † चोद्यतामिति । रथः इति शेषः । 'तुरगान् समचोदयत्' इत्युक्तया तुरगानिति वा शेषः । ‡ भीमधन्वानं तं राममित्यन्वयः । § रोषतत्पराः—क्रोधपरवशाः—गो. रोषेण रामहननपरा इति वा ।

[1] सगुणं—च. [2] निस्वनः—ङ. [3] चोदयामास राक्षसम्—च. [4] मुञ्चमाना—च. ज. [5] सचापाः—ङ. [6] इवोदितः—च. ज. [7] आयसैः—च. ज.

ते * बलाहकसङ्काशाः [1] महानादाः महौजसः ।
अभ्यधावन्त काकुत्स्थं रथैः वाजिभिरेव च ॥ ९ ॥

गजैः पर्वतकूटाभैः रामं युद्धे जिघांसवः ।
ते रामे शरवर्षाणि व्यसृजन् रक्षसां गणाः ॥ १० ॥

शैलेन्द्रमिव धाराभिः वर्षमाणा [2] बलाहकाः ।
स तैः परिवृतो घोरैः राघवो रक्षसां गणैः ॥ ११ ॥

†[3] तिथिष्विव महादेवः वृतः पारिषदां गणैः ।
तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः ॥ १२ ॥

‡ प्रतिजग्राह विशिखैः नद्योघानिव सागरः ।
स तैः प्रहरणैः घोरैः भिन्नगात्रो न विव्यथे ॥ १३ ॥

'रामः प्रदीप्तैः बहुभिः वज्रैरिव [5] महाचलः ।
स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः ॥ १४ ॥

बभूव रामः संध्यांभ्रैः दिवाकर इवावृतः ।

'वज्रैरिव महाचलः' इत्यनेन किञ्चिद्व्रणितत्वं गम्यते । अत एव 'स विद्धः § क्षतजादिग्धः' इत्यादि । आदिग्धः—आलिप्तः ॥१४॥

विषेदुः देवगन्धर्वाः सिद्धाश्च परमर्षयः ॥ १५ ॥

---

* बलाहकसंकाशाः—मेघसदृशाः ते रथैः वाजिभिः गजैश्च रामं अभ्यधावन्त—इति सार्धश्लोकमेकं वाक्यम् । † तिथिषु—प्रदोषरात्रिषु—रा. रामस्य, राक्षसानां च अत्युग्रत्वमात्रेऽयं दृष्टान्तः । ‡ प्रतिजग्राह—प्रतिरुरोध—गो. तेषां स्पर्धी स्वीचकार—उत्तरमदादिति यावत् । § क्षतजं—रक्तम् ।

[1] महाकाया महाबलाः—च. ज. [2] महाघनाः—च. ज. [3] इदमर्धं कुत्रचिन्नास्ति । [4] इदमर्धं कुत्रचिन्नास्ति—ज. [5] महाबलः—ङ.

एकं सहस्रैः बहुभिः तदा दृष्ट्वा समावृतम् ।
ततो रामः सुसंक्रुद्धः * मण्डलीकृतकार्मुकः ॥ १६ ॥
ससर्ज †[1] विशिखान् बाणान् शतशोऽथ सहस्रशः ।
दुरावारान् दुर्विषहान् कालदण्डोपमान् रणे ॥ १७ ॥
मुमोच लीलया रामः कङ्कपत्रान् अजिह्मगान् ।

दुरावारान्—अशक्यनिवारणान् । दुर्विषहान्–प्राणविमोकं विना केनापि सोढुमशक्यान् ॥ १७ ॥

ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया ॥ १८ ॥
आददू रक्षसां प्राणान् पाशाः ‡ कालकृता इव ।

लीलयेति । सकलप्रपञ्चसंहारब्रह्मस्वभावत्वात् भगवतो रामस्य इयं लीलेत्यविस्मयः । तेजसाऽऽविष्टशब्दवत् लीलयेत्यस्य च अभ्यासः तदर्थतात्पर्यप्रकाशनाय कवेः ॥ १८ ॥

[2] भित्त्वा राक्षसदेहांस्तान् ते शरा रुधिराप्लुताः ॥ १९ ॥
अन्तरिक्षगताः रेजुः दीप्ताग्निसमतेजसः ।

रुधिरैराप्लुताः—सिक्ताः । अत एव दीप्ताग्निसमतेजसः ॥१९॥

असंख्येयास्तु रामस्य सायकाः चापमण्डलात् ॥ २० ॥
विनिष्पेतुरतीवोग्राः रक्षःप्राणापहारिणः ।

चापमण्डलादिति । मण्डलाकारतयैव संधानमोक्षणादिशैघ्र्यवतो दीर्घशाटीभ्रमितकन्दुकास्पन्दनवत् अनुभूयमानात् इत्यर्थः ॥ २० ॥

---

* मण्डलीकृतकार्मुकः—आकर्षणाकर्षणेन मण्डलाकारीकृतधनुः—गो. बाणेऽत्यन्तवेगाधानाय सम्यगाकर्षणेन मण्डलीकृतं धनुः येनेति वा । † विशिखान् बाणान्—अर्धचन्द्राग्रबाणान्—गो. ‡ कालः—यमः ।

[1] निशितान्—ङ. च. [2] हत्वा—ङ.

तैर्धनूंषि ध्वजाग्राणि [1] चर्माणि च शिरांसि च ॥ २१ ॥
बाहून् सहस्ताभरणान् ऊरून् करिकरोपमान् ।
[2] चिच्छेद रामः समरे शतशोऽथ सहस्रशः ॥ २२ ॥
हयान् काञ्चनसंनाहान् रथयुक्तान् ससारथीन् ।
गजांश्च सगजारोहान् सहयान् सादिनस्तथा ॥ २३ ॥
[3] चिच्छिदुः बिभिदुश्चापि रामबाणा * गुणच्युताः ।
पदातीन् समरे हत्वा ह्यनयत् यमसादनम् ॥ २४ ॥

सहस्ताभरणान् साङ्गदान्। बाहूनित्यनेन अङ्गदार्हो हस्तप्रदेशः, भुजशब्देन च तदन्यः। चर्माणि-फलकानि। छेदनभेदनयोः द्वैधीभावविदारणे अर्थः। बाहून् सहस्ताभरणानित्यत्र हस्तसामान्यार्थो बाहुशब्दः ॥ २४ ॥

ततो † नालीकनाराचैः तीक्ष्णाग्रैश्च विकर्णिभिः ।
भीममार्तस्वरं चक्रुः भिद्यमाना निशाचराः ॥ २५ ॥

नालीकाः—मुखमात्रायस्संसृष्टाः बाणाः। नाराचाः—सर्वतोऽयोरूपाः। विकर्णिनः—अग्राङ्कुशाः उद्धारे च प्राणहराः ॥ २५ ॥

तत् सैन्यं [4] निशितैर्बाणैः अर्दितं मर्मभेदिभिः ।
रामेण न ‡ सुखं लेभे शुष्कं वनमिवाग्निना ॥ २६ ॥

---

* गुणः—धनुर्ज्या। † नालीकाः—नालमात्रशराः, नाराचाः आयसशराः, विकर्णिनः—कर्णशराः—गो. ‡ सुखं—दुःखनिवृत्तिम्—गो.

[1] वर्माणि—ङ. चर्माणि कवचानि च—ज. [2] बिभेद—ङ. [3] इदमर्धं—ङ. पुस्तके कुण्डलितम्। [4] विविधै—च. ज.

केचित् भीमबलाः [1]शूराः शूलान् खड्गान् परश्वधान् ।
[2]रामस्याभिमुखं गत्वा चिक्षिपुः * परमायुधान् ॥ २७ ॥
तानि बाणैः महाबाहुः † शस्त्राण्यावार्य [3]राघवः ।
जहार समरे प्राणान् चिच्छेद च शिरोधरान् ॥ २८ ॥

आवार्य–वारणं कृत्वा ॥ २८ ॥

ते छिन्नशिरसः पेतुः छिन्न[4]वर्मशरासनाः ।
सुपर्णवातनिक्षिप्ताः जगत्यां पादपा यथा ॥ २९ ॥

सुपर्णवातेति । जगत्यां–भूम्यां, सुपर्णस्य–महागरुडस्य, वातेन–पक्षवातेन, अमृताहरणयुद्धकाले विक्षिप्ताः–भग्नाः पादपाः–कल्पवृक्षाः यथा तद्वदित्यर्थः । समग्रालङ्कारतो रक्षस्तनूनां कल्पपादपसाम्यम् ॥

अवशिष्टाश्च ये तत्र विषण्णाश्च निशाचराः ।
खरमेवाभ्यधावन्त शरणार्थं शरार्दिताः ॥ ३० ॥

अवशिष्टाः—हतावशिष्टाः ॥ ३० ॥

तान् सर्वान् [5]पुनरादाय समाश्वास्य च ‡ दूषणः ।
§ अभ्यधावत काकुत्स्थं [6]क्रुद्धो रुद्रमिवान्तकः ॥ ३१ ॥

तान् सर्वानिति । खरशरणार्थिनः इत्यर्थः ॥ ३१ ॥

---

* ‘ परमायुधान् ’ इति शूलादिविशेषणम् । तेन शूलादेः शस्त्ररूपत्वमुक्तं भवति । अत एव ‘ शस्त्राण्यावार्य ’ इत्यनुपदमुच्यते । † शस्त्राण्यावार्य शिरोधरान् चिच्छेद, प्राणान् जहार च—इत्यन्वयः ‡ दूषणः—खरस्य प्रधानसेनापतिः–(22–7) § क्रुद्धः अन्तक इव स्थितः दूषणः रुद्रमिव स्थितं रामं अभ्यधावत इत्यन्वयः । रुद्रस्य मृत्युञ्जयत्वात्— दूषणवधः एतेन सूचितः ।

[1] प्रासान्–ङ. [2] चिक्षिपुः परमक्रुद्धाः रामाय रजनीचराः–च. ज. [3] वीर्यवान्–ज. [4] चर्म–च. ज. [5] धनु–च. ज. [6] क्रुद्धं क्रुद्ध इवान्तकः–ज. रुद्रं क्रूर इवान्तकः- ङ.

निवृत्तास्तु पुनः सर्वे दूषणाश्रय[1]निर्भयाः ।
राममेवाभ्यधावन्त *सालतालशिलायुधाः ॥ ३२ ॥

दूषणाश्रयबलेन निर्भयाः—भयरहिताः ॥ ३२ ॥

शूलमुद्गरहस्ताश्च चापहस्ता महाबलाः ।
सृजन्तः शरवर्षाणि शस्त्रवर्षाणि संयुगे ॥ ३३ ॥

द्रुमवर्षाणि मुञ्चन्तः शिलावर्षाणि राक्षसाः ।
तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् ॥ ३४ ॥

रामस्य च महाघोरं पुनस्तेषां च रक्षसाम् ।
ते समन्तादभिक्रुद्धाः राघवं[2] पुनरभ्ययुः ॥ ३५ ॥

तैश्च सर्वा दिशो दृष्ट्वा प्रदिशश्च समावृताः ।
राक्षसैः उद्यतप्रासैः शरवर्षाभिवर्षिभिः ॥ ३६ ॥

स कृत्वा भैरवं नादं अस्त्रं परमभास्वरम् ।
संयोजयत गान्धर्वं राक्षसेषु महाबलः ॥ ३७ ॥

सर्वाः दिशः प्रदिशश्च समावृताः दृष्ट्वा, स रामः भैरवं नादं कृत्वा, सर्वतो रक्षोभिः शरवर्षाभिवर्षिभिः आवृतत्वात् कालोचितं परम-भास्वरं गान्धर्वमस्त्रं राक्षसेषु विषये संयोजयत—समयोजयत् धनुषीत्यर्थः॥

ततः शरसहस्राणि निर्ययुः चापमण्डलात् ।
सर्वा दश दिशो बाणैः[3] आवार्यन्त समागतैः ॥ ३८ ॥

---

* सालतालौ—वृक्षविशेषौ ।

[1] दुर्जयाः-ङ. [2] पुनरार्दयन्—ज. [3] आपूर्यन्त—च. ज.

* नाददानं शरान् घोरान्[1] न मुञ्चन्तं[2] शिलीमुखान् ।
[3] विकर्षमाणं पश्यन्ति राक्षसास्ते शरार्दिताः † [4] ॥ ३९ ॥

नाददानमित्यादि । घोरान् शरान् आददानमपि न पश्यन्ति, तान् शिलीमुखान् मुञ्चन्तमपि न पश्यन्ति ; अपि तु शरार्दिताः राक्षसाः विकर्षमाणमेव केवलं पश्यन्ति । निरतिशयशैघ्र्यवशात् चक्रीभूतमेव केवलं धनुः पश्यन्ति ॥ ३९ ॥

‡ शरान्धकारमाकाशं आवृणोत् सदिवाकरम् ।
बभूवावस्थितो §रामः [5] प्रवमन्निव तान् शरान् ॥ ४० ॥

'अन्धकारोऽस्त्रियाम्', शरजं अन्धकारं तत् सदिवाकरं आकाशमावृणोत् । एवमपि तान् शरान् प्रवमन्निव, इवशब्दः एवार्थे, प्रवमन्नेव–भूयो विक्षिपन्नेव अवस्थितोऽभूत् ॥ ४० ॥

---

* राक्षसाः रामस्य शरादानकर्षणमोचनानि नापश्यन्, किन्तु स्वहिंसनमेवापश्यन्निति क्रियाप्रधानो निर्देशः–गो. आत्मानं विकर्षमाणं परं पश्यन्तीति योजना स्यात् । अथ वा–'शरादानकर्षणमोचनानि' इत्युक्त्या 'न कर्षमाणं पश्यन्ति' इति पाठः गो. सम्मतः स्यात् । 'स्वहिंसनमेवापश्यन्' इति च शरार्दिताः–इत्यस्य विवरणम् ॥

† यद्यपि गान्धर्वास्त्रप्रयोगे विचित्रबाणनिर्गमोऽस्ति, तदस्मिन् श्लोके नोच्यते ; किन्तु तदनन्तरभाविकेवलशरमोक्ष इति ज्ञेयम्–गो. उत्तरत्र ३१ सर्गे अकम्पनवाक्यं (१९–२०) अत्रावधेयम् । ‡ शरान्धकारमिति । अन्धकारमिति क्लीबत्वमार्ष–गो.

§ 'नाददानं शरान् घोरान्' इत्युक्त्या रामव्यापाराबदर्शनात्—आहत्य राम एव तान् प्रवमन्निवासीदित्युक्तिः ।

[1] नामुञ्चन्तं–ङ. विमुञ्चन्तं–च.ज. [2] शरोत्तमान्–ज. [3] 'न कर्षमाणं–च. न कार्मुकं विकर्षन्तं रामं पश्यन्ति संयुगे'–ङ. [4] एतदनन्तरं–"शरा रामेण तूत्सृष्टाः रुक्मपुङ्खाः पतत्रिणः । सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान्"—इत्यधिकं–ङ. [5] प्रक्षिपन्निव–ज.

युगपत् पतमानैश्च युगपच्च हतैर्भृशम् ।
युगप[1]त्पतितैश्चैव [2] विकीर्णा वसुधाऽभवत् ॥ ४१ ॥

पतमानैः—गच्छद्भिरिति यावत् । पतितैरिति । लक्ष्येष्विति शेषः । विकीर्णा विशेषणाच्छादिता ॥ ४१ ॥

* निहताः पतिताः क्षीणाः छिन्ना [3] भिन्ना विदारिताः ।
तत्र तत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः ॥ ४२ ॥

निहताः—सद्योहताः । पतिताः—पातानन्तरं मृताः । क्षीणाः—कण्ठगतप्राणाः । छिन्नभिन्नौ प्रागुक्तार्थौ ॥ ४२ ॥

सोष्णीषैरुत्तमाङ्गैश्च साङ्गदैः बाहुभिस्तथा ।
ऊरुभिः [4] जानुभिः छिन्नैः नानारूपविभूषणैः ॥ ४३ ॥
हयैश्च द्विपमुरुयैश्च रथैर्भिन्नैरनेकशः ।
चामरैः व्यजनैः छत्रैः ध्वजैः नानाविधैरपि ॥ ४४ ॥
रामस्य बाणाभिहतैः [5] विचित्रैः शूलपट्टिशैः [6] ।
विच्छिन्नैः समरे भूमिः विकीर्णाऽभूत् भयङ्करा ॥ ४५ ॥

विभूषणैरिति । उपलक्षिताः राक्षसाः इत्यन्वयः । विच्छिन्नैः—विशेषेण छिन्नैः ॥ ४५ ॥

---

* निहताः—केवलं प्रहताः । पतिताः—अशनिपात इव भयेन भूमौ पतिताः । क्षीणाः—कण्ठगतप्राणाः । छिन्नाः—द्विधाकृताः । भिन्नाः—खण्डितावयवाः । विदारिताः—नृसिंहेन हिरण्यवत् आनाभिकण्ठं उद्भिन्नशरीराः—गो.

[1] त्प्रहितै—ङ. [2] विस्तीर्णा—ङ. [3] भग्ना निवारिता:—ङ. [4] बाहुभिः—च. [5] विच्छिन्नैः । [6] एतदनन्तरं—"खड्गैः खण्डीकृतैः प्रासैः विकीर्णैश्च परश्वधैः । चूर्णिताभिः शिलाभिश्च शरैश्चित्रैरनेकशः ॥"—इत्यधिकं—ङ. ज.

* तान् दृष्ट्वा निहतान् सर्वे राक्षसाः परमातुराः ।
न तत्र चलितुं शक्ताः रामं परपुरञ्जयम् [1] ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चविंशः सर्गः

तीव्र(४६)मानः सर्गः ॥ ४६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चविंशः सर्गः

षड्विंशः सर्गः

[दूषणादिवधः]

दूषणस्तु † स्वकं सैन्यं हन्यमानं निरीक्ष्य सः ।
संदिदेश महाबाहुः भीमवेगान् दुरासदान् ॥ १ ॥
राक्षसान् ‡ पञ्चसाहस्रान् समरेष्वनिवर्तिनः ।

अथ दूषणवधः । दूषणस्त्वित्यादि । पञ्चसाहस्रानित्यनेन अर्थात् नवसाहस्री हतेत्यवगम्यते ॥ १ ॥

ते शूलैः पट्टिशैः खड्गैः शिलावर्षैः द्रुमैरपि ॥ २ ॥
शरवर्षैरविच्छिन्नं ववृषुस्तं समन्ततः ।
स द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥ ३ ॥

---

* तिलककतकयोः प्रायस्तुल्यपाठत्वात् तिलकानुरोधेनायं श्लोकोऽत्र योजितः । 'रामं चलितुं—रामं प्रति संमुखं गन्तुम्' इति च—ति. व्याख्यातम् । चलितुं—चालयितुं—कम्पयितुं इति वाऽर्थः ॥ † दूषणस्य सेनापतित्वेन 'स्वकं सैन्यं' इत्युक्तिः । ‡ पञ्चसाहस्रानित्यनेन पञ्चसाहस्री पूर्वं हतेति व्यज्यते—गो.

[1] एतदनन्तरं—"बलावशेषं तु निरस्तमाहवे खराधिकं राक्षसदुर्बलं बलम् । जघान रामं स्थिरधर्मपौरुषः धनुर्बलैरप्रतिवारणैः शरैः ॥"—इत्यधिकम्—ङ.

प्रतिजग्राह धर्मात्मा राघवः तीक्ष्णसायकैः ।
प्रतिगृह्य च तद्बाणं * निमीलित इवर्षभः ॥ ४ ॥
रामः क्रोधं परं [1] भेजे वधार्थं सर्वरक्षसाम् ।

निमीलित इति । वर्षधारानिमीलित इत्यर्थः ॥ ४ ॥

ततः क्रोधसमाविष्टः प्रदीप्त इव तेजसा ॥ ५ ॥
[2] शरैरवाकिरत् सैन्यं सर्वतः सहदूषणम् ।
ततः सेनापतिः क्रुद्धः दूषणः शत्रुदूषणः ॥ ६ ॥
शरैरशनिकल्पैस्तं राघवं [3] समवाकिरत् ।
ततो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः ॥ ७ ॥
चिच्छेद समरे वीरः चतुर्भिः चतुरो हयान् ।

क्षुरेण—क्षुरधारेण क्षुरपाख्यबाणेनेत्यर्थः ॥ ७ ॥

हत्वा चाश्वान् शरैः तीक्ष्णैः अर्धचन्द्रेण सारथेः ॥ ८ ॥
† शिरो [4] जहार तद्रक्षः त्रिभिः विव्याध वक्षसि ।
स च्छिन्नधन्वा विरथः हताश्वो हतसारथिः ॥ ९ ॥
जग्राह गिरि [5] शृङ्गाभं परिघं रोमहर्षणम् ।
वेष्टितं काञ्चनैः पट्टैः देवसैन्यप्रमर्दनम् ॥ १० ॥

---

* निमीलितः—निमीलितनयनः ऋषभः—सर्वश्रेष्ठः रामः रक्षसां वधार्थं परं क्रोधमिव लेभे । इवेन तस्य राक्षसदुष्टत्वनिवर्तकत्वात् कृपालुत्वं सूचितम्—रा. 'निमीलित इवर्षभः' इत्यनेन शरवर्षेऽपि निर्व्यथत्वमनायासत्वं च द्योत्यते—गो.

† सारथेः शिरः जहार । तद्रक्षः— दूषणं च त्रिभिः शरैः वक्षसि विव्याध ।

[1] लेभे—च. [2] शरैरभ्यहनत्—ङ. [3] समवारयत्—च, ज. [4] जघान—ङ. [5] संकाशं—ङ.

आयसैः शङ्कुभिः तीक्ष्णैः कीर्णं * परवसोक्षितम् ।
वज्राशनिसमस्पर्शं †[1] परगोपुरदारणम् [2] ॥ ११ ॥

परेषां—शत्रूणां, वसा—मांसविशेषः, तेनोक्षितम् । तथा परेषां—शत्रूणां गोपुरस्य—गावः—चक्षुरादीन्द्रियाणि, तेषां पुरं—शिरः, तस्य दारणं—विदारणम्—विदारकम् ॥ ११ ॥

तं महोरगसंकाशं प्रगृह्य परिघं रणे ।
दूषणोऽभ्यद्रवद्रामं क्रूरकर्मा निशाचरः ॥ १२ ॥
तस्याभिपतमानस्य दूषणस्य स राघवः ।
द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ १३ ॥
‡ भ्रष्टस्तस्य महाकायः पपात रणमूर्धनि ।
परिघः छिन्नहस्तस्य शक्रध्वज [3] इवाग्रतः ॥ १४ ॥

परिघः पपातेत्यन्वयः ॥ १४ ॥

§ स कराभ्यां विकीर्णाभ्यां पपात भुवि दूषणः ।
विषाणाभ्यां विशीर्णाभ्यां मनस्वीव महागजः ॥ १५ ॥

विकीर्णाभ्यां—विक्षिप्ताभ्यां—छिन्नाभ्यां उपलक्षितः इति शेषः । पपातेति । विगतासुरिति शेषः ॥ १५ ॥

---

* परवसया—शत्रुमेदसा उक्षितं—सिक्तम्—रा. परवसोक्षितं—शत्रुमेदस्सिक्तम्—'छन्मेदस्तु वपा वसा' इत्यमरः—गो. † परेषां—शत्रूणां यत् गोपुरं—पुरद्वारं, तस्य दारणं—भेदकम्—गो. ‡ भ्रष्टः—आघूर्णनेन स्खलितः तस्य महाकायः रणमूर्धनि—संग्राममध्ये पपात । छिन्नहस्तस्य परिघस्तु शक्रध्वज इव अग्रतः पपात—रा. रणमूर्धनि छिन्नहस्तस्य तस्य दूषणस्य भ्रष्टः—हस्ताच्च्युतः महाकायः—महाप्रमाणः परिघः शक्रध्वज इव अग्रतः पपात—गो. § पतनमेव भङ्ग्यन्तरेणाह—कराभ्यामिति—रा. कराभ्यां उपलक्षित इति शेषः ।

[1] पुरु—ङ. [2] एतदनन्तरं—'त्रासनं सर्वभूतानां काञ्चनाङ्गदभूषणम्'—इत्यधिकं—झ. [3] इवोच्छ्रितः—ङ.

तं दृष्ट्वा पतितं भूमौ दूषणं निहतं रणे ।
साधु साध्विति काकुत्स्थं सर्वभूतान्यपूजयन् ॥ १६ ॥
*एतस्मिन्नन्तरे क्रुद्धाः त्रयः सेनाग्रयायिनः ।
†[1] संहत्याभ्यद्रवन् रामं मृत्युपाशावपाशिताः ॥ १७ ॥
महाकपालः स्थूलाक्षः प्रमाथी च महाबलः ।
महाकपालो विपुलं शूलमुद्यम्य राक्षसः ॥ १८ ॥
स्थूलाक्षः पट्टिशं गृह्य प्रमाथी च परश्वथम् ‡ ।
दृष्ट्वैवापततस्तूर्णं राघवः सायकैः शितैः ॥ १९ ॥
तीक्ष्णाग्रैः प्रतिजग्राह §संप्राप्तानतिथीनिव ।
महाकपालस्य शिरः चिच्छेद [2] परमेषुभिः ॥ २० ॥
असंख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् ।
स पपात हतो भूमौ विटपीव महाद्रुमः ॥ २१ ॥
स्थूलाक्षस्याक्षिणी [3] तीक्ष्णैः पूरयामास सायकैः ।
दूषणस्यानुगान् पञ्च साहस्रान् कुपितः क्षणात् ॥ २२ ॥
[4] बाणौघैः पञ्चसाहस्रैः अनयद्यमसादनम् ।

पञ्चसाहस्रान् पञ्चसाहस्रैः बाणैः इत्यनेन सर्वलोकप्रसिद्धं रामबाणस्यामोघत्वं स्थापितम् ॥ २२ ॥

दूषणं निहतं [5] दृष्ट्वा तस्य चैव [6] पदानुगान् ॥ २३ ॥
व्यादिदेश खरः क्रुद्धः सेनाध्यक्षान् महाबलान् ।
अयं विनिहतः [7] संख्ये दूषणः सपदानुगः ॥ २४ ॥

---

* एतस्मिन्नित्यावर्धत्रयमेकं वाक्यम् । † संहत्य—मिलित्वा । ‡ परश्वथं गृह्य, अभ्यद्रवन्—इत्यनुकर्षः । § 'संप्राप्तानतिथीनिव' इति लोकरीत्या नमोक्तिः ।

[1] संगम्या—ङ. [2] रघुनन्दनः—च. परमेषुणा—ङ. [3] स्थूले—च. दृश्या तु—च. [5] श्रुत्वा—च. [6] वशानुगान्—ङ. [7] शेते—ङ.

महत्या सेनया सार्धं युद्ध्वा रामं कुमानुषम् ।
शस्त्रैः नानाविधाकारैः हनध्वं सर्वराक्षसाः ॥ २५ ॥
* एवमुक्त्वा खरः क्रुद्धः राममेवाभिदुद्रुवे ।

हनध्वमिति । छान्दसौ शप्तङौ । घ्नत इति यावत् । संहरतेत्यर्थः ॥ २५ ॥

श्येनगोमी पृथुग्रीवः यज्ञशत्रुः विहङ्गमः ॥ २६ ॥
दुर्जयः करवीराक्षः परुषः कालकार्मुकः ।
[1]मेघमाली महामाली सर्पास्यो रुधिराशनः ॥ २७ ॥
द्वादशैते महावीर्याः बलाध्यक्षाः ससैनिकाः ।
राममेवाभ्यवर्तन्त विसृजन्तः शरोत्तमान् ॥ २८ ॥
ततः पावकसङ्काशैः हेम†वज्रविभूषितैः ।
जघान [2]शेषं तेजस्वी तस्य सैन्यस्य सायकैः ॥ २९ ॥

तस्य सैन्यस्य शेषमित्यन्वयः ॥ २९ ॥

ते रुक्मपुङ्खाः विशिखाः सधूमा इव पावकाः ।
निजघ्नुः तानि रक्षांसि [3]वज्रा इव [4]महाद्रुमान् ॥ ३० ॥
रक्षसां तु शतं रामः [5]शतेनैकेन ‡कर्णिना ।
सहस्रं च सहस्रेण जघान रणमूर्धनि ॥ ३१ ॥

शतं एकेन शतेन तावन्मात्रसंख्याकेन कर्णिना-बाणविशेषेण प्राग्वर्णितेन जघान ॥ ३१ ॥

---

* तानेवमुक्त्वा खरः स्वयमपि रामं अभिदुद्रुवे । † वज्रं—मणिविशेषः । ‡ कर्णिना—कर्णाकारशरेण-गो.

[1] हेममाली-च. ज. [2] शेषान्-ङ. [3] वज्राणीव-ङ. [4] महासुरान्-ङ.
[5] शरेणैकेन-ङ.

तैर्भिन्नवर्माभरणाः छिन्नभिन्नशरासनाः ।
निपेतुः शोणितादिग्धाः धरण्यां रजनीचराः ॥ ३२ ॥

शोणितेनादिग्धाः–आलिप्ताः तथा ॥ ३२ ॥

तैर्मुक्तकेशैः समरे पतितैः शोणितोक्षितैः ।
आस्तीर्णा वसुधा कृत्स्ना महावेदिः कुशैरिव ॥ ३३ ॥

महावेदिः–महायागवेदिः ॥ ३३ ॥

क्षणेन तु महाघोरं वनं निहतराक्षसम् ।
बभूव निरयप्रख्यं मांसशोणितकर्दमम् ॥ ३४ ॥
चतुर्दशसहस्राणि रक्षसां [1] भीमकर्मणाम् ।
हतान्येकेन रामेण * मानुषेण पदातिना ॥ ३५ ॥
† तस्य सैन्यस्य सर्वस्य खरः शेषो महारथः ।
राक्षसः त्रिशिराश्चैव रामश्च रिपुसूदनः ॥ ३६ ॥
शेषा हता ‡ महासत्वाः राक्षसाः [2] रणमूर्धनि ।
घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ॥ ३७ ॥

---

* मानुषेण—मानुषवेषेणापि–ति. † तत्रावशिष्टान् निष्कृष्य कथयति—तस्येति । तत्सैन्यसम्बन्धिनौ वध्यौ खरत्रिशिरसौ, रिपुघाती रामश्चेति त्रय एवावशिष्टा बभूवुः । गोविन्दराजस्तु—सैन्यस्य—युद्धप्रवृत्तस्य, अतः रामस्यापि तत्रान्तर्भावः—इत्याह । ‡ 'महासत्वाः' इत्यादिविशेषणैः—महारथा एव हताः, क्षुद्राः केचन घोरा न हता इति गम्यते । अत एवोत्तरसर्गे हतशेषा इति वक्ष्यति–गो.

[1] क्रूरकर्मणाम्–ङ. [2] रणनिर्भयाः, रणदुर्जयाः–ङ.

ततस्तु तद्भीमबलं महाहवे
समीक्ष्य *[1] रामेण हतं बलीयसा।
रथेन रामं महता खरस्तदा
समाससादेन्द्र इवोद्यताशनिः ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षड्विंशः सर्गः

उद्यताशनिः---उद्यतवज्रः ॥ ३८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे षड्विंशः सर्गः

सप्तविंशः सर्गः

[त्रिशिरोवधः]

खरं तु रामाभिमुखं प्रयान्तं †[2] वाहिनीपतिः।
राक्षसः त्रिशिरा नाम [3] सन्निपत्येदमब्रवीत् ॥ १ ॥

अथ त्रिशिरोवधः। खरं तु इत्यादि ॥ १ ॥

मां नियोजय, [4] विक्रान्त! सन्निवर्तस्व ‡ साहसात्।
पश्य रामं महाबाहुं संयुगे विनिपातितम् ॥ २ ॥

विनिपातितमिति। मयेति शेषः ॥ २ ॥

---

* धर्मेण—रामेण—रा. † दूषणानन्तरः सेनापतिः इत्यर्थः। ‡ साहसात्—सहसा कृतात् निर्धारात्।

[1] धर्मेण—च. ज. [2] वाहिनीपतिम्—ङ. [3] सन्निपत्यें—ङ.
[4] विक्रान्तं—च. ज.

प्रतिजानामि ते [1] सत्यं * आयुधं चाहमालभे ।
यथा रामं वधिष्यामि [2] वधार्हं सर्वरक्षसाम् ॥ ३ ॥

यथा वधिष्यामि तथा प्रयतिष्ये इति शेषः । सर्वरक्षसामिति । सर्वरक्षोभिरित्यर्थः ॥ ३ ॥

अहं वाऽस्य रणे मृत्युः एष वा समरे मम † ।
विनिवृत्य रणोत्साहात् मुहूर्तं प्राश्निको भव ॥ ४ ॥

प्राश्निकः—मध्यस्थः—उभययुद्धसाक्षीत्यर्थः ॥ ४ ॥

‡[3] प्रहृष्टो वा हते रामे जनस्थानं प्रयास्यसि ।
मयि वा निहते रामं संयुगायोपयास्यसि ॥ ५ ॥

संयुगाय—संयुगं कर्तुम् । क्रियार्थोपपदस्येति चतुर्थी ॥ ५ ॥

खरः त्रिशिरसा तेन § मृत्युलोभात् प्रसादितः ।
गच्छ [4] युध्येत्यनुज्ञातः राघवाभिमुखो ययौ ॥ ६ ॥

मृत्युना कृतो लोभः—युद्धलोभः तथा । अनुज्ञात इति । करेणेति शेषः ॥ ६ ॥

---

* वीराणां प्रतिज्ञायां आयुधानि साक्षीक्रियन्त इति प्रसिद्धमेव । † मम, मृत्युरित्यनुकर्षः । ‡ प्रहृष्टे—गविष्टे—च. § मृत्युलोभात्—मृत्युकृतयुद्धलोभात् । मृत्युसमये रक्षःप्रकृतिविपर्ययात् तस्य भगवत्तत्त्वं ज्ञात्वा तद्धस्तमृत्युलोभादित्यर्थश्च—ति. मृत्युलोभात्—मृत्युनिवृत्तिविषयकोत्कटेच्छातः । किञ्च मृत्युलोभात्—मृत्युविषयकाविवेकात्, अस्य मृत्युर्न भविष्यतीति भ्रमादित्यर्थः—रा. मृत्युना कृतः लोभः—युद्धलोभः, तस्मात्—गो. मृत्युवञ्चित इति वा भावः ।

[1] सर्व—ङ. [2] हितार्थ—ङ. [3] प्रहृष्टे—ङ. [4] युद्धेऽभ्यनुज्ञातः—ङ.

त्रिशिराश्च रथेनैव वाजियुक्तेन भास्वता ।
अभ्यद्रवद्रणे रामं त्रिशृङ्ग इव पर्वतः ॥ ७ ॥
शरधारासमूहान् सः महामेघ इवोत्सृजन् ।
व्यसृजत् [1]सदृशं नादं * जलार्द्रस्येव दुन्दुभेः ॥ ८ ॥

जलार्द्रस्येति । मद्दलस्य मार्जनवत् दुन्दुभेः ध्वन्याधिक्य-प्रयोजनकं औषधविशेषसंस्कृतं यत् जलं तेन आर्द्रस्य-सिक्तस्येत्यर्थः ॥

आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः ।
† धनुषा प्रतिजग्राह विधून्वन् सायकान् शितान् ॥ ९ ॥
स संग्रहारस्तुमुलः रामत्रिशिरसोर्महान् ।
बभूवातीव बलिनोः सिंहकुञ्जरयोरिव ॥ १० ॥
ततः त्रिशिरसा बाणैः ललाटे ताडितः त्रिभिः ।
अमर्षी कुपितो रामः ‡ [2]संरब्धमिदमब्रवीत् ॥ ११ ॥
अहो ! विक्रमशूरस्य राक्षसस्येदृशं बलम् ।
पुष्पैरिव शरैर्यस्य ललाटेऽस्मि परिक्षतः ॥ १२ ॥
ममापि प्रतिगृह्णीष्व शरांश्चापगुणच्युतान् ।

अहो विक्रमशूरस्येत्यादि व्यङ्ग्योक्तिः । विक्रमः—पराभिभवः, तत्र शूरः—समर्थः तथा । पुष्पैरिव परिक्षतः इत्यनेन न त्वगपि विद्धेत्यर्थः ॥ १२ ॥

---

* अनेन नादवैपरीत्येन मृत्युसान्निध्यं सूचितम्-ति. जलार्द्रस्येत्यनेनास्य हीनस्वरत्वमुक्तम्-गो. † सायकान् विधून्वन् राक्षसं प्रतिजग्राह । ‡ संरब्धः—राक्षसकोपोत्पादकः, अन्तर्भावितणिजर्थः, कर्तरि निष्ठा तु कर्माविवक्षयाऽकर्मकत्वात्-रा संरब्धं—सकोपमित्यर्थः-गो.

[1] भैरवं-क. [2] संरब्ध इद-च. ज.

एवमुक्त्वा तु संरब्धः शरानाशीविषोपमान् ॥ १३ ॥
त्रिशिरोवक्षसि क्रुद्धः [1] निजघान चतुर्दश ।
चतुर्भिस्तुरगानस्य शरैः * संनतपर्वभिः ।
न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः ॥ १४ ॥

वाजिनः तुरगानिति । वाजः—जवः । वेगवतोऽश्वानित्यर्थः ॥

अष्टभिः सायकैः सूतं [2]रथोपस्थात् न्यपातयत् ।
रामः चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितम् ॥ १५ ॥
ततो हतरथात् तस्मात् उत्पतन्तं निशाचरम् ।
[3] बिभेद रामः तं बाणैः हृदये सोऽभवज्जडः ॥ १६ ॥

हतरथादिति । हतहयसारथिकोऽपि रथः हतरथः । उत्पतन्तमिति । तदवस्थमेवेत्यर्थः । सोऽभवज्जड इति । आयुधान्तरग्रह इति शेषः ॥ १६ ॥

सायकैश्चाप्रमेयात्मा सामर्षः तस्य रक्षसः ।
शिरांस्यपातयत् [4] रामः वेगवद्भिः त्रिभिः [5] शितैः ॥ १७ ॥
[6] स भूमौ रुधिरोद्गारी रामबाणाभिपीडितः ।
† न्यपतत् पतितैः पूर्वं [7] स्वशिरोभिः निशाचरः ॥ १८ ॥

---

* संनतपर्वभिः—ऋजुपर्वभिः—गो. सम्यक् तक्षणादिना श्लक्ष्णपर्वभिरित्यर्थः ।
† पूर्वं पतितैः स्वशिरोभिरुपलक्षितः निशाचरः न्यपतदित्यन्वयः । पूर्वं शिरांसि पतितानि, पश्चात् निशाचरः पतित इति भावः ।

[1] निचखान—ङ. [2] रथोपस्थे—च. ज. [3] चिच्छेद—च. ज. [4] त्रीणि—च. ज. [5] शरैः—च. ज. [6] सधूमश्शोणितोद्गारी—ज [7] समरस्थः—च.

हतशेषास्ततो भग्नाः राक्षसाः खरसंश्रयाः ।
द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ताः मृगा इव ॥ १९ ॥

हतावशिष्टाः इति । शतं पञ्चाशद्वा अत्यल्पावशिष्टमित्यर्थः * ॥

तान् खरो द्रवतो दृष्ट्वा निवर्त्य रुषितः [1] स्वयम् ।
राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्तविंशः सर्गः

अनाक(२०)मानः सर्गः ॥ २० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे सप्तविंशः सर्गः

अष्टाविंशः सर्गः

(रामखरसंग्रामः)

निहतं दूषणं दृष्ट्वा रणे † त्रिशिरसा सह ।
खरस्याप्यभवत् त्रासः दृष्ट्वा रामस्य विक्रमम् ॥ १ ॥

अथ खररामसंग्रामः । निहतमित्यादि ॥ १ ॥

स दृष्ट्वा राक्षसं सैन्यं अविषह्यं [2] महाबलः ।
हतमेकेन रामेण त्रिशिरोदूषणावपि ॥ २ ॥

रक्षसामिदं राक्षसम् । हतं दृष्ट्वेत्यन्वयः ॥ २ ॥

---

* अनन्तरसर्गे 'तद्बलं हतभूयिष्ठं' (३) इति वक्ष्यमाणत्वादेवं व्याख्यातम् ।

† त्रिशिरसा सह निहतं दूषणं इत्यन्वयः । उभावपि हतौ दृष्ट्वा—इत्यर्थे सहशब्दप्रयोगः ।

[1] त्वरन्—च. [2] महाबलम्—ङ.

तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः ।
आससाद खरो रामं *नमुचिर्वासवं यथा ॥ ३ ॥

हतं च तत् भूयिष्ठं च हतभूयिष्ठम् ॥ ३ ॥

विकृष्य बलवच्चापं नाराचान् रक्तभोजनान् ।
खरः चिक्षेप रामाय क्रुद्धान्नाशीविषानिव ॥ ४ ॥
ज्यां विधून्वन् सुबहुशः †शिक्षयाऽस्त्राणि दर्शयन् ।
[1]चकार समरे मार्गान् शरैः रथगतः खरः ॥ ५ ॥

समरे मार्गांश्चकार—प्रकारभेदान् दर्शयामासेत्यर्थः ॥ ५ ॥

स सर्वाश्च दिशो बाणैः प्रदिशश्च महारथः ।
पूरयामास तं दृष्ट्वा रामोऽपि सुमहद्धनुः ॥ ६ ॥
‡स सायकैः दुर्विषहैः सस्फुलिङ्गैरिवाग्निभिः ।
[2]नभश्चकाराविवरं पर्जन्य इव वृष्टिभिः ॥ ७ ॥

नभः—आकाशं अविवरं—अरन्ध्रं चकार ॥ ७ ॥

तद्बभूव शितैर्बाणैः खररामविसर्जितैः ।
§पर्याकाशमनाकाशं सर्वतः शरसङ्कुलम् ॥ ८ ॥

---

*कश्यपस्य पत्न्याः दनोः पुत्रः । †शिक्षया—धनुर्वेदशिक्षापाटवेन ज्यां विधून्वन् । अस्त्राणि दर्शयन्—अस्त्रप्रयोगपाटवं दर्शयन् समरे शरैः मार्गान्—नानाप्रकारांश्चकार—गो. शिक्षया—धनुर्विद्याभ्यासेन मार्गान्—शरसन्धानक्षेपणादि-प्रकारभेदान् दर्शयन् रथस्थः खरः समरे चचार—अनेकविधरथसंचरणैः—ति. ‡स राम इत्यन्वयः । §परि-परितः अनाकाशं-निरवकाशम् । तत्र हेतुः—सर्वतः शरसङ्कुलमिति वाऽर्थः ॥

[1] चचार—च. [2] रामश्चकाराविरतं—ङ.

पर्याकाशं—परितो वर्तमानं आकाशं, अनाकाशं—निरवकाशं अभवदित्यर्थः ॥ ८ ॥

शरजालावृतः सूर्यः न तदा स्म प्रकाशते ।
अन्योन्यवधसंरम्भात् उभयोः संप्रयुध्यतोः ॥ ९ ॥
ततो नालीकनाराचैः तीक्ष्णाग्रैश्च विकर्णिभिः ।
आजघान[1] खरो रामं तोत्रैरिव महाद्विपम् ॥ १० ॥
तं रथस्थं धनुष्पाणिं राक्षसं पर्यवस्थितम् ।
ददृशुः सर्वभूतानि पाशहस्तमिवान्तकम् ॥ ११ ॥
* हन्तारं सर्वसैन्यस्य पौरुषे पर्यवस्थितम् ।
परिश्रान्तं महासत्त्वं मेने रामं खरस्तदा ॥ १२ ॥

सर्वसैन्यस्य हन्तारं रामं खरः परिश्रान्तं मेने इत्यन्वयः । एतेन अयं प्रहारावसरः सर्वयत्नेनापीति खरः बुद्धवान् इत्युक्तं भवति । अत एव आरात् तस्य रामधनुश्छेदलाभः ॥ १२ ॥

तं सिंहमिव विक्रान्तं सिंहविक्रान्तगामिनम् ।
दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा ॥ १३ ॥
ततः सूर्यनिकाशेन रथेन महता खरः ।
आससाद रणे रामं † पतङ्ग इव पावकम् ॥ १४ ॥

---

* खरः सर्वसैन्यहननपरिश्रान्तमपि रामं पौरुषे पर्यवस्थितं महासत्त्वं मेने । यद्वा उक्तविशेषणं रामं परिश्रान्तं मेने—गो. † पतङ्ग इत्यनेन अमृत्वा अनिवृत्तिरुच्यते—गो.

[1] रणे—च. ज.

ततोऽस्य सशरं चापं * मुष्टिदेशे महात्मनः ।
खरः चिच्छेद रामस्य दर्शयन् [1] पाणिलाघवम् ॥ १५ ॥

मुष्टिदेश इति । धनुर्ग्रहणप्रदेशोपरिस्थले इत्यर्थः ॥ १५ ॥

स पुनस्त्वपरान् सप्त शरानादाय [2] वर्मणि ।
[3] निजघान खरः क्रुद्धः शक्राशनिसम [4] प्रभान् ॥ १६ ॥

वर्मणि—कवचसंधिबन्धे इत्यर्थः ॥ १६ ॥

ततः [5] तत्प्रहतं बाणैः खरमुक्तैः [6] सुपर्वभिः ।
पपात कवचं भूमौ रामस्यादित्य [7] वर्चसः ॥ १७ ॥

ततः तत्प्रहतं कवचमित्यन्वयः । एवं पाङ्क्तः ॥ १७ ॥

ततः शरसहस्रेण राममप्रतिमौजसम् ।
[8] अर्दयित्वा महानादं ननाद समरे खरः ॥ १८ ॥

शरसहस्रेण अर्दयित्वेति । सक्षतं कृत्वेति यावत् ॥ १८ ॥

स † शरै [9] रर्पितः क्रुद्धः सर्वगात्रेषु राघवः ।
रराज समरे रामः विधूमोऽग्निरिव ज्वलन् ॥ १९ ।
‡ ततः गम्भीरनिर्ह्रादं रामः शत्रुनिबर्हणः ।
चकारान्ताय स रिपोः सज्यमन्यन्महद्धनुः ॥ २० ॥

---

* मुष्टिदेशे—मुष्टिबन्धनसमीपदेशे—गो. अनेन करात् चापः च्युत इति प्रतीयते । अत एवोत्तरत्र 'सज्यमन्यन्महद्धनुः' (२०) इति वक्ष्यते । † शरैः अर्पितः—संक्षतः कृतः—ति. अर्पितः संयुक्तः—गो. ‡ गम्भीरनिर्ह्रादं—गम्भीरध्वनिकं धनुः रिपोरन्ताय-नाशाय सज्यं चकारेत्यन्वयः—गो.

[1] हस्त—च. ज. [2] मर्मणि—च. ज. [3] निचखान—ङ. [4] स्वनान्—ङ [5] तत्प्रहितं—ङ. [6] सपर्वभिः—ङ. [7] वर्चसम्—ङ. ज. [8] अर्पयित्वा—ङ. [9] रर्दितः—ज

* सुमहद्वैष्णवं यत्तत् अतिसृष्टं महर्षिणा ।
वरं तद्धनुरुद्यम्य खरं समभिधावत ॥ २१ ॥
महर्षिणेति अगस्त्येनेति यावत् ॥ २१ ॥

ततः कनकपुङ्खैस्तु शरैः संनतपर्वभिः ।
[1] बिभेद रामः संक्रुद्धः खरस्य समरे ध्वजम् ॥ २२ ॥
स दर्शनीयो बहुधा [2] विकीर्णः काञ्चनध्वजः ।
जगाम धरणीं सूर्यः देवतानामिवाज्ञया † ॥ २३ ॥
सूर्यो धरणीं जगामेति अभूतोपमा सर्वत्रात्र ॥ २३ ॥

तं चतुर्भिः खरः क्रुद्धः रामं गात्रेषु मार्गणैः ।
विव्याध [3] युधि मर्मज्ञः मातङ्गमिव तोमरैः ॥ २४ ॥
स रामो बहुभिर्बाणैः खरकार्मुकनिस्सृतैः ।
विद्धो रुधिरसिक्ताङ्गः बभूव रुषितो भृशम् ॥ २५ ॥
स धनुर्धन्विनां श्रेष्ठः प्रगृह्य परमाहवे ।
मुमोच परमेष्वासः षट् शरानभिलक्षितान् ॥ २६ ॥
षट् शरानभिलक्षितान् इति । अभिलक्षितविषयानित्यर्थः ॥

शिरस्येकेन बाणेन द्वाभ्यां बाह्वो [4] रथार्दयत् ।
त्रिभिः चन्द्रार्धवक्त्रैश्च वक्षस्यभिजघान ह ॥ २७ ॥
तानेव लक्षितषट्शरविषयान् दर्शयति—शिरस्येकेनेत्यादि ॥

---

* 'महद्धनुः' इत्यत्रोक्तं महत्त्वमेव विवृणोति—सुमहदित्यादिना । † आज्ञया—शापेन, उत्प्रेक्षेयम्—गो.

[1] चिच्छेद—ज. [2] विच्छिन्नः—ज. [3] हृदि—ज. [4] रथार्पयत्—ज.

ततः पश्चान्महातेजाः नाराचान् भास्करोपमान् ।
[1] जिघांसू राक्षसं क्रुद्धः त्रयोदश [2] समाददे ॥ २८ ॥
[3] ततोऽस्य * युगमेकेन चतुर्भिः [4] चतुरो हयान् ।
षष्ठेन तु † शिरः संख्ये [5] खरस्य रथसारथेः ॥ २९ ॥
त्रिभिः त्रिवेणुं बलवान् द्वाभ्यां अक्षं महाबलः ।
द्वादशेन तु बाणेन खरस्य [6] सशरं धनुः ॥ ३० ॥
छित्त्वा वज्रनिकाशेन राघवः प्रहसन्निव ।
त्रयोदशेनेन्द्रसमः बिभेद समरे खरम् ॥ ३१ ॥

उपात्तत्रयोदशानां विनियोगः—ततोऽस्य युगमित्यादि । त्रिवेणुर्नाम रथमुखस्थः युगाधारदण्डः । अक्षः चक्राधारदण्डः । प्रहसन्निव—लीलयैवेत्यर्थः । बिभेद खरमिति । हृदयदेशमिति शेषः ॥

प्रभग्नधन्वा विरथः हताश्वो हतसारथिः ।
गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥ ३२ ॥
तत् कर्म रामस्य महारथस्य
समेत्य देवाश्च महर्षयश्च ।
‡ अपूजयन् प्राञ्जलयः प्रहृष्टाः
तदा विमानाग्रगताः समेताः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टाविंशः सर्गः

महारथस्येति । महारथपरिगणनीयस्येत्यर्थः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे अष्टाविंशः सर्गः

---

* युगं—रथस्य युगम् । † खरस्य रथसारथेः शिर इत्यन्वयः । ‡ रामस्य कर्म अपूजयन्—प्राशंसन् ।

[1] जघान—ज. [2] समादिशत—ङ. शिलाशितान्—ज. [3] रथस्य—ज. [4] बलान्—ज. [5] चिच्छेद खरसारथेः—ज. [6] सकरं—ज.

एकोनत्रिंशः सर्गः

[खरगदाभेदनम्]

खरं तु विरथं रामः गदापाणिमवस्थितम् ।
*मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥

अथ पदातिरामखरयुद्धम् । खरं त्वित्यादि । मृदुपूर्वमिति । न्यायावलम्बनतो मृदूक्तिपूर्वं परुषं—पारुष्यार्थकं वाक्यमित्यर्थः ॥ १ ॥

†गजाश्वरथसंबाधे बले महति तिष्ठता ।
कृतं सुदारुणं कर्म सर्वलोकजुगुप्सितम् ॥ २ ॥

त्वत्कृतान्यायवशात् त्वं अद्य विनंक्ष्यसीति प्रतिपादनशेषतया सामान्यतो लोकस्थितिमाह—गजाश्वेत्यादि । बले तिष्ठतेति । बलविषये स्वामित्वेन तिष्ठतेत्यर्थः ॥ २ ॥

उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ।
त्रयाणामपि ‡लोकानां ईश्वरोऽपि न तिष्ठति ॥ ३ ॥

एवंरूपेण पुरुषेण यत् सुदारुणं कर्म कृतं भवति, तत् सर्वं लोकजुगुप्सितं निन्द्यं भवति । नाप्यसौ सुखमिह लोकेऽपि प्राप्नोतीत्याह—उद्वेजनीय इत्यादि । उद्वेजनीयत्वादिगुणकोऽसौ न तिष्ठति—न चिरस्थितिं प्राप्नोति ॥ ३ ॥

कर्म लोकविरुद्धं तु कुर्वाणं, क्षणदाचर!
तीक्ष्णं §सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ४ ॥

तदेव दर्शयति—कर्मेत्यादि । क्षणदाचरेति संबुद्धिः ॥ ४ ॥

---

* शब्दस्वरदृष्ट्या मृदुत्वं, अर्थदृष्ट्या तु परुषत्वम् । † स्वयं तु एक एव रथादिरहितः—इत्यभिप्रायेण तद्विपरीततया सहायसंपत्तिमत्त्वं उपहसत्येवम् । ‡लोकानामीश्वरोऽपि—तावच्छक्तः सन्नपीत्यर्थः । §सर्वजनो हन्ति—अकृतापकारोऽपि हन्ति—ति, सर्वजन इति । दयालुरपीति भावः—गो.

लोभात् पापानि कुर्वाणः कामाद्वा यो न बुध्यते ।
*[1] भ्रष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव ॥ ५ ॥

लोभादित्यादि । लोभात् भयाद्वा पापानि कुर्वाणः यः पुमान् करकात् ब्राह्मणीव । "वर्षोपलास्तु करकाः", तान् अत्तीति करकात्, 'ब्राह्मणी रक्तपुच्छिका', (அரக்கி) श्रेयो न बुध्यते, स्वानर्थं स्वभोजनं दुष्कर्ममूलं तस्य पापिष्ठस्य तद्दुष्कर्मवशप्राप्तं अन्तर्नाशं लोकाः दृष्टाः पश्यन्ति ॥ ५ ॥

†वसतो दण्डकारण्ये तापसान् धर्मचारिणः ।
किं नु हत्वा महाभागान् ‡फलं प्राप्स्यसि, राक्षस ! ॥६॥

किं ततः ? इत्यतः— वसत इत्यादि ॥ ६ ॥

न §चिरं पापकर्माणः [2]क्रूराः लोकजुगुप्सिताः ।
ऐश्वर्यं प्राप्य तिष्ठन्ति ‖ शीर्णमूला इव द्रुमाः ॥ ७ ॥
अवश्यं लभते [3]जन्तुः फलं पापस्य कर्मणः ।
घोरं पर्यागते काले द्रुमाः पुष्पमिवार्तवम् ॥ ८ ॥

घोरं कर्मणः फलमित्यन्वयः ॥ ८ ॥

---

* भ्रष्टः—ऐश्वर्यात् भ्रष्टः, तस्य कर्मणः अन्तं—फलं पश्यति—अनुभवति । कथमिव—करकात् ब्राह्मणीव...यथा ब्राह्मणी स्वमारकं कर्म स्वयमेव करोति, तथा स्वमपीत्यर्थः—गो. करकात्—वर्षोपलात्—तद्भक्षणादिवेत्यर्थः ; वर्षोपलं रक्तपुच्छिकाया विषमिति प्रसिद्धम्—रा.

† किं पापं मयाकृतमित्यत्राह—वसत इति—गो. ‡ तेषां हननेन तव को लाभ इति भावः । § चिरं न तिष्ठन्तीत्यन्वयः । अथ वा चिरं पापकर्माणः, चिरं क्रूराः, चिरं लोकजुगुप्सिताः इति सर्वत्रान्वयः । तेन अकृत्यकरणस्य कादाचित्कत्वाकस्मिकत्वादिव्यावृत्तिः । ‖ वृक्षाणां मूलवत्, नराणां धर्मः खलु आधारः । तस्य लोपे नरस्यापि पतनमवश्यं भावीत्याशयः ।

[1] नष्टः—ङ. दृष्टः—ज. [2] पापाः—ङ. [3] कर्ता—ज.

*नचिरात् प्राप्यते लोके पापानां कर्मणां फलम् ।
सविषाणामिवान्नानां भुक्तानां क्षणदाचर! ॥ ९ ॥
पापमाचरतां घोरं लोकस्याप्रियमिच्छताम् ।
†अहमासादितो[1] राजा प्राणान् हन्तुं, निशाचर! ॥ १० ॥

राजेत्यनेन दुष्टनिग्रहाधिकारः स्वस्य द्योत्यते । आसादित इति । ऋषिभिरिति शेषः । इममर्थं आराद्दषयो वक्ष्यन्ति ॥ १० ॥

[2]अद्य भित्त्वा मया मुक्ताः शराः काञ्चनभूषणाः ।
विदार्य निपतिष्यन्ति वल्मीकमिव पन्नगाः ॥ ११ ॥

अद्येत्यादि । भित्त्वा—त्वद्वपुरिति शेषः । विदार्येति । भूमिमिति शेषः ॥ ११ ॥

ये त्वया दण्डकारण्ये भक्षिताः धर्मचारिणः ।
‡तानद्य निहतः संख्ये ससैन्योऽनुगमिष्यसि ॥ १२ ॥
अद्य त्वां[3] निहतं बाणैः पश्यन्तु परमर्षयः ।
§निरयस्थं विमानस्थाः ॥ ये त्वया[4] हिंसिताः पुरा ॥ १३ ॥

---

* नचिरात्—अचिरादित्यर्थः । † राज्ञा—पित्रा अहं आसादितः—वर्ध प्रापितः । राजेति पाठेऽपि क्विबन्तत्वेन स एवार्थः—रा. आसादितोऽस्मि प्राप्तोऽस्मि—गो ‡तान् अनुगमिष्यसीत्यन्वयः । पापिनामपि समरे हतानां स्वर्गसंभवादिति भावः—गो प्राणत्यागमात्राभिप्रायेण वा अनुगमनोक्तिः ॥ §ननु भगवता हतस्य मृतिसमये भगव दर्शनवतः कथं निरयस्थत्वमिति चेन्न । अत्युग्रस्य ब्रह्मवधकर्मणः फलस्य अवश्यंभोक्तव्यत्वे आदौ भगवदिच्छयैव निरयभोगपूर्वं उत्तमपदप्राप्तेः सत्त्वेन अदोषात्—ति. निर्गत अयः—पुनरिह लोके पुत्रपौत्रादिदर्शनार्थं गमनं यस्मात्, तल्लोकविशेषस्थं—रा नरकसदृशं दुःखमनुभवन्तं—गो. ॥ ये त्वया पुरा हिंसिताः परमर्षयः ते अद्य विमानस्थ निहतं—ततः निरयस्थं च पश्यन्तु इत्यन्वयः ।

[1] राज्ञा—च. ज. [2] अद्य हि त्वां—ङ. [3] पतितं—ङ. [4] निहताः—ज.

प्रहर त्वं यथाकामं कुरु यत्नं, कुलाधम !
अद्य ते पातयिष्यामि शिरः तालफलं यथा ॥ १४ ॥
कुलाधम–कुलेन अधम ॥ १४ ॥

एवमुक्तस्तु रामेण क्रुद्धः संरक्तलोचनः ।
प्रत्युवाच [1] खरो रामं प्रहसन् क्रोधमूर्छितः ॥ १५ ॥
प्राकृतान् राक्षसान् हत्वा युद्धे, दशरथात्मज !
आत्मना कथमात्मानं अप्रशस्यं प्रशंससि ॥ १६ ॥
विक्रान्ताः बलवन्तो वा ये भवन्ति नरर्षभाः ।
कथयन्ति न ते किञ्चित् तेजसा स्वेन गर्विताः ॥ १७ ॥
गर्विताः न कथयन्तीत्यन्वयः ॥ १७ ॥

[2] प्राकृतास्त्वकृतात्मानः लोके क्षत्रियपांसनाः ।
निरर्थकं विकत्थन्ते यथा, राम ! विकत्थसे ॥ १८ ॥
* कुलं व्यपदिशन् वीरः समरे [3] कोऽभियास्यति ।
मृत्युकाले हि संप्राप्ते स्वयमप्रस्तवे कथम् ॥ १९ ॥
को वीरः कुलं व्यपदिशन् भूत्वा समरेऽभियास्यति–अभियानं कुर्यात् । न कोऽपि । इदं च वचनं 'अहमासादितो राजा' इति रामेणोक्तत्वात् उक्तवान् । अप्रस्तवे इति । 'प्रेद्रुस्तुस्रुवः' इति धत्वभावः आर्षः । अप्रस्तावे इति यावत् ॥ १९ ॥

---

* कुलं व्यपदिशन्–कुलीनत्वं प्रकटयन् मृत्युकाले–तत्तुल्यकाले संप्राप्ते अप्रस्तवे–अप्रस्तावे .... स्तवरूपं वचनं कोऽभिधास्यति ; न कोऽपीत्यर्थः । 'अहमासादितो राजा' इति रामोक्तिरिदमुक्तवान्–ति. कुलं व्यपदिशन्–आत्मनो महाकुलप्रसूतत्वं प्रकटयन् को वीरः मृत्युकाले संप्राप्ते अप्रस्तवे–अनवसरे स्वयं स्तवमभिधास्यति–गो.

[1] ततो–ज. [2] प्राकृता विकृता–ङ. [3] कोऽभिधास्यति–ङ. ज. को विधास्यति–ङ.

सर्वथैव लघुत्वं ते कत्थनेन विदर्शितम् ।
* सुवर्णप्रतिरूपेण [1] तप्तेनेव कुशाग्निना ॥ २० ॥

सर्वथेत्यादि । विकत्थनेन—अद्य त्वां निहतमित्याद्युक्तवृथाजल्पनेन । लघुत्वमेव जल्पत्वमेव दर्शितम् । अनुचिताप्रयोजनव्यवहारेण जल्पताप्राप्तौ दृष्टान्तः—सुवर्णेत्यादि । कुशाग्निः—स्वर्णकारपात्रस्थतुषाग्निः । तेन तप्तेन सुवर्णप्रतिरूपेण सुवर्णतुल्याकारेण आरकूटेन । आरकूटः—(சாகுபித்தல்) लघुत्वं दर्शितं भवति । सामान्यदृशा सुवर्णवत् व्यापारार्हत्वं प्राक् तापात् स्थितं गौरवं यथा अनुचितेन कुशाग्निना तापेन काष्ण्यावहेन विनाश्य आरकूटत्वरूपं लाघवं दर्शितं—प्रकाशितं भवति तद्वदित्यर्थः ॥ २० ॥

---

* सुवर्णतुल्यरूपेण पित्तलेन कुशाग्निना—स्वर्णादिशोधाग्निना तप्तेन स्वस्य कृष्णवर्णत्वरूपं लाघवं दर्शितं भवति, तापात्पूर्वं हि स्वर्णतावुद्धिः, सा तापे यथा नश्यति, तथा त्वया स्वस्मिन् स्थिता प्राक् शूरत्वबुद्धिः कत्थनेनापहृता—**ति.** यथा तापात् पूर्वं सूक्ष्मविचारमन्तरा पित्तले स्वर्णबुद्धिरुत्पद्यते, तापेन तु विनश्यति ; तथा स्वश्लाघावचनोच्चारणात्पूर्वं त्वच्छूरत्वविषयिणी बुद्धिर्ममोत्पन्ना त्वत्कर्तृकस्वश्लाघाकत्थनेन तु सा विनष्टेत्यर्थः—**रा.** तप्तेन अत एव सुवर्णसदृशेन कुशाग्निना—कुशे—दर्भे आश्रितेन अग्निना लघुत्वं विदश्यते तद्वत् । यथा तृणाग्निः सुवर्णतुल्यतया भासमानोऽपि—ज्वलन्नपि उत्तरकाले दाहकार्यकरो न भवति, तथा कत्थनेन वीरवद्भासमानोऽपि पुरुषः उत्तरकाले लघुरेव भविष्यतीत्यर्थः—**गो.** सुवर्णप्रतिरूपेण—सुवर्णसदृशेन अग्निना—अग्निवर्णेन, अश्मनापाषाणेन, न तप्यते वस्त्विति शेषः । सुवर्णवर्णमश्मानं दृष्ट्वा अयमङ्गार इति स्तुत्या व्यपदिशन्ति, तथाऽपि तेनाग्निना वस्तु न तप्यते, किन्तु मुख्येनैवाग्निनेत्यर्थः । एतदुक्तं भवति—अग्निबुद्ध्याऽग्निवर्णमश्मानं स्पृशते पुरुषायाऽनुपलभ्यमानोष्णस्पर्शेनात्मनाऽत्मनोऽनग्नित्वं नाम लघुत्वं यथा विदर्शितं भवति, तथा ते—त्वया त्वां वीरं मन्वानाय मह्यं कत्थनेन—आत्मप्रशंसया अवीरत्वं नामात्मनो लघुत्वं विदर्शितं—इत्यपेक्षितपदाध्याहारेण योजना—**ती.** वस्तुतस्तु—बहिः सुवर्णत्वेन भासमानः आरकूटः, शोधनां प्राप्तः यथा स्वस्वरूपं भजते, तथा बहिः शूरमानी पुरुषः युद्धे प्राप्ते आत्मश्लाघाकरणेन स्वेनावीरत्वमेव प्रकटितं भवेदिति भावः स्वरसः ॥

[1] तप्तेनेवाश्मनाग्निना, तप्तेनेव तुषाग्निना—**ङ.**

न तु मामिह तिष्ठन्तं पश्यसि त्वं गदाधरम् * ।
धराधरमिवाकम्प्यं पर्वतं [1] धातुभिश्चितम् ॥ २१ ॥

अथैवं विकत्थने हेतुः अयमेव ते इत्याह—न तु मामित्यादि । उच्यमानविशेषणकं मां न पश्यसि सारतो नावगच्छसीति यत् अत एव एवं विकत्थसे इत्यन्वयः ॥ २१ ॥

पर्याप्तोऽहं गदापाणिः हन्तुं प्राणान् रणे तव ।
† त्रयाणामपि लोकानां पाशहस्त इवान्तकः ॥ २२ ॥

स्वकं सारं दर्शयति—पर्याप्त इत्यादि । गदापाणिरिति । अमोघगदाहस्तः इत्यर्थः ॥ २२ ॥

कामं बह्वपि वक्तव्यं ‡ त्वयि वक्ष्यामि न त्वहम् ।
§ अस्तं [2] गच्छोद्धि सविता युद्धविघ्नः ततो भवेत् [3] ॥ २३ ॥
चतुर्दश सहस्राणि राक्षसानां हतानि ते ।
त्वद्विनाशात् [4] करोम्येषः तेषामास्रप्रमार्जनम् [5] ॥ २४ ॥

हतानीति । ते—त्वयेति यावत् । यानि हतानि तेषां स्त्रीपुत्रादिबन्धूनां अश्रुप्रमार्जनं—अश्रुधारापरिमार्जनं करिष्यामि ॥ २४ ॥

---

* अत एव एवं विकत्थस इति भावः—गो. † तव, त्रयाणां लोकानां च प्राणान् हन्तुं इत्यन्वयः । त्रयाणामपि लोकानां प्राणान् हन्तुं पर्याप्तः, किं पुनस्तवेति भावः । ‡ त्वयि—एवं आत्मानं श्लाघयितुः तव विषये । § यद्यपि स्वस्य रात्रिबलायैव, तथाऽपि राज्यशक्तमनुष्यवधे स्वस्य न काऽपि कीर्तिरिति खरहृदयम्—गो.

[1] धातुमण्डितम्—ङ. [2] प्राप्नोति—ज. [3] एतदनन्तरं—"अग्रतः संस्थितं दृष्ट्वा त्वां मनो रुध्यते मम । रणे यस्य तु रुध्यामि मुहूर्तं न स जीवति ॥ मम त्वाऽप्रियं राम दुर्लभं तव जीवितम् । तोयवर्षमिवावर्षे तोयदस्य विनर्दतः ॥" इत्यधिकम्—ङ. [4] करोम्यद्य—ज. [5] एतदनन्तरं—"ततो रुधिरधारामिः त्वच्छरीरविमर्दनात् । करिष्यामि बलिं भूमौ त्वां हत्वा सर्वरक्षसाम् ॥"—इत्यधिकम्—ङ.

इत्युक्त्वा परमक्रुद्धः तां गदां *[1] परमाङ्गदाम् ।
खरः चिक्षेप रामाय प्रदीप्तामशनिं यथा ॥ २५ ॥

'तां गदां परमाङ्गदां' इति पाठः । परमोऽङ्गदः—कनकवलयः यस्याः सा तथा ॥ २५ ॥

खरबाहुप्रमुक्ता सा प्रदीप्ता महती गदा ।
भस्म वृक्षांश्च गुल्मांश्च कृत्वाऽऽगात् तत्समीपतः ॥ २६ ॥

वृक्षान् गुल्मांश्च भस्म कृत्वा । स्वज्वालयेति शेषः ॥ २६ ॥

तामापतन्तीं [2] ज्वलितां मृत्युपाशोपमां गदाम् ।
अन्तरिक्षगतां रामः चिच्छेद बहुधा शरैः ॥ २७ ॥

तदेवोक्तं तामापतन्तीं ज्वलितामिति ॥ २७ ॥

सा [3] विकीर्णा शरैर्भग्ना पपात धरणीतले ।
गदा मन्त्रौषधबलैः † व्यालीव विनिपातिता ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकोनत्रिंशः सर्गः

जीर्ण(२८)मानः सर्गः ॥ २८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकोनत्रिंशः सर्गः

---

* परमाङ्गदः—गदाप्रहारसामर्थ्यविरुदयुक्त इत्यर्थः—गो. † गदाशब्दस्य स्त्रीलिङ्गत्वात् व्यालीवेत्युक्तम् । सर्पस्त्रियः विषाधिक्यमपि लोके प्रसिद्धम् ॥

[1] परमाङ्गदः—ङ. [2] महतीं—ज. सहसा—ङ. [3] विशीर्णा—ज.

त्रिंशः सर्गः

[खरसंहारः]

[1]भित्त्वा तु तां गदां बाणैः राघवो *[2]धर्मवत्सलः ।
सयमानः खरं वाक्यं संरब्धमिदमब्रवीत् ॥ १ ॥

अथ खरवधः । भित्त्वेत्यादि ॥ १ ॥

एतत्ते बलसर्वस्वं दर्शितं, राक्षसाधम !
शक्तिहीनतरो †मत्तः वृथा त्वमवगर्जसि ॥ २ ॥

अथ प्राप्तकालत्वात् त्वयैव विकत्थनं कृतमिति ब्रूते रामः—एतत्ते इत्यादि ॥ २ ॥

एषा बाणविनिर्भिन्ना गदा भूमितलं गता ।
‡अभिधानप्रगल्भस्य तव §[3]प्रत्ययघातिनी ॥ ३ ॥

अभिधाने केवलं प्रगल्भः तथा । प्रत्ययः—शत्रुवधो येन सर्वथा भवति सर्वान्तकोऽयं इति योऽयं ते विश्वासः, तस्य स्वनाशतो घातिनी—प्रत्ययघातिनी ॥ ३ ॥

यत् त्वयोक्तं विनष्टानां अहमास्रप्रमार्जनम् ।
राक्षसानां करोमीति मिथ्या तदपि ते वचः ॥ ४ ॥

---

* धर्मवत्सल इत्यनेन निरायुधवधोऽनुचित इति श्रीरामोऽमन्यतेति गम्यते—गो. सयमान इति कथनात्—संरब्धं खरमित्यन्वयः । 'तमेवमभिसंरब्धं ब्रुवाणं' (१३) इति कथनात् सयसंरंभयोरविरोधात् क्रियाविशेषणं वा । अथ वा तत्रापि अभिसंरब्धं तं—खरमित्यन्वयः । † मत्तः—मदपेक्षया । यद्वा मत्तः—मत्कारणात्, पूर्वमेव—गदाग्रहणकालेऽपि शक्तिहीन एव, इदानीं तु शक्तिहीनतरः इत्यर्थः । ‡ अभिधाने—वाङ्मात्रे । § प्रत्ययघातिनीति । वीप्सायां प्रतिः, अरीनरीन् प्रति घातिनी गदा—गो.

[1] स इत्वा—ङ्. [2] रघुनन्दनः—ङ्. [3] प्रत्ययघातिनी—ङ्.

* नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य[1] रक्षसः ।
प्राणानपहरिष्यामि गरुत्मान् अमृतं यथा ॥ ५ ॥

अद्य ते छिन्नकण्ठस्य फेनबुद्बुद[2]भूषितम् ।
विदारितस्य मद्बाणैः मही पास्यति शोणितम् ॥ ६ ॥

पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः ।
स्वप्स्यसे गां † समालिङ्ग्य दुर्लभां प्रमदामिव ॥ ७ ॥

गां भुवम् ॥ ७ ॥

‡[3] प्रबद्धनिद्रे शयिते त्वयि राक्षसपांसने ।
भविष्यन्त्यशरण्यानां शरण्या दण्डका इमे ॥ ८ ॥

प्रबद्धनिद्र इति । प्रबद्धदीर्घनिद्र इत्यर्थः । शरण्याः—सुखावासभूताः ॥ ८ ॥

जनस्थाने हतस्थाने तव, राक्षस ! मच्छरैः ।
निर्भयाः विचरिष्यन्ति सर्वतो मुनयो वने ॥ ९ ॥

हतस्थाने—हतावासे इत्यर्थः ॥ ९ ॥

अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः ।
बाष्पार्द्र[4]वदनाः दीनाः भयादन्यभयावहाः ॥ १० ॥

भयात् विप्रसरिष्यन्तीत्यन्वयः ॥ १० ॥

---

* नीचस्य, तवेति शेषः । † समालिङ्ग्येत्यनेन अवाग्भूतत्वमुच्यते—गां. दुर्लभां प्रमदामिवेत्यनेन, आलिङ्गने गाढत्वं, तेन त्यक्तुमनिच्छा, तेन च मरणं लक्ष्यते । ‡ 'प्र' इत्युपसर्गेण दीर्घनिद्रां प्राप्ते—इत्यर्थलाभः ।

[1] राक्षस—ङ. [2] दूषितम्, रूषितम्—ङ. [3] प्रबुद्ध—ज. [4] नयनाः—ङ.

अद्य शोकरसज्ञास्ताः भविष्यन्ति *[1] निरर्थकाः ।
अनुरूपकुलाः पत्न्यः यासां त्वं पतिरीदृशः ॥ ११ ॥

निरर्थकाः—निर्गतः अर्थकः-अर्थाभासः—कामपुरुषार्थो यासां ताः तथा । अनुरूपं-त्वत्सदृशं कुलं यासां ताः तथा । कुलमिति दुर्वृत्तस्याप्युपलक्षणम् । पत्न्यः इति । त्वत्स्त्रियः इत्यर्थः ॥ ११ ॥

नृशंस! नीच! क्षुद्रात्मन्! नित्यं ब्राह्मणकण्टक!
†यत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः ॥ १२ ॥

ईदृशः इत्यस्यैव विवरणं—नृशंसेत्यादि । शङ्कितैरिति । त्वद्भटभीतैः इत्यर्थः ॥ १२ ॥

तमेवमभिसंरब्धं ब्रुवाणं राघवं [2] रणे ।
खरो निर्भर्त्सयामास रोषात् खरतरस्वनः ॥ १३ ॥
दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः ।
वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥ १४ ॥

ततो हीति । अवलिप्तत्वादेवेत्यर्थः ॥ १४ ॥

[3] कालपाशपरिक्षिप्ताः भवन्ति पुरुषा हि ये ।
[4] कार्याकार्यं न जानन्ति ते ‡निरस्तषडिन्द्रियाः ॥ १५ ॥

निरस्तषडिन्द्रिया इति । आहिताग्न्यादिरयम् । सान्तःकरणचक्षुरादिपञ्चेन्द्रियैः निरस्ताः—विनाशितात्मस्वातन्त्र्याः इत्यर्थः ॥

---

* निरर्थकाः—व्यर्थजीवनाः—विधवा इति वा । †'त्वया कदाऽस्य धर्मस्य विघ्नो भवेत्' इति सदा शङ्कितैरेव मुनिभिः होमादिराचरितः खल्विति भावः । ‡'मनःषष्ठानीन्द्रियाणि' (गीता—15-7) इत्याद्यनुसारात् षडित्युक्तम् ।

[1] निशाचर—ङ. [2] वने—च. ज. [3] ध्रुवं कालपरिक्षिप्ताः—ङ. [4] वाच्यावाच्यं—ङ.

एवमुक्त्वा ततो रामं संबध्य भ्रुकुटीं ततः ॥ १६ ॥
स ददर्श महासालं अविदूरे निशाचरः ।
रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन् ॥ १७ ॥

भ्रुकुटीं संबध्येति । मुखे संनिबध्येत्यर्थः । प्रहरणस्य—आयुधस्य ॥ १६-१७ ॥

स तमुत्पाटयामास * सदश्यः दशनच्छदम् ।
तं समुत्क्षिप्य बाहुभ्यां विनद्य च [1]महाबलः ॥ १८ ॥

दशनच्छदं—अधरम् ॥ १८ ॥

राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ।
तमापतन्तं बाणौघैः छित्वा रामः प्रतापवान् ॥ १९ ॥
रोषमाहारयत् तीव्रं निहन्तुं समरे खरम् ।
जातस्वेदः ततो रामः † रोषात् रक्तान्तलोचनः ॥ २० ॥
निर्बिभेद सहस्रेण बाणानां समरे खरम् ।

रोषात् जातस्वेदः, न तु श्रमात् इत्यर्थः । रक्तं—रक्तवर्णं अन्तं लोचनं अपाङ्गं यस्य सः तथा । सहस्रेणेति । अनेकेनेति यावत् ॥ २० ॥

तस्य बाणान्तराद्रक्तं बहु सुस्राव फेनिलम् ॥ २१ ॥
गिरेः ‡ [2]प्रस्रवणस्येव तोयधारापरिस्रवः ।

बाणान्तरात्—विदीर्य निस्सृतबाणमार्गात् इत्यर्थः ॥ २१ ॥

---

* अनेन सालस्य दुर्ग्रहत्वमुक्तं—गो. † जातस्वेदः, रक्तान्तलोचनः—इत्युभयत्रापि 'रोषात्' इत्येतदन्वेति । ‡ प्रस्रवणस्य—प्रस्रवणाख्यस्य—गो. ति. रा.

[1] महाबलम्—ङ. [2] प्रस्रवतो यद्वत्—ङ.

[1] विह्वलः स कृतो बाणैः खरो रामेण संयुगे ॥ २२ ॥
मत्तो * रुधिरगन्धेन तमेवाभ्यद्रवद्भृशम् ।

विह्वलः कृतः इति । परवशः कृतः न मृतः । तदेव प्रदर्श्यते—मत्त इत्यादि । तमेव—राममेव ॥ २२ ॥

तमापतन्तं [2] संरब्धं [3] कृतास्त्रो रुधिराप्लुतम् ॥ २३ ॥
† अपासर्पत् [4] प्रतिपदं किंचित् त्वरितविक्रमः ।

अपासर्पत् प्रतिपदं किञ्चिदिति । अत्यासक्तौ धनुर्व्यापारायोग्यत्वात्, तेन च परवशतया आधावनात् तदभिमुखं वर्तमान एव धनुर्व्यापारयोग्यतायै द्वित्राणि पदानि पृष्ठतोऽपासर्पदित्यर्थः । एतेन च रावणतुल्यबलत्वं खरस्य प्रख्यापितम् । न हि सेन्द्रैर्देवैरपि रामधनुश्छेदः, रामसहस्रबाणसहनं, रामचालनं च सुशकम् । एवं बलमपि । तन्मूलत्वं मूलमुभयोः खररावणयोः ॥ २३ ॥

---

* रुधिरगन्धेन उपलक्षितः—गो. राक्षसत्वेन रुधिरगन्धाघ्राणनेन मत्तः—जातमद इति वा । † तं खरं प्रतिपदं—तत्स्थानं प्रति किञ्चिदपासर्पत्—बाणप्रहारयोग्यान्तरालाभाय अपासर्पयत, अन्तर्भावितणिजर्थः । अन्यथा तमिति द्वितीया न स्यात्, पञ्चम्यापत्तिश्च ; दृष्ट्यध्याहारे तु गौरवम् । तं—तस्मात्—गो. तं, दृष्ट्वा—ति. रा. अपसर्पणनिमित्तमाह—कृतास्त्र इति । सहितास्त्रत्वात् अस्त्रमोचनावकाशलाभाय अपासर्पदिति भावः । निमित्तान्तरमाह—रुधिराप्लुतमिति । तत्स्पर्शवीभत्सेनापसर्पणमित्यर्थः । यद्यपि रणे किञ्चिदपसर्पणं शूरस्यायुक्तं ; तथाऽपि 'सर्वतो बलवती ह्यन्यथाऽनुपपत्तिः' इति न्यायेन अपसर्पणं विना तत्संहारहेत्वलाभादपसर्पणं न दोष इति हृदयम्—गो. वस्तुतस्तु—भयात् अपसर्पणमेव दोषः । शूराः खलु रणे विचित्रगतिभेदं प्रदर्शयन्त्येव परेषां प्रहरणाय । अतः अत्रापि, इतोऽप्यतिशयेन युद्धसन्नाहरूपत्वादस्यापसर्पणस्य नायं दोषः । एतत्सूचनायैव अनुपदमेव 'त्वरितविक्रमः' इति कथ्यते ॥

[1] विकलः—ज्ञ. [2] संकुद्धं—ज्ञ. संप्रेक्ष्य—ङ. [3] रुधिरौघपरिप्लुतम्—ङ. [4] द्विपदं—च.

ततः पावकसङ्काशं वधाय समरे शरम् ॥ २४ ॥
*खरस्य रामो जग्राह †ब्रह्मदण्ड[1]मिवापरम् ।

एवं इदानीं अतिसङ्कटकाले सहजशक्तिपरिग्रहादेव निर्वाहं दर्शयति—तत इत्यादि ॥ २४ ॥

‡स तं दत्तं मघवता सुरराजेन धीमता ॥ २५ ॥
संदधे चापि धर्मात्मा मुमोच च खरं प्रति ।

सः—रामः । मघवता दत्तं—अगस्त्यद्वारा प्रदानाय दत्तं अन्वर्थब्रह्मदत्तं ब्रह्मास्त्रवदमोघं शरं संदधे—मुमोच च ॥ २५ ॥

स हि मुक्तो महाबाणः निर्घातसमनिःस्वनः ॥ २६ ॥
रामेण धनुरायम्य खरस्योपरि चापतत् ।

धनुरायम्य मुक्तः इत्यन्वयः । खरस्योपरि चापतत् इति पाङ्क्तः ।

स पपात खरो भूमौ दह्यमानः शराग्निना ॥ २७ ॥
§रुद्रेणेव विनिर्दग्धः श्वेतारण्ये [2]यथाऽन्धकः ।

---

*खरस्य वधायेत्यन्वयः । †ब्रह्मदण्डं—ब्रह्मशापम्—गो. ‡दत्तं, अगस्त्य मुखेनेति शेषः—गो. §रुद्रेण—रुद्रनेत्राग्निना दग्धः अन्तक इव, श्वेतारण्ये यथा श्वेतारण्ये इव भूमौ पपात—गो. श्वेतारण्ये यथाऽन्धकः । अन्धकासुरः श्वेतारण्ये रुद्रेण हत इति (हरिवंशादि) पुराणप्रसिद्धम् । रुद्रेणेवेति—इवशब्दो वाक्यालङ्कारे श्वेतारण्ये यथान्तक इति प्रचुरः पाठः । तत्र कावेरीतीरवर्तिनि श्वेताख्ये मार्कण्डेयचिरं जीवित्वाय अन्तकसंहारो रुद्रेण कृत इति तन्माहात्म्ये प्रसिद्धिः । कौर्मे तूत्तरखण्डे श्वेतो राजर्षेः परमशैवस्य कालञ्जरे पर्वते तपस्यभिरतस्य मारणायागतस्यान्तकस्य शिवेन वामपादप्रहारेण संहारः कृत इति षट्त्रिंशेऽध्याये उक्तम्—ति.

[1] मिवोद्यतम्—ङ. [2] यथाऽन्तकः—ङ.

शरानलेन दह्यमानः इति। तस्य ब्रह्मतेजोरूपत्वात्। एवं इह खरदूषणत्रिशिरःपरिणतवैराजसूक्ष्मत्रिमलस्य च सर्वान्तसंहारे ब्रह्मणो रामस्य रावणादिस्थूलत्रिमलसंहारे ब्रह्मास्त्रवत् ब्रह्मदत्तारूय-स्वशक्तिरेव परमसाधनं न त्वाविष्टवैराजक्षात्रशक्तिरिति सुस्पष्टं ब्रह्मत्वं रामस्य। श्वेतारण्ये यथाऽन्धकः इति पाङ्क्तः। श्वेतारण्ये अन्धकारूयोऽसुरः रुद्रेण प्रहृतः इति पुराणसिद्धम्॥ २७॥

* स वृत्र इव वज्रेण फेनेन नमुचिर्यथा॥ २८॥
[1]बलो वेन्द्राशनिहतः निपपात हतः खरः।

वृत्रः वज्रेणेव, नमुचिः फेनेनेव च हतः इति। "न मा शुष्केण नार्द्रेण हनः" इत्यारभ्य "अयां फेनेन शिर उदवर्तयत्" इत्यन्तश्रुत्या प्रसिद्धोऽयमर्थः। तथा वज्राशनिहतो बलो वेति। इदं च पुराणप्रसिद्धम्। एवं रुद्रेन्द्रसाध्यसंहारान्धकादिचतुर्दृष्टान्त-कथनेन कविना कथमपि रामब्रह्मातिरिक्तेन केनापि दुःसंहाररक्षसत्वं खरस्य प्रकाशितम्॥ २८॥

† ततो राजर्षयः सर्वे [2]सङ्गताः परमर्षयः॥ २९॥
[3]सभाज्य मुदिता रामं [4]इदं वचनमब्रुवन्।

राजर्षयः—नहुषाद्याः। परमर्षयः—भृग्वाद्याः ब्रह्मर्षयः। रामं सभाज्य—संपूज्य; "वरिवस्या सपर्या च पूजनं च समं जनम्॥"

---

* अमोघबाणहतत्वज्ञापनाय प्रथमो दृष्टान्तः, लीलया हतत्वज्ञापनाय द्वितीयः, समाधिष्ठितत्वज्ञापनाय तृतीयः। आर्द्रात् शुष्काच्चावध्यत्वं नमुचेर्लब्धम्, तदर्थं फेनेन हतः। बलो वेति। वाशब्दः इवार्थकः—गो. † एतदारभ्य दशश्लोकानां पौर्वापर्ये गो. ज. पुस्तके दृश्यते।

[1] बलो यथाऽशनिहतः—ङ. [2] संगताश्च महर्षयः—ङ. [3] समेत्य—ङ. [4] सागस्त्या इदमब्रुवन्—ङ.

*एतदर्थं महातेजाः महेन्द्रः पाकशासनः ॥ ३० ॥
शरभङ्गाश्रमं पुण्यं आजगाम पुरन्दरः।

एतदर्थमिति। एतद्रक्षोवधाय एतद्देशप्रस्थापननियोजनार्थमित्यर्थः। क्षणं स्थित्वा रामं प्रस्थाप्य भवद्भिः ब्रह्मलोकाय प्रस्थातव्यमिति मघवतोक्ताऽऽगतमित्यर्थः ॥ ३० ॥

आनीतस्त्वामिमं देशं †उपायेन महर्षिभिः ॥ ३१ ॥
एषां वधार्थं [1]क्रूराणां रक्षसां [2]पापकर्मणाम्।
तदिदं नः कृतं कार्यं त्वया, दशरथात्मज ! ॥ ३२ ॥
सुखं धर्मं चरिष्यन्ति दण्डकेषु महर्षयः।
एतस्मिन्नन्तरे देवाः चारणैस्सह सङ्गताः ॥ ३३ ॥
दुन्दुभींश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः।
रामस्योपरि संहृष्टाः ववृषुः विस्मितास्तदा ॥ ३४ ॥

एतस्मिन्नन्तर इति। ऋषिभिः वृत्तान्तकथनावसरे इत्यर्थः॥

अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः।
चतुर्दश सहस्राणि रक्षसां [3]भीमकर्मणाम् ॥ ३५ ॥
खरदूषणमुख्यानां निहतानि महाहवे।

---

* 'क्षणं स्थित्वा रामं प्रस्थाप्य भवद्भिः ब्रह्मलोकाय प्रस्थातव्यं इति इन्द्रः शरभङ्गं प्रति उक्त्वा गत इत्याशयः-ति. शरभङ्गेण हि सुतीक्ष्णाभिगमनं (5, 36) उपदिष्टम्। सुतीक्ष्णेन च अगस्त्याभिगमनं (11, 36–37) उक्तम्। अगस्त्येन च ऐन्द्रशरार्चनादिदानपूर्वकं पञ्चवटीनिवासः उपदिष्टः साभिप्रायमेव (13, 12–18)। एवञ्च राक्षसवधायैव रामः देवैः ऋषिभिश्च उपायेनानीतः पञ्चवटीमिति गम्यते। एतदेव 'ततो राजर्षयः'—इत्यारभ्य चतुर्भिः श्लोकैः कथ्यते। † उपायेन-तत्तदाश्रमदर्शनव्याजेन-गो.

[1] शूराणां-ङ. शत्रूणां-ज. [2] क्रूरकर्मणाम्-ङ. [3] कामरूपिणाम्-च. ज.

अर्धाधिकमुहूर्तेनेति । मुहूर्तः—घटिकाद्वयम् । मुहूर्तस्य अर्धमधिकं यस्मिन् स तथा । घटिकात्रयेणेत्यर्थः ॥ ३५ ॥

अहो बत ! महत्कर्म रामस्य विदितात्मनः ॥ ३६ ॥
अहो ! वीर्यं अहो ! दाक्ष्यं विष्णोरिव हि दृश्यते !
इत्येवमुक्त्वा ते सर्वे ययुर्देवाः [1] यथाऽऽगतम् ॥ ३७ ॥
दाक्ष्यं—सामर्थ्यं, युद्धविषयकम् ॥ ३७ ॥

*एतस्मिन्नन्तरे वीरः लक्ष्मणः स[६] सीतया ।
गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं [2] सुखी ॥ ३८ ॥
एतस्मिन्नन्तर इति । देवगणनिर्गमनसमये इत्यर्थः ॥ ३८ ॥

ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ।
प्रविवेशाश्रमं वीरः लक्ष्मणेनाभि[3]पूजितः ॥ ३९ ॥
†तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ ४० ॥

‡मुदा परमया युक्ता दृष्ट्वा रक्षोगणान् हतान् ।
रामं [4]चैवाव्यथं दृष्ट्वा तुतोष जनकात्मजा ॥ ४१ ॥

---

* युद्धपरिसमाप्तिं, रामविजयं च ज्ञात्वेति भावः । आगतानां महर्षीणां प्रत्यागमनकालिकहर्षादिभिः स वृत्तान्तः लक्ष्मणेन अवगतः स्यात् । अयमंशः 'सुखी' इत्यनेन सूच्यते । इतरथा हि लक्ष्मणस्य सुखमसंभावितमेव । † चतुर्दशसहस्ररक्षोभिः अयमेकाकी किं करिष्यतीति उद्विग्ना सीता रामेण जिते, वीरतारतम्याभिज्ञकुलप्रसूततया सबहुमानं परिषस्वज इत्याह—तं दृष्ट्वा इति । रामं विना गुहागता सीता ततो निर्गत्य निरस्तसमस्तशत्रुं रामं परिषस्वजे—इत्यनेन—हृदयगुहागतो जीवः परतन्त्रः आचार्यमुखेन परमशेषिणं दृष्ट्वा, तेन सकलविरोधिवर्गे निवर्तिते, ततो निर्गत्य नित्यसूरिपरिषदासीनं शेषिणमासाद्य तद्भोगपरीवाहमनुबभूवेति ध्वन्यते—गो. ‡ उक्तमेवार्थं विशदं दर्शयति दाक्ष्यां—मुदेत्यादि—गो.

[1] यथासुखम्—ङ. [2] सुखम्—ङ. [3] वादितः—ङ. [4] चैवाव्ययं—च. ज.

ततस्तु तं राक्षससङ्घमर्दनं
[1]सभाज्यमानं मुदितैः [2]महर्षिभिः ।
पुनः परिष्वज्य [3]शशिप्रभानना
बभूव हृष्टा जनकात्मजा तदा ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रिंशः सर्गः

स्तुतिसन्तोषादौ पौनःपुन्यमलङ्कारः इति आदावेवोक्तम् । अतः—ततस्तु तमित्यादि । रवि(४२)मानः सर्गः ॥ ४२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रिंशः सर्गः

एकत्रिंशः सर्गः

[रावणाकम्पनसंवादः]

*त्वरमाणस्ततो गत्वा †जनस्थानादकम्पनः ।
प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ १ ॥

अथ दैवात् खरसंग्रामसङ्गतेन कथंचित् पलायितेन अकम्पनेन विज्ञापितजनस्थानवृत्तान्तस्य तेनैव विनिवर्तितसङ्ग्रामस्य तेनैव बोधित-सीतापहारोपायस्य तदर्थं मारीचसङ्गतस्य मारीचोपदेशनिवृत्तसीतापहार-

---

*त्वरमाण इत्यनेन—शूर्पणखातः पूर्वमेव लङ्कागमनमुक्तम् । † संपूर्ण दण्डकारण्यं जनस्थानपदवाच्यम् । अतो गोदावरीतीरात् गतोऽपि जनस्थानात् गत इत्युक्तम्—ति. अथवा अकम्पनस्य जनस्थानवासित्वात्, युद्धाय केवलं पञ्चवटीगमनाच्च तथोक्तम् । अथवा अकम्पनोऽयं युद्धाय न गतः अत एव रामेण न हतश्च ; किन्तु जनस्थानपर्यवेक्षणाद्यधिकृतः स्यात् । गोविन्दराजस्तु अकम्पनः रावणचार इत्याह । अनन्तरश्लोकगतं 'कथञ्चिदहमागतः' इति वाक्यं द्रष्टव्यमत्र ।

[1] संपूज्यमानं—ङ. [2] महात्मभिः—ज. [3] मुदाऽन्वितानना—ज.

दुर्मतेः रावणस्य पुनः स्वपुर्यागमनम् । त्वरमाण इत्यादि । शूर्पणखाऽऽगमनात् पूर्वमेवेति शेषः । सर्वमपि दण्डकारण्यं जनस्थानदेशवाच्यं सामान्यतः, अतो गोदावरीतीरात् गतोऽपि जनस्थानात् गतः इत्युक्तम् ॥ १ ॥

जनस्थानस्थिताः, राजन् ! राक्षसाः ह वो हताः ।
खरश्च निहतः संख्ये *कथंचिदहमागतः ॥ २ ॥

कथंचिदहमागतः इति । मया कार्यवशात् सङ्गतेन केवलं प्रेक्षकतयाऽवस्थितत्वात् रामशराविषयीकृतः इत्यर्थः ॥ २ ॥

एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः ।
अकम्पनमुवाचेदं निर्दहन्निव [1]चक्षुषा ॥ ३ ॥
[2]केन [3]भीमजनस्थानं हतं मम परासुना ।
[4]को हि सर्वेषु लोकेषु †गतिं [5]चाधिगमिष्यति ॥ ४ ॥

भीमजनस्थानमिति पाङ्क्तः । भीमं–भयङ्करं जनस्थानं तथा । परासुनेति कोपात् । गतिं–स्थितिम् ॥ ४ ॥

न हि मे विप्रियं कृत्वा शक्यं मघवता ‡सुखम् ।
प्रासुं वैश्रवणेनापि न यमेन न विष्णुना ॥ ५ ॥
कालस्य चाप्यहं कालः दहेयमपि पावकम् ।
मृत्युं मरणधर्मेण संयोजयितुमुत्सहे ॥ ६ ॥

---

*कथञ्चिदिति । स्त्रीवेषधारणेनेति भावः । अत एव शूर्पणखा वक्ष्यति–"एका कथञ्चिन्मुक्ताऽहं परिभूय महात्मना । स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ॥" इति–**गो**.

† गतिं–गम्यत इति गतिः–स्थानम्–**गो**. ‡ सुखं प्रासुं न शक्यमित्यन्वयः ।

[1] तेजसा–**ज**. [2] तेन–**ज**. [3] रम्यं–**ङ**. भीमं–**ज**. [4] कोऽद्य–**ङ**. [5] चाधिगमिष्यति–**ज**.

दहेयमपि संक्रुद्धः तेजसाऽऽदित्यपावकौ *।
वातस्य तरसा वेगं निहन्तुमहमुत्सहे ॥ ७ ॥

निहन्तुमिति। भङ्क्तुमित्यर्थः। आदित्यपावकाविति। उभावपि युगपदिति शेषः ॥ ७ ॥

तथा क्रुद्धं दशग्रीवं कृताञ्जलिरकम्पनः।
भयात् † संदिग्धया वाचा रावणं याचतेऽभयम् ॥ ८ ॥

संदिग्धया—संदिग्धार्थया ॥ ८ ॥

‡ दशग्रीवोऽभयं तस्मै प्रददौ रक्षसां वरः।
स विश्रब्धोऽब्रवीद्वाक्यं असंदिग्धमकम्पनः ॥ ९ ॥
पुत्रो दशरथस्यास्ति सिंहसंहननो युवा।
रामो नाम [1] वृषस्कन्धः वृत्तायतमहाभुजः ॥ १० ॥
[2] वीरः पृथुयशाः श्रीमान् अतुल्यबलविक्रमः।
[3] हतं तेन जनस्थानं, खरश्च सहदूषणः § ॥ ११ ॥

अतुल्यं—केनाऽपि तुलनानर्हं बलं विक्रमश्च यस्य स तथा ॥ ११ ॥

अकम्पनवचः श्रुत्वा रावणो राक्षसाधिपः।
[4] नागेन्द्र इव निःश्वस्य वचनं चेदमब्रवीत् ॥ १२ ॥

नागेन्द्रः—सर्पश्रेष्ठः ॥ १२ ॥

---

* आदित्यपावकौ, परस्परसाहाय्येन संयुक्तावपीत्यर्थः, अतो (दहेयमपि पावकम् इत्यनेन) न पौनरुक्तिः—गो. † सन्दिग्धया—सन्दिग्धाक्षरया—गो. ‡ शत्रुपराक्रमस्य रावणपुरतः प्रशंसनस्य रावणापमानने विश्रान्त्या तेन किं वा भवेदिति भीताय अकम्पनाय अभयं ददौ रावणः। अत एव धैर्येण रामपराक्रमं वर्णयति अकम्पनः। § सहदूषणः खरश्च हत इति विपरिणामः। प्राधान्यात् पृथग्व्यपदेशः।

[1] महास्कन्धः—ज्ञ. [2] श्यामः—ज. [3] हतस्तेन जनस्थाने—ज. [4] मृगेन्द्र—ङ.

स सुरेन्द्रेण संयुक्तः रामः सर्वामरैः सह ।
*उपयातो जनस्थानं ब्रूहि कच्चित्, अकम्पन! ॥ १३ ॥

स सुरेन्द्रेणेत्यत्र स इति पदम् ॥ १३ ॥

रावणस्य पुनर्वाक्यं निशम्य तदकम्पनः ।
आचचक्षे बलं तस्य विक्रमं च महात्मनः ॥ १४ ॥
रामो नाम महातेजाः श्रेष्ठः सर्वधनुष्मताम् ।
दिव्यास्त्रगुणसंपन्नः [1]पुरन्दरसमो युधि ॥ १५ ॥
तस्यानुरूपो बलवान् [2]रक्ताक्षो दुन्दुभिस्वनः ।
कनीयान् लक्ष्मणो [3]नाम भ्राता शशिनिभाननः ॥ १६ ॥
†स तेन सह संयुक्तः पावकेनानिलो यथा ।
श्रीमान् राजवरस्तेन जनस्थानं निपातितम् ॥ १७ ॥
‡नैव देवा महात्मानः नात्र कार्या विचारणा ।
शरा रामेण तूत्सृष्टाः रुक्मपुङ्खाः पतत्रिणः ॥ १८ ॥
सर्पाः पञ्चानना भूत्वा भक्षयन्ति स्म राक्षसान् ।

रामेण त्विति । न च लक्ष्मणेनापीत्यर्थः ॥ १८ ॥

§येन येन च गच्छन्ति राक्षसाः [4]भयकर्शिताः ॥ १९ ॥

---

*उपयातः कच्चित्—इत्यन्वयः । एकेन, नरेण तादृशकर्मणः कर्तुमशक्यत्वादिति भावः । †एक एव राक्षससंहारायालं, किमुत लक्ष्मणसाहाय्ये इति भावः । ‡नैव देवा इति । साहाय्यार्थमागता इति शेषः—गो. रामस्यापि देवत्वं मन्यमानं प्रति उत्तरदानात् रामलक्ष्मणादीन् सर्वान् मिलित्वा वा तथा वचनम् । §२५ सर्गे १७ श्लोकोक्तगान्धर्वास्त्रप्रभावोऽयम् ।

[1] परं धर्मं गतो—ज. परंधामगतो—ङ. [2] रक्तास्यो—ङ. [3] भ्राता राकाशशि—ज. [4] भयशङ्किताः—ङ.

तेन तेन स्म पश्यन्ति राममेवाग्रतः स्थितम् ।
इत्थं विनाशितं तेन जनस्थानं तवानघ ! ॥ २० ॥

राममेवाग्रतः स्थितं पश्यन्तीति । भयादिति शेषः । वयं तु तत्त्वतश्च तथात्वं समस्तीति मन्यामहे । तत्कालं भूमतेजः-समावेशस्योक्तत्वात् तद्वशेन सहजब्रह्मताऽऽवरणनिवारणात् अनन्ता-कारतया प्रतिभासमानस्य ईषत्करत्वात् ॥ २० ॥

अकम्पनवचः श्रुत्वा रावणो वाक्यमब्रवीत् ।
जनस्थानं गमिष्यामि हन्तुं रामं सलक्ष्मणम् ॥ २१ ॥
अथैवमुक्ते वचने प्रोवाचेदमकम्पनः ।
शृणु, राजन् ! यथावृत्तं रामस्य * बलपौरुषम् ॥ २२ ॥
†[1] असाध्यः कुपितो रामः विक्रमेण महायशाः ।
आपगायाः सुपूर्णाया वेगं परिहरेच्छरैः ॥ २३ ॥
सतारग्रहनक्षत्रं नभश्चाप्यवसादयेत् ।

नभश्चाप्यवसादयेदिति । तारादिरहितं कुर्यादित्यर्थः । अत्रत्यलिङः सर्वे शक्यार्थे ॥ २३ ॥

असौ रामस्तु [2] मज्जन्तीं श्रीमान् अभ्युद्धरेन्महीम् ॥ २४ ॥
भित्त्वा वेलां समुद्रस्य लोकान् आप्लावये [3] द्विभुः ।

वेला—मर्यादा ॥ २४ ॥

---

* बलं-पराभिभवसामर्थ्यं, पौरुषं—महापुरुषकर्म-ति. बलं महत्स्वपि कर्मसु आयासाभावः—' अक्लिष्टकर्मा ' इति तत्र तत्र इदमेवोच्यते । पौरुषं तु—वीर्यतेजःपरा-क्रमादिसर्वोत्कर्षलक्षणम् । † रामः विक्रमेण असाध्यः—न स्वायत्तीकर्तुं शक्यः, न जेतुं शक्य इति यावत् । ' न हि रामः, दशग्रीव ! शक्यो जेतुं त्वया युधि ' इति च स्पष्टं वक्ष्यति ।

[1] अवध्यः—ङ. [2] सीदन्तीं—ज. [3] दिमान्—ङ.

वेगं वापि समुद्रस्य वायुं वा विधमेच्छरैः ॥ २५ ॥
* संहृत्य वा पुनर्लोकान् विक्रमेण महायशाः ।
शक्तः स पुरुषव्याघ्रः स्रष्टुं पुनरपि प्रजाः ॥ २६ ॥

* अतीतं च संहृत्य स्रष्टुं शक्तः इत्यादिकं वास्तवमेव दैवात् सत्यात् प्रवृत्तम् ॥ २६ ॥

न हि रामः, दशग्रीव! शक्यो जेतुं त्वया युधि ।
रक्षसां वाऽपि लोकेन, स्वर्गः पापजनैरिव ॥ २७ ॥

लोकेन-समूहेन । सहितेनापीति शेषः ॥ २७ ॥

न तं वध्यमहं मन्ये सर्वैः देवासुरैरपि ।
† अयं तस्य वधोपायः तं ममैकमनाः शृणु ॥ २८ ॥
भार्या तस्योत्तमा लोके सीता नाम सुमध्यमा ।
श्यामा समविभक्ताङ्गी स्त्रीरत्नं ‡ रत्नभूषिता ॥ २९ ॥
नैव देवी न गन्धर्वी नाप्सरा [1]नापि दानवी ।
तुल्या सीमन्तिनी तस्याः [2]मानुषी तु कुतो भवेत् ॥३०॥

श्यामा—यौवनमध्यस्था । कुतो भवेत् इति । तुल्येत्यनुकर्षः ॥

तस्यापहर भार्यां त्वं § प्रमथ्य तु महावने ।
[3]स तया रहितः कामी रामो हास्यति जीवितम् ॥ ३१ ॥

---

* जगत इदानीमुपलंभात्—संहृत्य स्रष्टुं शक्त इत्युक्तम् । † "एवं द्वित्रवारं रामस्य विक्रमेण अजय्यत्वोपपादनाभिप्रायमाविष्करोति—अयं तस्य वधोपाय इति । ‡ सीतायाः सर्वाभरणभूषिताया एव वनप्रस्थानं, रावणेन लङ्कापापणकाले मार्गे ऋश्यमूकपर्वते तेषां पातनं, तेषां सुग्रीवेणोपालंभः, रामाय दर्शनं—इत्यादिकं प्रसिद्धमेव । § प्रमथ्य—कथञ्चिदनवधानीकृत्य—रा.

[1] न च पन्नगी—ज. [2] मानुषीषु—ङ. [3] सीतया—ङ.

प्रमथ्येति । रामं केनचिदुपायेन प्रमथ्य–विलोड्य—उच्चाट्य तस्य भार्यां प्रमथ्य–बलात्कारेण हर ॥ ३१ ॥

अरोचयत तद्वाक्यं रावणो [1]राक्षसाधिपः ।
चिन्तयित्वा महाबाहुः अकम्पनमुवाच ह ॥ ३२ ॥

अरोचयत–इष्टं मन्यते स्म । चिन्तयित्वेति । रामवनोच्चाटनोपायमिति शेषः ॥ ३२ ॥

बाढं [2]काल्यं गमिष्यामि ह्येकः सारथिना सह ।
आनयिष्यामि वैदेहीं इमां *हृष्टो महापुरीम् ॥ ३३ ॥

काल्यं-प्रातः । काल्यमित्यप्यस्ति ॥ ३३ ॥

अथैवमुक्त्वा प्रययौ खरयुक्तेन रावणः ।
रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन् ॥ ३४ ॥

---

*हृष्ट इति । अकम्पनवाक्यं श्रुत्वा, त्रेतायुगे श्रीरामोऽवतरेष्यतीति स्मरणात् हृष्टः । तदेतदुत्तररामायणे स्पष्टम् । तत्र हि सनत्कुमारं प्रति विष्णुहस्तमृतानां का गतिरिति रावणेन पृष्टे, तेन हतानां तल्लोकप्राप्तिरिति सनत्कुमारवचः श्रुत्वा 'एवं श्रुत्वा महाबाहू राक्षसेन्द्रः प्रतापवान् । त्वया सह विरोधेप्सुः चिन्तयामास राघव ॥ एतदर्थं महाबाहो रावणेन दुरात्मना । सुता जनकराजस्य हृता राम! महावने ॥' इत्युक्तमिति तीर्थः । उत्तमस्त्रीलाभो भविष्यतीति हृष्ट इत्यर्थ उचितः । श्रुतस्यापि तस्यार्थस्य तामसत्वेन विस्मरणात् । ते पद्ये तु न यथाश्रुतार्थे, वक्ष्यमाणविष्णुपुराणविरोधात् । किन्तु श्रीरामस्य स्वमृत्योरवतारं श्रुत्वा त्वया सह मृत्युविघातकविरोधेच्छुः तां हृतवान् । तद्वियोगे तव मरणमित्याशयेनेति तयोरर्थ इत्यन्ये । वस्तुतस्तु एतेषां श्लोकानां तद्धृतां सर्गाणां च प्रक्षिप्तत्वान्न ते प्रमाणभूताः । अत एव ते सर्गाः कतकादिभिः तीर्थैन च न व्याख्याताः । एतेन—'एतदर्थं महाबाहो रावणेन दुरात्मना । विज्ञायापहृता सीता त्वत्तो मरणकाङ्क्षया' इति तत्र पाठो दृश्यते । तत्र च त्वदुक्तार्थासंभवः—इत्यपास्तम्–ति.

[1] लोकरावणः; कालचोदितः–ङ. [2] कल्यं–ज.

स रथो राक्षसेन्द्रस्य नक्षत्रपथगो महान् ।
[1]चञ्चूर्यमाणः शुशुभे जलदे चन्द्रमा इव ॥ ३५ ॥

चञ्चूर्यमाणः—सञ्चरन् । चरेर्यङन्तात् शानच् । 'चरफलोश्च । उत्परस्यातः ।' इति नुगुत्वे । जलदस्थानं गगनं, चन्द्रस्थानं रथः ॥

[2]स मारीचाश्रमं प्राप्य ताटकेयमुपागमत् ।
मारीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः* ॥ ३६ ॥

मारीचाश्रममित्यनेन सः तदानीं तपस्तेपे पूर्वं रामनिरस्तः तदुःखादिति गम्यते । ताटकेयम् । 'स्त्रीभ्यो ढक्' ॥ ३६

तं स्वयं पूजयित्वा तु आसनेनोदकेन च ।
†अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥ ३७ ॥
‡कच्चित् सुकुशलं, राजन्! लोकानां, राक्षसेश्वर! ।
आशङ्के [3]नाधिजाने त्वं, यतस्त्वर्णमिहागतः ॥ ३८ ॥

लोकानां—राक्षसलोकानाम् । 'आशङ्के नाथ जाने त्वं' इति पाठः । भयं आशङ्के, अथ क्षेमं न जाने—नावगच्छामीत्यर्थः । कुतः इत्यतः—यत इत्यादि । एकाकीति शेषः ॥ ३८ ॥

एवमुक्तो महातेजाः मारीचेन स रावणः ।
ततः पश्चादिदं वाक्यं अब्रवीत् वाक्यकोविदः ॥ ३९ ॥
§आरक्षो मे हतस्तात! रामेणाक्लिष्टकर्मणा ।
जनस्थानमवध्यं तत् सर्वं युधि निपातितम् ॥ ४० ॥
तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे ।

आरक्षः—समाजस्थानभूतं जनस्थानम् ॥ ४० ॥

---

* अमानुषैः—मनुष्यलोकदुर्लभैः—गो. † अर्थोपहितया—अर्थविशेषगर्भितयेति यावत् । ‡ लोकानां—राक्षसलोकानां, राक्षसेश्वरेति सममिव्याहारादयमर्थो लभ्यते—गो. § आरक्षः—अन्तपालः—गो. सर्वतो रक्षणकर्ता खरादिः—रा.

[1] संचार्यमाणः—ङ. [2] स दूरे चाश्रमं गत्वा—ज. [3] नाथ जाने—ङ. ज.

राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत् ॥ ४१ ॥
आख्याता केन *[1] सीतेति मित्ररूपेण शत्रुणा ।
त्वया, राक्षसशार्दूल! को न नन्दति निन्दितः ॥ ४२ ॥
सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे ।

सीतेति केनाख्याता--उपायत्वेनेति शेषः । त्वयेत्यादि । हे राक्षसशार्दूल! त्वया निन्दितः कः त्वां न नन्दति न संतुष्यति--क्रुध्यति शत्रुर्भवतीति यावत् । कस्ते अभिहितः सीतामिहानयस्वेति ब्रवीति तं मे ब्रवीहि । इट् छान्दसः ॥ ४२ ॥

रक्षोलोकस्य सर्वस्य कः †शृङ्गं छेत्तु[2]मिच्छति ॥ ४३ ॥
प्रोत्साहयति [3]कश्च त्वां स हि [4]शत्रुरसंशयम् ।

शृङ्गः--औन्नत्यम् ॥ ४३ ॥

आशीविषमुखात् दंष्ट्रां उद्धर्तुं चेच्छति त्वया ॥ ४४ ॥
कर्मणा तेन केनासि कापथं प्रतिपादितः ।
सुखसुप्तस्य ते, राजन्! प्रहृतं केन मूर्धनि ॥ ४५ ॥

स हि शत्रुरसंशयं इत्यत्र हेतुमाह- --आशीविषेत्यादि । यस्मात् त्वया प्रयोज्येन आशीविषमुखात् दंष्ट्रां उद्धर्तुं--उद्धारयितुं इच्छति, तस्मादेव । कर्मणा तेनेति । पापकर्मणेति यावत् । केनेति । शत्रुणेति यावत् । कापथं--कुमार्गं । ; का पथ्यक्षयोः इति कोः कादेशः । ते मूर्ध्नि प्रहृतमिति । वृथैव दुःखमुत्पादितमित्यर्थः ‡ ॥ ४४-४५ ॥

---

* सीता केन आख्याता--हर्तव्यत्वेन कथिता--ति. यः सीताया आख्याता स मित्ररूपः शत्रुः--गो. † शृङ्गं--प्राधान्यम्--गो. मुख्यं त्वां--रा. शृङ्गं--रक्षणसाधनं रक्षोलोकरक्षणरहितं कः चिकीर्षतीत्याशयः । ‡ वस्तुतस्तु त्वयि अजागरूके केन वा त्वं मारितः--सीतापहारे तव मृतिः सिद्धैवेत्याशयः ।

[1] सीता सा--ङ. वा सीता--ज. [2] महति--ङ. [3] यश्च त्वां--ङ.
[4] शत्रुर्न संशयः--ङ.

* विशुद्धवंशाभिजनाग्रहस्तः
तेजोमदः संस्थितदोर्विषाणः।
उदीक्षितुं, रावण! नेह युक्तः
स संयुगे राघवगन्धहस्ती ॥ ४६ ॥

राघवरूपो गन्धहस्ती—यस्य गन्धं समाघ्राय अन्ये गजाः पलायन्ते सः गन्धहस्ती—मत्तगजः उदीक्षितुमपीह—देशे काले च न युक्तः। तस्य हस्तिसमाधिः—विशुद्धेत्यादि। विशुद्धवंशे अभिजनः—अभिजननमेव अग्रहस्तः—शुण्डाग्रं यस्य तेजः—प्रताप एव मदो यस्य स तथा। संस्थितौ—समीचीनावस्थानौ दोषौ—बाहू एव विषाणे—दन्तौ यस्य स तथा ॥ ४६ ॥

असौ [1]रणान्तःस्थितिसन्धिवालः †
विदग्धरक्षोमृगहा नृसिंहः।
सुप्तस्त्वया बोधयितुं न [2]शक्यः
शराङ्गपूर्णो निशितासिदंष्ट्रः ॥ ४७ ॥

सिंहसमाधौ रामस्य—असावित्यादि। रणान्तःस्थितिरूपाः—रणमध्यावस्थानरूपाः संधयो वालाश्च यस्य स तथा। शररूपैः अङ्गैः पूर्णः ॥ ४७ ॥

---

* हे रावण! विशुद्धवंशाभिजनः—विशुद्धवंशोत्पन्नः त्वं, अग्रः—श्रेष्ठः हस्तः—शुण्डादण्डः यस्य सः राघवगन्धहस्ती उदीक्षितुं—अपराद्धुमित्यर्थः, न युक्तः—रा.

† संदधतीति सन्धिः। सन्धिभूतः—लोमसंघभूतः इत्यर्थः। यद्वा सन्धिः-मध्यः, लाङ्गूलं वालः—लाङ्गूलं यस्य स तथा। सिंहस्य लाङ्गूलं क्रोधदशायां मध्योपरिप्रदेशे भवति इति प्रसिद्धिः—गो. रणान्तः—रणमध्ये स्थितये संधिः—संधानं—उत्सुकत्वं एव वालो यस्य—रा. सिंहादीनां वालचालनं उत्साहादिपोषकं यथा भवति तथा रणान्तःस्थितिः रामोत्साहपोषक इत्यर्थः।

[1] रणाग्र—ङ. [2] युक्तः—ङ. ज.

*चापावहारे भुजवेग[1]पङ्के
शरोर्मि[2]माले सुमहाहवौघे ।
न रामपातालमुखेऽतिघोरे
प्रस्कन्दितुं, राक्षसराज! युक्तम् ॥ ४८ ॥

†अथ समुद्रसमाधिः—चापेत्यादि । चापरूपः अवहारः—ग्राहः यस्मिन् स तथा । भुजयोः शरग्रहणसंधानमोक्षविषयकः वेग एव पङ्कः यस्मिन् । सुमहान् आहव एव ओघः यस्य स तथा । राम एव पातालं—पातालप्रविष्टमहार्णव इति यावत्, तस्य मुखं—बडबामुखं । प्रस्कन्दितुं—पतितुम् ॥ ४८ ॥

प्रसीद लङ्केश्वर! राक्षसेन्द्र!
लङ्कां[3]प्रसन्नो भव साधु गच्छ ।
त्वं स्वेषु दारेषु रमस्व नित्यं
रामः सभार्यो रमतां वनेषु ॥ ४९ ॥

[4]एवमुक्तो दशग्रीवः मारीचेन स रावणः ।
न्यवर्तत पुरीं लङ्कां विवेश च गृहोत्तमम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकत्रिंशः सर्गः

मान(५०)मानः सर्गः ॥ ५० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकत्रिंशः सर्गः

---

*चाप एव अवहारः—हिंसकजन्तुः यस्मिन् रा. †समुद्रस्य जलपूर्ण-महागर्तरूपत्वात् अत्र समुद्रसमाधिरुच्यत इत्याशयः ।

[1] नागे—ङ. [2] जाले—ङ. [3] प्रपन्नो—ङ. [4] अयं श्लोकः कुत्रचित् अनन्तरसर्गारम्भे दृश्यते—ङ.

द्वात्रिंशः सर्गः

[शूर्पणखालङ्कागमनम्]

* ततः [1]शूर्पनखी दृष्ट्वा सहस्राणि चतुर्दश ।
हतान्येकेन रामेण रक्षसां [2]भीमकर्मणाम् ॥ १ ॥

अथ शूर्पणखायाः रावणदर्शनम् । ततः शूर्पनखीत्यादि ॥१॥

दूषणं च खरं चैव [3]हतं [4]त्रिशिरसा सह ।
दृष्ट्वा पुनर्महा[5]नादं † ननाद [6]जलदो यथा ॥ २ ॥

महानादं ननादेति । इष्टवियोगजः लोकप्रसिद्धोऽयं नादः ॥ २ ॥

सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम् ।
जगाम परमोद्विग्ना लङ्कां रावणपालिताम् ॥ ३ ॥
सा ददर्श ‡ विमानाग्रे रावणं दीप्ततेजसम् ।
[7]उपोपविष्टं सचिवैः मरुद्भिरिव वासवम् ॥ ४ ॥
आसीनं सूर्यसङ्काशे काञ्चने परमासने ।
रुक्मवेदि[8]गतं [9]प्राज्यं ज्वलन्तमिव पावकम् ॥ ५ ॥

रुक्मवेदिगतं- हिरण्येष्टकचितवेदिं प्राप्तम् । तदुक्तं कल्पसूत्रे— 'सावित्रं स्वर्गकामश्चिन्वीत पञ्चाशीतिशतं हिरण्येष्टकाः' इति । प्राज्यं- भूरिप्रकृष्टाज्यहोमवत् इत्यपीह । अत एव ज्वलन्तम् ॥ ५ ॥

---

* पूर्वं अकम्पनवाक्यात् सीतापहारे प्रवृत्तस्य रावणस्य मारीचेन निरोधेऽपि पुनः शूर्पणखावाक्यात्तत्र प्रवृत्तिः । † महानादमिति क्रियाविशेषणम्—गो. अथवा पाकं पचतीतिवत् 'महानादं ननाद' इत्युक्तिः । ‡ विमानाग्रे—पुष्पकविमानाग्रे—गो.

[1] शूर्पणखा—ज. [2] क्रूरकर्मणाम्—ङ. [3] हतौ—ङ. [4] त्रिशिरसं रणे—ज. [5] नादान्—ज. [6] जलदोपमा—ङ. [7] उपोपविष्टः—ङ. [8] कृतं—ङ. [9] पूज्यं—ङ.

देवगन्धर्वभूतानां ऋषीणां च महात्मनाम् ।
अजेयं समरे [1]शूरं [2]व्यात्ताननमिवान्तकम् ॥ ६ ॥

देवासुरविमर्देषु वज्राशनिकृतव्रणम् ।
ऐरावतविषाणाग्रैः [3]उद्भृष्टकिणवक्षसम् ॥ ७ ॥

विमर्दः-युद्धम् । वज्राशनिकृतव्रणमित्यनेन तदवध्यत्वं दर्शितम् । उद्भृष्टकिणवक्षसं-उद्भृष्टेन-विलेखेन जातो यः किणः, तदङ्कितवक्षसमित्यर्थः ॥ ७ ॥

विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् ।
विशालवक्षसं वीरं राजलक्षण[4]शोभितम् ॥ ८ ॥

परिच्छदः-अलङ्कारः ॥ ८ ॥

[5]स्निग्धवैडूर्यसङ्काशं तप्तकाञ्चन[6]कुण्डलम् ।
सुभुजं [7]शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९ ॥

वैडूर्यं-श्यामरत्नम् ॥ ९ ॥

विष्णुचक्रनिपातैश्च शतशो देवसंयुगे ।
अन्यैः शस्त्रप्रहारैश्च महायुद्धेषु ताडितम् ॥ १० ॥
[8]आहताङ्गं [9]समस्तैश्च देवप्रहरणैस्तथा ।
अक्षोभ्याणां समुद्राणां [10]क्षोभणं क्षिप्रकारिणम् ॥ ११ ॥

क्षोभणं-"कर्तरि ल्युट्"-क्षोभकर्तारम् ॥ ११ ॥

---

[1] घोरं-ज. [2] व्यक्तानन-ङ. [3] उत्कृत्त-ङ. उत्कृष्ट-ज. [4] लक्षितम्-ज. [5] नद्ध-ज. [6] भूषणम्-ङ. [7] श्लक्ष्ण-ङ. [8] आहताङ्गैः-ज. [9] समर्थैश्च-ङ. समस्तैस्त-ज. [10] क्षोभकं-ङ.

क्षेप्तारं [1]पर्वतेन्द्राणां [2]सुराणां च प्रमर्दनम् ।
उच्छेत्तारं च धर्माणां परदाराभि[3]मर्शकम् ॥ १२ ॥
सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा ।
पुरीं भोगवतीं प्राप्य पराजित्य च वासुकिम् ॥ १३ ॥
तक्षकस्य प्रियां भार्यां पराजित्य जहार यः ।
कैलासपर्वतं गत्वा विजित्य नरवाहनम् ॥ १४ ॥
विमानं पुष्पकं तस्य कामगं वै जहार यः ।

परदाराभिमर्शकमितीममंशं दर्शयति—तक्षकस्येत्यादि ॥ १४ ॥

वनं चैत्ररथं दिव्यं *नलिनीं नन्दनं वनम् ॥ १५ ॥
विनाशयति यः क्रोधात् देवोद्यानानि वीर्यवान् ।
चन्द्रसूर्यौ [4]महाभागौ उत्तिष्ठन्तौ परन्तपौ ॥ १६ ॥
निवारयति बाहुभ्यां यः शैलशिखरोपमः ।
दशवर्षसहस्राणि तपः तप्त्वा महावने ॥ १७ ॥
पुरा स्वयंभुवे [5]धीरः शिरांस्युपजहार यः ।

उपजहारेति । उपहारत्वेन कृतवानित्यर्थः ॥ १७ ॥

देवदानवगन्धर्व[6]पिशाचपतगोरगैः ॥ १८ ॥
अभयं [7]यस्य संग्रामे मृत्युतो मानुषादृते ।

मृत्युतः अभयमिति । मरणभयं नास्तीत्यर्थः ॥ १८ ॥

मन्त्रैः अभिषुतं पुण्यं अध्वरेषु द्विजातिभिः ॥ १९ ॥

---

* नलिनीं—कुबेरस्य पुष्करिणीम् । नन्दनं वनं—इन्द्रोद्यानम् । देवोद्यानानि—नन्दनवनादन्यानि—गो.

[1] पर्वताग्राणां—ज. [2] परेषां च—ङ. [3] मर्शनम्—ङ. ज. [4] महावेगौ—ङ. [5] धीरः—ङ. [6] देवर्षि—ङ. [7] सर्वभूतेभ्यः—ङ.

मन्त्रैः—प्रातरनुवाकग्रावस्तोत्रादिभिः अभिष्टुतं सोमं हविर्धानेषु—सोमाभिष्टवशालासु उपहन्ति—नाशयति ॥ १९ ॥

* हविर्धानेषु यः सोमं उपहन्ति महाबलः ।
[1] आप्तयज्ञहरं क्रूरं ब्रह्मघ्नं [2] दुष्टचारिणम् ॥ २० ॥

आप्तान्—दक्षिणादानकाले प्राप्तान् यज्ञान् हरतीति ॥ २० ॥

† कर्कशं निरनुक्रोशं प्रजानामहिते रतम् ।
‡ रावणं [3] सर्वभूतानां [4] सर्वलोकभयावहम् ॥ २१ ॥
राक्षसी [5] भ्रातरं [6] शूरं सा ददर्श महाबलम् ।

सा—राक्षसी शूर्पणखा ॥ २१ ॥

तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ॥ २२ ॥
आसने सूपविष्टं च § [7] काले कालमिवोद्यतम् ।

काले—युगान्तकाले ॥ २२ ॥

राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम् ॥ २३ ॥
रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम् ।
[8] अभिगम्याब्रवीद्वाक्यं राक्षसी भयविह्वला ॥ २४ ॥

पौलस्त्यानां कुलं नन्दयतीति तथा ॥ २४ ॥

---

* हविर्धानेषु—सोमसवनकर्मविशिष्टेषु अध्वरेषु यज्ञेषु द्विजातिभिः—कर्तृभिः मन्त्रैरभिष्टुतं सोमं—चन्द्रमसं—रा. अभिष्टुतं—क्षरितं—गो. † कर्कशं—निर्दाक्षिण्यं, निरनुक्रोशं—निर्दयम्—गो. ‡ रावणं—रावकम्—गो. § कालकालं—मृत्योरपि मृत्युम्—गो.

[1] प्राप्तसर्व—ङ. [2] क्रूरकारिणम्—ज. [3] सर्वलोकानां—ङ. [4] सर्वभूतभयंकरम्—ङ. [5] राक्षसं—ङ. [6] क्रूरं—ज. [7] कालकाल—ङ. [8] इदमर्धं ज पुस्तके 'रावणं शत्रुहन्तारं' इत्यतः पूर्वं पठितम् ।

तमब्रवीत् दीप्तविशाललोचनं
प्रदर्शयित्वा भय[1]मोह[2]मूर्छिता।
सुदारुणं वाक्यं अभीतचारिणी
महात्मना शूर्पणखा विरूपिता ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्वात्रिंशः सर्गः

अभिगम्याब्रवीदित्यस्यैव विवरणभूतोत्तरसर्गसंक्षेपः—तमब्रवीदित्यादि। प्रदर्शयित्वेति। स्वकं वैरूप्यमिति शेषः। अभीततया सर्वपुरुषेषु सर्वलोकेषु च चारः यस्याः सा तथा। शर(२५)मानः सर्गः ॥ २५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्वात्रिंशः सर्गः

त्रयस्त्रिंशः सर्गः

[रावणोपालम्भः]

ततः शूर्पणखा *[3]दीना रावणं लोकरावणम्।
अमात्यमध्ये संक्रुद्धा परुषं वाक्यमब्रवीत् ॥ १ ॥

अथ शूर्पणखायाः रावणे पारुष्यम्। तत इत्यादि ॥ १ ॥

प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः।
समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥ २ ॥

---

* दीना, रामपरिभूतत्वात्। स्वपरिभवदर्शनेऽपि भ्रातुर्निश्चलतया संक्रुद्धा—गो.

[1] शोक—ङ. लोभ—ज. [2] मोहिता—ङ. ज. [3] दीप्ता—ङ.

निरङ्कुशः सन् बोद्धव्यं नावबुध्यसे इत्यन्वयः। "त्वं तु रावण! दुर्बुद्धिः गुणैरेतैः विवर्जितः"* इति हि वक्ष्यन्ति ॥ २ ॥

सक्तं [1] ग्राम्योपभोगेषु कामवृत्तं महीपतिम्।
लुब्धं न बहुमन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३ ॥

हेयोपादेयराजगुणान् सामान्येनाह—सक्तमित्यादि। ग्राम्योपभोगः—स्त्र्यादिभोगः। तदेव दर्शितं—कामवृत्तमिति। कामचेष्टापरम्। लुब्धं—भोगलोलुपम् ॥ ३ ॥

स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः।
स तु वै सह राज्येन तैश्च कार्यैः विनश्यति ॥ ४ ॥

तैश्च कार्यैरिति। अननुष्ठानविनश्यद्भिरित्यर्थः ॥ ४ ॥

अयुक्तचारं दुर्दर्शं अस्वाधीनं नराधिपम्।
वर्जयन्ति नराः दूरात् नदीपङ्कमिव द्विपाः ॥ ५ ॥

अयुक्तचारमिति। अनियोजितापसर्पं†, दुर्दर्शं उचितकाले सभायां प्रजादर्शनप्रदानरहितम्। अस्वाधीनं स्त्र्यादिपरतन्त्रम् ॥ ५ ॥

ये न रक्षन्ति विषयं [2] अस्वाधीनाः नराधिपाः।
त न [3] वृद्ध्या प्रकाशन्ते गिरयः सागरे यथा ॥ ६ ॥

विषयं—प्रदेशं। वृद्ध्या—उदयेन न प्रकाशन्ते ॥ ६ ॥

---

* अस्मिन्नेव सर्गे २२ श्लोके। † अपसर्पः—चारः।

[1] ग्राम्येषु—ङ. ज. [2] अस्वाधीनं—ज. [3] बुध्या—ङ.

* आत्मविद्भिः विगृह्य त्वं देवगन्धर्वदानवैः ।
अयुक्तचारः चपलः कथं राजा भविष्यसि ॥ ७ ॥

आत्मविद्भिः— विवशीकृतबहिरन्तःकरणैः अयुक्तचारः । व्याकृतचरः ॥ ७ ॥

त्वं तु बालस्वभावश्च बुद्धिहीनश्च, राक्षस!
ज्ञातव्यं तु न जानीषे कथं राजा भविष्यसि ॥ ८ ॥
येषां चाराश्च कोशश्च नयश्च, जयतां वर!
अस्त्राधीनाः नरेन्द्राणां प्राकृतैस्ते जनैस्समाः ॥ ९ ॥

प्राकृतैर्जनैरिति । राज्यव्यवहारानर्हदासदासीजनैः इत्यर्थः ॥

यस्मात् पश्यन्ति दूरस्थान् सर्वानर्थान् नराधिपाः ।
चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥ १० ॥

यस्मात्तस्माच्छब्दौ हेतू ॥ १० ॥

अयुक्तचारं मन्ये त्वां प्राकृतैः सचिवैर्वृतम् ।
† स्वजनं तु [1] जनस्थानं हतं यो नावबुध्यसे ॥ ११ ॥
चतुर्दशसहस्राणि रक्षसां [2] क्रूरकर्मणाम् ।
हतान्येकेन रामेण खरश्च सहदूषणः ॥ १२ ॥
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ।
धर्षितं च जनस्थानं रामेणाक्लिष्ट[3]कर्मणा ॥ १३ ॥

---

* बलवद्भिः सह विरोधं संपादितवता हि सदा जागरूकेन भवितव्यमित्याशयः ।
† स्वजनं—स्वस्य जनाः यस्मिंस्तत्—ति.

[1] जनस्थाने—ङ. यतः स्थानं—ज. [2] भीम—ज. [3] कारिणा—ज.

त्वं तु लुब्धः प्रमत्तश्च पराधीनश्च, [1] रावण !
विषये स्वे समुत्पन्नं भयं यो नावबुध्यसे ॥ १४ ॥

विषये स्वे—स्वीयदेशे ॥ १४ ॥

तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम् ।
व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम् ॥ १५ ॥

तीक्ष्णादिधर्मकः स्वामात्यभृत्यादिविषये यः तं पार्थिवं, तस्य व्यसनकाले सर्वभूतानि भृत्यामात्यादिसर्वप्रजा नाभिधावन्ति—तद्रक्षणाय न प्रवर्तन्ते ॥ १५ ॥

[2] अतिमानिनं * अग्राह्यं आत्मसंभावितं नरम् ।
[3] क्रोधनं व्यसने हन्ति स्वजनोऽपि [4] महीपतिम् ॥ १६ ॥

अग्राह्यं—स्वकैः अनुपसर्प्यम् ॥ १६ ॥

नानुतिष्ठति कार्याणि भयेषु न बिभेति च ।
क्षिप्रं राज्याच्च्युतो दीनः तृणैः तुल्यो [5] भविष्यति ॥ १७ ॥

नानुतिष्ठन्तीति । अमात्यादिस्वजनोऽपीत्यनुकर्षः ॥ १७ ॥

† [6] शुष्कैः काष्ठैः भवेत् कार्यं लोष्टैरपि च पांसुभिः ।
न तु स्थानात् परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः ॥ १८ ॥

---

* अग्राह्यं—सद्भिरिति शेषः—गो. † स्थानात् भ्रष्टमेव खलु शुष्ककाष्ठादिव्यपदेश्यं भवति । तैरपि कदाचित् किञ्चित् कार्यं निर्वर्तेत । स्थानभ्रष्टेन पार्थिवेन तु न किञ्चिदपि ।

[1] राक्षस—ज. [2] अभिमानिनं—ङ. [3] क्रोधिनं—ङ. [4] नराधिपम्—ज. [5] भवेदिह—ज. [6] शुष्क—ङ.

*[1] उपभुक्तं यथा वासः स्रजो वा मृदिताः यथा ।
एवं राज्यात् परिभ्रष्टः समर्थोऽपि निरर्थकः ॥ १९ ॥
अप्रमत्तश्च यो राजा सर्वज्ञो विजितेन्द्रियः ।
कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २० ॥

सर्वज्ञः इति । स्वपरसर्ववृत्तान्तज्ञः इत्यर्थः । तिष्ठते चिरमिति । "अकर्मकाच्च" इति आत्मनेपदम् ॥ २० ॥

नयनाभ्यां प्रसुप्तोऽपि जागर्ति नयचक्षुषा ।
†व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥ २१ ॥
‡त्व तु, रावण! दुर्बुद्धिः गुणैरेतैः विवर्जितः ।
यस्य तेऽविदितश्चारैः रक्षसां सुमहान् वधः ॥ २२ ॥

यस्य ते अविदितः इति । 'गतिबुद्धि' इत्यादिना वर्तमाने क्तः । 'क्तस्य च वर्तमाने' इति षष्ठी । येन त्वया न ज्ञायते इत्यर्थः ॥ २२ ॥

परावमन्ता विषयेषु [2]सङ्गतः
न देशकालप्रविभागतत्त्ववित् ।
अयुक्तबुद्धिः गुणदोषनिश्चये
विपन्नराज्यो न चिराद्विपत्स्यसे ॥ २३ ॥

परावमन्ता—शत्रुषूदासीनः ॥ २३ ॥

---

* अम्लाना सुगन्धिन्यपि परोपभुक्ता भ्रष्टा स्रक् यथा न कार्यान्तरोपयोगिनी, तथा समर्थोऽपि राजा राज्याद्भ्रष्टः निरर्थक एवेत्यर्थः । † क्रोधप्रसादयोः व्यक्तत्वं दण्डदानादिना । ‡ यद्यप्यकम्पनमुखात् विदित एव वृत्तान्तः ; तथापि तदजानन्ती शूर्पणखा एवं वदति । तादृशो महान् वधः यदि ज्ञातः स्यात्, तदा हि राज्ञः औदासीन्यादिकं सर्वथा न संभवीति भावनयाऽपि तथा वदति ।

[1] उपयुक्तं—ङ. [2] सङ्गवान्—ङ.

इति स्वदोषान् परिकीर्तितांस्तया
समीक्ष्य बुद्धया क्षणदाचरेश्वरः ।
धनेन दर्पेण बलेन चान्वितः
*विचिन्तयामास चिरं स रावणः ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रयस्त्रिंशः सर्गः

धनेन—अक्षयकोशसंपत्त्या दर्पेण—राजत्वाहङ्कारेण बलेन—प्राणबलेन चतुरङ्गबलेन च । चिरं चिन्तयामासेति । मारीचः मा स्म कलहप्रवृत्तो भूरिति ब्रूते, इयं तु कलहार्थमेव प्रोत्साहयति । किमत्र कर्तव्यमिति चिन्तयामासेत्यर्थः । भार(२४)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रयस्त्रिंशः सर्गः

चतुस्त्रिंशः सर्गः

[सीतापहरणोपदेशः]

ततः [1]शूर्पनखीं [2]क्रुद्धां ब्रुवन्तीं परुषं वचः ।
†अमात्यमध्ये संक्रुद्धः परिपप्रच्छ [3]रावणः ॥ १ ॥

अथ रावणः कार्यनिश्चयाय वृत्तान्तमेव सम्यगवगच्छति । ततः शूर्पनखीमित्यादि ॥ १ ॥

---

* विचिन्तने हेतुरुक्तः—स्वदोषान् परिकीर्तितानिति । तदुक्तदोषाणां स्वस्मिन् भानादेव चिन्ता । † अमात्यमध्ये परुषं ब्रुवन्तीमिति चान्वयः । अत एव संक्रुद्ध इत्यपि ।

[1] शूर्पणखां—ज. [2] दृष्ट्वा—ज. [3] राक्षसः—ङ.

कश्च रामः? कथंवीर्यः? किंरूपः? किंपराक्रमः?।
किमर्थं दण्डकारण्यं प्रविष्टः स दुरासदम्? ॥ २ ॥
आयुधं किं च रामस्य निहताः येन राक्षसाः।
खरश्च निहतः संख्ये दूषणः त्रिशिरास्तथा? ॥ ३ ॥
[1]तत्त्वं ब्रूहि, मनोज्ञाङ्गि! केन त्वं च विरूपिता।
इत्युक्ता राक्षसेन्द्रेण राक्षसी क्रोधमूर्च्छिता ॥ ४ ॥
ततो रामं [2]यथातत्त्वं आख्यातुमुपचक्रमे।
*दीर्घबाहुः विशालाक्षः [3]चीरकृष्णाजिनाम्बरः ॥ ५ ॥
कन्दर्पसमरूपश्च रामो दशरथात्मजः।

किंरूपः इत्यस्योत्तरं--दीर्घबाहुरित्यादि। कश्च रामः इत्यस्योत्तरं--दशरथात्मजः इति। अन्ये स्पष्टाः ॥ ५ ॥

शक्रचापनिभं चापं विकृष्य [4]कनकाङ्गदम् ॥ ६ ॥
दीप्तान् क्षिपति नाराचान् सर्पानिव महाविषान्।
कनकाङ्गदं--कनकवलयभूषितम् ॥ ६ ॥

नाददानं शरान् घोरान् [5]न मुञ्चन्तं शिलीमुखान् ॥ ७ ॥
न कार्मुकं विकर्षन्तं रामं पश्यामि संयुगे।
[6]हन्यमानं तु तत् सैन्यं पश्यामि शरवृष्टिभिः ॥ ८ ॥

---

* रामानुजपरवशहृदयाऽपि तदग्रजकृतमहोन्मादहेतुभूतं रामलावण्यं संग्रहेणाभिधत्ते-दीर्घबाहुरित्यादिना--गो.

[1] इदमर्धं नास्ति--ङ. [2] यथान्यायं--ज. [3] श्रीमान् शत्रुनिबर्हणः--ङ.
[4] कनकाङ्कितम्--ङ. [5] विमुञ्चन्तं--ज. [6] दह्यमानं--ङ.

इन्द्रेणेवोत्तमं सस्यं आहतं [1]त्वश्मवृष्टिभिः * ।
रक्षसां [2]भीमरूपाणां सहस्राणि चतुर्दश ॥ ९ ॥
निहतानि शरैः तीक्ष्णैः [3]तनैकेन पदातिना ।
अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ॥ १० ॥
ऋषीणामभयं दत्तं कृतक्षेमाश्च दण्डकाः ।

किमर्थं दण्डकारण्यं प्रविष्टः इत्यस्योत्तरं—ऋषीणामित्यादि ॥

एका कथंचिन्मुक्ताऽहं [4]परिभूय महात्मना ॥ ११ ॥
स्त्रीवधं शङ्कमानेन रामेण विदितात्मना ।
भ्राता चास्य महातेजाः [5]गुणतः तुल्यविक्रमः ॥ १२ ॥
अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ।
† अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान् बली ॥ १३ ॥
रामस्य दक्षिणो बाहुः नित्यं प्राणो बहिश्चरः ।
रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना ॥ १४ ॥
धर्मपत्नी प्रिया भर्तुः नित्यं प्रियहिते रता ।
सा सुकेशी सुनासोरुः सुरूपा च यशस्विनी ॥ १५ ॥
देवतेव वनस्यास्य राजते श्रीरिवापरा ।
[6]तप्तकाञ्चनवर्णाभा रक्ततुङ्गनखी शुभा ॥ १६ ॥
सीता नाम वरारोहा वैदेही तनुमध्यमा ।
नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ॥ १७ ॥

---

* अश्मवृष्टिभिः—करकामयवर्षैः—गो. † अमर्षी—रामापराधासहनशीलः—रा.

[1] स्वतिवृष्टिभिः—ङ. [2] भीमवीर्याणां—ज्ञ. [3] रामेणाक्लिष्टकर्मणा—ङ.
[4] पराभूता—ङ. [5] गुणात् तत्तुल्य—ङ. [6] काञ्चनोज्ज्वलवर्णाभा—ङ.

[1]नैवंरूपा मया नारी दृष्टपूर्वा महीतले।
*यस्य सीता भवेत् भार्या यं च हृष्टा परिष्वजेत् ॥१८॥
[2]अतिजीवेत् स सर्वेषु [3]लोकेष्वपि पुरन्दरात्।

यं च हृष्टा परिष्वजेत् स एव सर्वेष्वपि कालेषु पुरन्दर इव अतिजीवेत्—अत्यधिकं जीवेत् अत्यधिकसुखी भवेत् ॥ १८ ॥

[4]सा सुशीला †वपुःश्लाघ्या रूपेणाप्रतिमा भुवि ॥ १९ ॥
तवानुरूपा भार्या स्यात् त्वं च तस्याः तथा पतिः।
तां तु विस्तीर्णजघनां [5]पीनश्रोणिपयोधराम् ॥ २० ॥
[6]भार्यात्वे च तवानेतुं [7]उद्यताऽहं वराननाम्।
विरूपिताऽस्मि क्रूरेण लक्ष्मणेन, महाभुज! ॥ २१ ॥

'भार्यात्वे च तवाऽऽनेतुमुद्यता' इति मृषा ब्रूते रावण-प्रियार्थम् ॥ २१ ॥

तां तु दृष्ट्वाऽद्य वैदेहीं पूर्णचन्द्रनिभाननाम्।
मन्मथस्य शराणां वै त्वं विधेयो भविष्यसि ॥ २२ ॥

---

*परिष्वङ्गं विना भार्यात्वेन स्थिता चेत्, सः सर्वेषु लोकेषु सर्वानपि लोकान् अतिजीवेत्—अतीत्य जीवेत्, सर्वलोकोत्तीर्णपरमसुखमयजीवन इत्यर्थः। परिष्वङ्गाभावेऽपि सदा सन्निधानादिसौख्यादिति भावः। भार्यात्वं विनाऽपि यं सकृत् परिष्वजेत्, सः पुरन्दरादपि पुरन्दरमपि अतिजीवेत्—अतिशय्य जीवेत्—गो. पुरन्दरादप्यधिकं अभिजीवेत्—रा. †वपुषा श्लाघ्या, सर्वानवद्याङ्गीत्यर्थः—गो.

[1]तथारूपा—ज. [2]अभिजीवेत्—ज. [3]देवेष्विव पुरन्दरः—ङ. [4]साधुशीला—ङ. [5]पीनोत्तुङ्ग—ज. [6]भार्यार्थं, भार्यार्थं—ङ. [7]उद्युक्ता—ङ.

यदि तस्यामभिप्रायः भार्यार्थे तव जायते ।
[1]शीघ्रमुद्क्रियतां पादः जयार्थमिह दक्षिणः ॥ २३ ॥
क्रियतां निर्विशङ्केन वचनं मम रावण ! ॥ २४ ॥
[2]विज्ञायैषामशक्तिं च क्रियतां च, महाबल !
सीता [3]तवानवद्याङ्गी [4]भार्यात्वे, राक्षसेश्वर ! ॥ २५ ॥

"विज्ञायैषामशक्तिं च क्रियतां च महाबल । सीता तवानवद्याङ्गी भार्यात्वं राक्षसेश्वर।" इति पाङ्क्तः। एषां–रामादीनां अशक्तिं, चकारात् तव शक्तिं च विज्ञाय सीता तव भार्यात्वे क्रियताम् । राज्याद्यभावात् रामस्य अशक्तिरिति मूढायाः तात्पर्यम् * ॥ २५ ॥

निशम्य रामेण शरैरजिह्मगैः
हतान् जनस्थानगतान् निशाचरान् ।
खरं च [5]बुध्द्वा निहतं च दूषणं
[6]त्वमद्य कृत्यं प्रतिपत्तुमर्हसि ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चतुस्त्रिंशः सर्गः

उपसंहरति—निशम्य रामेणेति । अद्य कृत्यमिति । एतत्कालोचितं यत् कर्तुं योग्यं तत् प्रतिपत्तुं—निश्चित्य ज्ञात्वा प्रवर्तितुमर्हसीत्यर्थः । चोर(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुस्त्रिंशः सर्गः

---

* अथवा—तयोः पौरुषं साक्षाद्दृष्टवती शूर्पणखा वीर्यात् सीता रावणेन नापहर्तुं शक्येति जानन्ती–रामलक्ष्मणयोर्दौर्बल्यं ज्ञात्वा तदुपयोगेन सीतामपहरेति वदति । रावणोऽपि तथैव सीतायाश्चापल्यं, रामस्य सीतावचनानुपेक्षकत्वं— इत्यादिकं छिद्रं विज्ञाय उपायेन सीतां जहार । तदेतदुच्यते— एषामशक्तिमिति । 'विज्ञायेहात्मशक्तिं' इति–गो. पाठः ॥

[1] एतदनन्तरं, "कुरु प्रियं तथा तेषां रक्षसां राक्षसेश्वर ! वधात तस्य नृशंसस्य रामस्याश्रमवासिनः ॥ त शरैः निशितैः हत्वा लक्ष्मणं च महारथम् । हतनाथां सुखं सीतां यथावदुपभोक्ष्यसि ॥ रोचते यदि ते वाक्यं ममैतद्राक्षसेश्वर !" इत्यधिकं- ङ.ज.झ. [2] विज्ञायेहात्मशक्तिं च क्रियतामबला बलात्–ङ. [3] सर्वा–ङ. [4] भार्यार्थे–ङ. [5] दृष्ट्वा–ङ. [6] त्वमत्र–ङ.

पञ्चत्रिंशः सर्गः

[मारीचाश्रमपुनर्गमनम्]

ततः शूर्पणखावाक्यं तच्छ्रुत्वा *[1] रोमहर्षणम् ।
सचिवानभ्यनुज्ञाय [2] कार्यं बुद्ध्वा जगाम सः ॥ १ ॥

अथ रावणः अकम्पनादिव शूर्पनख्याश्च सकाशात् सीताहरणं कृत्यं श्रुत्वा तदेव कर्तव्यं, युद्धं चानुचितमिति निश्चित्य तत्साहाय्याय परममायामारीचं रहः पुनरुपगच्छति । ततः शूर्पणखावाक्यमित्यादि । रोमहर्षणमिति । भयोत्पादकतया कामविरहोत्पादकतया च रोमाञ्चकरत्वं शूर्पणखावाक्यस्य । कार्यं बुद्ध्वा जगाम सः । मारीचाश्रममिति शेषः । अस्यैव प्रपञ्चः आसर्गसमाप्ति ॥ १ ॥

तत्कार्यमनुगम्याथ यथावदुपलभ्य च ।
†दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ २ ॥
इतिकर्तव्यमित्येव कृत्वा निश्चयमात्मनः ।
स्थिरबुद्धिस्ततो रम्यां यानशालां जगाम ह ॥ ३ ॥

तत्कार्यमित्यादि । सीताऽपहारमित्यर्थः । अनुगम्य–उद्दिश्य । दोषाणां च गुणानां च स्वरूपं यथावदुपलभ्य बलाबलं च यथावत् संप्रधार्य इत्येव कर्तव्यमिति आत्मनः–स्वस्य निश्चयं कृत्वा यानशालां जगाम ॥ २–३ ॥

---

* रोमहर्षणं — भयोत्पादकत्वेन रोमाञ्चकरम्–गो. अस्य कविवाक्यरूपत्वात् एवं व्याख्यानम् । तथा च–परभार्यापहारस्य–विशिष्य सीतापहारस्य अतिक्रूरत्वात्— श्रवणमात्रमेव रोमाञ्चकारीति भावः । † स्वेन चिकीर्षितं सीतापहरणलक्षणं कार्यं किं पौरुषेण सुकरम् ? आहोस्विच्चौर्येण कर्तव्यमिति विचार्य–गो.

[1] राक्षसाधिपः–ङ. [2] कार्यबुध्या–ङ.

यानशालां ततो गत्वा *[1] प्रच्छन्नं राक्षसाधिपः ।
सूतं संचोदयामास रथः संयोज्यतामिति ॥ ४ ॥

प्रच्छन्नमिति दुष्प्रवृत्तितो दृष्टश्रुतिनिगेधशङ्कया ॥ ४ ॥

एवमुक्तः क्षणेनैव सारथिर्लघुविक्रमः ।
रथं [2] संयोजयामास तस्याभिमतमुत्तमम् ॥ ५ ॥

काञ्चनं रथमास्थाय कामगं रत्नभूषितम् ।
पिशाचवदनैर्युक्तं खरैः काञ्चनभूषणैः ॥ ६ ॥

पिशाचवदनैरिति । देवयोनिभेदाः पिशाचाः । वदनभागे तत्सदृशैरित्यर्थः ॥ ६ ॥

†मेघप्रतिमनादेन स तेन धनदानुजः ।
राक्षसाधिपतिः श्रीमान् ययौ ‡नदनदीपतिम् ॥ ७ ॥

नदानां नदीनां च पतिः समुद्रः ॥ ७ ॥

स श्वेतवालव्यजनः श्वेतच्छत्रो दशाननः ।
स्निग्धवैडूर्यसङ्काशः तप्तकाञ्चन[3]कुण्डलः ॥ ८ ॥

विंशद्भुजो दशग्रीवः दर्शनीयपरिच्छदः ।
त्रिदशारिर्मुनीन्द्रघ्नः [4]दशशीर्ष इवाद्रिराट् ॥ ९ ॥

---

* प्रच्छन्न इति । प्रकाशश्चेद्वृद्धा मन्दोदर्यादयश्च वारयिष्यन्तीति भावः । यद्वा पौरुषं विहाय चौर्यमार्गाश्रयणं लज्जावहमिति प्रच्छन्नमार्गाश्रयणम् । यद्वा—ततः—सचिवान् तदानीं सभाभिस्थितान् विसृज्य च स्वयं कार्यं बुद्ध्येत्यर्थः । अत एव सचिवैः पर्यालोचनाभावात् प्रच्छन्न इत्युक्तम् । अत एव कुम्भकर्णादिभिरुच्यते सचिवैरमन्त्रयित्वा कृतस्य कथमिदानीं प्रतीकार इति—गो. † मेघप्रतिमवचनेनोपलक्षितः—रा. विमानविशेषणं वा. ‡ नदनदीपतिं तीर्त्वा ययौ—ति.

[1] प्रच्छन्नः—ङ. [2] संचोदयामास—ङ. [3] भूषणः—ज्ञ. [4] दशशृङ्ग—ङ.

कामगं रथमास्थाय शुशुभे राक्षसेश्वरः।
विद्युन्मण्डलवान् मेघः *सबलाक इवाम्बरे ॥ १० ॥

विद्युन्मण्डलवान् इति। विद्युत्स्थाने आभरणानि, मेघस्थाने रावणः, बलाकास्थाने अलङ्कृतरथः ॥ १० ॥

[1]सशैलसागरानूपं वीर्यवानवलोकयन्।
नानापुष्पफलैर्वृक्षैः अनुकीर्णं सहस्रशः ॥ ११ ॥

शैलैः सहितः सागरस्यानूपः तथा। तस्यैव वर्णनं—नानापुष्पफलैरित्यादि ॥ ११ ॥

शीतमङ्गलतोयाभिः पद्मिनीभिः समन्ततः।
विशालैराश्रमपदैः वेदिमद्भिः समावृतम् ॥ १२ ॥
[2]कदल्यटविसंबाधं नालिकेरोपशोभितम्।
सालैस्तालैस्तमालैश्च पुष्पितैस्तरुभिर्वृतम् ॥ १३ ॥

कदल्यटवी—कदलीवनम् ॥ १३ ॥

अत्यन्तनियताहारैः शोभितं परमर्षिभिः।
नागैः सुपर्णैः गन्धर्वैः किन्नरैश्च सहस्रशः ॥ १४ ॥

अत्यन्तं—अतिशयेन पर्णवातादिना नियतः आहारः यैस्तथा ॥

आजैर्वैखानसैर्मार्षैः बालखिल्यैर्मरीचिपैः †।
जितकाशैश्च सिद्धैश्च चारणैरुपशोभितम् ॥ १५ ॥

आजैः—ब्रह्मपुत्रैः अयोनिजैः वैखानसैः। तथा चोक्तं सिद्धैस्ते। "ये नखाः, ते वैखानसाः" ॥ १५ ॥

---

* सबलाकः—बकपङ्क्तिसहितः—रा. † मरीचिपैः—रविकिरणपानव्रतनिष्ठैः—गो.
[1] सशैलं—ङ. [2] कदल्याटवि—ङ.

दिव्याभरणमाल्याभिः दिव्यरूपाभिरावृतम् ।
क्रीड[1]रतिविधिज्ञाभिः अप्सरोभिः सहस्रशः ॥ १६ ॥
सेवितं देवपत्नीभिः श्रीमतीभिः[2] श्रिया वृतम् ।
देवदानवसंघैश्च चरितं *त्वमृताशिभिः ॥ १७ ॥

अमृतमशितुं शीलमस्येषामिति अमृताशिनः तैः ॥ १७ ॥

हंसक्रौञ्चप्लवाकीर्णं सारसैः[3] संप्रणादितम् ।
वैडूर्यप्रस्तरं [4]रम्यं स्निग्धं सागरतेजसा † ॥ १८ ॥

प्लवाः – मण्डूकाः ‡ । वैडूर्याभाः श्यामाः प्रस्तराः यस्मिन् अनूपे स तथा । सागरतेजसा-सागरोर्मिभवेन । स्निग्धं-सान्द्रम् — शीतलम् ॥ १८ ॥

पाण्डराणि विशालानि दिव्यमाल्ययुतानि च ।
तूर्यगीताभिजुष्टानि विमानानि समन्ततः ॥ १९ ॥
तपसा जितलोकानां कामगान्यभिसंपतन् ।
गन्धर्वाप्सरसश्चैव ददर्श धनदानुजः ॥ २० ॥

उच्यमानविशेषणकानि विमानान्यपि संपतन्—गच्छन् मार्ग-वशात् ददर्शेत्यग्रेण संबन्धः ॥ २० ॥

निर्यासरसमूलानां चन्दनानां सहस्रशः ।
वनानि पश्यन् सौम्यानि घ्राणतृप्तिकराणि च ॥ २१ ॥

---

* अमृताशिभिः देवैश्चेति शेषः । यद्वा ऋतामृताभ्यां जीवेतेत्युक्तायाश्चितलब्धा-शिभिः । 'ऋतमुञ्छशिलं प्रोक्तं अमृतं स्यादयाचितम्' इति मनुः–गो. † एतादृशं सागरानूपमवलोकयन् विमानानि ददर्शेत्यन्वयः । ‡ प्लवाः—जलकाका वा ।

[1] रस–ङ. रीति–ज. [2] उपासितम्–ज. [3] संप्रसादितम्–ज.
[4] दिव्यं–ङ.

[1]अगरूणां च मुख्यानां वनान्युपवनानि च ।
तक्कोलानां च जात्यानां [2]फलिनां च सुगन्धिनाम् ॥
पुष्पाणि च तमालस्य गुल्मानि मरिचस्य च ।
मुक्तानां च समूहानि शुष्यमाणानि तीरतः ॥ २३

निर्यासरूपो रसः—निर्यासरसः, तस्य मूलानि—उपादानभूतानि गुग्गुलादिवृक्षाः, तेषां चन्दनानां च वनानि सहस्रशः पश्यन् । जात्यानां उत्तमतक्कोलवृक्षभवानां फलिनां-प्रशस्तफलवतां ॥ २३ ॥

*[3]शङ्खानां प्रस्तरं चैव प्रवालनिचयं तथा ।
काञ्चनानि च [4]शैलानि राजतानि च सर्वशः ॥ २४ ॥

शैलानीति समूहार्थे । शिलावृन्दानीत्यर्थः ॥ २४ ॥

प्रस्रवाणि मनोज्ञानि प्रसन्नानि [5]ह्रदानि च ।
धनधान्योपपन्नानि स्त्रीरत्नैः शोभितानि च ॥ २५ ॥
हस्त्यश्वरथगाढानि नगराण्यवलोकयन् ।

प्रस्रवाणि—निर्झराः ॥ २५ ॥

तं समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतम् ॥ २६ ॥
†[6]अनूपं सिन्धुराजस्य ददर्श त्रिदिवोपमम् ।

समं—सममूतलम् ॥ २६ ॥

तत्रापश्यत् स मेघाभं न्यग्रोधमृषिभिर्वृतम् ॥ २७ ॥

---

* शैलानीति नपुंसकत्वमार्षम् । † एवं बहुधा सागरानूपवर्णनं पुनः बहुदूर-मार्गगमनप्रयासेन मारीचोपदेशानिवर्त्याध्यवसायविशेषं व्यञ्जयितुम्—गो.

[1] अंकोलानां च—ङ. ज. [2] फलानां—ज. पलाशानां—ङ. [3] शैलानि प्रवरांश्चैव—ज. [4] शृङ्गाणि—ज. [5] अद्भुतानि च—ज. [6] अनूपे—ज.

समन्ताद्यस्य ताः शाखाः शतयोजनमायताः ।
यस्य हस्तिनमादाय महाकायं च कच्छपम् ॥ २८ ॥

तत्र—समुद्रदिव्यद्वीपानूपे । यस्य—दिव्यसिद्धवटस्येत्यर्थः ॥

भक्षार्थं गरुडः शाखां आजगाम महाबलः ।
तस्य तां सहसा शाखां भारेण पतगोत्तमः ॥ २९ ॥

सुपर्णः पर्णबहुलां बभञ्ज च महाबलः ।
तत्र वैखानसा माषाः बालखिल्या मरीचिपाः ॥ ३० ॥

[1]अजा बभूवुर्धूम्राश्च संगताः परमर्षयः ।
तेषां दयार्थं गरुडः तां शाखां शतयोजनाम् । ३१ ॥

[2]जगामादाय वेगेन तौ चोभौ गजकच्छपौ ।
एकपादेन धर्मात्मा भक्षयित्वा तदामिषम् ॥ ३२ ॥

निषादविषयं हत्वा शाखया [3]पतगोत्तमः ।
* प्रहर्षमतुलं लेभे †मोक्षयित्वा महामुनीन्[4] ॥ ३३ ॥

प्रसङ्गात् अस्य माहात्म्यं कविर्वर्णयति—यस्येत्यादि । गरुडः अमृताहरणकाले भक्षणार्थं महाकायं हस्तिनं महाकायं कच्छपं चादाय क्वचित् स्थित्वा भक्षणाय यस्य शाखां जगाम, गत्वा च यस्य शाखां भारेण हेतुना पतगोत्तमो बभञ्ज च, तस्य भग्नशाखायाः अधः वैखानसाद्याः अनेके ऋषयः सङ्गता बभूवुः तपसे । तेषां दयार्थं—शाखापातेन तेषां नाशो मा भूदिति अनुग्रहार्थं तां शाखां

---

* शिष्टपालनात् दुष्टनिग्रहाच्चातुलं प्रहर्षं लेभे—गो. † तेषामुपरि पतनोन्मुख-शाखाया धारणपूर्वकमन्यत्र नीत्वा पातनेन मुनीन् मृत्युतः मोक्षयित्वा ।

[1] आजाः—ज. [2] भग्नमादाय—ज. [3] पतगाधिपः—ङ. [4] एतदनन्तरं—"शाखा-निपातभीतांश्च शाखां चोत्सृज्य सर्वतः" —इत्यधिकम्—ङ.

तौ गजकच्छपौ च महाबलत्वादादाय अन्यत्र जगाम। तदा गच्छन्नेव तौ शाखां च एकपादेन धृत्वा अन्तरिक्ष एव तदामिषं गजकच्छपरूपं भक्ष्यं भक्षयित्वा, अ तया शाखया प्रक्षिप्यमाणया निषादविषयं—निषाददेशं हत्वा मुनींश्च वधान्मोक्षयित्वा अतुलं प्रहर्षं लेभे ॥ २९–३३ ॥

स तेनैव प्रहर्षेण द्विगुणीकृतविक्रमः।
अमृतानयनार्थं वै चकार [1]मतिमान् मतिम् ॥ ३४ ॥

सः तेनैव प्रहर्षेण—आमिषभक्षणनिषादनाशनमुनिजनरक्षणसंतोषेणेत्यर्थः ॥ ३४ ॥

अयोजालानि निर्मथ्य भित्त्वा [2]रत्नमयं गृहम्।
महेन्द्रभवनाद्गुप्त आजहारामृतं ततः ॥ ३५ ॥

अयोजालानीति। अयश्शृङ्खलानिर्मितानि जालानि—आनाय्य रत्नमयगेहोपरि पक्षिजालप्रवेशपरिहाराय बद्धानि बलान्निर्मथ्य, छित्वा—रत्नमयं गेहं च भित्त्वा गुप्तममृतं महेन्द्रभवनादाजहार ॥ ३५ ॥

तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणम्।
नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥ ३६ ॥

सुपर्णकृतलक्षणं—सुपर्णेन कृतं भग्नैकमहाशाखारूपं लक्षणं—चिह्नं यस्य स तथा ॥ ३६ ॥

तं तु गत्वा परं पारं समुद्रस्य नदीपतेः।
ददर्शाश्रममेकान्ते रम्ये पुण्ये वनान्तरे ॥ ३७ ॥

---

[1] गमने–ङ्ग [2] रत्नगृहं वरम्–ज.

* तत्र कृष्णाजिनधरं जटा[1]वल्कलधारिणम् ।
ददर्श नियताहारं मारीचं नाम राक्षसम् ॥ ३८ ॥
स रावणः समागम्य विधिवत्तेन रक्षसा ।
मारीचेनार्चितो राजा सर्वकामैरमानुषैः ॥ ३९ ॥

सर्वकामैः—अभिलषितसर्वभोग्यवस्तुभिः अर्चितो बभूवेति शेषः ॥ ३९ ॥

तं स्वयं पूजयित्वा तु [2]भोजनेनोदकेन च ।
अर्थोपहितया [3]वाचा मारीचो वाक्यमब्रवीत् ॥ ४० ॥

अनुष्ठितपूजानुवादपूर्वं मारीचकर्तृकं कुशलप्रश्नं दर्शयति—तं स्वयमित्यादि ॥ ४० ॥

कच्चित् सुकुशलं, राजन् ! लङ्कायां राक्षसेश्वर !
केनार्थेन पुनस्त्वं वै तूर्णमेवमिहागतः ॥ ४१ ॥
एवमुक्तो महातेजाः मारीचेन स रावणः ।
तं तु पश्चादिदं † वाक्यं अब्रवीद्वाक्यकोविदः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चत्रिंशः सर्गः

इदमिति । अग्रिमसर्गवक्ष्यमाणम् । घोर(४२)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चत्रिंशः सर्गः

---

* कृष्णाजिनेत्यादिना रामभक्ततया जनितवैराग्यचिह्नोक्तिः—गो. † इदं—उत्तरसर्गे वक्ष्यमाणम्-गो.

[1] मण्डल—ज. [2] भाजनेनासनेन च—ङ. [3] बुद्ध्या—ङ.

षट्त्रिंशः सर्गः

[मारीचसहायप्रार्थना]

मारीच! श्रूयतां, [1]तात! वचनं मम भाषतः।
आर्तोऽस्मि मम चार्तस्य भवान् हि परमा गतिः ॥ १ ॥

अथ रावणेन स्वागमनकार्यनिवेदनम्। मारीचेत्यादि। तातेत्युपलालने ॥ १ ॥

जानीषे त्वं [2]जनस्थाने यथा भ्राता खरो मम।
दूषणश्च [3]महाबाहुः स्वसा शूर्पणखा च मे ॥ २ ॥
त्रिशिराश्च महातेजाः राक्षसः पिशिताशनः।
अन्ये च बहवः शूराः *लब्धलक्षा [4]निशाचराः ॥ ३ ॥
वसन्ति मन्नियोगेन [5]†अधिवासं च राक्षसाः।
बाधमाना महारण्ये मुनीन् वै धर्मचारिणः ॥ ४ ॥

कर्तव्यं वदिष्यन् पूर्ववृत्तान्तं स्मारयति—जानीष इत्यादि। भ्रात्रादयो मन्नियोगात् जनस्थानं प्राप्य वसन्तीति त्वं जानीषे किलेत्यन्वयः। अथ तत्र स्थित्वा क्रियमाणं वृत्तान्तं जानीषे इत्याह—अधिवासं चेत्यादि। मुनीन् बाधमानाः, हेतौ शानच्, बाधहेतवे अधिवासं च कुर्वन्ति, मन्नियोगेनेति शेषः ॥ २–४ ॥

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्।
शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनाम् ॥ ५ ॥

---

* लब्धलक्षाः—लब्धयुद्धोत्साहाः—ति. रा. † अधिवासः—उपद्रव इति कतकः। 'रतिवासं' इति पाठे रत्या—प्रीत्या वासः यस्मिन् कर्मणि तथा—ति. अधिवासं—निरन्तरवसं वसन्ति—कुर्वन्ति—रा.

[1] वत्स—ङ. [2] जनस्थानं—ज. [3] महातेजाः—ङ. [4] महाबलाः—ङ. [5] नित्यवासं, तन्निवासं, रतिवासं, रतिवासाश्च—ङ.

ते त्विदानीं जनस्थाने [1]वसमाना महाबलाः ।

किं ततः ? इत्यतः चतुर्दशेत्यादि । यानि सन्ति ते त्विदानीमित्यन्वयः । वसमानाः—वसन्तः इति यावत् ॥ ५ ॥

*[2]सङ्गताः परमायत्ताः रामेण सह संयुगे ॥ ६ ॥
नानाप्रहरणोपेताः खरप्रमुखराक्षसाः ।
तेन संजातरोषेण रामेण रणमूर्धनि ॥ ७ ॥
†अनुक्ता परुषं किंचित् शरैर्व्यापारितं धनुः ।
चतुर्दश सहस्राणि रक्षसामुग्रतेजसाम् ॥ ८ ॥
निहतानि [3]शरैस्तीक्ष्णैः मानुषेण पदातिना ।
खरश्च निहतः संख्ये दूषणश्च निपातितः ॥ ९ ॥
[4]हतश्च त्रिशिराश्चापि निर्भया दण्डकाः कृताः ।

किंचिदपि परुषमनुक्ता धनुः शरैः—शरमोक्षणव्यापारैः व्यापारितं संजातव्यापारं कृतम् ॥ ९ ॥

पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः ॥ १० ॥
स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः ।
[5]दुश्शीलः कर्कशः तीक्ष्णः मूर्खो लुब्धोऽजितेन्द्रियः ॥ ११ ॥
[6]त्यक्तधर्मो ह्यधर्मात्मा भूतानामहिते रतः ।
‡येन वैरं विनाऽरण्ये सत्त्व[7]माश्रित्य केवलम् ॥ १२ ॥

---

* संयुगे रामेण सह संगताः इत्यन्वयः । † अनेन रामगाम्भीर्यं, स्वपक्षीयाणां अवमानाधिक्यं च सूच्यते । ‡ यद्यपि शूर्पणखया 'भार्यात्वे च तवानेतुमुद्यताऽहं वराननाम् । विरूपिताऽस्मि' (३४–२१) इत्युक्तम् । परन्तु तया स्वस्वार्थनिगूहनात्, रावणार्थमेव स्वप्रवृत्तिरिति कथनाच्च रावणः एवं वदति ।

[1] वर्तमाना–ङ. [2] संयताः–ङ. [3] शरैर्दीप्तैः–ज. [4] हत्वा त्रिशिरसं चापि–ज. [5] अशीलः–ज. [6] त्यक्त्वा धर्ममधर्मात्मा–ङ. [7] मास्थाय–ज.

कर्णनासाऽपहरणात् भगिनी मे विरूपिता ।

अथ भगिनीवैरूप्यं निष्कारणमकृतेति मन्यमानः क्रोधादूष-यति--पित्रा निरस्तः इत्यादि । अजितेन्द्रियः इति पदम् । सत्त्वं-बलमेव केवलं आश्रितः, न तु धर्ममित्यर्थः ॥ १२ ॥

तस्य भार्यां जनस्थानात् सीतां सुरसुतोपमाम् ॥ १३ ॥
*आनयिष्यामि विक्रम्य सहायस्तत्र मे भव ।
त्वया ह्यहं सहायेन पार्श्वस्थेन, महाबल ! ॥ १४ ॥
† भ्रातृभिश्च सुरान् युद्धे समग्रान् नाभिचिन्तये ।

भ्रातृभिः—कुम्भकर्णादिभिः । नाभिचिन्तये—न गणयामि इति अकुलाभिमाने ॥ १४ ॥

तत् सहायो भव त्वं मे समर्थो ह्यसि, राक्षस ! ॥ १५ ॥
वीर्ये दर्पे च युद्धे च न ह्यस्ति सदृशस्तव ।
[1] उपायज्ञो महान् शूरः [2] सर्वमायाविशारदः ॥ १६ ॥
एतदर्थमहं प्राप्तः त्वत्समीपं, निशाचर ! ।
शृणु तत् कर्म साहाय्ये यत् कार्यं वचनान्मम ॥ १७ ॥

शृण्वित्यादि । मम साहाय्यार्थं यच्च कर्म त्वया कर्तव्यं तच्च कर्म शृणु ॥ १७ ॥

सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ।
आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥ १८ ॥

---

* बलादानेष्यामीत्यर्थः । † भ्रातृभिश्च—सहायैरिति विपरिणामः ।

[1] उपायतो—ज. [2] महामाया—ज.

त्वां तु निःसंशयं सीता दृष्ट्वा तु मृगरूपिणम् ।
गृह्यतामिति भर्तारं लक्ष्मणं चाभिधास्यति ॥ १९ ॥
ततस्तयोरपाये तु शून्ये सीतां यथासुखम् ।
[1] निराबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव ॥ २० ॥
ततः पश्चात् सुखं रामे भार्याहरणकर्शिते ।
[2] विश्रब्धः प्रहरिष्यामि कृतार्थेनान्तरात्मना ॥ २१ ॥
[3] तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः ।
शुष्कं समभवद्वक्त्रं परित्रस्तो बभूव ह ॥ २२ ॥
ओष्ठौ परिलिहन् शुष्कौ नेत्रैरनिमिषैरिव ।
मृतभूत इवार्तस्तु रावणं समुदैक्षत ॥ २३ ॥

महात्मनः रामस्य कथां—प्रसङ्गमित्यर्थः । नेत्रैरनिमिषैरिव । एवं चिन्तावशात् उपलक्षित इति शेषः । मृतभूत इति—मृतप्राय इत्यर्थः ॥ २३ ॥

* स [4] रावणं त्रस्तविषण्णचेताः
† महावने रामपराक्रमज्ञः ।
कृताञ्जलिस्तत्त्वमुवाच वाक्यं
हितं च तस्मै हितमात्मनश्च ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षट्त्रिंशः सर्गः

धर्म(२४)मानः सर्गः ॥ २४ ॥

इति श्रीमद्रामायणमूतकतकटीकायां अरण्यकाण्डे षट्त्रिंशः सर्गः

---

* उत्तरसर्गार्थं संगृह्णाति—स इति—गो. † महावने—विश्वामित्रतपोवने ।
[1] निराबाधं, निरायासो, निरपायो—ङ. [2] विस्रब्धं—ज. [3] तस्मात्—ङ.
[4] राक्षसः—ङ.

सप्तत्रिंशः सर्गः

[मारीचहितोपदेशः]

तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः ।
प्रत्युवाच [1]महाप्राज्ञः मारीचो राक्षसेश्वरम् ॥ १ ॥

अथ मारीचः स्वराज्ञे तत्त्वकथनाय रावणोक्तदूषणं किमपि तत्र नास्तीति दर्शयित्वा सीताऽपहारबुद्धिः सर्वथा सर्वरक्षःकुलनाशाय इत्याह । तच्छ्रुत्वेत्यादि ॥ १ ॥

सुलभाः पुरुषाः, राजन्! सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता [2]श्रोता च दुर्लभः ॥ २ ॥

सततं प्रियवादिन इति । स्वामिहिताहितविमर्शमुपेक्ष्य केवलं स्वप्रयोजनाय तन्मुखेच्छावादशीलाः पुरुषाः सुलभाः राज्ञः; अपि तु अप्रियस्यापि—तत्कालमप्रियतया प्रतीयमानस्यापि कालान्तरे पथ्यस्य वचनस्य श्रोता, अपथ्यभक्षणवत् प्रतीयमानमपि इदं पथ्यमेवेति गृहीता च राजा विवेकी दुर्लभ एव । अतो मयोच्यमानं अप्रियमिव स्थितमपि परमहितमित्येव गृहाणेति शेषः ॥ २ ॥

न नूनं बुध्यसे रामं महावीर्यं [3]गुणान्वितम् ।
*अयुक्तचारश्चपलः महेन्द्रवरुणोपमम् ॥ ३ ॥

एवं पीठिकां कृत्वा हितं ब्रूते—न नूनमित्यादि । महावीर्यं गुणान्वितं च न बुध्यसे । एतेन त्वदुक्तः सर्वोऽपि रामदोषः

---

*राजानो हि चारचक्षुषः, तत् भवता न सम्यगुपयोजितमित्यर्थः । एवं मनोदौर्बल्यरूपं चापस्यमपि रामपराक्रमापरिज्ञाने हेतुः ।

[1] महातेजाः–ज. [2] भोक्ता–ज. [3] गुणोन्नतम्–ङ. ज.

अवास्तव इत्युक्तम्। अस्यैव विस्तारः आरादुच्यमानः। अबोधे हेतुमाह—अयुक्तचार इति ॥ ३ ॥

* अपि स्वस्ति भवेत्, तात! सर्वेषां भुवि रक्षसाम्।
अपि रामो न संक्रुद्धः कुर्याल्लोकरामक्षसम् ॥ ४ ॥

रक्षसां स्वस्ति भवेदपि—क्षेमं संपद्येत किम्। तव दुर्बुद्धिविनिवृत्त्येति शेषः। तथा संक्रुद्धो रामः लोकं अराक्षसं न कुर्यादपि। तथा अग्रेऽपि ॥ ४ ॥

अपि ते जीवितान्ताय नोत्पन्ना जनकात्मजा।
अपि सीतानिमित्तं[1] च न भवेद्व्यसनं[2] मम ॥ ५ ॥
अपि त्वामीश्वरं प्राप्य कामवृत्तं निरङ्कुशम्।
न विनश्येत् पुरी लङ्का त्वया सह सराक्षसा ॥ ६ ॥
† त्वाद्विधः कामवृत्तो हि दुःशीलः पाप[3]मंत्रितः।
आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥ ७ ॥

पापमंत्रितः इति। पापैः सह कृतकार्यविचार इत्यर्थः ॥ ७ ॥

‡ न च पित्रा परित्यक्तः नामर्यादः कथञ्चन।
न लुब्धो न च दुश्शीलः न च क्षत्रियपांसनः ॥ ८ ॥

---

* अद्यैव निर्गत्य पुनरागमनात् नूनं न मे वचनं श्रोष्यतीति निश्चित्य रावणवापलेन संभावितानर्थानाह—अपीत्यादिना। अपिः संभावनायां, काकुस्वरो द्रष्टव्यः—गो. † अत्र य इत्यध्याहार्यम्। ‡ रामोपरि रावणारोपितान् दोषान् परिवर्त्य—न चेत्यादि।

[1] ते—ङ. [2] महत्—ज. [3] मंत्रितः—ङ.

न च धर्मगुणैर्हीनः * कौसल्या[1]ऽऽनन्दिवर्धनः ।
न तीक्ष्णो न च भूतानां सर्वेषामहिते रतः ॥ ९ ॥
वञ्चितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनम् ।
करिष्यामीति धर्मात्मा, तात ! [2] प्रव्राजितो वनम् ॥१०॥
† कैकेय्याः प्रियकामार्थं पितुर्दशरथस्य च ।
हित्वा राज्यं च भोगांश्च प्रविष्टो दण्डकावनम् ॥ ११ ॥

एवं कामप्रवेदनव्याजेन महावीर्यत्वं प्रतिपाद्य, अथ—न च पित्रेत्यादिना गुणान्वितत्वस्य प्रपञ्चः कृतः । सत्यवादिनं करिष्यामीति वनं प्रव्राजितः, न तु किञ्चित्पापात् पित्रा विवासित इत्यर्थः ॥८–११॥

न रामः कर्कशः, तात ! नाविद्वान् नाजितेन्द्रियः ।
‡ अनृतं [3] न श्रुतं चैव [4] नैवं त्वं वक्तुमर्हसि ॥ १२ ॥

अनृतं न श्रुतं चैव—अनृतप्रसङ्गमपि न जानाति, तेन तत्कथनं दूरापास्तमित्यर्थः । एवं वक्तुमिति । दुर्गुणवन्तमित्यर्थः ॥ १२ ॥

रामो विग्रहवान् धर्मः [5] साधुः सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानां मघवानिव ॥ १३ ॥
कथं त्वं तस्य वैदेहीं रक्षितां स्वेन तेजसा ।
इच्छसि प्रसभं हर्तुं प्रभामिव विवस्वतः ॥ १४ ॥

---

* आनन्दिः—आनन्दः, 'सर्वधातुभ्य इन्'—गो. † वनगमने हेत्वन्तरमाह—कैकेय्या इति—गो. ‡ अनृतं—असत्यं दुःश्रुतं—वैपरीत्येन श्रुतं च त्वं वक्तुं नार्हसि—गो.

[1] नन्द—ज. [2] प्रव्रजितो—ज. [3] दुःश्रुतं—ङ. [4] नैव—ङ. [5] रणे—ङ.

अथ सीतापहारस्याशक्यत्वं शक्यत्वे सर्वानर्थं च प्रतिपादयति—स्वेन तेजसा रक्षितामिति। पातिव्रत्यवैभवेनेत्यर्थः। तस्य स्वेन तेजसेति। रामस्य सहजप्रतापेनेत्यप्यर्थः ॥ १४ ॥

* शरार्चिषमनाधृष्यं चाप[1]खड्गेन्धनं रणे।
रामाग्निं सहसा दीप्तं न प्रवेष्टुं त्वमर्हसि ॥ १५ ॥
धनुर्व्यादितदीप्तास्यं [2]शरार्चिषममर्षणम्।
[3]चापपाशधरं वीरं शत्रु[4]सैन्यप्रहारिणम् ॥ १६ ॥
राज्यं सुखं च संत्यज्य जीवितं चेष्टमात्मनः।
नात्यासादयितुं, [5]तात! रामान्तकमिहार्हसि ॥ १७ ॥

अन्तकसमाधिर्धनुरित्यादि। धनुरेव व्यादितं व्यात्तमिति यावत्, आस्यं यस्य रामरूपाहिकस्य स तथा। अत्यासादयितुं—अत्यन्तं प्राप्तुं। व्यर्थमिममुद्यमं कृत्वा ते न किमपि हितमित्यर्थः ॥ १६–१७ ॥

अप्रमेयं हि तत्तेजो † यस्य सा जनकात्मजा।
न त्वं समर्थः तां हर्तुं राम[6]चापाश्रयां वने ॥ १८ ॥
तस्य सा नरसिंहस्य सिंहोरस्कस्य भामिनी।
प्राणेभ्योऽपि प्रियतरा भार्या नित्यमनुव्रता ॥ १९ ॥
न सा धर्षयितुं शक्या मैथिल्याजस्रिनः प्रिया।
दीप्तस्येव हुताशस्य शिखा सीता सुमध्यमा ॥ २० ॥

---

* शरार्चिषमिति शरपदं खड्गधारायाः अप्युपलक्षणम्। चापखड्गेन्धनमिति रूपणात्—गो. † जनकात्मजा यस्य—यत्सम्बन्धिनी—गो.

[1] खड्गधरं—ङ. [2] शरजिह्व—ङ. [3] चापबाण, खड्गचाप, खड्गपाश—ङ.
[4] सैन्यापहारिणम्—ङ. च. [5] तं तु—ङ. [6] पादा—ङ.

* किमुद्यममिमं व्यर्थं कृत्वा ते, राक्षसाधिप !
दृष्टश्चेत्त्वं रणे तेन तदन्तं तव जीवितम् ॥ २१ ॥

तेन रणे दृष्टश्चेत् तव जीवितं तदन्तं—तद्दर्शनावसानमित्यर्थः ॥

जीवितं च सुखं चैव राज्यं चैव † सुदुर्लभम्[1] ।

यदेवं अतः—जीवितमित्यादि ॥ २२ ॥

स सर्वैः सचिवैस्सार्धं विभीषणपुरोगमैः । २२ ।
मन्त्रयित्वा तु [2]धर्मिष्ठैः कृत्वा [3]निश्चयमात्मनः ।
दोषाणां च गुणानां च संप्रधार्य बलाबलम् ॥ २३ ॥
आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्त्वतः ।
[4]हिताहितं विनिश्चित्य क्षमं त्वं कर्तुमर्हसि ॥ २४ ॥

उक्तं प्रयोजनमुद्दिश्य स त्वं विभीषणपुरोगमैः उच्यमानलक्षणैः मंत्रयित्वा, अनन्तरं निश्चयं कृत्वा, तथा आत्मनः रामस्य च दोषगुणबलाबलादिकं ज्ञात्वा—विचार्य निश्चित्य पश्चात् यत् क्षमं तत् कर्तुमर्हसि, न हठात् प्रवर्तितुमर्हसीत्यर्थः ॥ २२–२४ ॥

---

* व्यर्थमिममुद्योगं कृत्वा ते किं—किं फलं प्राप्तव्यमित्यर्थः–गो. † अधिकपाठे सुतरां दुर्लभं राज्यं च चिरं भोक्तुमित्यन्वयः । यथाश्रुते तु जीवितादिकं तव सुतरां दुर्लभं नश्यत्येवेत्यर्थः ।

[1] एतदनन्तरं—यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम्—इत्यधिकं–ङ. ज.
[2] धर्मिष्ठं–ङ. [3] कार्यविनिश्चयम्–ङ. [4] हितं हि तव निश्चित्य–ज.

अहं तु मन्ये तव न क्षमं रणे
समागमं कोसलराजसूनुना ।
इदं हि भूयः शृणु वाक्यमुत्तमं
क्षमं च युक्तं च, निशाचरेश्वर ! ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्तत्रिंशः सर्गः

अथ मत्सचिवान्तर्गतस्य तवैव निश्चयः कीदृशः ? इत्यपेक्षायामाह—अहं त्वित्यादि । इदमिति वक्ष्यमाणम् । शठ (२५) मानः सर्गः ॥ २५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे सप्तत्रिंशः सर्गः

अष्टात्रिंशः सर्गः

[रामपराक्रमकथनम्]

* कदाचिदप्यहं वीर्यात् पर्यटन् पृथिवीमिमाम् ।
बलं नागसहस्रस्य धारयन् पर्वतोपमः ॥ १ ॥
† नीलजीमूतसङ्काशः तप्तकाञ्चनकुण्डलः ।
भयं लोकस्य जनयन् किरीटी परिघायुधः ॥ २ ॥
व्यचरं [1] दण्डकारण्ये ऋषिमांसानि भक्षयन् ।

अथ स्वानुभवसिद्धं रामबलं रावणं प्रति निवृत्तीच्छया मारीचः आह—कदाचिदित्यादि ॥ १–२ ॥

---

* तद्गुणजातं न युक्तया कल्पयित्वोच्यते, किं त्वनुभवसिद्धमित्याह —कदाचिदित्यादिना—गो. † भयजनने हेतुमाह —नीलेत्यादिना—गो.

[1] दण्डकारण्यं—ज.

विश्वामित्रोऽथ धर्मात्मा *मद्वित्रस्तो महामुनिः ॥ ३ ॥
स्वयं गत्वा दशरथं नरेन्द्रमिदमब्रवीत् ।

मद्वित्रस्त इति । मन्निमित्तं वित्रस्त इत्यर्थः ॥ ३ ॥

[1]अद्य रक्षतु मां रामः †पर्वकाले समाहितः ॥ ४ ॥
मारीचान्मे भयं घोरं समुत्पन्नं, नरेश्वर!

पर्वकाले—यागकाले ॥ ४ ॥

इत्येवमुक्तो धर्मात्मा राजा दशरथस्तदा ॥ ५ ॥
प्रत्युवाच महाभागं विश्वामित्रं महाबलम् ।
‡[2]बालो द्वादशवर्षोऽयं अकृतास्त्रश्च राघवः ॥ ६ ॥

---

*मद्वित्रस्तः—मत्तो वित्रस्तः—विशेषेण भीतः। †पर्वकाले—यज्ञसुत्याकाले—**गो.** ‡द्वादशवर्षः—द्वादशवर्षवयस्कः। केचित्तु—इदं रावणबिभीषयोक्तम् ; वस्तुतस्तु ऊनषोडशवर्ष इत्येव इत्यूचुः—**गो.** पञ्चदशवर्षोऽपि, तथा दशरथेनानूदितोऽप्यत्यन्तबाल्यद्योतनाय, 'अतिबालेनापीदृशं कृतं, किमधुना वाच्यम्' इति रावणस्यात्यन्तभयोत्पादनधिया मारीचेन तथा दशरथेनोक्तमित्यनूद्यते—'ऊनद्वादशवर्षोऽयं' इति पाठान्तरम्—**ति.** अय राघवः ऊनद्वादशवर्षः—किञ्चिन्मासोनषोडशवार्षिक इत्यर्थः। अयमर्थः—द्वौ च द्वौ च द्वौ चेत्येकशेषेण लब्धः। अत्र बीजं तु बालकाण्डघटकीभूते 'ऊनषोडशवर्षो मे' इति पद्ये निरूपितम्—**रा. गोविन्दराजस्तु**—विश्वामित्रनयनकाले रामः द्वादशवर्ष एवेत्याह—तथा हि (बाल. २०-२) – दशरथेन पित्रा 'ऊनषोडशवर्षः' (बा. २०-२) इत्युक्तम्। ऊनत्वं च मासेन मासत्रयेण षण्मासैर्वा स्यात्, न त्वेकद्विवर्षादिभिः। तस्मिन्नेव वर्षे सीताविवाहः। तदनु द्वादशवर्षाण्ययोध्यावासः, 'समा द्वादश तत्राहं राघवस्य निवेशने। भुञ्जानोऽमानुषान् भोगान् सर्वकामसमृद्धिनी ॥'

[1] अर्थं—**ज.** [2] ऊनद्वादश—**ज.**

(अर. ४७-४) इति सीतया वक्ष्यमाणत्वात्। तथा च वनप्रवेशकाले रामस्याष्टाविंशतिवर्षाणीति प्रतिभाति—तदनुपपन्नम्—'मम भर्ता महातेजाः वयसा पञ्चविंशकः। अष्टादश हि वर्षाणि मम जन्मनि गण्यते॥' (अर. ४७-१०) इति सीतावचनात्। कौसल्यया च वनप्रवेशसमये प्रोच्यते—'दश सप्त च वर्षाणि जातस्य तव पुत्रक। आसितानि प्रकाङ्क्षन्त्या मया दुःखपरिक्षयम्॥' (अयो. २०-४५) इति। तस्मात् अष्टाविंशतेः, पञ्चविंशतेः, सप्तदशानां च कथमविरोधः? इति चेत्—अत्र केचित्-कौसल्यावाक्ये जातस्येति द्वितीयं जन्मोच्यते। क्षत्रियस्यापि द्विजत्वात्। द्वितीयं जन्म च उपनयनम्। तच्च वृद्धेन दशरथेन काम्यपक्षमाश्रित्य गर्भाष्टम एव कृतम्। तथा च द्वितीयजन्मापेक्षया सप्तदशत्वम्। उपनयनात्पूर्वं सप्तवर्षाणीति 'वयसा पञ्चविंशकः' इति सीतावचनमप्युपपन्नम्। ऊनषोडशवर्ष इति पादोनत्वम्, 'द्वादशवर्षः' इत्यन्यत्रोक्तत्वात् (वस्तुतस्तु षोडशवर्षे एव क्षत्रियः कवचधारणार्हत्वात् युद्धार्ह इति—षोडशवर्षाः नैव पूर्णाः इति भावेन 'ऊनषोडशवर्षः' इत्युक्तिः। न्यूनत्वं यथाप्रमाणं ग्राह्यम्)। अतः सर्वथा वनप्रवेशकाले पञ्चविंशतिवर्ष एव राम इत्याहुः। अन्ये बहुक्लेशं सहमाना एवं व्याचख्युः—अष्टाविंशतिवर्ष एव वनप्रवेशे रामः। 'ऊनषोडशवर्षः' इति यत्किञ्चिन्मासोनषोडशवर्षवयस्क इत्यर्थः। 'बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम्' इति दशरथवचने बाल्ययौवनसन्धौ बाल इति व्यवहर्तुं शक्यत्वात्, 'बाल आषोडशाद्वर्षात् पौगण्डश्चेति कीर्त्यते' इति वचनात्। 'बालो द्वादशवर्षोऽयमकृतास्त्रश्च राघवः। अजातव्यञ्जनः श्रीमान् पद्मपत्रनिभेक्षणः॥' (अर. ३८-६) इति मारीचवचनं तु युद्धभीरुतया भ्रान्तिकृतम्, रावणविभीषिकयोक्तं वा। अत एव स्वयं वाय्वस्त्रभग्नोऽपि अकृतास्त्र इत्याह (परन्तु इयमुक्तिः रामप्रथमदर्शने इत्यवधेयम्)। अजातव्यञ्जनत्वं च निरुदरा कन्येतिवदल्पश्मश्रुत्वम्। 'वयसा पञ्चविंशकः' इति तु पञ्चविंशतुल्यत्वमाह, इवार्थे कनो विधानात्। तेन नित्ययौवनत्वं शापयति। देवा हि सदा पञ्चविंशतिवार्षीका इत्युच्यन्ते। कौसल्यावाक्यमपि 'गर्भैकादशेषु राजन्यम्' इतिविहितोपनयनापेक्षया। तस्मान्न किञ्चिदनुपपन्नमिति। वस्तुतः—'वयसा पञ्चविंशकः' इति सीतायाः शापभीतायाः सन्यासिनं प्रति (वास्तविकं सन्यासिनमेव सीता प्रथमं मन्यते स्म) वचनमेव यथार्थम्—इति॥

कामं तु मम यत्सैन्यं मया सह गमिष्यति ।
बलेन चतुरङ्गेण स्वयमेत्य [1] निशाचरान् ॥ ७ ॥
वधिष्यामि, मुनिश्रेष्ठ ! शत्रूंस्ते मनसेप्सितान् ।
इत्येवमुक्तः स मुनिः राजानमिदमब्रवीत् ॥ ८ ॥
रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः ।
देवतानामपि भवान् समरेष्वभिपालकः ॥ ९ ॥
आसीत्तव कृतं कर्म त्रिलोके विदितं, नृप !
काममस्तु [2] महत् सैन्यं तिष्ठत्विह, परंतप ! ॥ १० ॥

आसीत्तवेति । त्वया कृतं तव कर्म त्रिषु लोकेषु विदितं यद्यपि, ते कामं महत् सैन्यमस्ति, सर्वमपि तदिहैव तिष्ठतु ॥ १० ॥

[3] बालोऽप्येष महातेजाः समर्थस्तस्य निग्रहे ।
गमिष्ये राममादाय स्वस्ति तेऽस्तु, परंतप ! ॥ ११ ॥
एवमुक्त्वा तु स मुनिः तमादाय नृपात्मजम् ।
जगाम परमप्रीतः विश्वामित्रः स्वमाश्रमम् ॥ १२ ॥
तं तदा दण्डकारण्ये यज्ञमुद्दिश्य [4] दीक्षितम् ।
[5] बभूवोपस्थितो रामः [6] चित्रं विष्फारयन् धनुः ॥ १३ ॥
अजातव्यञ्जनः श्रीमान् [7] पद्मपत्रनिभेक्षणः ।
*एकवस्त्रधरो धन्वी शिखी कनकमालया ॥ १४ ॥

---

* एकवस्त्रधरः—ब्रह्मचर्यव्रते स्थित इत्यर्थः—गो.

[1] निशाचरम्—ज. [2] मम श्रीमान् पद्मपत्रनिभेक्षणः—ङ. [3] रामो ह्येष—ङ. [4] रक्षितुम्—ङ. [5] बभूवावस्थितो—ङ. [6] सख्यं—ङ. [7] बालः श्यामः शुभेक्षणः—ज.

शोभयन् दण्डकारण्यं दीप्तेन स्वेन तेजसा ।
अदृश्यत[1] ततो रामः बालचन्द्र इवोदितः ॥ १५ ॥

अजातव्यञ्जनः इति । इन्द्रादिपुंस्त्वचिह्नप्रादुर्भावरहितः इत्यर्थः । एकवस्त्रधर इति । कच्छबन्धवस्त्रमात्रधर इत्यर्थः । १४-१५॥

ततोऽहं मेघसङ्काशः तप्तकाञ्चन[2]कुण्डलः ।
बली दत्तवरो दर्पात् *[3] आजगाम तदाश्रमम् ॥ १६ ॥

दत्तवर इति । ब्रह्मदत्तदेवासुरावध्यत्ववर इत्यर्थः ॥ १६ ॥

†तेन दृष्टः प्रविष्टोऽहं सहसैवोद्यतायुधः ।
मां तु दृष्ट्वा धनुः सज्यं असंभ्रान्तश्चकार सः ॥ १७ ॥
[4] अवजानन्नहं मोहात् बालोऽयमिति राघवम् ।
विश्वामित्रस्य तां वेदिं अभ्यधावं कृतत्वरः ॥ १८ ॥
तेन मुक्त[5]स्ततो बाणः शितः शत्रुनिबर्हणः ।
तेनाहं [6]त्वाहतः क्षिप्तः समुद्रे शतयोजने ॥ १९ ॥
‡नेच्छता, तात! मां हन्तुं तदा वीरेण रक्षितः ।
रामस्य शरवेगेन निरस्तो[7]ऽहमचेतनः ॥ २० ॥
पातितोऽहं तदा तेन गम्भीरे सागराम्भसि ।
प्राप्य संज्ञां चिरात्, तात! लङ्कां प्रतिगतः पुरीम् ॥ २१ ॥

---

* आजगामेत्युत्तमः पुरुषः । अत्र लिट्प्रयोगः दीर्घकालिकत्वेन परोक्षत्वारोपात्—रा.
† तदाश्रमं प्रविष्टः अहं तेन दृष्ट इत्यन्वयः । ‡ एतच्च रक्षणं केवलं कृपाजन्यमिति मारीचाशयः । भाविकार्यार्थमिति वस्तुतस्त्वम्—ति. अनिच्छाहेतुर्न ज्ञायते, स्वयं तु हन्तुं समर्थ एवेति भावः । अचेतनः—निश्चेष्टः मूर्छितो वा—गो.

[1] तदा—ज. [2] भूषणः—ङ. [3] आगतोऽस्मि—ङ. [4] अवज्ञानादहं—ङ. [5] ताडितः—ज. [6] त्वाहतः—ङ. [7] भ्रान्तचेतनः—ज.

एवमस्मि तदा मुक्तः, सहायास्तु निपातिताः ।
अकृतास्त्रेण बालेन रामेणाक्लिष्टकर्मणा ॥ २२ ॥
तन्मया वार्यमाणस्त्वं यदि रामेण विग्रहम् ।
करिष्यस्यापदं घोरां क्षिप्रं [1] प्राप्स्यसि, रावण! ॥ २३ ॥
* क्रीडा[2]रतिविधिज्ञानां समाजोत्सव[3]शालिनाम् ।
रक्षसां चैव सन्तापं अनर्थं चाहरिष्यसि ॥ २४ ॥
हर्म्यप्रासादसंबाधां नानारत्नविभूषिताम् ।
द्रक्ष्यसि त्वं पुरीं लङ्कां विनष्टां मैथिलीकृते ॥ २५ ॥
अकुर्वन्तोऽपि पापानि शुचयः पापसंश्रयात् ।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २६ ॥

अथ त्वद्दोषात् रक्षःकुलमात्रस्य नाशः प्राप्तोतीत्याह—अकुर्वन्त इत्यादि । मत्स्या नागह्रदे यथेति । सर्पाधिष्ठिते ह्रदे स्नानार्थ-प्रविष्टनृपादिना सर्पनाशाय प्रेरितधीवरादिना सर्पनाशप्रसङ्गे मत्स्याश्च यथा नाश्यन्ते तद्वदित्यर्थः ॥ २६ ॥

दिव्यचन्दन[4]दिग्धाङ्गान् दिव्याभरणभूषितान् ।
द्रक्ष्यस्यभिहतान् भूमौ तव दोषात्तु [5] राक्षसान् ॥ २७ ॥
† [6] हृतदारान् सदारांश्च दश विद्रवतो दिशः ।
हतशेषान् [7] अशरणान् द्रक्ष्यसि त्वं निशाचरान् ॥ २८ ॥

हृतदारान्—परिहृतदारान्, त्यक्तदारानित्यर्थः ॥ २८ ॥

---

* क्रीडारत्योः—लीलाभोगयोः विधिं क्रमं जानन्ति, तेषां—रा. † पूर्वं सदारान्, ततः हृतदारान्, दश दिशः विद्रवतः ।

[1] प्राप्य नशिष्यसि—ज्ञ. [2] विधिरस—ङ. [3] दर्शिनाम्—ङ. [4] लिप्ता—ङ. [5] रावण—ङ. [6] हत—ङ. [7] अशेषांश्च—ङ.

शरजालपरिक्षिप्तां अग्निज्वालासमावृताम् ।
प्रदग्धभवनां लङ्कां द्रक्ष्यसि त्वं न संशयः ॥ २९ ॥

परदाराभिमर्शात्तु नान्यत् पापतरं महत् ।
प्रमदानां सहस्राणि तव, राजन् ! *[1] परिग्रहः ॥ ३० ॥

भव स्वदारनिरतः स्वकुलं रक्ष, [2]राक्षस !
मानमृद्धिं च राज्यं च जीवितं चेष्टमात्मनः[3] ॥ ३१ ॥

कलत्राणि च सौम्यानि मित्रवर्गं तथैव च ।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ ३२ ॥

निवार्यमाणः सुहृदा मया भृशं
प्रसह्य सीतां यदि धर्षयिष्यसि ।
गमिष्यसि क्षीणबलः सबान्धवः
यमक्षयं राम[4]शरात्तजीवितः ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टात्रिंशः सर्गः

लोल(३३)मानः सर्गः ॥ ३३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे अष्टात्रिंशः सर्गः

---

* 'परिग्रहः कलत्रे स्यात्' इति शाश्वतः—**गो.** परिग्रहे—अन्तःपुरे सन्तीति शेषः—**ति. रा.**

[1] परिग्रहे—**ज.** [2] रावण—**ङ.** [3] एतदनन्तरं—"सीताहेतोः समग्राणि विद्रविष्यन्ति भीतवत् । आत्मनश्च दशग्रीव ! पुरस्यान्तःपुरस्य च । रक्षसां च विनाशाय मैथिलीमानयिष्यसि । मा नाशय त्वं राज्यं च जीवितं चेष्टमात्मनः"—**इत्यधिकं—ङ.** [4] शरार्त—**ङ.** शरास्त—**ज.**

एकोनचत्वारिंशः सर्गः

[साहाय्यकानभ्युपगमः]

एवमस्मि तदा मुक्तः कथंचित् तेन संयुगे।
इदानीमपि यद्वृत्तं तच्छृणुष्व *[1] यदुत्तरम् ॥ १ ।

पुनश्च स्वानुभवसिद्धं रामवीर्यं महद्वृत्तानुवादपूर्वं आह—एवमित्यादि। 'इदानीमपि यद्वृत्तं तच्छृणुष्व यदुत्तरम्' इति पाङ्क्तः। इदानीं प्रौढावस्थायामपि यद्वृत्तं मद्विषयमभूत, यच्चेदमप्युत्तरं—सर्वलोकोत्तरं तदतिरिक्तासाध्यं तच्छृणुष्व—शृण्विति यावत् ॥ १ ॥

राक्षसाभ्यामहं † द्वाभ्यां ‡ अनिर्विण्णस्तथा कृतः।
सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावनम् ॥ २ ॥

अनिर्विण्णस्तथा कृतः इति। पूर्वं प्राणसंकटं प्रापितोऽपि अहं अनिर्विण्णः—अप्राप्तद्विषयप्रवृत्तिवैराग्यः ॥ २ ॥

दीप्तजिह्वो [2] महाकायः तीक्ष्णदंष्ट्रो महाबलः।
व्यचरं [3] दण्डकारण्यं [4] मांसभक्षो महामृगः ॥ ३ ॥
अग्निहोत्रेषु तीर्थेषु § चैत्यवृक्षेषु, रावण!
अत्यन्तघोरो व्यचरं तापसान् संप्रधर्षयन् ॥ ४ ॥

---

* निरुत्तरं शृणुष्व—मध्ये वाक्यविच्छेदाकरणेन शृण्वित्यर्थः। यदुत्तरमितिपाठे, यत् सर्वान्तोत्तरं तदतिरिक्तासाध्यं तदपि शृण्वित्यर्थः—गो. † अहं—मृगरूपधर इति शेषः, उत्तरश्लोके हि तथोक्तम्। ‡ अनिर्विण्णः—निर्वेदरहितः, 'निर्वेदो निष्फलत्वधीः', अप्राप्तद्विषयप्रवृत्तिवैराग्यः—गो. § चैत्यवृक्षाः—देवालयस्थानापन्नाः पूज्यवृक्षाः, अश्वत्थादिवत्।

[1] निरुत्तरम्—ङ. [2] महादंष्ट्रः तीक्ष्णशृंगो—ज. [3] दण्डकारण्ये—ङ. [4] ऋषिमांसानि भक्षयन्—ङ.

निहत्य दण्डकारण्ये तापसान् धर्मचारिणः ।
रुधिराणि पिबंस्तेषां [1]तथा मांसानि भक्षयन् ॥ ५ ॥

*ऋषिमांसाशनः क्रूरः त्रासयन् वनगोचरान् ।
[2]तथा रुधिरमत्तोऽहं विचरन् धर्मदूषकः ॥ ६ ॥

आसादयं तदा रामं तापसं धर्म[3]चारिणम् ।
वैदेहीं च महाभागां लक्ष्मणं च [4]महारथम् ॥ ७ ॥

तापसं नियताहारं सर्वभूतहिते रतम् ।
सोऽहं वनगतं रामं परिभूय महाबलम् ॥ ८ ॥

†तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ।
अभ्यधावं हि संक्रुद्धः तीक्ष्णशृङ्गो मृगाकृतिः ॥ ९ ॥

जिघांसुरकृतप्रज्ञः तं प्रहारमनुस्मरन् ।
तेन [5]मुक्ताः त्रयो बाणाः शिताः शत्रुनिबर्हणाः ॥ १० ॥

विकृष्य [6]बलवच्चापं सुपर्णानिल[7]निःस्वनाः[8] ।
ते बाणाः वज्रसङ्काशाः [9]सुमुक्ता रक्तभोजनाः ॥ ११ ॥

---

*उक्तानुवादः, अतो न पौनरुक्त्यम् । †रामपराक्रमं जानन्नपि कथं तत्परिभवायोद्युक्तः इत्यत्राह—तापसोऽयमिति । तापसत्वादहिंसापरेण भवितव्यमिति विश्वस्येत्यर्थः—गो. राज्यात् भ्रष्टः, अत एव कालक्रमतः निर्वीर्यो जातः तापसः—दीनः—निर्गतिकः इति मत्वा—इति वा । निरायुध इति वा ॥

[1] तन्मांसानि च—ज. [2] एतदर्धस्थाने—"तदा रुधिरमत्तोऽहं व्यचरं दण्डकावनम् । तदाऽहं दण्डकारण्ये विचरन् धर्मदूषकः" इति—ज. [3] माश्रितं—ङ. [4] महाबलम्—ङ. [5] त्यक्ताः—ज. [6] सुमह—ज. [7] तुल्यगाः—ज. [8] एतदनन्तरं—"तैर्बाणैर्दण्डकारण्ये मत्तैराशीविषोपमैः । कृतं तिमिरं सर्वं रामेणाक्लिष्टकर्मणा"—इत्यधिकं—ङ. [9] सुघोरा—ज.

आजग्मुः सहिताः सर्वे त्रयः संनतपर्वणः ।
पराक्रमज्ञो रामस्य *[1] शठो दृष्टभयः पुरा ॥ १२ ॥
[2] समुद्भ्रान्तस्ततो मुक्तः तावुभौ राक्षसौ हतौ ।
शरेण मुक्तो रामस्य कथंचित्प्राप्य जीवितम् ॥ १३ ॥
इह प्रव्राजितो †युक्तः तापसोऽहं समाहितः ।

शठः—गूढविप्रियकृत् । समुद्भ्रान्तः—पलायमानः । प्रव्राजितः—कृतसकलदुर्वृत्तपरित्यागः । तापसः—तपोनिष्ठः ॥ १२-१३ ॥

वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम् ॥ १४ ॥
गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ।
‡अपि रामसहस्राणि भीतः पश्यामि, रावण ! ॥ १५ ॥
रामभूतमिदं सर्वं अरण्यं प्रतिभाति मे ।
§राममेव हि पश्यामि रहिते, राक्षसाधिप ! ॥ १६ ॥
दृष्ट्वा स्वप्नगतं रामं उद्भ्रमामि विचेतनः ।

रहिते—रामरहितेऽपि वने ॥ १६ ॥

रकारादीनि नामानि रामत्रस्तस्य, रावण ! ॥ १७ ॥
रत्नानि च रथाश्चैव त्रासं संजनयन्ति मे ।

रकारादीनीति । रेफादीनीति यावत् ॥ १७ ॥

अहं तस्य प्रभावज्ञः न युद्धं तेन ते क्षमम् ॥ १८ ॥

---

* शरः पुरा दृष्टभयः—गो. †युक्तः—उचिताचरणः—गो. योगाभ्यासरतः—ति. रा. ‡एकस्यैव रामस्य प्रतिवृक्षं गत्वा गत्वा दृश्यमानत्वमुच्यत इति भ्रमं धारयति—अपीति—गो. §नेदं रामस्य मायाकृतमित्याह—राममेवेति । रहिते—रामरहिते प्रदेशे—गो.

[1] शरो—ङ. [2] समुत्क्रान्त—ज.

बलिं वा नमुचिं वापि हन्याद्धि रघुनन्दनः ।
* रणे रामेण युध्यस्व [1]क्षमां वा कुरु, [2]राक्षस ! ॥ १९ ॥
न ते रामकथा कार्या [3]यदि मां द्रष्टुमिच्छसि ।

त्वं रामेण रणे युद्धं वा कुरु, क्षमां वा कुरु । अपि तु मां यदि जीवितं द्रष्टुमिच्छसि तदा मम पुरस्तात् रामकथा—रामप्रसङ्गः न कार्यः ॥ १९ ॥

बहवः † साधवो लोके युक्ता धर्ममनुष्ठिताः ॥ २० ॥
परेषामपराधेन विनष्टाः सपरिच्छदाः ।

साधव इति । अकृतापचारा इत्यर्थः । धर्ममनुष्ठिता इति । 'गत्यर्थाकर्मकश्लिषशीङ्स्थे'ति कर्तरि निष्ठा ॥ २० ॥

सोऽहं [4]तवापराधेन [5]विनश्येयं, निशाचर ! ॥ २१ ॥
[6]कुरु यत्ते क्षमं तं त्वां अहं नानुनयामि ह ।

'कुरु यत्ते क्षमं तं त्वां अहं नानुनयामि ह' इति पाठः । यत्ते क्षमं रणः क्षमा वा तत् त्वमेव कुरु । अहं तु त्वां नानुयामि । त्वद्बुद्धिं नानुगच्छामि ॥ २१ ॥

रामश्च हि [7]महातेजाः महासत्त्वो महाबलः ॥ २२ ॥
अपि राक्षसलोकस्य न भवेदन्तकोऽपि सः ।

तत्र हेतुमाह—रामश्चेत्यादि । स हि प्रसिद्धपराक्रमो रामः राक्षसकुलस्य अन्तकरो भवेत् यदि तदा त्वामनुनयाम्यपि, नैतदस्ति, अतो नानुनयामीति पूर्वेण संबन्धः ॥ २२ ॥

---

* यदि अस्ति दर्पः त्वं रणे रामेण युध्यस्व, सर्वानर्थमूलसीतापहारं मा कुरु, मां तु मुञ्चेत्यर्थः । † साधवः—स्वयं निरपराधाः ।

[1] न क्षमं तव—ङ. [2] रावण—ज. [3] न चैनं द्रष्टुमर्हसि—ङ. [4] परा—ज. [5] न नश्येयं—ङ. [6] 'कुरु यत्ते क्षमं तत् त्वं अहं त्वा नानुयामि ह'—ङ. [7] महावीर्यः—ङ.

यदि * शूर्पणखाहेतोः जनस्थानगतः खरः ॥ २३ ॥
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ।
अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः ? ॥ २४ ॥

अथ खरादिनाशस्य च तत्कृतान्यायमूलत्वात् तत्र च क्षमैव युक्तेत्याशयेनाह—यदीत्यादि । शूर्पनखीहेतोः जनस्थानगतः खरः पूर्वं-प्रथमं अतिवृत्तो जातः—तूष्णीमेव स्थितं रामं स्वयं गत्वा अतिमर्यादं तत्पीडाकरं युद्धप्रवृत्तिं कृतवान् पश्चात् तेन रामेण हतः, अत्र रामस्य को व्यतिक्रमः—अन्यायः ? त्वमेव ब्रूहि ॥ २३-२४ ॥

इदं वचो बन्धुहितार्थिना मया
यथोच्यमानं यदि नाभिपत्स्यसे ।
सबान्धवः त्यक्ष्यसि जीवितं रणे
हतोऽद्य † रामेण शरैरजिह्मगैः ॥ २५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकोनचत्वारिंशः सर्गः

अथ मथितसिद्धान्तमाह—इदमिति । यथोच्यमानं—परमार्थतः उच्यमानं, यदि नाभिपत्स्यसे—नाङ्गीकरिष्यसि, तदा रणे हतः जीवितं त्यक्ष्यसीति, मया अद्यैव निश्चीयत इति शेषः । शर(२५)मानः सर्गः ॥ २५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकोनचत्वारिंशः सर्गः

---

* सीताहनने प्रवृत्तशूर्पणखाहेतोरित्यर्थः । तेन च शूर्पणखाविरूपणप्रतीकारेच्छापि न न्याय्येति भावः । खरहननस्य प्राधान्येन रावणेनोत्कीर्तनात् अत्रैवमुक्तिः ।

† रामापराधे त्वद्वधस्य निश्चितत्वात्सन्निहितत्वाद्वा अद्येत्युक्तिः ।

चत्वारिंशः सर्गः

[मारीचभर्त्सनम्]

[1]मारीचेन तु तद्वाक्यं [2]क्षमं युक्तं निशाचरः।
उक्तो न प्रतिजग्राह * मर्तुकाम इवौषधम् ॥ १ ॥

एवं मारीचोपदिष्टं अप्रतिगृह्णाने रावणे बलात् स्वाभिमतदुष्कृत्ये नियुज्यते। मारीचेनेत्यादि। मारीचेन तत्–पूर्वोक्तप्रकारकं क्षमं–सदृशं युक्तं–कालोचितमेव वाक्यमुक्तम्, एवं उचित एवोक्तः–उपदिष्टः निशाचरो रावणः, मुमूर्षुः औषधमिव तदुक्तं न प्रतिजग्राह ॥ १ ॥

तं †पथ्यहितवक्तारं मारीचं राक्षसाधिपः।
अब्रवीत् परुषं वाक्यं अयुक्तं कालचोदितः ॥ २ ॥

[3]यत् किलैतदयुक्तार्थं, मारीच! मयि कथ्यते।
वाक्यं निष्फलमत्यर्थं उप्तं बीजमिवोषरे ॥ ३ ॥

अयुक्तार्थमिति। राजचित्तप्रतिकूलत्वात् अनुचितार्थकम् ॥

त्वद्वाक्यैर्न तु मां शक्यं भेत्तुं रामस्य संयुगे‡।
पापशीलस्य मूर्खस्य मानुषस्य विशेषतः ॥ ४ ॥

यस्त्यक्त्वा सुहृदो राज्यं मातरं पितरं तथा।
स्त्रीवाक्यं प्राकृतं श्रुत्वा वनमेकपदे गतः ॥ ५ ॥

---

* मर्तुकामः – मुमूर्षुः—सन्निहितमरणः। †पथ्यं—अनपायं हितं—सुखावहम्—गो ‡रामस्य संयुगे विषये मां भेत्तुं-सीताहरणोपायात् युद्धे मां प्रवर्तयितुं त्वद्वाक्यैर्न शक्यम्—गो. रामस्य संयुगे उद्यतं मां—रा. संयुगे पापशीलत्वादिगुणकस्य रामस्य भार्याहरणविषये स्थितं मां ति.

[1] मारीचस्य—ज. [2] क्षेमंयुक्तं—ङ. [3] दुष्कुलैत—ज.

'त्वद्वाक्यैर्न तु मां शक्यं' इति पाठः। पापशीलत्वादि-विशेषकस्य रामस्य संयुगे युद्धविषये व्यवस्थितं मां भेत्तुं त्वद्वाक्यैः त्वया न शक्यमिति योजना। प्राकृतं स्त्रीवाक्यं श्रुत्वेति। असारं कैकेयीवाक्यमित्यर्थः। एकपदे—द्राक् ॥ ५ ॥

अवश्यं तु मया तस्य *संयुगे खरघातिनः।
प्राणैः प्रियतरा सीता हर्तव्या †तव सन्निधौ ॥ ६ ॥
एवं मे निश्चिता बुद्धिः हृदि, मारीच! वर्तते।
न व्यावर्तयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ ७ ॥
दोषं गुणं वा संपृष्टः त्वमेवं वक्तुमर्हसि।
‡अपायं वाप्युपायं वा कार्यस्यास्य विनिश्चये ॥ ८ ॥

अपि च अपृष्टोत्तरप्रलापः तवासङ्गत इत्याह—दोषमित्यादि। कस्यचित् संदिग्धस्य कार्यस्य निश्चये—निश्चयसिद्ध्यर्थं 'अस्मिन्ननुष्ठिते को गुणः? को दोषः? कः उपायः? को वाऽपायः?' इति यदि पृष्टं स्यात्, तथा पृष्टे सत्येव गुणदोषादिकं वक्तुमर्हसि, मया तु निश्चिते कार्ये केवलं साहाय्ये नियुज्यते, अतो न ते जल्पः सङ्गतः इत्यर्थः ॥ ८ ॥

संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता।
उद्यताञ्जलिना [1]राज्ञे य इच्छे[2]द्भूतिमात्मनः ॥ ९ ॥

अथ सचिवकृत्यं तु राजनि पृष्टोत्तरमेव, तच्च सोपचारं वक्तव्यमिति राजनीतिरित्याह—संपृष्टेनेत्यादि ॥ ९ ॥

---

* संयुगे खरघातिन इत्यन्वयः। † तव सन्निधौ—त्वत्साहाय्ये इति यावत्
‡ कार्यस्य विनिश्चये उपायं, अपायं, दोषं, गुणं वा संपृष्ट इत्यन्वयः।

[1] राज्ञः—ज. [2] द्भूति—ङ.

*वाक्यमप्रतिकूलं तु मृदुपूर्वं हितं शुभम् ।
उपचारेण युक्तं च वक्तव्यो वसुधाधिपः ॥ १० ॥

तस्यैव विवरणं वाक्यमित्यादि १० ॥

[1]सावमर्दं तु [2]यद्वाक्यं, मारीच! हितमुच्यते ।
नाभिनन्दति तद्राजा [3]मानार्हो मान[4]वर्जितम् ॥ ११ ॥

ननु प्रतिकूलमपि हितं राज्ञे वक्तव्यं इत्याशङ्क्याह—सावमर्दमित्यादि । राजपृष्टावमर्दसहितमित्यर्थः ॥ ११ ॥

पञ्चरूपाणि राजानः धारयन्त्यमितौजसः ।
अग्नेरिन्द्रस्य सोमस्य वरुणस्य यमस्य च ॥ १२ ॥
†औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् ।
धारयन्ति महात्मानः राजानः, क्षणदाचर ॥ १३ ॥
तस्मात् सर्वास्ववस्थासु मान्याः पूज्याश्च [5]पार्थिवाः ।

पञ्चानां रूपाणि पञ्चरूपाणि । के ते इत्यतः अग्नेरित्यादि । कस्य किं रूपं धारयन्तीत्यतः—औष्ण्यमित्यादि ॥ १२-१३ ॥

त्वं तु धर्ममविज्ञाय केवलं मोहमास्थितः ॥ १४ ॥
‡अभ्यागतं मां दौरात्म्यात् परुषं [6]वक्तुमिच्छसि ।

अभ्यागतमित्यनेन विशिष्य पूजनीयत्वसूचनम् ॥ १४ ॥

---

* एवं वक्तृगुणा उक्ताः, अथ वचनप्रकारमाह—वाक्यमिति—गो. † औष्ण्यं—तीक्ष्णत्वं, विक्रमः—बलातिशयः, सौम्यं—कृपालुता, दण्डः—दुष्टनिग्रहः, प्रसन्नता—प्रसादः रा. ‡राजानं, विशिष्येदानीं अभ्यागतं—इति भावः ।

[1] सोपमर्दं, सावमानं—ङ. [2] यद्वाक्यमथवा हित—ञ. यद्वाक्यं मानहारीदं—ङ. [3] मानार्थी—ञ. [4] वर्जितः—ङ. [5] नित्यदा—ञ. [6] वदसीदृशम्—ञ.

गुणदोषौ न पृच्छामि क्षमं चात्मनि, राक्षस ! ॥ १५ ॥
*मयोक्तं तव चैतावत् संप्रत्यमितविक्रम !

क्षमं चात्मनीति । युक्तमित्यर्थः । मयेत्यादि । संप्रति मया तवोक्तं—त्वया कर्तव्यतया उक्तं एतावत् ॥ १५ ॥

अस्मिंस्तु [1]स भवान् कृत्ये साहाय्यं कर्तुमर्हति ॥ १६ ॥
शृणु तत्कर्म साहाय्ये यत् कार्यं †[2]वचनान्मम ।

एतच्छब्दार्थ एव अस्मिन्नित्यादि । निश्चिते सीतापहारकृत्ये स भवान् मया नियुक्तः साहाय्यं कर्तुमर्हतीत्यर्थः । मत्कर्तव्यसाहाय्यं कीदृशं ते ? इत्यपेक्षायामाह—शृण्वित्यादि ॥ १६ ॥

सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ॥ १७ ॥
आश्रमे तस्य रामस्य सीतायाः ‡प्रमुखे चर ।
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ॥ १८ ॥
त्वां तु मायामृगं §दृष्ट्वा काञ्चनं जातविस्मया ।
आनयैनमिति क्षिप्रं रामं वक्ष्यति [3]मैथिली ॥ १९ ॥
अपक्रान्ते तु काकुत्स्थे दूरं यात्वा व्युदाहर ।
हा सीते लक्ष्मणेत्येवं रामवाक्यानुरूपकम् ॥ २० ॥

रामवाक्यानुरूपकमिति । रामकण्ठध्वनिसदृशध्वनियुक्तामित्यर्थः॥

तच्छ्रुत्वा रामपदवीं सीतया च प्रचोदितः ।
अनुगच्छति संभ्रान्तः सौमित्रिरपि सौहृदात् ॥ २१ ॥

---

* संप्रति एतावदेव मया तव—तुभ्यमुक्तम् । तदेव अनन्तरश्लोके विवियते ।
† कार्यं—इदानीं कर्तव्यम् । ‡ प्रमुखे—पुरतः । § काञ्चनं मायामृगरूपं त्वां इत्यर्थः ।
[1] त्वं महाकृत्ये—ङ. [2] वचनं मम—ङ. [3] जानकी—ङ.

अपक्रान्ते च काकुत्स्थे लक्ष्मणे च यथासुखं ।
[1] आनयिष्यामि वैदेहीं * सहस्राक्षः शचीमिव ॥ २२ ॥
एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ, राक्षस!
राज्यस्यार्धं [2] प्रयच्छामि, मारीच! तव, सुव्रत! ॥ २३ ॥
गच्छ, सौम्य! † शिवं मार्गं कार्यस्यास्य विवृद्धये ।
अहं त्वाऽनुगमिष्यामि सरथो दण्डकावनम् ॥ २४ ॥

शिवं मार्गं गच्छेति । सौम्यभावमास्थाय प्रस्थितो भवेत्यर्थः ॥२४॥

प्राप्य सीतामयुद्धेन वञ्चयित्वा च [3] राघवम् ।
लङ्कां प्रतिगमिष्यामि कृतकार्यः सह त्वया ॥ २५ ॥
न चेत् करोषि, मारीच! हन्मि त्वामहमद्य वै ।
एतत् कार्यमवश्यं मे बलादपि करिष्यसि ।
राज्ञो हि प्रतिकूलस्थः न जातु सुखमेधते ॥ २६ ॥

अथ रावणो राजत्वात् अकरणे दण्डमाह—न चेदित्यादि ॥ २६ ॥

‡ आसाद्य तं जीवितसंशयस्ते
मृत्युर्ध्रुवो ह्यद्य मया विरुध्य ।
एतद्यथावत् [4] प्रतिगृह्य बुद्ध्या
[5] यदत्र पथ्यं कुरु तत् तथा त्वम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चत्वारिंशः सर्गः

---

* सहस्राक्षः शचीमिवेति स्वबुद्ध्या । † मार्गं—मृगसम्बन्धिरूपं शिवं—मनोहरं गच्छ—गो. यद्वा 'न चेत्करोषि' (२६) इति वक्ष्यमाणत्वात् तव निरपायं मार्गं गच्छेत्यर्थः । ‡ रामसम्मुखगमने वारद्वयवत् अद्यापि जीवितसंशय एव, मद्विरोधे तु अद्यैव मृत्युस्तव निश्चितः ; अनयोः कः श्रेष्ठः इत्यालोचयेति भावः ॥

[1] आहरिष्यामि—ज. [2] प्रदास्यामि—ज. [3] राघवौ—ङ. [4] प्रतिगम्य—ङ. परिगण्य—ज. [5] यद्रोचते तत्कुरु मा चिरेण—ङ.

प्रत्यक्षवधपरिहाराय मद्वचस्यनुष्ठिते जीवितस्ते मत्तो बहुसम्मान-प्राप्तिः। न च रामो मां हनिष्यतीति शङ्क्यम्। वारद्वयवत् तृतीय-पर्यायेऽपि जीवितस्य संभावितत्वेन मृत्युनिश्चयाभावः, अतो विमृश्य यदिष्टं तत् कुरु इत्याह—आसाद्य तमिति। राममित्यर्थः। जीवित-संशय इति। प्राणस्य नाशस्थित्योः संशयः तथा, न तु निश्चय इत्यर्थः। एतदिति। मदुक्तवचनमित्यर्थः। सर्प(२७)मानः सर्गः ॥ २७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चत्वारिंशः सर्गः

एकचत्वारिंशः सर्गः

[रावणप्रतिबोधनम्]

* आज्ञप्तो [1] रावणेनेत्थं प्रतिकूलं [2] च राजवत्।
अब्रवीत् [3] परुषं वाक्यं [4] निःशङ्को राक्षसाधिपम् ॥ १ ॥

अथ मारीचस्तु उभयथाऽपि निश्चितमरणः लोकवदेव निश्शङ्को मृत्योः रावणस्य पारुष्यं करोति—आज्ञप्त इत्यादि। राजवदिति। प्रकृतार्थे वतिः, तदन्तमव्ययं चेह सर्वत्र इति बहुधा दर्शितम्। राज्ञा रावणेन आज्ञप्तः—कृतप्रत्यवायनियोगः परुषं—अत एव प्रतिकूलं च वाक्यमब्रवीत् ॥ १ ॥

---

* अराजवत्—(आज्ञप्तोऽराजवद्वाक्यं प्रतिकूलं निशाचरः—इति गो. पाठः) यदा रामप्रातिकूल्ये प्रवृत्तः तदैव राजत्वं गतमिति मुनेराशयः। (राजार्हविवेकराहित्याद्वा अराजवदिति कथनम्)। यद्वा राजवत्—राजार्हम्; 'तदर्हम्' इत्यर्हार्थे वतिः। यद्वा राजवदिति पूर्वसर्गोक्तं औद्धत्यं लक्ष्यते—गो. राजवत्—राजयोग्यम्—ति. निश्शङ्कः मारीचः राजवत् परुषं वाक्यं राक्षसाधिपमब्रवीत्—रा.

[1] ऽराजवद्वाक्यं—ङ्. [2] निशाचरः—ङ्. [3] सरुषं—ङ्. [4] मारीचो—ङ्.

केनायमुपदिष्टस्ते * विनाशः पापकर्मणा ।
[1] सपुत्रस्य सराष्ट्रस्य सामात्यस्य, निशाचर! ॥ २ ॥

विनाशः—अपाय इत्यर्थः ॥ २ ॥

† कस्त्वया सुखिना, राजन्! नाभिनन्दति [2] पापकृत् ।
केनेदमुपदिष्टं ते मृत्युद्वार[3]मुपायतः ॥ ३ ॥

सुखिना त्वयेति । अवस्थानमिति शेषः । उपायत इति । उपायव्याजेनेत्यर्थः ॥ ३ ॥

‡ शत्रवस्तव सुव्यक्तं हीनवीर्या [4] निशाचराः ।
इच्छन्ति त्वां विनश्यन्तं उपरुद्धं बलीयसा ॥ ४ ॥
केनेदमुपदिष्टं ते क्षुद्रेणाहित[5]वादिना ।
यस्त्वामिच्छति नश्यन्तं स्वकृतेन, निशाचर! ॥ ५ ॥

स्वकृतेनेति । स्वरचितविनाशोपायेनेत्यर्थः ॥ ५ ॥

वध्याः खलु न [6]हन्यन्ते सचिवास्तव, रावण !
ये त्वामुत्पथमारूढं न निगृह्णन्ति सर्वशः ॥ ६ ॥

न निगृह्णन्तीति । न निवारयन्तीत्यर्थः ॥ ६ ॥

अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः ।
निग्राह्यः सर्वथा सद्भिः [7] न §निग्राह्यो निगृह्यसे ॥ ७ ॥

---

* विनाशः—विनाशोपायः-गो. ति. † अभिनन्दने हेतुः त्वया सुखिनेति । सुखिनं त्वां न सहत इति यावत् । ‡ हीनवीर्याः, अत एव स्वयं त्वामुपरोद्धुमशक्ता निशाचराः बलीयसा रामेण त्वां विनश्यन्तमिच्छन्ति । § निग्राह्याः, त्वमिति शेषः ।

[1] सपुत्रस्य—ङ. [2] निन्दितः-ङ. [3] मपावृतम्—ङ. [4] निशाचर—ज. [5] बुद्धिना-ज. [6] वध्यन्ते—ज. [7] स निग्राह्यो न गृह्यते-ज.

धर्ममर्थं च कामं च यशश्च, जयतां वर!
*स्वामिप्रसादात् सचिवाः प्राप्नुवन्ति, निशाचर!॥ ८॥
विपर्यये तु तत्सर्वं व्यर्थं भवति, रावण!
†व्यसनं स्वामिवैगुण्यात् प्राप्नुवन्तीतरे जनाः॥ ९॥

स्वामिवैगुण्यं- -उत्पथवृत्तिः॥ ९॥

राजमूलो हि धर्मश्च [1]जयश्च, जयतां वर!
तस्मात् सर्वास्ववस्थासु रक्षितव्या नराधिपाः॥ १०॥
राज्यं पालयितुं शक्यं न तीक्ष्णेन, निशाचर!
न [2]चापि प्रतिकूलेन ‡नाविनीतेन, राक्षस!॥ ११॥

तीक्ष्णेनेति। क्रूरदण्डेनेति यावत्। प्रतिकूलेनेति। स्वप्रकृतीनामिति शेषः॥ ११॥

ये तीक्ष्णमन्त्राः सचिवाः भज्यन्ते सह तेन वै।
[3]विषमे तुरगाः शीघ्राः मन्दसारथयो यथा॥ १२॥

तीक्ष्णमन्त्राः—तीक्ष्णोपायप्रयोक्तारः। तेनेति। स्वमन्त्रग्राहिराज्ञेत्यर्थः। मन्दः—मन्दबुद्धिः अकुशलः सारथिः येषां ते मन्दसारथयः यथा तेन सारथिना सह नश्यन्ति तद्वत्॥ १२॥

बहवः साधवो लोके [4]युक्ता धर्ममनुष्ठिताः।
परेषामपराधेन विनष्टाः सपरिच्छदाः॥ १३॥
स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन, रावण!
रक्ष्यमाणाः न वर्धन्ते [5]मेषा गोमायुना यथा॥ १४॥

---

*स्वामिनः—यजमानस्य स्वास्थ्ये सर्वं इष्टं प्राप्येत, स्वामिन एवापाये विपर्ययः सिद्ध एवेत्याशयः। †स्वामिवैगुण्यात न केवलममात्या एव नश्यन्ति, किन्तु तदितरेऽपि जना इत्याह—व्यसनमिति—गो. ‡अविनीतेन—इन्द्रियजयरहितेन, 'विनयो ह्यिन्द्रियजयः' इति कामन्दकः—गो.

[1] यशश्च—ज. [2] चाति—ज. [3] विषमेषु रथाः—ज. [4] युक्तधर्म—ज. [5] मृगा—ज.

अवश्यं विनशिष्यन्ति सर्वे, रावण ! राक्षसाः ।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ १५ ॥

कर्कश इति । क्रूरबुद्धिः कठिनश्चेत्यर्थः ॥ १५ ॥

*तदिदं काकतालीयं घोरमासादितं मया ।
अत्रैव शोचनीयस्त्वं ससैन्यो विनशिष्यसि ॥ १६ ॥
मां निहत्य तु [1]रामोऽसावचिरात् त्वां वधिष्यति ।

इदानीं स्वनाशं प्रति न शोचामि, किन्तु कुलनाशं प्रत्येव शोचामीत्याह—तदिदमित्यादि । येन मया यदिदं घोरं काकतालीयं—अचिन्त्यमरणं प्राप्तं, तेन मया तदिदं प्रति न शोकः क्रियते, 'जातस्य हि ध्रुवो मृत्युः' इति धिया; अपि तु त्वं ससैन्यो विनशिष्यसीति यत्, अत्रैवार्थे त्वं मया शोचनीयोऽसि । रामस्तु मां निहत्य पश्चात् त्वामपि सबान्धवं अचिरादेव वधिष्यतीति ॥ १६ ॥

†अनेन कृतकृत्योऽस्मि म्रिये यदरिणा हतः ॥ १७ ॥

---

* काकतालीयं—यादृच्छिकं घोरं— भयंकरं इदं कृत्यं मयाऽऽसादितम्, ततः नाहं शोच्यः । न हि प्रमादविपन्नः शोच्य इति भावः । ससैन्यस्त्वं विनशिष्यसीत्यत्रैव कृत्ये त्वं मे शोचनीयः । बुद्धिपूर्वकारी त्वमेव हि शोच्य इति भावः । यद्वा ससैन्यो विनशिष्यसीति यत् तदिदं काकतालीयं घोरं त्वयाऽऽसादितम्, अत्रैव मया त्वं शोचनीयः—गो. स्वस्य स्वत एव मरणं सन्निहितं जानन् मारीचः, अत्र त्वं काकतालीयतया हेतुरभूः किल; तत्फलत्वेन ससैन्यो विनशिष्यसि किल, अत्रैव शोचनीयस्त्वमिति वाऽर्थः । अनिरीक्षितत्वमात्राद्वा काकतालीयत्वोक्तिः ।

† तव अरिणा रामेण हतो म्रिय इति यत्, अनेन हेतुना कृतकृत्योऽस्मि । विश्वामित्रयागसंरक्षणप्रभृति खरादिवधान्तातिमानुषचारित्रानुस्मृतिकृतासाधारणमहिमस्फूर्त्या राघवं परमपुरुषं निश्चितवतः मम तत्करप्रापितमरणस्य परमपुरुषार्थत्वादिति भावः । तथोक्तं नृसिंहपुराणे—'रामादपि हि मर्तव्यं मर्तव्यं रावणादपि । उभयोरपि मर्तव्ये वरं रामान्न रावणात्' इति । यद्वा त्वत्तो निरुपाधिकवधात् शत्रुहस्ताद्वधः निःश्रेयसकर इति भावः—गो.

[1] रामश्च न चिरात्—ङ.

दर्शनादेव रामस्य हतं[1] मामुपधारय ।
आत्मानं च हतं विद्धि हत्वा सीतां सबान्धवम् ॥ १८ ॥

उक्त एवार्थः प्रपञ्च्यते—अनेनेत्यादि । यत्—यदा अरिणा—रामेण हतः सन् म्रिये, तदा अनेन मन्मरणेनैव कृतकृत्योऽस्मि, हा सीते हा लक्ष्मणेत्यनेन शब्देन, न प्रकारान्तरेण । अतो मद्वधः प्रथमं निश्चितः । ननु वधं विनाऽपि मत्कृत्यं सुकरं इत्याशङ्क्य नेत्याह—दर्शनादेवेत्यादि । अत्र केचन श्रद्धाजडाः * "अनेन कृतकृत्योऽस्मि" इत्यत्र "रामात् वधेन अहं कृतार्थः स्वर्गे भविष्यामि इत्याह" इति व्याकुर्वन् । केन प्रमाणेन 'रामः परमात्मा, तन्मूलवधः ममानुग्रहः' इति जानीयात्? यदि जानीयात् कथं च विरुणद्ध्यात्मानम्? इति । आत्मशब्दः रावणार्थः, सबान्धवं आत्मानमित्यन्वयः ॥ १७–१८ ॥

आनयिष्यसि चेत् सीतां आश्रमात् † सहितो मया ।
नैव[2] त्वमसि नाहं च नैव लङ्का न राक्षसाः ॥ १९ ॥

आनयिष्यसीति । मम मरणं निश्चितं, दैवात् जीवता मया वा सीतां आश्रमात् आनयिष्यसि चेत् पश्चादपि नाहमस्मि ॥ १९ ॥

निवार्यमाणस्तु मया हितैषिणा
न मृष्यसे वाक्यमिदं, निशाचर!
‡ परेतकल्पा हि गतायुषो नराः
हितं न गृह्णन्ति सुहृद्भिरीरितम् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकचत्वारिंशः सर्गः

---

* महेश्वरतीर्थगोविन्दराजादयः । † मया सहितः—कृतसहाय इति भावः ।
‡ मृत्योरतिसन्निहितत्वे हितं न शृणुयुरिति भावः ।

[1] मां विद्धि रावण–ङ. [2] त्वमपि–ज.

न मृष्यसे—प्रतिकूलबुद्ध्या न परिगृह्णासीत्यर्थः। परेतकल्पाः—मृतप्रायाः। नीर(२०)मानः सर्गः ॥ २० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकचत्वारिंशः सर्गः

द्विचत्वारिंशः सर्गः

[सौवर्णमृगदर्शनम्]

एवमुक्ता तु [1] वचनं मारीचो रावणं [2] ततः।
गच्छावेत्यब्रवीद्दीनः भयाद्रात्रिंचरप्रभोः ॥ १ ॥

अथ बलात् निर्गतस्य कनकमृगभूतमारीचस्य सीताया दर्शनम्। एवमुक्तेत्यादि। गच्छावेति संप्रश्ने लोट् ॥ १ ॥

* दृष्टश्चाहं पुनस्तेन शरचापासिधारिणा।
मद्बधोद्यतशस्त्रेण [3] विनष्टं जीवितं च मे ॥ २ ॥

गच्छन् निजं दुःखं चाह—दृष्टश्चाहमित्यादि। पुनश्चाहं यदाऽद्य दृष्टो भविष्यामि, तदा उच्यमानविशेषेण रामेण मे जीवितं विनष्टमेव; चकारात् तव जीवितं चेत्यन्वाचीयते ॥ २ ॥

न हि रामं पराक्रम्य जीवन् प्रतिनिवर्तते।
† वर्तते प्रतिरूपोऽसौ यमदण्डहतस्य ते ॥ ३ ॥

---

* दीन इत्युक्तं दौरथ्यमुपपादयति—दृष्ट इत्यादिभिः। यद्यहं तेन दृष्टः तदा मे जीवितं विनष्टमित्यन्वयः—गो. † यमदण्डहतस्य ते प्रतिरूपः—सदृशः असौ जनः वर्तते; त्वमेवाहमपि यमदण्डहत इत्यर्थः—गो. रावणवधाङ्कतया स्ववधं पश्यन् मारीच एवमाह।

[1] परुषं—ज. [2] तदा—ङ. [3] निहतं—ज.

चकारेणोक्तार्थमेव व्यक्तीकरोति—न हीत्यादि। रामं प्रति पराक्रम्य इदानीं लोकान्तरे वा भवान् जीवन् भूत्वा न हि प्रतिनिवर्तते। कुत इत्यत आह—वर्तत इत्यादि। यमदण्डहतस्य ते—तव असौ रामः प्रतिरूपः—यमदण्डप्रतिरूपः यतो वर्तते तस्मादेव ॥ ३ ॥

*[1] किं तु शक्यं मया कर्तुं एवं त्वयि दुरात्मनि।
एष गच्छाम्यहं, तात! स्वस्ति तेऽस्तु, निशाचर! ॥ ४ ॥

अथ अशक्यपरिहारं निजानर्थं शोचति—किं त्वित्यादि ॥ ४ ॥

प्रहृष्टस्त्वभवत्तेन वचनेन स[2] रावणः।
परिष्वज्य सुसंश्लिष्टं इदं वचनमब्रवीत् ॥ ५ ॥

तेन वचनेनेति। गच्छामीति वचनेनेत्यर्थः ॥ ५ ॥

†एतत्, [3] शौण्डीर्य! युक्तं ते मच्छन्दवशवर्तिनः।
इदानीमसि मारीचः पूर्वमन्यो निशाचरः ॥ ६ ॥

"एतच्छौण्डीर्य! युक्तं ते मच्छन्दवशवर्तिनः" इति प्राचीनः पाङ्क्तः पाठः। शौण्डीर्यं—वीर्यम्। मत्वर्थीयाजाश्रयतः तद्युक्तोऽपि तथेत्युच्यते। हे शूरेति यावत्। मच्छन्दवशवर्तिनः—मदभिप्राय-वशवर्तिनः ते एतदेव—मद्वचनानुकरणमेव युक्तं—योग्यम्। इदानीं मारीचोऽसि इति। स्वप्रकृतिं प्राप्तोषीत्यर्थः। पूर्वं अन्य इति। आविष्टोन्मत्तादिवदिति शेषः ॥ ६ ॥

---

* उभयोः वधः सन्निहितः। तु—किन्तु त्वयि दुरात्मनि मया किं कर्तुं शक्यमित्यन्वयः। किन्तु शक्यमिति पाठे अन्वयः स्वरस एव। † 'एतच्छौण्डीर्ययुक्तं ते मच्छन्दादिव भाषितम्' इति गो. पाठः। शौण्डीर्ययुक्तमेतत्ते भाषितं मच्छन्दादिव-मदभिप्रायादिव। मद्भाषितसदृशं भाषितमित्यर्थः—गो. मच्छन्दात्—मदृष्टयेति यावत्। मदृष्ट्या एतदेव ते भाषितं शौण्डीर्ययुक्तमिव—इति वा ॥

[1] किं तु—ङ. [2] राक्षसः—ज. [3] शौण्डीर्ययुक्तं ते मच्छन्दादिव भाषितम्—ङ.

आरुह्यतामयं शीघ्रं [1]रथो रत्नविभूषितः ।
मया सह [2]तथा युक्तः पिशाचवदनैः खरैः ॥ ७ ॥
प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि ।
तां शून्ये प्रसभं सीतां आनयिष्यामि मैथिलीम् [3] ॥ ८ ॥
ततो रावणमारीचौ * विमानमिव तं रथम् ।
[4]आरुह्य ययतुः शीघ्रं तस्मात् आश्रममण्डलात् ॥ ९ ॥

तस्मादाश्रममण्डलात् इति । मारीचाश्रममण्डलादित्यर्थः ॥ ९ ॥

तथैव तत्र पश्यन्तौ †पत्तनानि वनानि च ।
गिरींश्च सरितः सर्वाः राष्ट्राणि †[5]नगराणि च ॥ १० ॥
समेत्य दण्डकारण्यं राघवस्याश्रमं ततः ।
ददर्श सहमारीचः रावणो राक्षसाधिपः ॥ ११ ॥

पत्तननगरयोः अराजधानीराजधानीत्वेन भेदः ॥ १०-११ ॥

---

* विमानमिव स्थितं तं रथं, विमानं-आकाशगमिति वा । † नगरपत्तनादिलक्षणमुक्तं वास्तुशास्त्रे—"ग्रामश्च नगरं चैव पत्तनं खर्वटं पुरम् । खेटकं कुसुमं चैव शिबिरं राजवासिकम् । सेनामुखमिति ज्ञेयं दशधा कीर्तितं बुधैः । विप्राणां च सशूद्राणां वासो **ग्राम** इतीरितः । स एव विप्रैराकीर्णस्त्वग्रहार इति स्मृतः । कुटुम्बिभिर्दशैरेकोनत्रिंशद्भिश्च समन्वितः । अनेकनारीसम्बद्धं नानाशिल्पिजनैर्वृतम् । क्रयविक्रयकैः कीर्णं सर्वदेवैः समन्वितम् । **नगरं** त्विति विख्यातं **पत्तनं** शृणु साम्प्रतम् । द्वीपान्तरागतद्रव्यक्रयविक्रयकैर्युतम् । **पत्तनं** त्वब्धितीरे स्यात् तयोर्मिश्रं तु **खर्वटम्** । क्रयविक्रयकैर्युक्तं नानाजातिसमन्वितम् । तन्तुवायसमायुक्तं **तत्पुरं** त्विति कथ्यते । एतैरधिष्ठितं यत्तत् **खेटकं** परिकीर्तितम् । तेषामेकान्तरेष्वेव वासः **कुसुममुच्यते** " इत्यादिना—**गो.**

[1] खगो—**ज.** [2] रथो—**ज.** [3] एतदनन्तरं—[4] ततस्तथेत्युवाचैनं रावणं ताटकासुतः' इत्यधिकं—**ज.** [4] आरुह्यायतुः—**ज.** [5] विविधानि च—**ङ.**

अवतीर्य रथात् तस्मात् [1]ततः काञ्चनभूषणात् ।
हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत् ॥ १२ ॥

[2]एतद्रामाश्रमपदं दृश्यते कदलीवृतम् ।
क्रियतां तत्, सखे! शीघ्रं यदर्थं वयमागताः ॥ १३ ॥

स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा ।
मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह ॥ १४ ॥

*स तु रूपं समास्थाय महदद्भुतदर्शनम् ।
मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः ॥ १५ ॥

[3]रक्तपद्मोत्पलमुखः [4]इन्द्रनीलोत्पलश्रवाः ।
किञ्चिद्[5]भ्युन्नतग्रीवः इन्द्रनील[6]दलाधरः ॥ १६ ॥

†[7]कुन्देन्दुवज्रसङ्काशं उदरं चास्य भास्वरम् ।
[8]मधूकनिभपार्श्वश्च [9]कञ्जकिञ्जल्कसंनिभः ॥ १७ ॥

वैडूर्यसङ्काशखुरः तनुजङ्घः सुसंहतः ।
इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं [10]विराजता ॥ १८ ॥

मनोहरः स्निग्धवर्णः रत्नैः नानाविधैर्वृतः ।
क्षणेन राक्षसो जातः मृगः परमशोभनः ॥ १९ ॥

---

* संग्रहेणोक्तं विवृणोति—स त्वित्यादिना—गो. स तु राक्षसः महदद्भुतदर्शनं रूपं समास्थाय मणिप्रवरशृङ्गाग्रः परमशोभनो मृगः क्षणेन जात इत्यन्वयः॥

† अस्य मृगरूपस्य कुन्देन्दुसंकाशं उदरमासीत् । तादृशोदर इति विपरिणतव्यम्, अन्यथा पूर्वापरविरोधः—गो.

[1] तप्तकाञ्चन—ङ. [2] एतत्तदाश्रम—ङ. [3] रत्ननीलोत्पल—ङ. [4] इन्द्रनीलोपम—ङ. [5] त्युन्नत—ज. [6] तलोदरः—ङ. निभोदरः—ज. [7] इदमर्धं नास्ति—ज. [8] मधूर—ङ. [9] पद्म—ङ. [10] विराजितः—ज.

मणिप्रवराकारं—इन्द्रनीलरत्नाकारं शृङ्गं यस्य स तथा। मणिशब्दः केवल इन्द्रनीले कविसमयप्रयोगः। क्वचित् सिता क्वचित् असिता च मुखाकृतिः—मुखशोभा यस्य स तथा। मधूक पुष्पनिभे पार्श्वे यस्य स तथा। कञ्जं—पद्मं तस्य किञ्जल्कः—केसरः तत्संनिभः तथा॥ १५-१९॥

वनं प्रज्वलयन् रम्यं रामाश्रमपदं च तत्।
मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः॥ २०॥
प्रलोभनार्थं वैदेह्याः नानाधातुविचित्रितम्।
[1] विचरन् गच्छते तस्मात् शाद्वलानि समन्ततः॥ २१॥

प्रज्वलयन्—दीपयन्॥ २०-२१॥

रूप्यैः बिन्दुशतैश्चित्रः भूत्वा स प्रियदर्शनः।
विटपीनां किसलयान् [2] भक्ताऽदन् विचचार ह॥ २२॥

भक्तेति। 'जान्तनशां विभाषा' इत्यनुनासिकलोपः॥ २२॥

* कदलीगृहकं गत्वा कर्णिकारान् इतस्ततः।
समाश्रयन् [3] मन्दगतिः † सीतासन्दर्शनं तथा॥ २३॥
राजीवचित्रपृष्ठः सः विरराज [4] महामृगः।
रामाश्रमपदाभ्याशे विचचार यथासुखम्॥ २४॥

कदलीगृहं कदलीवनान्तर्गतसूक्ष्मगृहम्। सीतासंदर्शनमपेक्ष्य इतस्ततो मन्दगतिं समाश्रयन्॥ २३-२४॥

पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः।
गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते॥ २५॥

---

* कदलीगृहकं—कृत्रिमकदलीमयगृहं—गो. † सीता संदृश्यतेऽस्मिन्निति सीतासन्दर्शनं, अधिकरणे ल्युट्, सीतासन्दर्शनयोग्यस्थानं समाश्रयन्—गो.

[1] विचरंश्च वनं सर्वं—ङ. [2] भक्त्वा—ङ. [3] मन्दगतिं—ज. [4] मृगोत्तमः—ज.

विक्रीडंश्च क्वचिद्भूमौ पुनरेव निषीदति ।
आश्रमद्वारमागम्य मृगयूथानि गच्छति ॥ २६ ॥
मृगयूथैरनुगतः पुनरेव निवर्तते ।
सीतादर्शनमाकांक्षन् राक्षसो मृगतां गतः ॥ २७ ॥
परिभ्रमति चित्राणि मण्डलान्यभिनिष्पतन्[1] ॥ २८ ॥

अभिनिष्पतन्—वल्गमान इति यावत् ॥ २८ ॥

समुद्वीक्ष्य च तं सर्वे मृगा ह्यन्ये वनेचराः ।
उपागम्य *समाघ्राय विद्रवन्ति दिशो दश ॥ २९ ॥

समाघ्राय विद्रवन्ति इति । अमृगत्वनिश्चयादिति शेषः ॥ २९ ॥

राक्षसः सोऽपि तान् वन्यान् मृगान् मृगवधे रतः ।
प्रच्छादनार्थं †भावस्य न भक्षयति संस्पृशन् ॥ ३० ॥

भावस्य प्रच्छादनार्थमिति । तत्प्रयोजनमुद्दिश्यैव संस्पृशन्नपि मृगान् न भक्षयति ॥ ३० ॥

तस्मिन्नेव ततः काले वैदेही शुभलोचना ।
कुसुमापचयव्यग्रा पादपानभ्यवर्तत ॥ ३१ ॥
‡कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ।
कुसुमान्यपचिन्वन्ती चचार रुचिरानना ॥ ३२ ॥

---

* 'गावो घ्राणेन पश्यन्ति' । † भावस्य—स्वकीयभावस्य । ‡ अत्र अशोक-चूतकुसुमानामपचयोक्त्या शिशिरान्तकालोऽयम् । 'गन्धवान् सुरभिर्मासः जातपुष्प-फलद्रुमः' इति, 'सन्तापयति सौमित्रे शूरश्चत्रवनानिलः' इति च पम्पातीरे रामोक्तेश्च । किञ्चाग्रे द्वादशमासोत्तरं यदेषा मां नाङ्गीकरोति तदैनां हन्मीति रावणप्रतिज्ञा । ततो हनूमद्दर्शनकाले च तं प्रति सीतावाक्यम्—'वर्तते दशमो मासः द्वौ तु शेषौ प्लवङ्गम' इति सङ्गच्छते । माघशुक्लाष्टम्यां हरणे हि मार्गशुक्लाष्टम्यां, ततोऽवोगेव वा दशमसमाप्त्या तस्य वर्तमानत्वोक्तिरसङ्गतैव स्यात्, तच्छुक्लाक्षान्ते हनुमतस्तद्दर्शनात्-ति.

[1] एतदनन्तरं—समीपे मृगयूथस्य विस्मितानि विशेषतः—इत्यधिकं-ङ

अनर्हाऽरण्यवासस्य सा तं रत्नमयं मृगम् ।
मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना ॥ ३३ ॥
सा तं रुचिर[1]दन्तोष्ठी रूप्यधातुतनूरुहम् ।
विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत ॥ ३४ ॥
स च तां रामदयितां पश्यन् मायामयो मृगः ।
विचचार पुनश्चित्रं दीपयन्निव तद्वनम् ॥ ३५ ॥
अदृष्टपूर्वं तं दृष्ट्वा नानारत्नमयं मृगम् ।
विस्मयं परमं सीता जगाम जनकात्मजा ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्विचत्वारिंशः सर्गः

षण्ड(३६)मानः सर्गः ॥ ३६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्विचत्वारिंशः सर्गः

त्रिचत्वारिंशः सर्गः

[लक्ष्मणशङ्का]

सा तं संप्रेक्ष्य सुश्रोणी कुसुमान्यपचिन्वती ।
हैमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितम् ॥ १ ॥
प्रहृष्टा चानवद्याङ्गी मृष्टहाटकवर्णिनी ।
भर्तारमभिचक्रन्द लक्ष्मणं चापि * सायुधम्[2] ॥ २ ॥

---

* सायुधमित्यनेन आयुधेन सहागन्तव्यमित्याहूतवतीति गम्यते–गो. सदा रामसीतारक्षणतत्परत्वं वा गम्यते'।

[1] दन्तोष्ठं–ज. [2] एतदनन्तरं—आहूयाहूय च पुनः तं मृगं साधु वीक्षते । आगच्छागच्छ शीघ्रं वै आर्यपुत्र सहानुजः—इत्यधिकं–ङ. ज.

अथ सीतया प्रदर्शितं मायामृगं मायामृगत्वेन निश्चित्यैव ग्रहो वा वधो वा भविष्यतीति सीताचित्तानुवर्तनाय रामः प्रवर्तते । सा तमित्यादि । चक्रन्द—'कदि-क्रदि-क्लदि आह्वाने रोदने च', आहूतवती ॥ १-२ ॥

तावाहूतौ नरव्याघ्रौ वैदेह्या रामलक्ष्मणौ ।
वीक्षमाणौ तु तं देशं तदा ददृशतुर्मृगम् ॥ ३ ॥

तावाहूताविति । तया सीतयेत्यनुषङ्गः ॥ ३ ॥

शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् ।
तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥ ४ ॥
चरन्तो मृगयां हृष्टाः पापेनोपाधिना वने ।
अनेन निहताः, [1]राजन् ! राजानः [2]कामरूपिणा ॥ ५ ॥

मृगयां चरन्तः इति । मृगयार्थं पर्यटन्त इत्यर्थः । उपाधिनेति । मृगरूपोपाधिनेत्यर्थः ॥ ५ ॥

[3]अस्य [4]मायाविदो मायामृगरूपमिदं कृतम् ।
[5]भानुमत्, पुरुषव्याघ्र ! *गन्धर्वपुरसंनिभम् ॥ ६ ॥

मायाविदः इति षष्ठी । भानुमत्—ज्योतिष्मत् ॥ ६ ॥

मृगो ह्येवंविधो रत्नविचित्रो नास्ति, राघव !
जगत्यां, जगतीनाथ ! मायैषा हि न संशयः ॥ ७ ॥

नास्तीति । एवमुपादानकमृगासंभवादिति भावः ॥ ७ ॥

---

* गन्धर्वपुरवदापातरमणीयं—ति. गन्धर्वपुरं—नानाविधविस्मयनीयाकारसंस्थानं क्षणभङ्गुरमभ्रं ; तत्सन्निभं—तद्वद्विस्मयनीयं—गो.

[1] राम—ज्ञ. [2] पापरूपिणा—ङ. [3] मन्ये—ङ. [4] मायाविनो—ङ. [5] सुमते—ङ.

एवं ब्रुवाणं [1] काकुत्स्थं प्रतिवार्य शुचिस्मिता।
उवाच सीता संहृष्टा * [2] छद्मना [3] हृतचेतना ॥ ८ ॥

प्रतिवार्येति। अयं न राक्षसः, अपि तु चित्रमृग एव, अतो नैतद्ग्रहणविघ्नः त्वया कार्यः इत्युक्तेत्यर्थः। छद्मना—वञ्चनेन ॥ ८ ॥

आर्यपुत्राभिरामोऽसौ मृगो हरति मे मनः।
आनयैनं, महाबाहो! क्रीडार्थं नो भविष्यति ॥ ९ ॥

नः—अस्माकम् ॥ ९ ॥

इहाश्रमपदेऽस्माकं बहवः पुण्यदर्शनाः।
मृगाश्चरन्ति सहिताः सृमराश्चमरास्तथा ॥ १० ॥

सृमरचमरौ कृष्णशुक्लपुच्छचमरमृगौ ॥ १० ॥

ऋक्षाः पृषतसंघाश्च वानराः किन्नरास्तथा।
[4] विचरन्ति, महाबाहो! रूपश्रेष्ठाः [5] मनोहराः ॥ ११ ॥
न चास्य सदृशः, राजन्! दृष्टपूर्वो मृगः पुरा।
तेजसा† क्षमया दीप्त्या यथाऽयं मृगसत्तमः ॥ १२ ॥

तेजसा—विचित्रगतिसामर्थ्येन। क्षमया—सौम्यभावेन। दीप्त्या—देहप्रभया ॥ १२ ॥

---

* अत्र हेतुः—चर्मणेति—गो तादृशविचित्राजिनेनेति यावत्। परन्त्वत्र 'क्रीडार्थं नो भविष्यति' इत्यनुपदोक्तिः विरुद्धा। अथवा चर्मणा—इत्यनेन वैचित्र्यमात्रमुक्तं, न तु चर्मापेक्षा।

† इतरमृगवत् नास्य अत्यन्तसंभ्रमो दृश्यत इति भावः।

[1] सौमित्रिं—ङ. [2] चर्मणा, मृगेण—ङ. [3] हृतलोचना—ङ. [4] विहरन्ति—ज. महाबलाः—ज. [6] न चान्यः—ज.

नानावर्णविचित्राङ्गः [1]रत्नबिन्दुसमाचितः ।
द्योतयन् वन[2]मव्यग्रं शोभते शशिसंनिभः ॥ १३ ॥

शशिसन्निभः इत्यनेन आह्लादकत्वम् ॥ १३ ॥

अहो ! रूपं अहो ! लक्ष्मीः स्वरसंपच्च शोभना ।
मृगोऽद्भुतो विचित्राङ्गः हृदयं हरतीव मे ॥ १४ ॥

स्वरसंपत्–ध्वनिसमृद्धिः ॥ १४ ॥

यदि ग्रहणमभ्येति जीवन्नेव मृगस्तव ।
आश्चर्यभूतं भवति विस्मयं जनयिष्यति ॥ १५ ॥

तव ग्रहणं–त्वत्कर्तृकग्रहणमित्यर्थः ॥ १५ ॥

समाप्तवनवासानां राज्यस्थानां च नः पुनः ।
अन्तःपुरविभूषार्थः मृग एष भविष्यति ॥ १६ ॥
भरतस्यार्यपुत्रस्य श्वश्रूणां मम च, प्रभो !
मृगरूपमिदं [3]व्यक्तं विस्मयं जनयिष्यति ॥ १७ ॥
जीवन्न यदि तेऽभ्येति ग्रहणं मृगसत्तमः ।
अजिनं, नरशार्दूल ! रुचिरं मे भविष्यति ॥ १८ ॥

जीवन् ग्रहणं नाभ्येतीति हतोऽपि वा यदि ग्रहणं प्राप्नोति, तदाऽपि मे प्रयोजनमस्तीत्याह–अजिनमित्यादि ॥ १८ ॥

निहतस्यास्य सत्त्वस्य जाम्बूनदमयत्वचि ।
*शष्पबृस्यां विनीतायां इच्छाम्यहमुपासितुम् ॥ १९ ॥

---

* शष्पबृस्यां–बालतृणैः कृतायां बृस्यां–गो.

[1] रत्नभूतो समाचितः–ज. [2] मव्यग्रः–ङ. [3] दिव्यं–ज.

शष्पोपरि प्रतिष्ठापिता बृसी–तापसासनं–पर्णशय्या ; तस्या-मित्यर्थः । विनीतायां–प्रसारितायाम् । उपासितुं–त्वत्समीपे अवस्थातु-मित्यर्थः ॥ १९ ॥

*कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् ।
वपुषा त्वस्य सत्त्वस्य विस्मयो जनितो मम ॥ २० ॥

कामवृत्तमिति । कैकेय्यादिवत् स्वकामप्रयोजनाय तन्नियोजन-रूपमिदं कृत्यं घोरं स्त्रीणां असदृशं–अनुचितमिति यद्यपि मतं–ज्ञातम् ; अथापि अस्य स्वप्नविस्मयः मम जनित इति कौतुकनिवृत्त्यर्थं अनुचितमपि करोमीत्यर्थः ॥ २० ॥

†तेन काञ्चनरोम्णा तु मणिप्रवरशृङ्गिणा ।
तरुणादित्यवर्णेन ‡नक्षत्रपथवर्चसा ॥ २१ ॥
§बभूव राघवस्यापि मनो विस्मयमागतम् ।

नक्षत्रपथवर्चसेति । नक्षत्रसदृशनानाबिन्दूपलक्षितत्वात् । नक्षत्रपथः–छायापथः । राघवस्यापीति । संभावितासंभावितवस्तु-तत्त्वनिरूपणकुशलबुद्धेरपीत्यर्थः । मनो विस्मयमागतमिति । भवितव्य-तायाः प्राबल्यादिति शेषः ॥ २१ ॥

---

* आनयेति वक्तुमप्ययुक्तम् । अतः तवापि कुतूहलमस्ति चेत् तथा क्रियतामिति भावः । अनेन पूर्वं आनयेति प्रमादादुक्तस्य क्षमापणं कृतम्–गो. अथवा स्त्रीणां कार्यसाधनाय प्रकटीक्रियमाणः विनयः अत्र प्रदर्शितः । †न केवलं स्त्रीपारवश्येन कृतवान् ; किन्तु स्वविस्मयेनापीत्याह—तेनेत्यादिना–गो. ‡नक्षत्रसदृशबिन्दूप-लक्षितत्वात् तत्तुल्यवर्चसा–गो. §मनः विस्मयं आगतं–प्राप्तं बभूव ।

एवं सीतावचः श्रुत्वा तं दृष्ट्वा मृगमद्भुतम् ॥ २२ ॥
लोभितस्तेन रूपेण सीतया च प्रचोदितः ।
उवाच राघवो हृष्टः भ्रातरं लक्ष्मणं वचः ॥ २३ ॥

तदेव दर्शितं लोभित इति ॥ २३ ॥

पश्य, लक्ष्मण ! वैदेह्याः स्पृहां [1]मृगगतामिमाम् ।
रूपश्रेष्ठतया ह्येषः मृगोऽद्य *न भविष्यति ॥ २४ ॥

रूपश्रेष्ठतया—रूपेण—अलौकिकविचित्रस्वरूपेण श्रेष्ठः—सर्वश्रेष्ठः तेनैव हेतुना । अद्य अनुभूयमान एष तु मृगो न भविष्यति । प्रायेण मृगत्वमत्र न संभावितमित्यर्थः ॥ २४ ॥

न वने नन्दनोद्देशे न चैत्ररथसंश्रये ।
कुतः पृथिव्यां, सौमित्रे ! योऽस्य कश्चित् समो मृगः ॥

तदेव दर्शयति—न वन इत्यादि । नन्दन इत्युद्देशः कीर्तनं यस्य स तथा । चैत्ररथसंश्रये—तदाख्यवनेऽपि न । पृथिव्यामेव तत्सदृशमृगो न समस्तीति ॥ २५ ॥

†प्रतिलोमानुलोमाश्च रुचिराः रोमराजयः ।
शोभन्ते मृगमाश्रित्य चित्राः कनकबिन्दुभिः ॥ २६ ॥

उक्त एवार्थः प्रपञ्च्यते—प्रतिलोमेत्यादि । कनकबिन्दुभिः चित्राः रोमराजयः इत्यन्वयः ॥ २६ ॥

---

*न भविष्यति—न जीविष्यति—ति. न भविष्यति—न सेत्स्यति, दुर्लभ इत्यर्थः—गो. † प्रतिलोमाः—तिर्यग्भूताः, अनुलोमाः—अनुकूलाः—गो.

[1] उल्लसिता—ज.

पश्यास्य जृम्भमाणस्य दीप्तामग्निशिखोपमाम् ।
जिह्वां मुखान्निःसरन्तीं मेघादिव शतह्रदाम् ॥ २७ ॥

निःसरन्तीं–प्रवर्तमानाम् । शतह्रदां–विद्युतम् ॥ २७ ॥

*[1] मसारगल्लर्कमुखः शङ्खमुक्तानिभोदरः ।
कस्य[2] नामाभिरूपोऽसौ न मनो लोभयेन्मृगः ? ॥ २८ ॥

कस्य रूपमिदं दृष्ट्वा जाम्बूनद[3]मयं, प्रभो !
नानारत्नमयं [4] दिव्यं न मनो विस्मयं व्रजेत् ? ॥ २९ ॥

[5] किं पुनर्मैथिली सीता बाला नारी न विस्मयेत् ? ।
† मांसहेतोरपि मृगान् विहारार्थं च धन्विनः ।
घ्नन्ति, लक्ष्मण ! राजानः मृगयायां महावने ॥ ३० ॥

अथ रामोऽपि मृगत्वसंभावनयैवाह —मांसहेतोरित्यादि । धन्विनो राजानः मृगयायां मांसहेतोरपि मृगान् घ्नन्ति, विहारार्थं च ॥ ३० ॥

धनानि व्यवसायेन विचीयन्ते महावने ।
धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ ३१ ॥

अपि च राजभिः धनानि व्यवसायेन मृगययोद्योगेन विचीयन्ते–संगृह्यन्ते । ननु कुतो वने धनसंग्रहप्रसक्तिः इत्यत्राह —धातव इत्यादि ॥

---

* मसारः–इन्द्रनील. । गल्लर्कः–चषकः, 'गल्लर्कश्चानुनर्षश्च तर्षकश्चषकः स्मृतः' इति हलायुधः ; इन्द्रनीलनेमिश्चषकाकारमुखसंपुटः–गो. † मांसहेतोरपि विनोदार्थं च राजानो मृगान् घ्नन्ति, किं पुनरेवंविधविचित्रवस्तुलाभहेतोरिति भावः–गो.

[1] बालार्कामुखः शंखमुक्तामणिमनोहरः–ङ. [2] नामानुरूप्यो–ज्ञ.
[3] मयप्रभम् ज्ञ. [4] रम्य–ङ. [5] इदमर्धं कुण्डलितं–ङ.

* तत्सारमखिलं नृणां धनं निचयवर्धनम् ।
मनसा चिन्तितं सर्वं यथा [1] शुक्रमतं तथा ! ॥ ३२ ॥

नृणां—राजादिधनिनां निचयवर्धनं—कोशवर्धनं धनं तत्सारं भवति । जानपदधनादपि वन्यधनं सारं भवति—अतिप्रशस्तं भवतीत्यर्थः । अत्रांशे दृष्टान्तः—मनसेत्यादि । शुक्रं-ब्रह्म । "सपर्यगात् शुक्रं अकायं" इत्याद्युपनिषदतिप्रसिद्धश्चायमर्थः । शुक्रमतं—ब्रह्मलोकाभिमतं, मनसा चिन्तितं-संकल्पमात्रसिद्धम् । सर्वं वस्तु भोग्यवस्तुमात्रं यथा सर्वस्मात् सारतरं तद्वदित्यर्थः । 'स यदि . . यं यं कामं कामयते संकल्पादेवास्य समुत्तिष्ठन्ति' इति सुप्रसिद्धं संकल्पमात्रसुलभत्वं मुक्तभोग्यवस्तुनः ॥ ३२ ॥

† अर्थी येनार्थकृत्येन संव्रजत्यविचारयन् ।
तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्यञ्च, लक्ष्मण ! ॥ ३३ ॥

एवं अर्थार्थमपि प्रवृत्तिं राज्ञामुपवर्ण्य अर्थपुरुषार्थस्य लक्षणं प्रकृते अर्थधिया प्रवृत्तिशेषतया उपदिशति—अर्थी येनेत्यादि । अर्थापेक्षी पुमान् येन अर्थकृत्येन अर्थनिमित्तेन कर्मणा अविचारयन् तत्सौन्दर्यात् बलादिव संव्रजति तादृशमर्थं—वस्त्वेव अर्थशास्त्रज्ञाः अर्थं—अर्थपदार्थं प्राहुः ॥ ३३ ॥

---

* अखिलं धनं नृणां निचयवर्धनं—कोशवर्धनं भवेत् । किमिव—शुक्रस्य मनसा चिन्तितं—संकल्पितं वस्तुजातं तथैवाविचार्य निचयवर्धनं यथा, तद्वदित्यर्थः । यद्वा नृणां मनसा चिन्तितं—वृथामनोरथकल्पितं सर्वं धनं यथा शुक्रस्य कोशं पूरयति तथेत्यर्थः । तदुक्तमुद्योगपर्वणि 'मनुष्येभ्यः समादत्ते शुक्रश्चिन्तार्जितं धनम्' इति-गो. शुक्रस्य—दैत्याचार्यस्येव त्यक्तप्राक्तनबन्धस्य-रा. इदं नीतिशास्त्रविदः शुक्रस्य मतमित्यपि केचित् । † अस्त्वेवं, अथापि विचार्य कार्यमिति चेत् तत्राह—अर्थीति-गो.

[1] शुक्रस्य लक्ष्मण-ङ. ज.

एतस्य मृगरत्नस्य पार्श्वे काञ्चनत्वचि ।
उपवेक्ष्यति वैदेही मया सह सुमध्यमा ॥ ३४ ॥

यदेवमतः प्रकृते अर्थविषया प्रवृत्तिर्भविष्यतीत्याह—एतस्येत्यादि ॥ ३४ ॥

न *कादली न प्रियकी न प्रवेणी न चाविकी ।
भवेदेतस्य सदृशी [1]स्पर्शनेनेति मे मतिः ॥ ३५ ॥

एतन्मृगत्वचः पार्श्वत्वमेव दर्शयति—न कादलीत्यादि । मृदूच्चकर्बुरनीलरोमा मृगविशेषः कदली—வாலி மான் । कदल्याः त्वक् कादली । प्रियकी—மயிர் மான் । 'प्रियकी रोमभिर्युक्ता मृदूच्चमसृणैर्घनैः ।" प्रवेणी अजविशेषः । आविकी—ऊर्णायुः—अविः । तस्याः त्वक् आविकी—प्रवेणिशब्दतश्च तत्त्वक् । एतस्य मृगस्य त्वचः कादली न सदृशी, तथा प्रियकी, प्रवेणी, आविकी च न सदृशीति मे मतिरिति योजना ॥ ३५ ॥

एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः ।
उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ ॥ ३६ ॥

यश्च दिव्यो नभश्चर इति । खेचरः अप्राकृतो मृगः इत्यर्थः । कौ तौ मृगौ दिव्यौ कथितौ इत्यतः—तारामृगमहीमृगाविति । तारारूपो मृगशिराः, महीमृगस्त्वसौ ॥ ३६ ॥

यदि वाऽयं तथा यन्मां [2]भवेद्वदसि, लक्ष्मण !
मायैषा राक्षसस्येति कर्तव्योऽस्य वधो मया ॥ ३७ ॥

---

* 'कदली तु बिले शेते मृदुसूक्ष्मोच्चकर्बुरैः । नीलाग्रैर्लोमभिर्युक्ता सा विंशत्यङ्गुलायता । प्रियकी लोमभिर्युक्ता मृदुश्च मसृणैर्घनैः'—गो.

[1] स्पर्शेऽनेनेति—ज्ञ. [2] भवान् वदति—ङ.

अथ लक्ष्मणमतमङ्गीकृत्यापि प्रवृत्तिमाह—यदि वेत्यादि। हे लक्ष्मण! राक्षसस्य मायैवैषा, न मृगः इति यन्मां प्रति वदसि, यदि वा अयं तथा भवेत्—त्वदुच्यमानप्रकारो भवेत्, अथापि अस्य वधो मया कर्तव्य इति प्रवृत्तिः उभयथाऽपि प्राप्तैवेत्यर्थः ॥ ३७ ॥

एतेन हि नृशंसेन [1] मारीचेनाकृतात्मना।
वने विचरता पूर्वं हिंसिता मुनिपुङ्गवाः ॥ ३८ ॥
* उत्थाय [2] बहवो येन मृगयायां जनाधिपाः।
निहताः परमेष्वासाः तस्माद्बध्यस्त्वयं मृगः ॥ ३९ ॥

उत्थाय—उत्प्लुत्य ॥ ३९ ॥

पुरस्तादिह वातापिः परिभूय तपस्विनः।
उदरस्थो द्विजान् हन्ति † स्वगर्भोऽश्वतरीमिव ॥ ४० ॥

स्वगर्भोऽश्वतरीमिवेति। अश्वतरी स्वगर्भेण म्रियत इति प्रसिद्धिः। ययाऽश्वो न जीवति सा अश्वतरीति। यया कयाचन व्युत्पत्त्या वृश्चिकोऽप्युच्यते ॥ ४० ॥

‡ स कदाचित् [3] चिराल्लोभात् आससाद महामुनिम्।
अगस्त्यं तेजसा युक्तं भक्षार्थं तस्य बभूव ह ॥ ४१ ॥

---

* उत्थाय—वञ्चनया हठात् प्राप्येति यावत्। † अश्वतरो नाम गर्दभादश्वायामुत्पन्न इति वृत्तिकारः—गो. अश्वतरी गर्दभादश्वायामुत्पन्नेति तीर्थः। कर्कटीति परे। वृश्चिक इति कतकः। अत्र आद्यव्याख्यैव ज्यायसी; तस्या गर्भस्य उदरपाटनं विना न निःसरणमिति सर्वजनप्रसिद्धेः—ति. अत्र तिलकोक्तिरेव यथार्था। ‡ अस्मिन्नेव काण्डे ११ सर्गे वर्णितेयं कथा ॥

[1] मारीचेन दुरात्मना—ङ. [2] बहवोऽनेन—ङ. [3] चिरालोके—ज.

समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तं ।
उत्स्मयित्वा तु भगवान् वातापिमिदमब्रवीत् ॥ ४२ ॥

समुत्थाने—श्राद्धान्ते । तद्रूपं—राक्षसं रूपं । उत्स्मयित्वा—ईषत् स्मित्वा ॥ ४२ ॥

त्वयाऽविगण्य, वातापे! परिभूताः [1] स्वतेजसा ।
जीवलोके द्विजश्रेष्ठाः तस्मादसि * जरां गतः ॥ ४३ ॥

अविगण्य—अविचार्य, पापमिति शेषः । स्वतेजसा—स्वबलेन । तस्मादिति । द्विजपरिभवजपापेनेत्यर्थः ॥ ४३ ॥

[2] तद्रक्षोऽपि भवेदेव वातापिरिव, लक्ष्मण !
मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियम् ॥ ४४ ॥
भवेद्धतोऽयं वातापिः अगस्त्येनेव मा गतः ।

तद्रक्षोऽपीति । मारीचाख्यरक्षोऽपीत्यर्थः । मद्विधं य इति । मारीच इत्यर्थः । अगस्त्येनेव मा गत इति । मा—मां गतः अयं मारीचोऽपि, वातापिः अगस्त्येनेव मया हतो भविष्यतीत्यर्थः । ४४ ॥

इह त्वं भव संनद्धः यन्त्रितो रक्ष मैथिलीम् । ४५ ॥
† अस्यामायत्तमस्माकं यत्कृत्यं, रघुनन्दन !

सन्नद्धः—धनुःकवचादिसंनाहयुक्तः । यन्त्रितः—व्याक्षेपान्तर-रहितः । अस्माकं यत् कृत्यं—कर्तव्यं आवश्यकं तदस्यामायत्तं, तदस्यां-एतद्रक्षणविषये आयत्तं—स्थितम् ॥ ४५ ॥

---

* जरां गतोऽसि-जीर्णोऽसि । † अस्माकं यत् कृत्यमावश्यकं, तत्सर्वमस्यां आयत्तं—एतद्रक्षणप्रधानमित्यर्थः । एतन्मूलतया रावणवधादिकं कर्तव्यम् ; इयं हि पूर्वं वेदवतीभावे तथा संकल्पितवतीत्यपि सूचयति—गो. अस्या अपाये अनन्तरमस्माकं कर्तव्यमेव न किञ्चिदस्ति तां विना मम जीवनमेव असंभवतीति यावत् ॥

[1] च देवताः-ङ. [2] तदेतन्न भवेद्रक्ष-ङ. तद्रक्षो न भवेदेव—ज्ञ.

अहमेनं वधिष्यामि ग्रहीष्याम्यपि वा मृगम् ॥ ४६ ॥
यावद्गच्छामि, सौमित्रे! मृग[1]मानयितुं द्रुतम् ।

यावद्गच्छामीति । 'यावत्पुरे'ति लट्, गमिष्यामीति यावत् । आनयितुमिति । आनेतुमिति यावत् ॥ ४६ ॥

पश्य, लक्ष्मण! [2]वैदेहीं मृगत्वचि [*3]गतस्पृहाम् ॥४७॥
त्वचा प्रधानया ह्येषः मृगोऽद्य न भविष्यति ।
अप्रमत्तेन ते भाव्यं आश्रमस्थेन [†]सीतया ॥ ४८ ॥

गमनावश्यकबीजं दर्शयति — पश्येत्यादि । त्वचा प्रधानयेति । प्रधानप्रयोजनभूतयेत्यर्थः । ततश्च नायं जीवग्राहं सुशक्यग्रहः इत्युक्तं भवति । ते भाव्यमिति । त्वया भवितव्यमित्यर्थः ॥ ४७-४८ ॥

यावत्पृषतमेकेन सायकेन निहन्म्यहम् ।
हत्वैतच्चर्म चादाय शीघ्रमेष्यामि, लक्ष्मण ॥ ४९ ॥
प्रदक्षिणेनातिबलेन पक्षिणा
[‡]जटायुषा बुद्धिमता च, लक्ष्मण ।
भवाप्रमत्तः [4]परिगृह्य मैथिलीं
प्रतिक्षणं सर्वत एव शङ्कितः ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे त्रिचत्वारिंशः सर्गः

प्रदक्षिणेन—समर्थेन । सर्वत एवेति । सर्वदिग्वर्तिरक्षोऽसुरादिभ्य इत्यर्थः । नर्म(५०)मानः सर्गः ॥ ५० ॥

इति श्रीमद्रामायणामृतकतकटीकायां आरण्यकाण्डे त्रिचत्वारिंशः सर्गः

---

* गतस्पृहां—प्राप्तस्पृहां—गो. एवमस्मद्वादेन निराशामिति वा । † सीतया आश्रमस्थेनेत्यन्वयः । ‡ जटायुषा च सहित इत्यर्थः ।

[1] मानेतुमुद्यतम्—ङ. [2] वैदेह्याः—ज. [3] गतां—ज. [4] प्रतिगृह्य—ङ.

चतुश्चत्वारिंशः सर्गः

[मायामृगवधः]

तथा तु तं समादिश्य भ्रातरं रघुनन्दनः ।
[1]बबन्धासिं महातेजाः जाम्बूनदमयत्सरुम् ॥ १ ॥

अथ मायामृगानुगतरामेण तद्बधः । तथेति । त्सरुः—खड्गमुष्टिः ॥ १ ॥

ततः [2]त्रिविनतं चापं *आदायात्मविभूषणम् ।
आबध्य च कलापौ द्वौ जगामोदग्रविक्रमः ॥ २ ॥

त्रिविनतं—†मध्ये त्रिस्थले विनतं त्रिविनतं, तादृशं चापं शार्ङ्गं आदायेत्यर्थः । एतस्य महस्त्वरूपकार्यत्वात् । तदभिप्रायेणोक्तं—आत्मविभूषणमिति । आत्मालङ्कारभूतमित्यर्थः । कलापौ द्वाविति । द्वे तूणीरे इत्यर्थः ॥ २ ॥

तं [3]वन्यराजो राजेन्द्रं आपतन्तं निरीक्ष्य वै ।
बभूवान्तर्हितस्त्रासात् पुनः सन्दर्शनेऽभवत् ॥ ३ ॥
बद्धासिर्धनुरादाय प्रदुद्राव यतो मृगः ।

तं वन्यराज इति पाङ्क्तः । वन्याः—मृगाः तेषां राजा श्रेष्ठः, विचित्रमृगत्वात् । संदर्शने—दृष्टिविषय इत्यर्थः ॥ ३ ॥

‡तं स्म पश्यति रूपेण [4]द्योतमानमिवाग्रतः ॥ ४ ॥
अवेक्ष्यावेक्ष्य धावन्तं धनुष्पाणिं महावने ।

रूपेण—स्वरूपेण । अग्रे द्योतमानमिव च स्थितम् ॥ ४ ॥

---

* आत्मविभूषणमित्यनेन तत् अगस्त्यदत्तं वैष्णवमिति सूचितम्-ति.
† आबन्तयोः मध्ये वा विनतम् । ‡ तमित्यादिश्लोकत्रयमेकं वाक्यम्-गो.

[1] दधारासिं-ज्ञ. [2] श्यवनतं-ङ. [3] वन्ययानो-ङ. [4] द्योतयन्त-ज्ञ.

अतिवृत्त[1]मिषोः पातात् लोभयानं [2]कदाचन ॥ ५ ॥
* शङ्कितं तु समुद्भ्रान्तं उत्पतन्तमिवाम्बरे ।
अतिवृत्तं–अतिक्रान्तं । कदाचन इषुपातात् शङ्कितम् ॥ ५ ॥

दृश्यमानमदृश्यं च वनोद्देशेषु केषुचित् ॥ ६ ॥
छन्नाभ्रैरिव संवीतं शारदं चन्द्रमण्डलम् ।
वनोद्देशे दृश्यमानत्वात् छन्नाभ्रदृश्यमानचन्द्रदृष्टान्तः ॥ ६ ॥

† मुहूर्तादेव ददृशे मुहुर्दूरात् प्रकाशते ॥ ७ ॥

दर्शनादर्शनादेवं सोऽपाकर्षत राघवम् ।
सुदूरमाश्रमस्यास्य मारीचो ‡ मृगतां गतः ॥ ८ ॥
दर्शनं चादर्शनं चेति द्वन्द्वैकवद्भावः ॥ ८ ॥

आसीत् क्रुद्धस्तु काकुत्स्थः विवशस्तेन मोहितः ।
अथावतस्थे [3]सुश्रान्तः छायामाश्रित्य शाद्वले ॥ ९ ॥
तेनेति । दर्शनादर्शनाभ्यां विलोभ्य मोहयता मारीचेनेत्यर्थः ॥

स तमुन्मादयामास मृगरूपो निशाचरः ।
मृगैः परिवृतो वन्यैः अदूरात् प्रत्यदृश्यत ॥ १० ॥
उन्मादयामासेति । ‘ उन्मादश्चित्तविभ्रमः ’ । बहुदूरविधावनेन चित्तमोहं चाकरोदित्यर्थः ॥ १० ॥

---

* शङ्कितं—रामबाणपातसंभावनया प्राप्तशङ्कं, अत एव समुद्भ्रान्तं—भीतं, अत एव अम्बरं—आकाशं उत्पतन्तं – उल्लङ्घयन्तमिव–रा. † समीपे मुहूर्तात्—मुहूर्तं ददृशे, दूरात्– दूरे मुहुः प्रकाशते–गो. ‡ मृगतां गतः मारीच इत्यन्वयः ।

[1] मिवोत्पातात्–ज. [2] कथञ्चन–ङ. [3] संभ्रान्तः–ङ.

ग्रहीतुकामं दृष्ट्वैनं पुनरेवाभ्यधावत ।
तत्क्षणादेव संत्रासात् पुनरन्तर्हितोऽभवत् ॥ ११ ॥

पुनरेव ततो दूरात् वृक्षषण्डा[1]द्विनिस्सृतम् ।
दृष्ट्वा रामो महातेजाः तं हन्तुं कृतनिश्चयः ॥ १२ ॥

*भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः ।
सूर्यरश्मिप्रतीकाशं ज्वलन्तमरि[2]मर्दनः ॥ १३ ॥

संधाय सुदृढे चापे विकृष्य †बलवद्बली ।
तमेव मृगमुद्दिश्य[3] श्वसन्तमिव पन्नगम् ॥ १४ ॥

मुमोच ज्वलितं दीप्तं अस्त्रं ब्रह्मविनिर्मितम् ।
ब्रह्मविनिर्मितमस्त्रमिति । ब्रह्मदत्तबाणमित्यर्थः । स एव हि परमापदि शरणम् ॥ १४ ॥

‡[4]शरीरं मृगरूपस्य विनिर्भिद्य शरोत्तमः ॥ १५ ॥
मारीचस्यैव हृदयं विभेदाशनिसंनिभः ।
मारीचस्यैव हृदयमिति । न तु तत्कृतमायामृगाकारस्येत्यर्थः ॥

तालमात्रमथोत्प्लुत्य न्यपतत् स शरातुरः ॥ १६ ॥
विनदन् भैरवं नादं धरण्यामल्पजीवितः§ ।
तालमात्रमुत्प्लुत्येति । शरवेधवेगादिति शेषः ॥ १६ ॥

---

*भूयः—अत्यर्थं कुपितः—गो. अथवा पूर्वं 'आसीत् क्रुद्धस्तु'(९) इति कथनात्, भूयः—पुनः कुपित इत्यर्थः । †बलवद्विकृष्येत्यन्वयः । ‡विशिष्टस्त्रप्रयोगस्य फलमपि विचित्रं दर्शयति—शरीरमिति । §अल्पजीवितः—अल्पावशिष्टजीवितः ।

[1] द्विनिस्सृतः—ज. [2] मर्दनम्—ज. [3] ज्वलन्त—ज. [4] स भृशं—ज.

[1] म्रियमाणस्तु मारीचः जहौ तां कृत्रिमां तनुम् ॥ १७ ॥
स्मृत्वा [2] तद्वचनं रक्षः दध्यौ केन तु लक्ष्मणम् ।
इह प्रस्थापयेत् सीता * शून्ये तां रावणो हरेत् ॥ १८ ॥

तद्वचनमिति । रावणवचनमित्यर्थः । दध्यौ-ध्यानं कृतवान् । केन—केनोपायेन मया कृतेन सीता लक्ष्मणं इह प्रस्थापयेत्, तां च कथं शून्ये रावणो हरेत् , इति दध्यौ इत्यन्वयः ॥ १८ ॥

स प्राप्तकालमाज्ञाय चकार च ततः स्वरम् ।
सदृशं राघवस्यैव, हा सीते ! लक्ष्मणेति च ॥ १९ ॥
तेन मर्मणि निर्विद्धः शरेणानुपमेन हि ।
मृगरूपं तु तत् त्यक्त्वा राक्षसं रूप [3] मात्मनः ॥ २० ॥
चक्रे स सुमहा [4] कायो मारीचो जीवितं त्यजन् ।

मर्मणि—सहजरूपाप्राणस्थाने इत्यर्थः । तत्र हेतुः—शरेणानुपमेन हीति । रक्षस्संबन्धि—राक्षसम् ॥ २० ॥

[ततो विचित्रकेयूरः सर्वाभरणभूषितः ।
हेममाली महादंष्ट्रः राक्षसोऽभूच्छराहतः ॥]
तं दृष्ट्वा पतितं भूमौ राक्षसं घोरदर्शनम् ॥ २१ ॥

---

* यद्यपि रावणेनैव पूर्वमत्रोपायः उपदिष्टः—'अवक्रान्ते तु काकुत्स्थे दूरं यात्वा व्युदाहर । हा सीते लक्ष्मणेत्येवं रामवाक्यानुरूपकम्' (४०–२०) इति । परन्तु तस्यैव प्रकारचिन्तनमिदम् । अथवा—केन तु लक्ष्मणं सीता इह प्रस्थापयेत्, तां च शून्ये रावणो हरेत् इति दध्यौ । ततः—रावणवचनं तद्वचनं स्मृत्वा सः तत् प्राप्तकालमाज्ञाय राघवस्य सदृशं स्वनं चकार—इत्यन्वयः । पाठान्तरे तु न कश्चन क्लेशः ।

[1] एतदर्धद्वयस्थाने—'म्रियमाणस्तु मारीचः दध्यौ केन तु लक्ष्मणं'—झ. [2] तु तां मतिं—ङ. [3] मास्थितः—ञ. [4] कायं—ङ.

रामो रुधिरसिक्ताङ्गं [1]वेष्टमानं महीतले ।
जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥ २२ ॥
मारीचस्यैव मायैषा * पूर्वोक्तं लक्ष्मणेन तु ।
तत् तथा ह्यभवच्चाद्य मारीचोऽयं मया हतः ॥ २३ ॥

लक्ष्मणस्य वचः स्मरन्नित्येतदेव प्रकाशयति—मारीचस्येत्यादि ॥

हा सीते ! लक्ष्मणेत्येवं आक्रुश्य च [2]महास्वनम् ।
ममार राक्षसः सोऽयं † श्रुत्वा सीता कथं भवेत् ? ॥२४॥

सीता कथं भवेत्—मद्भयं ज्ञात्वा धीरा भवेत् ? उत अन्यथा ज्ञात्वा दुरवस्थां गच्छेद्वेत्यर्थः ॥ २४ ॥

लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ?
इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥ २५ ॥
तत्र रामं भयं तीव्रं आविवेश विषादजम् ॥

हृष्टतनूरुह इति । सीतानिमित्तभयविकारादिति शेषः । तदेव दर्शयति—तत्र रामं भयमित्यादि ॥ २५ ॥

राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत् स्वरम् ॥ २६ ॥

---

* मायैषेत्यत्र इतिकरणं बोध्यम्—गो. अथवा 'मारीचस्यैव मायैषा' इति स्वगतं वचनं वा । † सीता कथं भवेत्—किमधैर्यं नाटयित्वा लक्ष्मणं प्रेषयेत, उत धीरा भवेदित्यर्थः—ति. वस्तुतस्तु सीतालक्ष्मणयोः स्वविरहासहिष्णुत्वस्य—'न च सीता त्वया हीना न चाहमपि राघव । मुहूर्तमपि जीवावः जलान्मत्स्याविवोद्धृतौ' इत्यादावव-गतत्वेन, एवं मदीयार्तं स्वरश्रवणमात्रेण तयोर्जीवितविपत्तिर्न भवेद्वेत्येवातिशङ्काऽत्र रामस्य स्यात् । अत एव 'हृष्टतनूरुहः' इत्युच्यते । तयोर्जीवितविपत्तिस्मरणमात्रेण रामः अतीव व्यथां प्राप । हृष्टत्वं नाम तनूरुहाणां पुलकितत्वम् । समनन्तरश्लोके 'तत्र रामं भयं तीव्रमाविवेश' इत्युक्तं अवधेयमत्र ।

[1] चेष्टमानं—ज. [2] बभ स्वरम्—ङ.

*निहत्य पृषतं चान्यं मांसमादाय राघवः ।
त्वरमाणो जनस्थानं ससार[1]भिमुखं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चतुश्चत्वारिंशः सर्गः

पृषतं—मृगम् । जनस्थानं अभिमुखं—जनस्थानवर्तिनिजाश्रम-मुद्दिश्येत्यर्थः । सार(२७)मानः सर्गः ॥ २७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुश्चत्वारिंशः सर्गः

पञ्चचत्वारिंशः सर्गः

[लक्ष्मणापसरणम्]

आर्तस्वरं तु तं[†] भर्तुः विज्ञाय सदृशं[2] वने ।
उवाच लक्ष्मणं सीता, गच्छ जानीहि राघवम् ॥ १ ॥

अथ सीतया आसन्ननिजानर्थनिदानातिघोरानुचितदुर्वचन-शितशरैः मर्माणि लक्ष्मणं विद्ध्वा आश्रमादुद्वासनम् । आर्तस्वर-मित्यादि । भर्तुः स्वरेण सदृशं तं आर्तस्वरं भर्तुः स्वरमेवेति विज्ञायेत्यर्थः ॥ १ ॥

न हि मे हृदयं स्थाने जीवितं वाऽवतिष्ठति ।
क्रोशतः परमार्तस्य श्रुतः शब्दो मया भृशम् ॥ २ ॥
आक्रन्दमानं तु वने भ्रातरं [3]त्रातुमर्हसि ।
तं क्षिप्रमभिधाव त्वं भ्रातरं शरणैषिणम् ॥ ३ ॥

---

* लक्ष्मणस्य सीतारक्षार्थमेव नियुक्तत्वेन स्वयमेवाहारमप्याहायागच्छदिति भावः।
† भर्तुः स्वरमित्युक्त्या नेदं रामवच इति सीतया ज्ञातमिति सूचितम्—रा. परन्तु भर्तुः स्वरमिति कविवचनम् । इदं समनन्तरश्लोकेऽपि स्पष्टम् ।

[1] भिमुखः—ङ्. [2] वचः—ङ्. [3] शातु—ङ्.

रक्षसां वशमापन्नं सिंहानामिव गोवृषम् ।
न जगाम तथोक्तस्तु भ्रातुराज्ञाय शासनम् ॥ ४ ॥

भ्रातुः शासनमाज्ञायेति । "अप्रमत्तेन ते भाव्यं आश्रमस्थेन सीतया" इत्युक्तं शासनमनुचिन्त्येत्यर्थः ॥ ४ ॥

तमुवाच ततस्तत्र [1] कुपिता जनकात्मजा ।
सौमित्रे ! मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ।
यस्त्वमस्यामवस्थायां भ्रातरं नाभिपत्स्यसे ॥ ५ ॥

शत्रुवत् । शत्रुरेवेत्यर्थः । तत्र हेतुः यदित्यादि ॥ ५ ॥

इच्छसि त्वं विनश्यन्तं रामं, लक्ष्मण ! मत्कृते ।
लोभान्मम कृते नूनं नानुगच्छसि राघवम् ॥ ६ ॥

मत्कृते इति । मत्परिग्रहार्थमित्यर्थः । एवंविधमपि घोरवचनं तस्याः बलात् अन्यस्पर्शानर्थप्राप्तिमाशङ्कां सूचयत् अवशात् प्रवृत्तम्, भवितव्यतावशात् ॥ ६ ॥

व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ।
तेन तिष्ठसि [2] विस्रब्धः तमपश्यन्महाद्युतिम् ॥ ७ ॥
*किं हि संशयमापन्ने तस्मिन्निह मया भवेत् ।
कर्तव्यमिह तिष्ठन्त्या यत्प्रधानस्त्वमागतः ॥ ८ ॥

किं हीत्यादि । तस्मिन् रामे संशयमापन्ने तद्रहिते इह आश्रमे तिष्ठन्त्या मया इह-इदानीं त्वं यत्प्रधानः आगतः—मत्परिग्रहरूपयत्कार्य-प्रधानः त्वं आगतः, अत्र विषये मया किं कर्तव्यमिति योजनार्थः ॥

---

* त्वद्रक्षणं विहाय कथं गमिष्यामीत्याह—किं हीति । यः रामः प्रधानं यस्य सः यत्प्रधानः त्वमिहागतः, तस्मिन् रामे संशयं—प्राणसंशयमापन्ने सति इह—आश्रमपदे तिष्ठन्त्या मया किं कर्तव्यं, न किमपीत्यर्थः—गो.

[1] क्षुभिता—ज. [2] विस्रब्धं—ज.

इति ब्रुवाणां वैदेहीं बाष्पशोकपरिप्लुताम् ।
अब्रवील्लक्ष्मणः *त्रस्तां सीतां मृगवधूमिव ॥ ९ ॥
पन्नगासुरगन्धर्वदेवमानुषराक्षसैः ।
अशक्यस्तव, वैदेहि ! भर्ता जेतुं न संशयः ॥ १० ॥
† देवि ! देवमनुष्येषु गन्धर्वेषु पतत्रिषु ।
राक्षसेषु पिशाचेषु किन्नरेषु मृगेषु च ॥ ११ ॥
दानवेषु च घोरेषु न स विद्येत, शोभने !
यो रामं प्रतियुध्येत समरे वासवोपमम् ॥ १२ ॥

न स विद्येतेति । क इत्यतः—यो राममित्यादि ॥ १२ ॥

अवध्यः समरे रामः नैवं त्वं वक्तुमर्हसि ।
न त्वामस्मिन् वने हातुं उत्सहे राघवं विना ॥ १३ ॥
अनिवार्यं बलं तस्य बलैर्बलवतामपि ।
त्रिभिर्लोकैः समुद्युक्तैः सेश्वरैरपि सामरैः ॥ १४ ॥

बलवतां इन्द्रादीनामपि बलैः तस्य बलं अनिवार्यं—अनाधृष्यमित्यर्थः ॥ १४ ॥

हृदयं निर्वृतं तेऽस्तु संतापस्त्यज्यतामयम् ।
आगमिष्यति ते भर्ता शीघ्रं हत्वा मृगोत्तमम् ॥ १५ ॥
न स तस्य स्वरो ‡ व्यक्तं [1] न कश्चिदपि दैवतः ।
गन्धर्वनगरप्रख्या माया सा तस्य रक्षसः ॥ १६ ॥

---

*त्रस्तां मृगवधूमिव स्थितां सीताम् । † तदेव भङ्गयन्तरेणाह—देवीति—रा. ‡ कश्चिद्दैवतः रामं जिगीषुरपि न व्यक्तं—स्पष्टमेतदरमासु—रा. केनाचित् कृता मायैव इयम् । वस्तुतस्तु मारीचस्यैवेयं मायेत्याह—गन्धर्वेति—गो.

[1] मायया केनचित् कृतः—ङ.

न स तस्येत्यादि । व्यक्तं—स्पष्टं सः स्वरः तस्य—रामस्य स्वरो न भवति इति । "न कश्चिदपि दैवतः" इति पाङ्क्तः । दैवतः—अशरीरदेवतासंबन्धीव कश्चित् स्वरः इत्यपि न; अपि तु गन्धर्वनगरप्रख्या—तद्वत मिथ्या, रक्षसो मायैव—वञ्चनार्थप्रवर्तित एवायं स्वर इत्यर्थः ॥ १६ ॥

न्यासभूताऽसि, वैदेहि! न्यस्ता मयि महात्मना ।
रामेण त्वं, वरारोहे! न त्वां त्यक्तुमिहोत्सहे ॥ १७ ॥

न्यासरूपतया मयि निक्षिप्तां त्वां त्यक्तुं अहं नोत्सहे ॥ १७ ॥

*कृतवैराश्च, वैदेहि! वयमेतैर्निशाचरैः ।
खरस्य निधनादेव जनस्थानवधं प्रति ॥ १८ ॥

इतश्च मया त्यक्तुं न शक्यते इत्याह—कृतवैरा इत्यादि । जनस्थानवधं प्रति—जनस्थानवर्तिस्वपरिकररक्षोवधमुपलक्ष्य प्रवृत्तस्य खरस्य निधनादेव हेतोः वयं एतैः निशाचरैश्च यस्मात् कृतवैराः अतः त्वां त्यक्तुं नोत्सहे इति संबन्धः ॥ १८ ॥

राक्षसाः विविधा वाचो [1] विसृजन्ति महावने ।
हिंसाविहाराः, वैदेहि! न चिन्तयितुमर्हसि ॥ १९ ॥

विविधा वाचो विसृजन्तीति । अस्मद्व्यामोहनार्थमिति शेषः । हिंसैव—साधुजनपीडैव विहारो येषां ते तथा ॥ १९ ॥

---

*खरस्य स्वामिनः निधनात् जनस्थाने वधो यः तं प्रति वयं एतैः निशाचरैः कृतवैराः—गो. एवं कृतवैराः राक्षसाः विविधा वाचो विसृजन्ति अस्मद्व्यामोहनायेत्युत्तरत्रान्वयः ॥

[1] व्याहरन्ति—ज.

लक्ष्मणेनैवमुक्ता सा क्रुद्धा संरक्तलोचना ।
अब्रवीत् परुषं वाक्यं लक्ष्मणं सत्यवादिनम् ॥ २० ॥
*[1] अनार्यकरुणारम्भ! नृशंस! कुलपांसन!
अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥ २१ ॥
रामस्य व्यसनं दृष्ट्वा तेनैतानि प्रभाषसे ।

अनार्यकरुणारम्भेति पाङ्क्तः । विपरीतार्थाभिसंधितस्त्वं अनार्यया—कुत्सितया करुणया भ्रातृविषयया आरम्भः—सेवाप्रवृत्तिः यस्य स तथा । तेनेति । रामव्यसनस्य प्रियत्वेन हेतुनेत्यर्थः ॥२१॥

नैतच्चित्रं सपत्नेषु पापं, लक्ष्मण! यद्भवेत् ॥ २२ ॥
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ।

सपत्नेष्विति । ज्ञातिष्वित्यर्थः ॥ २२ ॥

†सुदुष्टस्त्वं वने रामं एकमेकोऽनुगच्छसि ॥ २३ ॥
मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ।
तन्न सिद्ध्यति, सौमित्रे! तव वा भरतस्य वा ॥ २४ ॥

तन्न सिद्ध्यतीति । मत्परिग्रह इत्यर्थः ॥ २४ ॥

कथमिन्दीवरश्यामं पद्मपत्रनिभेक्षणम् ।
उपसंश्रित्य भर्तारं [2] कामयेयं ‡पृथग्जनम् ॥ २५ ॥
समक्षं तव, सौमित्रे! प्राणांस्त्यक्ष्ये न संशयः ।
रामं विना क्षणमपि न हि जीवामि भूतले ॥ २६ ॥

---

* अनार्य-दुश्शील, अकरुणारम्भ—दयाप्रसक्तिरहित-गो. रामस्य प्राप्तं महद् व्यसनं तव प्रियमेव स्यादित्यहं मन्ये इत्यन्वयः । † 'प्रच्छन्नचारिषु' इति पूर्वश्लोकोक्तं विवृणोति—सुदुष्ट इति । ‡ पृथग्जनं-क्षुद्रपुरुषं-गो.

[1] अनार्याकरुणा-ङ. [2] कामये पामरं जनम्-ङ.

इत्युक्तः परुषं वाक्यं सीतया रोमहर्षणम् ।
अब्रवील्लक्ष्मणः सीतां प्राञ्जलिर्विजितेन्द्रियः * ॥ २७ ॥
उत्तरं नोत्सहे वक्तुं दैवतं भवती मम ।
वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु, मैथिलि! ॥ २८ ॥

अप्रतिरूपम् । अत्यन्तानुचितमित्यर्थः ॥ २८ ॥

स्वभावस्त्वेष नारीणां एवं लोकेषु दृश्यते ।
विमुक्तधर्माश्चपलाः तीक्ष्णाः भेदकराः स्त्रियः ॥ २९ ॥

भेदकराः इति । सुतात् पितृमात्रादेरिति शेषः ॥ २९ ॥

न सहे हीदृशं वाक्यं वैदेहि, जनकात्मजे!
श्रोत्रयोरुभयोर्मेऽद्य तप्तनाराचसंनिभम् ॥ ३० ॥
उपशृण्वन्तु मे सर्वे साक्षिभूताः वनेचराः ।
न्यायवादी [1] यथाऽन्यायमुक्तोऽहं परुषं त्वया । ३१ ॥

वनेचराः इति । देवा इति शेषः । तमुपशृण्वन्त्विति योजना ॥ ३१ ॥

धिक्! त्वां अद्य [2] विनश्यन्तीं यन्मामेवं विशङ्कसे ।
[3] स्त्रीत्वात् दुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम् ॥ ३२ ॥

धिगिति । यस्मात् मामपि एवं वाचामगोचरदुर्भाववन्तं विशङ्कसे, तत एव दोषात् अद्य विनश्यन्तीं—विनशिष्यन्तीं आसन्नानर्थां त्वां धिक् । अतः परं "स्त्रीत्वात् दुष्टस्वभावेन गुरुवाक्ये व्यवस्थितम् । गमिष्ये यत्र काकुत्स्थः" इति पाङ्क्तः ।

---

* सीतयाऽऽपादितदोषाभावं वदति—विजितेन्द्रिय इति ।

[1] यथावाक्यं—ज्ञ. [2] प्रणश्य त्वं—ङ. [3] स्त्रीत्वं दुष्ट—ङ.

अत्र स्त्रीत्वादित्यर्धं त्यक्त्वा गच्छन्ति केचित् । योजनं तु—स्त्रीत्वात् दुष्टस्वभावेन कार्येणोपलक्षिता सती त्वं गुरुवाक्ये—ज्येष्ठनियोगे त्वद्रक्षणविषयके व्यवस्थितं मामप्येवं शङ्कसे इति पूर्वान्वयेन ॥ ३२ ॥

गमिष्ये यत्र काकुत्स्थः स्वस्ति तेऽस्तु, वरानने !
रक्षन्तु त्वां, विशालाक्षि ! समग्राः वनदेवताः ॥ ३३ ॥
निमित्तानि हि घोराणि यानि प्रादुर्भवन्ति मे ।
अपि त्वां सह रामेण पश्येयं पुनरागतः[1] ॥ ३४ ॥

घोराणि यानि निमित्तानि मे प्रादुर्भवन्ति, तैः त्वदुपप्लवं शङ्कमानोऽहं रामेण सह पुनरागतः त्वां पश्येयमपि, तदपि संभवेत् किं ? ॥ ३४ ॥

लक्ष्मणेनैवमुक्ता सा रुदन्ती जनकात्मजा ।
प्रत्युवाच ततो वाक्यं तीव्रं बाष्पपरिप्लुता ॥ ३५ ॥

अथ प्रतिष्ठासुना लक्ष्मणेन अन्यपुरुषसङ्गप्रसङ्गः शङ्क्यते इति मन्यमानया स्वधीदार्ढ्यं प्रकाश्यते —लक्ष्मणेनेत्यादि * ॥ ३५ ॥

गोदावरीं प्रवेक्ष्यामि [2]विना रामेण, लक्ष्मण !
आबन्धिष्येऽथ वा त्यक्ष्ये विषमे देहमात्मनः ॥ ३६ ॥

आबन्धिष्ये इति । रज्जुमिति शेषः । विषमे इति । भृग्वादि-विषमस्थले पातेनेति शेषः ॥ ३६ ॥

---

* वस्तुतस्तु—'निमित्तानि च घोराणि' इत्यादिलक्ष्मणवचनदर्शनेन, लक्ष्मणस्य सीतां त्यक्त्वा गमने नोत्साह आसीदिति गम्यते । ३९ श्लोके 'आश्वासयामास' इति पदं इदं दृढयति च । एवं लक्ष्मणस्य विलम्बं पश्यन्ती सीता पुनरपि परुषं वाक्यमुवाचेति युक्तं प्रतिभाति ।

[1] एतदनन्तरं—"न वेत्येतन्न जानामि वैदेहि ! जनकात्मजे !"—इत्यधिकं—ङ, [2] हीना—ज्ञ.

पिबाम्यहं विषं तीक्ष्णं * प्रवेक्ष्यामि हुताशनम् ।
न त्वहं राघवादन्यं [1] पदाऽपि पुरुषं स्पृशे ॥ ३७ ॥
इति लक्ष्मणमाक्रुश्य सीता [2] दुःखसमन्विता ।
पाणिभ्यां रुदती दुःखात् उदरं प्रजघान ह ॥ ३८ ॥

दुःखं—सकलकरणपरितापः, शोकस्तु मानसं दैन्यम् ॥ ३८ ॥

तामार्तरूपां विमना रुदन्तीं
सौमित्रिरालोक्य विशालनेत्राम् ।
आश्वासयामास न चैव भर्तुः
तं भ्रातरं किंचिदुवाच सीता ॥ ३९ ॥

भर्तुः भ्रातरं न किञ्चिदुवाचेति । आश्वासनव्याजेन गमन-विलम्बं करोतीति कोपेनेति शेषः ॥ ३९ ॥

† ततस्तु सीतामभिवाद्य लक्ष्मणः
कृताञ्जलिः किञ्चिदभिप्रणम्य च ।
अन्वीक्षमाणो बहुशश्च मैथिलीं
जगाम रामस्य समीपमात्मवान् ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चचत्वारिंशः सर्गः

मौन(४०)मानः सर्गः ॥ ४० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चचत्वारिंशः सर्गः

---

* अत्र वाशब्दानुक्तया, साक्षाद्रावणगृहं न गमिष्यामि, किन्त्वहं स्वरूपेणाग्नौ स्थित्वा मायया एव तद्गृहं गमिष्यामि—इति ध्वनितम् । तदुक्तं कूर्मपुराणे "इति वह्नयष्टकं जप्त्वा रामपत्नी यशस्विनी । ध्यायन्ती मनसा तस्थौ राममुन्मीलितेक्षणा । अथावसथ्यात् भगवान् हव्यवाहो महेश्वरः । आविरासीत् सुदीप्तात्मा तेजसा निर्दहन्निव । सङ्गा मायामयीं सीतां स रावणवधेच्छया । सीतामादाय रामेष्टां पावकोऽन्तरधीयत ॥" इति—ति.

† ततः—एवं उदरताडनपूर्वकरोदनादिदर्शनात् सीताया अनाश्वासनीयत्वनिश्चयानन्तरम् ।

[1] कदाऽपि—ज. [2] शोक—ज.

षट्चत्वारिंशः सर्गः

[रावणप्रवेशः]

* तया परुषमुक्तस्तु कुपितो राघवानुजः ।
स † विकांक्षन् भृशं रामं प्रतस्थे न चिरादिव ॥ १ ॥

एवं लक्ष्मणे निष्क्रान्ते निःशङ्कं आश्रमं प्रविष्टस्य रावणस्य सीतया सह संभाषणम् । तथेत्यादि । न चिरादिव—शीघ्रमेवेत्यर्थः । विकांक्षन्—विशेषेण कांक्षमाण इति यावत् ॥ १ ॥

तदासाद्य दशग्रीवः क्षिप्रमन्तरमास्थितः ‡ ।
अभिचक्राम वैदेहीं परिव्राजकरूपधृत् ॥ २ ॥

अन्तरं—अवकाशम् ॥ २ ॥

§ श्लक्ष्णकाषायसंवीतः शिखी छत्री उपानही ।
वामे चांसेऽवसज्याथ शुभे [1]यष्टिकमण्डलू ।
परिव्राजकरूपेण वैदेहीं समुपागमत् ॥ ३ ॥

शिखी उपानहीति व्रीह्यादित्वादिनिः । यष्टिः—त्रिदण्डः ॥ ३ ॥

तामाससादातिबलः भ्रातृभ्यां रहितां वने ।
रहितां चन्द्रसूर्याभ्यां सन्ध्यामिव ‖ महत्तमः ॥ ४ ॥

भ्रातृभ्यां—परस्परभ्रातृभ्यां रामलक्ष्मणाभ्याम् ॥ ४ ॥

---

* अथ सीतायाः लक्ष्मणविषयकपरुषभाषणफलं दर्शयस्येकादशभिः सर्गैः—गो. † विकाङ्क्षन्—अनिच्छन्नेव—गो. ‡ आस्थितः—अवकाशं प्रतीक्षमाणः स्थितः दशग्रीवः तदेव अन्तरं—अवकाशं आसाद्य—गो. § पूर्वश्लोकस्यैव विवरणमिदम् । ‖ महत्तम इत्यभूतोपमा, सन्ध्यायां महतस्तमसोऽसंभवात्—गो.

[1] दण्ड—ङः,

तामपश्यत् ततो बालां [1]रामपत्नीं यशस्विनीम् ।
*रोहिणीं शशिना हीनां ग्रहवत् भृशदारुणः ॥ ५ ॥

ग्रहवत्—हन्तुकामब्रह्मजोमुखभूतविशेषवत् ॥ ५ ॥

[2]तमुग्रं पापकर्माणं जनस्थानरुहा द्रुमाः ।
समीक्ष्य न प्रकम्पन्ते न प्रवाति च मारुतः ॥ ६ ॥
शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ।
[3]स्तिमितं गन्तुमारेभे भयाद्गोदावरी नदी ॥ ७ ॥

शीघ्रस्रोताः—शीघ्रप्रवाहाः । वीक्षन्तं—वीक्षमाणम् । भयादिति । तत्सन्निधानेनेति शेषः ॥ ७ ॥

रामस्य त्वन्तरप्रेप्सुः [4]दशग्रीवस्तदन्तरे ।
उपतस्थे च वैदेहीं भिक्षुरूपेण रावणः ॥ ८ ॥

अन्तरं—अपकारयोग्यं छिद्रम् । तदन्तरे—उभयविरहितदेशकाले ॥ ८ ॥

अभव्यो भव्यरूपेण भर्तारमनुशोचतीम् ।
अभ्यवर्तत वैदेहीं चित्रामिव शनैश्चरः ॥ ९ ॥

चित्रां—चित्रानक्षत्रम् । अभव्यः—अक्षेमरूपः ॥ ९ ॥

[5]स पापो भव्यरूपेण तृणैः कूप इवावृतः ।
†अतिष्ठत् प्रेक्ष्य वैदेहीं रामपत्नीं यशस्विनीम्[6] ॥ १० ॥

---

*ग्रहः—अङ्गारकः शनैश्चरो वा । रोहिण्याः क्रूरग्रहवीक्षणं लोकानर्थकरम्—गो.

†अतिष्ठत्—तत्सन्निधावुपाविशत्—रा. परन्तु 'अभ्यगच्छत' इति पुरतो दर्शनात् क्रमक्रमश उपसर्पणं एभिः क्रियापदैर्वर्ण्यत इति प्रतिभाति ।

[1]राजपुत्रीं—ज्ञ. [2]तमुग्रतेजःकर्माणं—ङ. [3]स्तिमिता—ङ. [4]दशग्रीवो महाबलः—ङ. [5]सहसा—ज्ञ. [6]एतदनन्तरं "निष्ठन् संप्रेक्ष्य च तदा पत्नीं रामस्य रावणः ॥" इत्यधिकं—ङ. ज्ञ.

शुभां रुचिरदन्तोष्ठीं पूर्णचन्द्रनिभाननाम् ।
आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम् ॥ ११ ॥
स तां पद्मपलाशाक्षीं पीतकौशेयवासिनीम् ।
अभ्यगच्छत वैदेहीं दुष्टचेता निशाचरः ॥ १२ ॥

पीतकौशेयवासिनीं इति । णिन्यन्तत्वात् ङीप् ॥ १२ ॥

[1]स मन्मथशरविष्टः *ब्रह्मघोषमुदीरयन् ।
अब्रवीत् प्रश्रितं वाक्यं रहिते राक्षसाधिपः ॥ १३ ॥

ब्रह्मघोषं–वेदघोषं ब्राह्मणत्वप्रत्यभिज्ञानार्थं उदीरयन् ॥ १३ ॥

तामुत्तमां [2]स्त्रियं लोके †पद्महीनामिव श्रियम् ।
विभ्राजमानां वपुषा रावणः प्रशशंस ह ॥ १४ ॥
[3]एतावुपचितौ वृत्तौ संहतौ [4]संप्रगल्भितौ ।
पीनोन्नतमुखौ कान्तौ स्निग्धौ तालफलोपमौ ॥ १५ ॥
मणिप्रवेकाभरणौ रुचिरौ तौ पयोधरौ ।

प्रशशंस हेत्यस्यैव प्रपञ्चः—एतावित्यादि । संप्रगल्भितौ–संजातप्रागल्भ्यौ । मणिप्रवेकः–मणिश्रेष्ठः ॥ १५ ॥

चारुस्मिते! चारुदति! चारुनेत्रे! विलासिनि! ॥ १६ ॥
मनो हरसि मे, [5]कान्ते! नदी कूलमिवाम्भसा ।

नदी कर्त्री, कूलं–स्वकूलम् ॥ १६ ॥

---

* ब्रह्मघोषं — 'उपनिषदमावर्तयेत्' इत्युक्तपरिव्राजकोचितवेदघोषं–गो.

† पद्मालयत्वपद्माकरत्वादीनां लक्ष्मीचिह्नत्वात्, तत् परित्यज्य आगतां श्रियमिव ॥

[1] दृष्ट्वा कामशराविद्धः–ज. [2] त्रिलोकानां–ज. [3] एतदारभ्यार्धपञ्चकं ङ. ज. पुस्तकयोः 'ऊरू करिकरोपमौ'–इत्येतदनन्तरं दृश्यते । [4] संप्रवल्गितौ–ङ. [5] रामे-ज.

[1] का त्वं ? काञ्चनवर्णाभे ! पीतकौशेयवासिनि ! ॥ १७ ॥
कमलानां शुभां मालां पद्मिनीव हि बिभ्रती ।
ह्रीः कीर्तिः श्रीः शुभा लक्ष्मीः अप्सरा वा, [2] शुभानने ! ॥
[3] भूतिर्वा त्वं, वरारोहे ! रतिर्वा *स्वैरचारिणी ।

ह्रीः—गौरी । श्रीः—ऐश्वर्यप्रधाना भगवच्छक्तिः । लक्ष्मीः—सौभाग्यप्रधाना । भूतिः—अणिमादिसिद्धिः परमेश्वरशक्तिः । रतिः—कामपत्नी ॥ १८ ॥

समाः शिखरिणः †स्निग्धाः पाण्डुराः दशनास्तव ॥ १९ ॥
विशाले विमले नेत्रे रक्तान्ते कृष्णतारके ।
विशालं जघनं पीनं ऊरू करिकरोपमौ ॥ २० ॥
करान्तमितमध्याऽसि सुकेशी संहतस्तनी ।

समाः—समसंस्थानाः शिखरिणः शिखरं—अग्रम् । कुन्दकुट्मलवत् प्रशस्ताग्रा इति यावत् । करान्तेन करतलाङ्गुष्ठप्रदेशिनीचक्रप्रमाणेन मितं मध्यं यस्याः सा तथा ॥ २० ॥

नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ॥ २१ ॥
नैवंरूपा मया नारी दृष्टपूर्वा महीतले ।
[4] रूपमग्र्यं च लोकेषु सौकुमार्यं वयश्च ते ॥ २२ ॥
इह वासश्च कान्तारे चित्तमुन्मादयन्ति मे ।

उन्मादयन्ति—विकृतं कुर्वन्तीति यावत् ॥ २२ ॥

---

* स्वैरचारिणीति इतरग्राप्यन्वेति ॥ † स्निग्धाः—अविरलाः—अच्छिद्रा इति यावत् ।

[1] रौप्यकाञ्चन—ज्ञ. [2] वरानने—ङ. [3] भूमि—ङ. [4] रूपमप्रतिमं लोके—ङ

सा प्रतिक्राम, भद्रं ते, न त्वं वस्तुमिहार्हसि ॥ २३ ॥
राक्षसानामयं वासः घोराणां कामरूपिणाम् ।
सा त्वं प्रतिक्राम-निर्याहि ॥ २३ ॥

प्रासादाग्राणि रम्याणि नगरोपवनानि च ॥ २४ ॥
संपन्नानि सुगन्धीनि युक्तान्याचरितुं त्वया ।
* वरं माल्यं वरं [1] भोज्यं वरं वस्त्रं च, शोभने! ॥ २५ ॥
भर्तारं च वरं मन्ये त्वद्युक्तं, असितेक्षणे!
का त्वं भवसि रुद्राणां मरुतां वा? [2] वरानने! ॥ २६ ॥
वसूनां वा, वरारोहे! देवता प्रतिभासि मे ।
[3] नेहागच्छन्ति गन्धर्वाः न देवाः न च किन्नराः ॥ २७ ॥
राक्षसानामयं वासः कथं नु त्वमिहागता?
इह शार्दूलमृगाः सिंहाः द्वीपिव्याघ्रमृगास्तथा ॥ २८ ॥
ऋक्षाः तरक्षवः कङ्काः कथं तेभ्यो न बिभ्यसि?
द्वीपिव्याघ्रौ सबिन्दुनिर्बिन्दू शार्दूलौ । செட்டிப்புலி, வேங்கப்புலி-'तरक्षुस्तु मृगादनः' வரிவேங்கை ॥ २८ ॥

मदान्वितानां घोराणां † कुञ्जराणां तरस्विनाम् ॥ २९ ॥
कथमेका महारण्ये न बिभेषि? वरानने!
काऽसि? कस्य? कुतश्चित्त्वं? किंनिमित्तं च दण्डकान् ॥

---

* वरं—श्रेष्ठं माल्यादि त्वद्युक्तं—तव योग्यं मन्ये, न तु यादृशतादृशं, यद्वा माल्यादिकं त्वद्युक्तं त्वत्सम्बद्धं सत् वरं—प्रशस्तं भवतीति मन्ये-गो. † कुञ्जराणां एका त्वं कथं न बिभेषि, सम्बन्धसामान्यविवक्षया षष्ठी-रा. कुञ्जराणां महारण्ये इति वाऽन्वयः ।

[1] गन्धं-ज्ञ. [2] शुचिस्मिते-ज्ञ. [3] नेह गच्छन्ति-ज्ञ.

एका चरसि, कल्याणि! घोरान् राक्षसमेवितान् ?
इति प्रशस्ता वैदेही रावणेन [1]दुरात्मना ॥ ३१ ॥
*द्विजातिवेषेण हि तं दृष्ट्वा रावणमागतम् ।
सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३२ ॥

प्रशस्ता–कृतप्रशंसा ; प्रशंसितेति यावत् ॥ ३२ ॥

[2]उपानीयासनं पूर्वं पाद्येनाभिनिमन्त्र्य च ।
अब्रवीत् सिद्धमित्येव तदा तं सौम्यदर्शनम् ॥ ३३ ॥

---

* द्विजातिवेषेण आगतं तं रावणं–रा. ति. हितं—सहितम्–गो. अथवा आगतं रावण द्विजातिवेषेण हितं–स्वहितपरं दृष्ट्वा ; 'ब्राह्मणा हि सर्वभूतहितैषिणः' अतोऽयं 'कथं न बिभेषि' इति पृच्छतीति मन्यमाना। ननु 'मनो हरसि मे कान्ते' 'चित्तमुन्मादयन्ति मे' इत्यादिवाक्यं वदन्तं रावणं कथं सीता तन्मनोदोषं न शङ्कितवती? कथं वा पूजयामासेति चेत्—'यथावस्थितसौन्दर्यवर्णनरूपमिदं सर्वं स्यात्' इति भावनया रावणस्य हृदयदोषं नाभ्यूहितवती सीता। अथवा 'आसीनां पर्णशालायां बाष्पशोकाभिपीडिताम्' (११) इति आदौ कथनात् विक्षिप्तचित्तया नावहितं स्यात् रावणवाक्यम्। समीपमागतं द्विजातिवेषं च दृष्ट्वा तावतैव पूजितवतीति गम्यते। गोविन्दराजेन तु (अनन्तरश्लोकव्याख्यायां) मैथिली जनककुलजाततया तद्व्यवहारपरिपाटीविज्ञातकपटवेषाऽपि संन्यासिवेषधारणमात्रेण उद्वेष्टुं-द्वेषं कर्तुं अशक्यं तं न्यमन्त्रयत्। 'काषायदण्डमात्रेण यतिः पूज्यो न संशयः' इति वचनादिति भावः—इत्युक्तम्। अथवा जानन्त्यपि जानकी एतेन विरोधे अपायः स्यादिति बुद्ध्या स्वयं अजानन्तीव नटयित्वा तं संपूज्य सामवाचा उपायेन च प्रेषितुमनाः, यावद्रामाद्यागमनं कालं कथंचित् क्षपयितुमना वा एवं पूजां चकारेति स्यात्। एतत्पक्षे समनन्तरश्लोकानां स्वारस्यं च स्पष्टम्। ननु सीता यदि तं कपटिनं जानाति, तदा 'ब्राह्मणश्चातिथिश्चैष अनुक्तो हि शपेत माम्' (२) इत्यनन्तरसर्गे कथं सीतोक्तिरिति चेत्—सीता पुरतः स्थितं रावणं यद्यपि न जानाति ; किन्तु तस्य हृदयदोषं परं जानाति। अतश्च तस्य दुर्हृदयत्वेऽपि, ब्राह्मणत्वात् मां शपेद्वा इति चिन्तयैव तथोक्तिः युज्यत एव। एवञ्च सीता तं रावणमजानन्ती, ब्राह्मण एव कश्चित् बुद्धिदोषादेवं वदतीति मनुते स्मेति भाति। अधिकमन्यत्र ॥

[1] महात्मना–ज. [2] उपनीय–ज.

पाद्येनाभिनिमन्त्र्येति । सत्कृत्येत्यर्थः । तदा—पाद्यप्रदानानन्तरकाले सौम्यदर्शनं तं सिद्धमित्येवाब्रवीत्—सर्वं पक्वमित्येवाब्रवीत् ॥ ३३ ॥

द्विजातिवेषेण समीक्ष्य मैथिली
समागतं पात्रकुसुम्भधारिणम् ।
अशक्यं उद्वेष्टुं [1]उपायदर्शनात्
न्यमन्त्रयत् ब्राह्मणवत् [2]तथागतम् ॥ ३४ ॥

पात्रं—यतिपात्रम् । कुसुम्भं—कुसुम्भवस्त्रं च धरतीति तथा । "अशक्यं उद्वेष्टुं उपायदर्शनात् न्यमन्त्रयत् ब्राह्मणवत्तथागतं" इति पाठः । उपायानां—ब्राह्मणत्वप्रतिपत्त्यै रावणेन रचितानां काषायदण्डब्रह्मघोषादीनां दर्शनात् उद्वेष्टुं—द्वेषं कर्तुं, उच्छठत्वात् उपेक्षितुमशक्यं अनुचितं तथागतं—तथावेषं प्राप्तवन्तं ब्राह्मणवदेव न्यमन्त्रयत्—सीता सत्कृतवती ॥

इयं बृसी, ब्राह्मण! काममास्यतां
इदं च पाद्यं प्रतिगृह्यतामिति ।
इदं च सिद्धं वनजातमुत्तमं
*त्वदर्थं अव्यग्रमिहोपभुज्यताम् ॥ ३५ ॥

तस्यैव प्रकारः—इयं बृसीत्यादि । सिद्धं वनजातमिति । पक्वं वन्यपदार्थजातमित्यर्थः ॥ ३५ ॥

निमन्त्र्यमाणः प्रतिपूर्णभाषिणीं
नरेन्द्रपत्नीं प्रसमीक्ष्य मैथिलीम् ।
प्रसह्य तस्या हरणे †[3]धृतं मनः
[4]समर्पयामास वधाय रावणः ॥ ३६ ॥

---

* त्वदर्थं सिद्धं-ति. गो. † धृतं—धीरं यथा तथा, मनोविशेषणं वा—गो. सीताया दर्शनात् पूर्वमेव तस्याः हरणे निश्चितं मनः, इदानीं सीताया दर्शनेन यथाकथञ्चित् हरणे सुदृढं निश्चितमभूदिति वा ॥

[1] अपायदर्शनं—ङ. [2] तदाऽज्ञना—ङ. [3] दृढं—ज. [4] समार्पयत्स्वात्मवधाय—ङ.

प्रसह्येत्यादि । रावणः वधाय-स्वनाशसंपादनाय तस्याः प्रसह्य हरणे मनः धृतं-निश्चितं समर्पयामास-सम्यक् कृतवान् इत्यर्थः ॥

ततः सुवेषं मृगयागतं पतिं
* प्रतीक्षमाणा सहलक्ष्मणं तदा ।
[1] विवीक्षमाणा हरितं ददर्श तत्
महद्वनं नैव तु रामलक्ष्मणौ ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षट्चत्वारिंशः सर्गः

सुवेषं-शोभनाकारम् । मृगयां प्रति गतः मृगयागतः । हरितं-श्यामम् । छल(३७)मानः सर्गः ॥ ३७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे षट्चत्वारिंशः सर्गः

सप्तचत्वारिंशः सर्गः

[रावणप्रलोभनम्]

रावणेन तु वैदेही तथा पृष्टा [2] जिहीर्षता ।
† परिव्राजक[3]लिङ्गेन शशंसात्मान[4]मात्मना ॥ १ ॥

अथ सीता सत्कृत्य, का? कस्य? इत्यादिप्रश्नस्य उत्तरमुक्त्वा, तस्मिंश्च पृष्टे, तेन च स्वतत्त्वे स्वागमनप्रयोजने चाभिहिते, सीता रोषात् पारुष्यमकरोत् । रावणेनेत्यादि । आत्मानं जिहीर्षता रावणेन तथा पृष्टा-पूर्वसर्गोक्तरीत्या पृष्टा वैदेही आत्मना स्वयमेव आत्मानं शशंस ॥ १ ॥

---

* प्रतीक्षमाणा—प्रतिपालयन्ती । विवीक्षमाणा—तां दिशं विविधं पश्यन्ती—गो.

† परिव्राजकलिङ्गेन रावणेनेत्यन्वयः ।

[1] निरीक्षमाणा—ज. [2] जिहीर्षुणा—ज. [3] रूपेण—ज. [4] मज्ञना—ङ.

*ब्राह्मणश्चातिथिश्चैषः अनुक्तो हि शपेत माम् ।
इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥ २ ॥

ननु सत्कारमात्रं कर्तव्यं, किं प्रतिवचनेन ? इत्यत्राह—ब्राह्मणश्चेत्यादि । एष अनुक्तः इति छान्दसः असन्धिः । अनुक्तप्रतिवचन इत्यर्थः ॥ २ ॥

दुहिता जनकस्याहं मैथिलस्य महात्मनः ।
सीता नाम्नाऽस्मि, भद्रं ते [1]रामभार्या, द्विजोत्तम ! ॥ ३ ॥

उषित्वा द्वादशसमाः इक्ष्वाकूणां निवेशने ।
†भुञ्जाना मानुषान् भोगान् सर्वकाम[2]समृद्धिनि ॥ ४ ॥

सर्वकामसमृद्धिनि निवेशने इत्यन्वयः ॥ ४ ॥

ततः त्रयोदशे वर्षे राजाऽमन्त्रयत प्रभुः ।
अभिषेचयितुं रामं [3]समेतो राजमन्त्रिभिः ॥ ५ ॥

राज्यकर्तारो मन्त्रिणः—राजमन्त्रिणः, तैः ॥ ५ ॥

तस्मिन् संभ्रियमाणे तु [4]राघवस्याभिषेचने ।
कैकेयी नाम भर्तारं ‡[5]आर्या सा याचते वरम् ॥ ६ ॥

संभ्रियमाणे—संभ्रियमाणसंभारे । भर्तारं—दशरथं आर्या-मम पूज्या वरं याचते इति द्विकर्मकत्वात् ॥ ६ ॥

प्रतिगृह्य तु कैकेयी श्वशुरं सुकृतेन मे ।
मम प्रव्राजनं भर्तुः भरतस्याभिषेचनम् ॥ ७ ॥

---

* यतिवेषं प्रत्यात्मवंशं सा किमर्थमुक्तवतीत्यत्राह—ब्राह्मणश्चेति—गो. अत्र वक्तव्यं गतसर्गीय ३२ श्लोकटिप्पण्यां द्रष्टव्यम् । † अत्र अमानुषान् भोगान् भुञ्जाना इत्यपि संभवति । ‡ आर्या—पूज्या, मम श्वश्रूरित्यर्थः—गो. अनार्या इत्यपि पाठः—ति.

[1] रामस्य महिषी प्रिया—ज्र. [2] समृद्धिनी—ग. [3] सर्वेषां मतमास्थितः—ङ. [4] मध्यमा महिषी विभोः—ङ. [5] अनार्या—ङ.

द्वावयाचत भर्तारं सत्यसन्धं नृपोत्तमम् ।

मे श्वशुरं सुकृतेन वररूपेण—मम भर्तुः प्रव्राजनं, भरतस्याभिषेचनं इति द्वौ वरौ अयाचत ॥ ७ ॥

नाद्य भोक्ष्ये न च स्वप्स्ये न च पास्ये[1] कथंचन ॥ ८ ॥
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ।
इति ब्रुवाणां कैकेयीं श्वशुरो मे स मानदः ॥ ९ ॥
अयाचतार्थैः * अन्वर्थैः न च याच्ञां चकार सा ।

अन्वर्थैः—अनुगतार्थैः, अर्थैः—प्रयोजनकरैः, वाक्यैरिति शेषः, अयाचत । एवं याच्यमानाऽपि सा याच्ञां न चकार—नाङ्गीकृतवतीत्यर्थः॥

† मम भर्ता महातेजाः[2] पञ्चविंशतिवर्षकः ॥ १० ॥

---

* अन्वर्थैः—अर्थानुगतैः, सप्रयोजनैरिति यावत्, उपभोगक्षमैरित्यर्थः, अर्थैः—सुवर्णरत्नादिभिः कैकेयीमयाचत, वरद्वयप्रतिनिधित्वेनैतानर्थान् प्रतिगृह्णेति प्रार्थयामासेत्यर्थः—गो. अन्वर्थैः—'अर्थो येनार्थकृत्येन संव्रजत्यविचारयन् । तमर्थमर्थशास्त्रज्ञाः प्राहुः' (अर. 43-34) इत्युक्तार्थानुगतैः इत्यर्थः । † नन्विदमयुक्तं, 'ऊनषोडशवर्षोऽयं' इति विश्वामित्रं प्रति दशरथोक्तेः ; 'उषित्वा द्वादश समाः' इत्यत्रोक्तेश्चेति चेत्—न—अल्पान्तरत्वात् । अतितरुणावस्थायामपि राज्यं त्यक्तवानित्यर्थे तात्पर्येणास्थया तथोक्तेः । यद्वा अतिक्रान्तपञ्चविंशक इत्यर्थः—ति. पञ्चविंशकः—पञ्चविंशेन युक्ताः काः—त्रयः यस्य सः, अष्टाविंशतिवार्षिक इत्यर्थः । अत एव 'ऊनषोडशवर्षो मे रामो राजीवलोचनः' इति विश्वामित्रं प्रति दशरथोक्त्या 'उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने' इति रावणं प्रति सीतोक्त्या च सिद्धस्य वनप्रवेशसमये अष्टाविंशतिवार्षिकत्वस्य नापलापः । निरूपितं चैतद्विस्तरशः 'ऊनषोडशवर्षो मे' इत्यत्र व्याख्याने—रा. रामस्य जन्मारभ्य द्वादशे वर्षे विश्वामित्रागमनम् । तदनन्तरं वैदेह्या सह नगरे द्वादशवर्षाणि वासं कृतवान् । ततः परं त्रयोदशे यौवराज्याभिषेकारंभः । ततश्च वनप्रवेशसमये रामः पञ्चविंशतिवर्षाहः । ततो मुनीनामाश्रमेषु दश वत्सराः । पञ्चवट्यां त्रयः । वनवासस्य चतुर्दशे वर्षे सीतापहरणम्—गो.

[1] कदाचन—ज. [2] वयसा पञ्चविंशकः—ग.

अष्टादश हि वर्षाणि मम जन्मनि गण्यते ।

मम जन्मनीति । जन्मारभ्येति यावत् । अत्र काचित् काकदन्त-परीक्षा रामविषयिण्यस्ति । सा तु उपेक्ष्यते । यद्वा लिखामः—

द्वादशे तु मुनेः सङ्गः सीतया चानया सह ।
पुरे च वत्सरं वासः पञ्चविंशे वनागमः ॥
मुन्याश्रमेष्वथ दश पञ्चवट्यां ततस्त्रयः ।
अथोनचत्वारिंशे स्यात् सीतापहरणं त्विति ॥

ततश्च पञ्चविंशतिवर्षक इत्यस्य वनानिर्गमकाले इति शेषः ॥ १० ॥

रामेति प्रथितो लोके [1]गुणवान् सत्यवान् शुचिः ॥ ११ ॥
विशालाक्षो महाबाहुः सर्वभूतहिते रतः ।
*[2]कामार्तस्तु [3]महातेजाः पिता दशरथः स्वयम् ॥ १२ ॥
कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत् ।
अभिषेकाय तु पितुः समीपं राममागतम् ॥ १३ ॥
कैकेयी मम भर्तारं इत्युवाच [4]धृतं वचः ।
तव पित्रा समाज्ञप्तं ममेदं शृणु, राघव ! ॥ १४ ॥
भरताय प्रदातव्यं इदं राज्यमकण्टकम् ।
त्वया हि खलु वस्तव्यं नव वर्षाणि पञ्च च ॥ १५ ॥
वने प्रव्रज, काकुत्स्थ ! पितरं मोचयानृतात् ।

पितरं अनृतान्मोचयेति । तत्प्रवर्तितवरानुपालनेनेति शेषः ॥

---

* कामार्त इति । कामार्ततया प्रथमं 'तव यत् प्रियं तत्करिष्यामि' इति प्रतिज्ञाय, पश्चाद्रामप्रव्राजने वृत्ते प्रतिज्ञाभङ्गं कर्तुमक्षमः नाभ्यषेचयदित्यर्थः—गो.

[1] सत्यवान् शीलवान्—ज. [2] कामार्थश्च—ङ. [3] महाराजः—ज.
[4] दृढ—ङ. द्रुतं—ज.

तथेत्युक्त्वा च तां रामः कैकेयीमकुतोभयः ॥ १६ ॥
चकार तद्वचः तस्याः मम भर्ता दृढव्रतः ।
—दद्यान्न प्रतिगृह्णीयात् सत्यं ब्रूयान्न चानृतम् ॥ १७ ॥
एतद् ब्राह्मण! रामस्य [1]ध्रुवं व्रतमनुत्तमम् ।
तस्य भ्राता तु *[2]वैमात्रः लक्ष्मणो नाम वीर्यवान् ॥
रामस्य पुरुषव्याघ्रः सहायः समरेऽरिहा ।

वैमात्र इति । विभिन्नायाः मातुरपत्यं वैमात्रः । मातृशब्दस्य स्वस्रादित्वेन स्त्रीप्रत्ययाभावात् न ठक् । असंख्यादिपूर्वत्वात् नापि "मातुरुत्" इत्युत् । अतः केवलं आपत्योऽण् । भिन्नोदर-भ्रातेत्यर्थः ॥ १८ ॥

स भ्राता लक्ष्मणो नाम [3]धर्मचारी दृढव्रतः ॥ १९ ॥
अन्वगच्छत् धनुष्पाणिः प्रव्रजन्तं †मया सह ।
जटी तापसरूपेण मया सह महानुजः ॥ २० ॥
प्रविष्टो दण्डकारण्यं धर्मनित्यो [4]जितेन्द्रियः ।
ते वयं प्रच्युता राज्यात् कैकेय्यास्तु कृते त्रयः ॥ २१ ॥
विचराम, द्विजश्रेष्ठ! वनं गम्भीरमोजसा ‡ ।
समाश्वस मुहूर्तं तु शक्यं वस्तुमिह त्वया ॥ २२ ॥
आगमिष्यति मे भर्ता वन्यमादाय पुष्कलम् [5] ।
मुहूर्तं तु समाश्वसेति । विश्रान्तिं कुर्वित्यर्थः ॥ २२ ॥

---

* द्वयोर्मात्रोरपत्यं पुमान् द्वैमात्रः—गो सापत्नीकमातुः पुत्र इत्यर्थः—ती.
† मयासह अन्वगच्छदित्यन्वयः—गो. ‡ ओजसा—स्ववीर्येण—रा.
[1] व्रतं धृ—ज. [2] द्वैमात्रः—ङ. [3] ब्रह्मचारी—ज. [4] दृढव्रतः—ज.
[5] एतदनन्तरं "रुरून् गोधान् वराहांश्च हत्वाऽऽदायामिषं बहु ।" इत्यधिकं—ज.

*स त्वं नाम च गोत्रं च कुलं चाचक्ष्व तत्त्वतः ॥ २३ ॥
एकश्च दण्डकारण्ये किमर्थं चरसि, द्विज!
एवं ब्रुवन्त्यां सीतायां रामपत्न्यां महाबलः ॥ २४ ॥
प्रत्युवाचोत्तरं तीव्रं रावणो राक्षसाधिपः।
†येन वित्रासिता लोकाः सदेवासुर[1]पन्नगाः ॥ २५ ॥
अहं स रावणो नाम, सीते! रक्षोगणेश्वरः।
त्वां तु काञ्चनवर्णाभां दृष्ट्वा कौशेयवासिनीम् ॥ २६ ॥
रतिं स्वकेषु दारेषु नाधिगच्छाम्यनिन्दिते!
दृष्ट्वेति। पूर्वं श्रुत्वा, अद्य दृष्ट्वा चेत्यर्थः ॥ २६ ॥

बह्वीनामुत्तमस्त्रीणां आहृतानामितस्ततः ॥ २७ ॥
सर्वासामेव, भद्रं ते, ममाग्रमहिषी भव।
लङ्का नाम समुद्रस्य मध्ये मम महापुरी ॥ २८ ॥
सागरेण परिक्षिप्ता निविष्टा [2]नगमूर्धनि।
तत्र, सीते! मया सार्धं वनेषु [3]विहरिष्यसि ॥ २९ ॥

---

*ननु सन्न्यासिनं प्रति कुलगोत्रप्रश्नोऽनुपपन्नः। एकाकितया अरण्ये सञ्चारश्च यतेर्धर्म एव। अतोऽङ्कत इव प्रतिभातीति चेत्, उच्यते—पूर्वाश्रमनामगोत्रप्रश्नोऽयम्। 'भिक्षार्थं ग्रामं प्रविशेत्' इति श्रुत्या भिक्षुभिर्ग्रामसमीपारण्ये वस्तव्यम्, न तु ग्रामप्रसङ्गरहितेऽरण्ये इति, 'कथं भवान् भिक्षाप्रदजनरहिते चरति?' इति प्रश्न उपपद्यते—गो. परन्तु सीता रावणं 'ब्राह्मण!' 'द्विजश्रेष्ठ!' 'द्विज!' इत्येव संबुध्यतीत्यवधेयमत्र।

†यद्यपि परिव्राजकरूपेणागतवतः रावणस्य हठात् एवंवादः न चातुर्याबहः, परन्तु 'स मन्मथशराविष्टः' (46-13) इत्यादिना तस्य कामोपहतचित्तत्वप्रतीत्या, कामपरवशानां स्वप्रलोभनीयनारीपुरतः विकत्थनस्यावश्यत्वतः हठात् स्वप्रभावमेव वर्णयितुमुपक्रमते रावणः। अत एव पूर्वश्लोके 'प्रत्युवाचोत्तरं तीव्रं' इति दृश्यते। तीव्र—त्वरित—मवशत इति यावत्॥

[1] मानुषाः—ज्ञ. [2] गिरि—ज्ञ. [3] विचरिष्यसि—ज्ञ.

न चास्यारण्यवासस्य स्पृहयिष्यसि, भामिनि !

तत्र—लङ्कायाम् । वनेष्विति उपवनेष्वित्यर्थः ॥ २९ ॥

*पञ्च [1] दास्यः सहस्राणि सर्वाभरणभूषिताः ॥ ३० ॥

मीते ! परिचरिष्यन्ति भार्या भवसि मे यदि ।
रावणेनैवमुक्ता तु कुपिता जनकात्मजा ॥ ३१ ॥

प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम् ।
महागिरिमिवाकम्प्यं महेन्द्र[2]सदृशं पतिम् ॥ ३२ ॥

महोदधिमिवाक्षोभ्यं अहं राममनुव्रता ।
सर्वलक्षणसम्पन्नं †न्यग्रोधपरिमण्डलम् ॥ ३३ ॥

---

* रक्षोयोनौ तमोगुणप्रधानायां जातत्वात् उद्रिक्ततमसा भगवन्मायया ज्ञानाच्छादनादेवमुक्तिः । सर्वथा तत्त्वज्ञो रावणः कथमेवं वदेदिति तु श्रद्धाजाड्यमेव, तत्त्वज्ञचिह्नानुपलंभात् । सीतारामौ सर्वेश्वरावित्येतावन्मात्रज्ञानं रावणस्यास्त्येवेत्यपि श्रद्धाजाड्यमेव । विष्णुपुराणादिविरोधात् । एवंविधदुरुक्तीनां यद्वातद्वाप्रकारेणान्यथायोजनप्रयासः तीर्थादीनां विफल एव-इति. महेश्वरतीर्थः—त्वां तु काञ्चनवर्णाङ्गीमित्यादिश्लोकस्य प्रतीतिकार्थः स्पष्टः । वस्तुतस्तु—त्वां—ममेष्टदेवतामित्यर्थः । दृष्ट्वा स्वकेषु पुत्रमित्रादिषु दारेषु च रतिं—इच्छां नाधिगच्छामि । ममेष्टदेवतायास्तव दर्शनेनानन्दपूर्णोऽहं सर्वतो निवृतोऽस्मीति भावः । बह्वीनामिति । इतस्तत आहृतानां उत्तमस्त्रीणां सर्वासां मम मे या अग्रमहिषी तस्याश्च मम च भव, ईश्वरीति शेषः । लङ्केति । तत्र—लङ्कायां वनेषु विहरिष्यसि यदि, तदाऽरण्यवासं न स्पृहयिष्यसि । पञ्चेति । पञ्चसहस्राणि दास्यः मे—मया सार्धं परिचरिष्यन्ति, यदि तवेति शेषः—तदा भार्या—मया—कान्त्या आर्या—पूज्याऽसीति सम्बन्धः । रावणेनेति । पुत्रसदृशेनेति शेषः । एव प्रार्थनारूपेणोक्ताऽपि अतितामसभक्तो रावणः श्रीरामवियोगं संपादयतीति कुपिता जनकात्मजा प्रत्युवाचेति सम्बन्धः ॥ † यद्वा 'कूपोदकं वटच्छाया युवतीनां स्तनद्वयम् । शीतकाले भवेदुष्णं उष्णकाले च शीतलम्' इत्युक्तरीत्या सर्वकालेऽपि सर्वजनानुकूलम्—गो.

[1] दासी—क. [2] सदृशद्युतिम्—क.

सत्यसन्धं [1]महाभागं अहं राममनुव्रता ।

न्यग्रोधपरिमण्डलं—न्यग्रोधवत् बहुशाखबन्धुस्तोमं, तद्वत् सर्वाश्रयणीयं च ॥ ३३ ॥

महाबाहुं महोरस्कं * सिंहविक्रान्तगामिनम् ॥ ३४ ॥

नृसिंहं सिंहसंकाशं अहं राममनुव्रता ।

सिंहस्य विक्रान्तः—पदविक्षेपः तथा । पदविक्षेपवत् गमनशीलमित्यर्थः ॥ ३४ ॥

पूर्णचन्द्राननं रामं [2]राजवत्सं जितेन्द्रियम् ॥ ३५ ॥

पृथुकीर्तिं महात्मानं अहं राममनुव्रता ।

राजवत्सं—दशरथपुत्रम् । राजा चासौ वत्सश्रेष्ठः तरुणश्चेत्यपि ॥

त्वं पुनः जम्बुकः सिंहीं मामिच्छसि सुदुर्लभाम् ॥ ३६ ॥

नाहं शक्या त्वया स्प्रष्टुं आदित्यस्य प्रभा यथा ।
पादपान् काञ्चनान् नूनं बहून् पश्यसि मन्दभाक् ॥ ३७ ॥

राघवस्य प्रियां भार्यां यस्त्वमिच्छसि [3]रावण !

काञ्चनपादपदर्शनं मुमूर्षुलक्षणम् । मन्द—क्षीणं आयुरादिकं भजतीति मन्दभाक् ॥ ३७ ॥

क्षुधितस्य हि सिंहस्य मृगशत्रोः तरस्विनः [4] ॥ ३८ ॥

---

* सिंहवत् सगर्वगमनशीलम् -ति. गो.

[1] महाबाहु-ङ. [2] राजीवाक्षं-ङ. [3] राक्षस-ज. [4] एतदनन्तरं—"आस्यं प्रविश्य तरसा जिह्वामाहर्तुमिच्छसि । वल्मीकान्ताद्विनिरसत्य प्रत्याशां वीक्षितस्य च ॥"—दृश्यधिकं-ङ.

आशीविषस्य [1] वदनात् दंष्ट्रामादातुमिच्छसि ।
मन्दरं पर्वतश्रेष्ठं [2] पाणिना हर्तुमिच्छसि ॥ ३९ ॥

कालकूटं विषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि ।
अक्षि सूच्या प्रमृजसि जिह्वया लेक्षि च क्षुरम् ॥ ४० ॥
राघवस्य प्रियां भार्यां योऽधिगन्तुं त्वमिच्छसि ।
अक्षि इति पृथक् पदम् ॥ ४० ॥

* अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ॥ ४१ ॥
सूर्याचन्द्रमसौ चोभौ पाणिभ्यां हर्तुमिच्छसि ।
यो रामस्य प्रियां भार्यां प्रधर्षयितुमिच्छसि ॥ ४२ ॥

अग्निं प्रज्वलितं [3] दृष्ट्वा वस्त्रेणाहर्तुमिच्छसि ।
† कल्याणवृत्तां रामस्य यो भार्यां हर्तुमिच्छसि ॥ ४३ ॥

अयोमुखानां शूलानां ‡ [4] अग्रे चरितुमिच्छसि ।
रामस्य सदृशीं भार्यां [5] योऽधिगन्तुं त्वमिच्छसि ॥ ४४ ॥

यदन्तरं सिंहसृगालयोर्वने
यदन्तरं स्यन्दिनिकासमुद्रयोः ।
§ सुराग्रचसौवीरकयोर्यदन्तरं
तदन्तरं [6] वै तव राघवस्य च ॥ ४५ ॥

---

* अवसज्य—बध्वा—गो. † कल्याणवृत्तां—शुभाचाराम् गो. ‡ अग्रे—तादृशशूलाग्रेषु पादं निक्षिप्येत्यर्थः । § सुराग्रयं—श्रेष्ठमद्यं—गो. सुरा अग्रया—पूर्वमुत्पन्ना यस्मात्, अमृतमित्यर्थः—रा.

[1] तु मुखात्—ङ. [2] पाणिभ्यां—ङ. [3] दीप्तं, स्पृष्ट्वा—ङ. [4] मध्ये—ज. [5] योऽभिगन्तुं—ङ. [6] दाशरथेस्तवैव च—ज.

स्यन्दनिका—क्षुद्रनदी स्यन्दनधर्मवान् कूपवाप्यादिश्च ।
सुराग्रस्य—सोमराजस्य अमृतमयस्य सौवीरस्य—काञ्जिकस्य चेत्यर्थः ॥

यदन्तरं काञ्चनसीसलोहयोः
यदन्तरं चन्दनवारिपङ्कयोः ।
यदन्तरं हस्तिबिडालयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥ ४६ ॥

हस्तिबिडालयोः—गजमार्जारयोः ॥ ४६ ॥

यदन्तरं वायसवैनतेययोः
यदन्तरं मद्गुशूरयोरपि ।
यदन्तरं [1]सारसगृध्रयोर्वने
तदन्तरं दाशरथेः तवैव च ॥ ४७ ॥

मद्गुः—जलवायसः ॥ ४७ ॥

तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ ।
*हृताऽपि तेऽहं न जरां गमिष्ये
[2]वज्रं यथा मक्षिकयाऽवगीर्णम् ॥ ४८ ॥

---

* मक्षिकया अवगीर्णं—ग्रस्तं वज्रं—हीररत्नं, मक्षिकया तण्डुलखण्डभ्रान्त्या ग्रस्तं हीररत्नमित्यर्थः ; यथा न जीर्णं भवति । यद्वा—मक्षिकया सहावगीर्णं—भुक्तं वज्रं—आज्यं, 'वज्रो वा आज्यम्' इति श्रुतेः, यथा न जीर्णं भवतीत्यर्थः—नो. ते—त्वया हृताऽपि अहं न जरां गमिष्ये—अनिरादेव मां रामः मोचयेदेवेति तात्पर्यम् । अथवा मदपहरणं जीर्णीकर्तुं त्वया सर्वथाऽशक्यमित्यर्थः । भवदभिमतं सर्वथा न सिध्येदिति यावत् ।

[1] इसक—ङ. [2] आज्यं—ज्ञ.

जर्गं–जीर्णावस्थाम् । सुखोदर्कतामिति यावत् । वज्रं–आज्यम् । "वज्रो वा आज्यम् ।" मक्षिकया सह अवगीर्णं भुक्तमित्यर्थः ॥

इतीव तद्वाक्यमदृष्टभावा
[1]सुधृष्टमुक्ता रजनीचरं तम् ।
गात्रप्रकम्पव्यथिता बभूव
*वातोद्धता सा कदलीव तन्वी ॥ ४९ ॥

इतीव–इत्येव । तत्–उक्तरूपम् । वातोद्धता–आहिताग्न्यादिः, उद्धतवाता–महावातप्रकम्प्यमानेति यावत् ॥ ४९ ॥

तां वेपमानामुपलक्ष्य सीतां
स रावणो मृत्युसमप्रभावः ।
कुलं बलं नाम च कर्म च स्वं
समाचचक्षे †भयकारणार्थम् ॥ ५० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे सप्तचत्वारिंशः सर्गः

भयकारणार्थं–भयोत्पादनार्थमित्यर्थः । मौन(५०)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायामरण्यकाण्डे सप्तचत्वारिंशः सर्गः

अष्टचत्वारिंशः सर्गः

[सीताधिक्कारः]

‡एवं ब्रुवन्त्यां सीतायां संरब्धः परुषं वचः ।
ललाटे भ्रुकुटीं कृत्वा रावणः प्रत्युवाच ह ॥ १ ॥

---

* वातोद्धता—वाताहता—गो. † भूयोऽपि भयोत्पादनायेत्यर्थः । ‡एवं परुषं वचः ब्रुवन्त्यां संरब्धः—इत्यन्वयः ॥

[1] सुदुःख–ङ. सुदुष्ट–ज.

अथ कुलादिकमाचचक्षे इति यत् पूर्वसर्गान्ते उक्तं तस्यैव प्रपञ्चः। एवं ब्रुवन्त्यामित्यादि ॥ १ ॥

साक्षात् वैश्रवणस्याहं [1]सापत्ने, वरवर्णिनि!
रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ २ ॥

अहं वैश्रवणस्य सापत्ने—ज्ञातित्वे साक्षात् भवामि इति शेषः। एतेन कुलप्राशस्त्यमुक्तम्। सपत्नीशब्दः इह सर्वत्र ज्ञातिवाची ॥

यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः।
विद्रवन्ति [2]भयाद्भीताः मृत्योरिव सदा प्रजाः ॥ ३ ॥

येन वैश्रवणो [3]राजा [4]द्वैमात्रः कारणान्तरे।
*द्वन्द्वमासादितः क्रोधात् रणे विक्रम्य निर्जितः ॥ ४ ॥

द्वैमात्र इति। द्वितीया माता द्विमाता। तस्याः अपत्यं द्वैमात्रः। "मातुरुत्संख्यासंभद्रपूर्वायाः" इत्युत्वं न भवति। द्विशब्दस्येह संख्याप्राधान्याविवक्षणात्। कारणान्तर इति। निमित्तान्तर इत्यर्थः। द्वन्द्वं—द्वन्द्वयुद्धम् ॥ ४ ॥

[5]यद्भयार्तः परित्यज्य †स्वमधिष्ठानमृद्धिमत्।
कैलासं पर्वतश्रेष्ठं अध्यास्ते नरवाहनः ॥ ५ ॥

स्वमधिष्ठानम्—स्वां पुरीं—अलकापुरीमिति यावत्। कैलासमध्यास्त इति। 'अधिशीङि'ति कर्मत्वं। प्रबलाश्रयहेतवे इति शेषः ॥

---

*द्वंद्वमासादितः वैश्रवणः विक्रम्य निर्जित इत्यन्वयः। †स्वं अधिष्ठानं—लङ्कां—रा. ति. इयं कथा उत्तरकाण्डे 11 सर्गे द्रष्टव्या ॥

[1] सापत्न्यः—ङ. [2] सदा भीताः—ज. [3] भ्राता—ज. [4] वैमात्रः—ज. [5] मद्भयार्तः—ज.

*यस्य तत् पुष्पकं नाम विमानं कामगं शुभम् ।
वीर्यादेवार्जितं, भद्रे ! येन यामि विहायसम् ॥ ६ ॥

येन—पुष्पकेण ॥ ६ ॥

मम संजातरोषस्य मुखं दृष्ट्वा, मैथिलि !
विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः ॥ ७ ॥

यत्र तिष्ठाम्यहं तत्र मारुतो वाति शङ्कितः ।
तीव्रांशुः [1]अमृतांशुश्च भयात् संपद्यते [2]रविः ॥ ८ ॥

रविः तीव्रांशुरपि भयात्—मद्भयात् अमृतांशुश्च संपद्यते ॥

निष्कम्पपत्राः तरवः नद्यश्च स्तिमितोदकाः ।
भवन्ति यत्र यत्राहं तिष्ठामि विचरामि च ॥ ९ ॥

†मम पारे समुद्रस्य लङ्का नाम पुरी शुभा ।
संपूर्णा राक्षसैर्घोरैः यथेन्द्रस्यामरावती ॥ १० ॥

पारे समुद्रस्येति । "पारे मध्ये षष्ठ्या वा" इति विभक्त्यधिकारात् अव्ययीभावाभावः ॥ १० ॥

प्राकारेण परिक्षिप्ता पाण्डरेण विराजता ।
हेमकक्ष्या पुरी रम्या वैदूर्यमयतोरणा ॥ ११ ॥

पाण्डरेणेति । सुधालेपवशादिति शेषः । हेमकक्ष्या—हेममय्यः कक्ष्याः—अवच्छेदाः यस्याः सा तथा ॥ ११ ॥

---

* उत्तरकाण्डे 15 सर्गे इयं कथा द्रष्टव्या । † मम पुरीत्यन्वयः ।

[1] शिशिरांशुश्च—ङ. ञ. [2] दाव—ञ.

हस्त्यश्वरथसंबाधा तूर्यनादविनादिता[1]।
[2]सर्वकालफलैर्वृक्षैः * संकुलोद्यानशोभिता ॥ १२ ॥
तत्र त्वं वसती, सीते! राजपुत्रि! मया सह।
न स्मरिष्यसि नारीणां मानुषीणां, मनस्विनी ॥ १३ ॥

नारीणां न स्मरिष्यसीति। 'अधीगर्थे' ति षष्ठी ॥ १३ ॥

भुञ्जाना मानुषान् भोगान् दिव्यांश्च, वरवर्णिनि!
न स्मरिष्यसि रामस्य मानुषस्य † गतायुषः ॥ १४ ॥
‡स्थापयित्वा प्रियं पुत्रं राज्ये दशरथेन यः।
मन्दवीर्यः सुतो ज्येष्ठः ततः [3]प्रस्थापितो ह्ययम् ॥ १५ ॥
तेन किं भ्रष्टराज्येन रामेण § गतचेतसा।
करिष्यसि, विशालाक्षि! तापसेन तपस्विना ॥ १६ ॥

तापसेन—शोच्येन। तपस्विना—अशूरेण ॥ १६ ॥

[4]सर्वराक्षसभर्तारं [5]कामात् स्वयमिहागतम्।
न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्हसि ॥ १७ ॥
प्रत्याख्याय हि मां, भीरु! [6]परितापं गमिष्यसि।
चरणेनाभिहत्येव ‖ पुरूरवसमुर्वशी ॥ १८ ॥

पुरूरवसं राजानं चरणेनाभिहत्य उर्वशीव तापं—पश्चात्तापं गमिष्यसीति। यथा श्रुतौ पुराणे च प्रसिद्धम् ॥ १८ ॥

---

* संकुलेति पृथक्पदम्। सर्वकालफलैर्वृक्षैः संकुला—व्याप्ता। † गतायुषः—गतप्रायायुषः, अल्पायुष इत्यर्थः—गो. ‡ प्रियं पुत्र—भरतम्। § गतचेतसा—कर्तव्याकर्तव्यविमूढमनसा—गो. ‖ ऊर्वशी किल स्वयमेव प्रार्थयन्तं पुरूरवसं प्रथमं निरस्य, पश्चात्तापेन पुनस्तमागतेति पौराणिकी कथा—गो. इयं कथा पद्मपुराणे दृश्यते।

[1] एतदनन्तरं "शतयोजनविस्तीर्णा त्रिंशद्योजनमायता" इत्यधिकं—ङ. [2] सर्वकाम—ज. [3] प्रव्राजितो वनम्—ङ. [4] यक्ष—ङ. रक्ष—ज. [5] कामय स्वयमागतम्—ज. [6] पश्चात्तापं—ज.

अङ्गुल्या न समो रामः मम युद्धे स मानुषः ।
तव भाग्येन * संप्राप्तं भजस्व, वरवर्णिनि ! ॥ १९ ॥

अङ्गुल्या न समः इति । अङ्गुलिबलेनापि तुल्यबलो न भवतीत्यर्थः ॥ १९ ॥

एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना ।
अब्रवीत् परुषं वाक्यं रहिते राक्षसाधिपम् ॥ २० ॥

रहिते—रामरहिते आश्रमे स्थितं इति शेषः ॥ २० ॥

कथं वैश्रवणं देवं सर्व[1]भूतनमस्कृतम् ।
भ्रातरं व्यपदिश्य त्वं अशुभं कर्तु[2]मिच्छसि ॥ २१ ॥
अवश्यं विनशिष्यन्ति सर्वे, रावण ! राक्षसाः ।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ २२ ॥
अपहृत्य शचीं भार्यां शक्यमिन्द्रस्य जीवितुम् ।
न च रामस्य भार्यां मां [3]अपनीयास्ति जीवितम् ॥ २३ ॥
जीवेच्चिरं वज्रधरस्य [4]हस्तात्
शचीं प्रधृष्याप्रतिरूपरूपाम् ।
न मादृशीं, राक्षस ! [5]दूषयित्वा
पीतामृतस्यापि तवास्ति मोक्षः ॥ २४ ॥

† इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टचत्वारिंशः सर्गः

---

* संप्राप्तं—मामिति शेषः । † अत्र सर्गे रावणोक्तौ—" सप्तसप्तकवेत्ताऽहं अष्टाष्टकविभूषितः । पञ्चपञ्चकतत्त्वज्ञः रावणोऽहं भजस्व माम् ॥ "—इति श्लोकः क्वचित्पठ्यते । स कतकाद्यर्वाचीनत्वात् प्रक्षिप्त इति ज्ञायते । तदर्थस्तु—सप्तसप्तकं—षडंगसहितवेदोपवेदसहितचतुर्दशविद्यारूपं तद्वेत्ता । अष्टाष्टकविभूषितः—षष्टिकलाभूषितः । पञ्चपञ्चकतत्त्वज्ञः—पञ्चविंशतितत्त्वस्वरूपवेत्ता इति—ति.

[1] देव—ज्ञ. [2] महंसि—ङ. [3] आनीय स्वस्तिमान् भवेत—ज्ञ. [4] पश्चात्—ज्ञ. [5] धर्षयित्वा—ज्ञ.

अप्रतिरूपं—अनुपमं रूपं यस्याः सा तथा। पीतं अमृतं येन स तथा। वीर(२४)मानः सर्गः ॥ २४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे अष्टचत्वारिंशः सर्गः

एकोनपञ्चाशः सर्गः

[सीतापहरणम्]

सीतायाः वचनं श्रुत्वा दशग्रीवः प्रतापवान्।
हस्ते हस्तं [1]समाहन्य चकार सुमहद्वपुः ॥ १ ॥

क्रुद्धेन गृहीतनिजरूपेण रावणेन यस्मै आगतं तत् कर्म कृतम्। सीतायाः इत्यादि। हस्ते हस्तं समाहन्येति। समाहत्येति यावत्। मान्तानुदात्तोपदेशानामेव 'वा ल्यपि' इति अनुनासिकलोपे विकल्पः। अमान्तस्य तु नित्य एव सः। *भुजेन भुजास्फालनं शूराणां संनाहविशेषः ॥ १ ॥

†स मैथिलीं पुनर्वाक्यं बभाषे [2]च ततो भृशम्।
नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ ॥ २ ॥

न श्रुतौ मन्य इति। प्रागुक्ताविति शेषः। २ ॥

उद्वहेयं भुजाभ्यां तु मेदिनीमम्बरे स्थितः।
आपिबेयं समुद्रं च हन्यां मृत्युं रणे स्थितः ॥ ३ ॥

---

* हस्ततलयोरेव घट्टनं वा विवक्षितम्। भुजास्फालनं तु समयोर्घर्षणायामेव प्रसिद्धम्। † 'चकार सुमहद्वपुः' इत्यस्यैव प्रपञ्चो वा दशमश्लोकपर्यन्तम्।

1 समाहत्य—ङ. 2 वाक्यकोविदः—ञ.

अर्कं [1]रुन्ध्यां शरैस्तीक्ष्णैः विभिन्द्यां हि महीतलम् ।
*[2]कामरूपिणमुन्मत्त! पश्य मां कामदं पतिम् ॥ ४ ॥

एवमुक्तवतस्तस्य [3]सूर्यकल्पे शिखिप्रभे ।
क्रुद्धस्य †हरिपर्यन्ते रक्ते नेत्रे बभूवतुः ॥ ५ ॥

हरिपर्यन्ते—श्यामपर्यन्तप्रदेशे ॥ ५ ॥

सद्यः सौम्यं परित्यज्य [4]भिक्षुरूपं स रावणः ।
[5]स्वं रूपं कालरूपाभं भेजे वैश्रवणानुजः ॥ ६ ॥
संरक्तनयनः श्रीमान् तप्तकाञ्चन[6]कुण्डलः ।
क्रोधेन महताऽऽविष्टः नीलजीमूतसंनिभः ॥ ७ ॥
दशास्यः [7]कार्मुकी बाणी बभूव क्षणदाचरः ।
स परिव्राजकच्छद्म महाकायो विहाय तत् ॥ ८ ॥

परिव्राजकच्छद्मेति । परिव्राजकात्मतया रूपमित्यर्थः ॥ ८ ॥

[8]प्रतिपद्य स्वकं रूपं रावणो राक्षसाधिपः ।
[9]संरक्तनयनः क्रोधात् जीमूतनिचयप्रभः ॥ ९ ॥
रक्ताम्बरधरस्तस्थौ स्त्रीलं [10]प्रेक्ष्य मैथिलीम् ॥ १० ॥
[11]स तामसितकेशान्तां ‡ भास्करस्य प्रभामिव ।
वसनाभरणापेतां मैथिलीं रावणोऽब्रवीत् ॥ ११ ॥

---

* कामरूपेण (पा.)—स्वेच्छाचारेण उपलक्षिते, अत एव—हे उन्मत्ते—रा. † हरिपर्यन्ते—पिङ्गलवर्णपर्यन्ते गो. ‡ असितकेशान्तां—नीलकेशाग्रां—केशाग्रे पैङ्गलं दुर्लक्षणम्—गो.

[1] तुद्यां ज. [2] कामरूपेण उन्मत्ते पश्य मां कामरूपिणम्—ज. [3] रावणस्य—ज. [4] तीक्ष्णरूपं—ज. [5] स्वरूपं कालसंकाशं ङ. [6] भूषणः—ज. [7] विंशतिभुजः—ज. [8] प्रतिपेदे—ज. [9] इदमर्धं कुण्डलितं—ज. [10] प्रेक्ष्य—ङ. [11] सीता—ङ.

* त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि ।
मामाश्रय, वरारोहे ! तवाहं सदृशः पतिः ॥ १२ ॥
मां भजस्व चिराय त्वं अहं श्लाघ्यः [1]प्रियस्तव ।
नैव चाहं क्वचित्, भद्रे ! करिष्ये तव विप्रियम् ॥ १३ ॥
त्यज्यतां †मानुषो भावः मयि भावः प्रणीयताम् ।
राज्यात् च्युतमसिद्धार्थं रामं ‡परिमितायुषम् ॥ १४ ॥

मानुषः—मनुष्यरामविषयकः भावः—स्नेहबन्धः ॥ १४ ॥

कैर्गुणैरनुरक्ताऽसि, मूढे ! पण्डितमानिनि !
यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनम् ॥ १५ ॥
अस्मिन् व्यालानुचरिते वने वसति दुर्मतिः ।
इत्युक्त्वा मैथिलीं वाक्यं प्रियार्हां §प्रियवादिनीम् ॥
अभिगम्य सुदुष्टात्मा [2]राक्षसः काममोहितः ।
जग्राह रावणः सीतां ‖बुधः खे रोहिणीमिव ॥ १७ ॥

प्रियार्हां प्रियवादिनीं । रावणादन्यत्र इति शेषः । काममोहितः जग्राह इत्यत्र अत्यन्तानौचित्ये दृष्टान्तः—बुधः खे रोहिणीमिवेति । अभूतोपमेयम् । रौहिणेयो बुधः रोहिणीं स्वमातरं यदि

---

* यदि तादृशं भर्तारमिच्छसि, तर्हि मामाश्रय, अहमेव किल्ला तादृश इत्याशयः । † मानुषो भावः—अरामनस्कता वा । ‡ चिराय मां भजस्वेत्येतत्प्रतिकोटितयाऽऽह—परिमितायुषमिति । § प्रियवादिनीं—प्रियवदनशीलां—वाचाऽप्यनपराध्यन्तीमिति भावः । ‖ 'बुधः खे रोहिणीमिव' इत्यभूतोपमेयम् । बुधः स्वपितृपत्नीत्वेन मातरं खे—आकाशे सुखेन सञ्चरन्तीं यदि गृह्णीयात्—तत्तुल्यमिदं पापमित्यर्थः—गो.

[1] पतिस्तव—ज. [2] रावणः कालचोदितः—ङ.

कामात् गृह्णीयात् तत्सदृशमिदं घोरमित्यर्थः । ननु कथं सीता न शापतो रावणं नाशयति ? उच्यते—

अयुक्तयोक्तव्यनिजघोरोत्थत्वेन रक्षसः ।
पतिनिग्राह्यतां ज्ञात्वा सर्वज्ञा जोषमास्थिता ॥

अयमेवाशयः कविना रोहिणीदृष्टान्तेन सूचितः । श्लोकार्धः योगिजनगम्यः, न प्रश्नार्हः । अन्यदपि—

प्राग्वेदवत्यात्मकृतप्रतिज्ञास्मृतितो विभोः ।
सोढ्वा स्थितं, सा प्रतिज्ञा * तत्समूलविनाशने ॥

वेदवतीति त्रयीप्रधाना श्रीमहामातुर्मूर्तिः । सीता तु तत्सारत्रिपदाप्रधाना शुद्धचै । तपश्चरन्त्या रावणधर्षितया तु प्रतिज्ञां कृत्वा देहः उत्सृष्टः । सा तु प्रतिज्ञा—

"यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने ।
तस्मात् तव वधार्थं वै उत्पत्स्येऽहं महीतलात् ॥" (उत्तर. १७-३१)

इति । सा च प्रतिज्ञा भगवदाज्ञया स्मृता इति ॥ १७ ॥

वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ।
ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥ १८ ॥
तं दृष्ट्वा मृत्युसङ्काशं तीक्ष्णदंष्ट्रं महाभुजम् ।
प्राद्रवन् गिरिसङ्काशं भयार्ता वनदेवताः ॥ १९ ॥
स च मायामयो दिव्यः खरयुक्तः खरस्वनः ।
प्रत्यदृश्यत † हेमाङ्गः रावणस्य महारथः ॥ २० ॥

---

* रावणमात्रभस्मीकारे राक्षसकुलनाशो न स्यादित्याशयः । † हेमाङ्गः—स्वर्णमयचक्रः, चक्रं हि रथाङ्गमित्युच्यते—गो.

ततस्तां *परुषैर्वाक्यैः भर्त्सयन् स महास्वनः ।
†अङ्केनादाय वैदेहीं रथमारोपयत्तदा ॥ २१ ॥

अङ्केनादायेति । अङ्कशब्दः इह सर्वत्र कटिप्रदेशवाची । हस्तान्तरैरिति शेषः ॥ २१ ॥

सा गृहीता विचुक्रोश रावणेन यशस्विनी ।
रामेति सीता दुःखार्ता ‡रामं दूरगतं वने ॥ २२ ॥

[1]तामकामां स कामार्तः पन्नगेन्द्रवधूमिव ।
§[2]विवेष्टमानामादाय उत्पपाताथ रावणः ॥ २३ ॥

अकामां—विरागिणीम् ॥ २३ ॥

ततः सा राक्षसेन्द्रेण ह्रियमाणा विहायसा ।
भृशं चुक्रोश मत्तेव भ्रान्तचित्ता यथाऽऽतुरा ॥ २४ ॥

विहायसा—आकाशमार्गेण । मत्ता—पैत्त्यवशात् उन्मत्तेवेत्यर्थः ॥

हा लक्ष्मण ! महाबाहो ! गुरुचित्तप्रसादक !
ह्रियमाणां न जानीषे रक्षसा [3]माममर्षिणा ॥ २५ ॥

जीवितं सुखमर्थांश्च धर्महेतोः परित्यजन् ॥ ।
ह्रियमाणां अधर्मेण मां, राघव ! न पश्यसि ॥ २६ ॥

---

*रावणादात्मानं मोचयितुं यतन्तीं परुषोक्तिभिः भर्त्सयन् । †अङ्केन—हस्तान्तरैरित्यर्थः—ति. अङ्केन—ऊरुभागेन—गो. ‡दूरगतं रामं रामेति विचुक्रोश—उच्चैराक्रन्दनेनाहूतवती । §विवेष्टमानां—रथोपरिस्थले लुठन्तीं—गो. विचेष्टमानां तत आत्मानं मोचयितुं—ति. ॥ राघवविशेषणमिदम् ।

[1] रामकामां—ङ. [2] विचेष्टमानां—ज. [3] कामरूपिणा—ज.

ननु नामाविनीतानां विनेताऽसि, परंतप !
कथमेवंविधं पापं न त्वं शाधि हि रावणम् ? ॥ २७ ॥

ननु नामेति प्रसिद्धौ। शाधि हीति पदद्वयम्। कथं एवंविधं हि पापं न शाधि इति ॥ २७ ॥

न तु सद्योऽविनीतस्य दृश्यते कर्मणः फलम् ।
कालोऽप्यङ्गीभवत्यत्र सस्यानामिव पक्तये ॥ २८ ॥

तत्र स्वयमेव हेतुमुन्नयति—न त्वित्यादि। अविनीतस्य पुरुषस्य अविनयकर्मणः फलं तु सद्यो न दृश्यत एव। कुत इत्यतः—कालोऽपीत्यादि। अङ्गीभवतीति। सहकारिकारणं भवतीत्यर्थः। पक्तिः—पाकः ॥ २८ ॥

[2]स कर्म कृतवानेतत् कालोपहतचेतनः ।
जीवितान्तकरं घोरं रामात् व्यसनमाप्नुहि ॥ २९ ॥

अथ यः आशयः श्लोकेनास्माभिः वर्णितः * स एव स्पष्टीक्रियते मात्रा—स कर्मेत्यादि—रामात् व्यसनमाप्नुहीति ॥ २९ ॥

† हन्तेदानीं सकामाऽस्तु कैकेयी सह बान्धवैः ।
[3]ह्रियेयं धर्मकामस्य धर्मपत्नी यशस्विनः ॥ ३० ॥

ह्रियेयमिति यतः अतः सकामाऽस्तु इति योजना ॥ ३० ॥

---

* 'पतिनिग्राह्यतां ज्ञात्वा सर्वज्ञा जोषमास्थिता' इति 17 श्लोकव्याख्यायामुक्तः अर्थः—अत्र 'रामात् व्यसनमाप्नुहि' इत्यत्र स्पष्ट इति भावः ॥ † वने राक्षसादिभिर्हृता भवेदिति मां कैकेयी वनं प्रेषितवतीति वैदेह्या हृदये सर्वदा स्थितं, तदिदानीं सुप्तप्रमत्त-कुपितानां भावज्ञानं दृष्टमिति न्यायेनोद्घाटयति— हन्तेति—गो.

[1] शास्सि—ङ्ग. [2] त्वं—ज्ञ. [3] ह्रिये यद्धर्मै—ङ्ग.

*आमन्त्रये जनस्थाने कर्णिकारान् सुपुष्पितान् ।
क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥ ३१ ॥

हरतीति शंसध्वमिति योजना ॥ ३१ ॥

†[माल्यवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम् ।
क्षिप्रं रामाय शंस त्वं सीतां हरति रावणः ॥

हंसकारण्डवाकीर्णां वन्दे गोदावरीं नदीम् ।
क्षिप्रं रामाय शंस त्वं सीतां हरति रावणः ॥]

माल्यवन्तमित्यादिश्लोकद्वयं प्रक्षिपन्ति केचित् । न तत् प्राचीनपाठेऽस्ति ॥

दैवतानि च यान्यस्मिन् वने विविधपादपे ।
नमस्करोम्यहं तेभ्यः भर्तुः शंसत मां हृताम् ॥ ३२ ॥

यानि कानिचिदप्यत्र सत्त्वानि [1] निवसन्त्युत ।
सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥ ३३ ॥

ह्रियमाणां प्रियां भर्तुः प्राणेभ्योऽपि गरीयसीम् ।
विवशाऽपहृता सीता रावणेनेति शंसत ॥ ३४ ॥

विदित्वा मां महाबाहुः ‡अमुत्रापि महाबलः ।
आनेष्यति पराक्रम्य वैवस्वतहृतामपि ॥ ३५ ॥

अमुत्र—परलोके । वैवस्वतहृतां वाऽपि मां शनैर्विदित्वा पराक्रम्य—पराक्रमं कृत्वा आनेष्यत्येव, अतो यूयं शंसतेति शेषः ॥

---

*आमन्त्रये—प्रार्थये—रा. संबोधयामि—गो. † इदं श्लोकद्वयं महेश्वरतीर्थ-गोविन्दराजादिसम्मतम् । ‡ अमुत्र—स्वर्गलोके गतामपि, वैवस्वतहृतामपि मां—गो.

[1] विविधानि च—ज.

सा तदा करुणाः वाचः विलपन्ती सुदुःखिता ।
वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥ ३६ ॥

सा तमुद्वीक्ष्य सुश्रोणी रावणस्य [1] वशं गता ।
समाक्रन्दत् भयपरा [2] दुःखोपहतया गिरा ॥ ३७ ॥

जटायो ! पश्य मामार्य ! ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण * करुणं पापकर्मणा ॥ ३८ ॥

नैष वारयितुं शक्यः †[3] तव क्रूरो निशाचरः ।
सत्त्ववान् ‡ जितकाशी च सायुधश्चैव दुर्मतिः ॥ ३९ ॥

वारयितुं न शक्यते इत्यत्र हेतुः—सत्त्ववानित्यादि । जितकाशी—जितभयः ॥ ३९ ॥

रामाय तु यथातत्त्वं, जटायो ! हरणं मम ।
लक्ष्मणाय च तत् सर्वं [4] आख्यातव्यमशेषतः ॥ ४० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकोनपञ्चाशः सर्गः

नाभि(४०)मानः सर्गः ॥ ४० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकोनपञ्चाशः सर्गः

---

* करुणं यथा तथा ह्रियमाणां—गो. अकरुणं यथा भवति तथा अनाथवत् ह्रियमाणां—रा. † तव—त्वया । भवता वारयितुमशक्यत्वात् रामाय वृत्तं कथयेत्यर्थः । ‡ जितकाशी—जयावहः—गो.

[1] वशानुगा—ङ. [2] दुःखोपहतया—ज. [3] त्वया—ज. [4] आख्यातव्यं विशेषतः—ङ.

पञ्चाशः सर्गः

[जटायुरभियोगः]

तं शब्द*मवसुप्तस्तु जटायुरथ शुश्रुवे।
[1]निरीक्ष्य रावणं क्षिप्रं वैदेहीं च [2]ददर्श सः ॥ १ ॥

अथ सीतानिवेदितापहारेण जटायुना न्यायोक्तिपूर्वं रावणनिरोधः। तं शब्दमित्यादि। अपहारावेदनशब्दमित्यर्थः। अवगाढ सुप्तः—अवसुप्तः ॥ १ ॥

ततः पर्वतकूटाभः तीक्ष्णतुण्डः [3]खगोत्तमः।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिरम् ॥ २ ॥

दशग्रीव ! स्थितो धर्मे पुराणे †सत्य[4]संश्रवः [5]।
जटायुर्नाम नाम्नाऽहं गृध्रराजो महाबलः ॥ ३ ॥

दशग्रीवेति संबुद्धिः। सत्यसंश्रवः—सत्यप्रतिज्ञः। सीतासंरक्षणे अहं सहायः इत्युक्तत्वात् इत्याशयः। अहं उच्यमाननामादिकः ॥ ३ ॥

राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः।
लोकानां च हिते युक्तः रामो दशरथात्मजः ॥ ४ ॥

किं ततः ? इत्यत आह—राजेत्यादि ॥ ४ ॥

तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी।
सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि ॥ ५ ॥

---

*अवसुप्तः—ईषत्सुप्तः—गो. भोजनोत्तरं दिवैव गाढसुप्तोऽपि—ति. वार्धक्यादीषत्सुप्त इव स्थितः। †सत्यसंश्रयः—सत्यं—'सत्यं ज्ञानमनन्तं ब्रह्म' इत्युक्तः परमात्मा संश्रयः—आलम्बनं यस्य सः—गो.

[1]निरैक्षत ज. [2]यशस्विनीम्—ङ. [3]खगेश्वरः—ङ. [4]संश्रयः—ङ. [5]एतदनन्तरं—"भ्रातस्त्वं निन्दितं कर्म कर्तुं नार्हसि सांप्रतम्" इत्यधिकं—ङ.

* कथं राजा स्थितो धर्मे परदारान् परामृशेत् ।
रक्षणीया विशेषेण राजदाराः, महाबल ! ॥ ६ ॥

राजा, भवानिति शेषः ॥ ६ ॥

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत् समाचरेद्धीरः † यत् परोऽस्य विगर्हयेत् ॥ ७ ॥
‡ यथाऽऽत्मनः तथाऽन्येषां दाराः रक्ष्याः [1] विपश्चिता ।

यत्परोऽस्येति । अस्य—पुरुषस्य परः—स्वेतरः प्राणी यत कर्म विगर्हयेत्—निन्दति, न तत् कर्म समाचरेत् । स्वदारवत् परदाराश्च परस्पर्शात् रक्षणीया इति ॥ ७ ॥

§ पापस्वभावः चपलः कथं त्वं, रक्षसां वर ! ॥ ८ ॥
ऐश्वर्य[2]मभि संप्राप्तः ‖ विमानमिव दुष्कृतिः ।
¶ [3] कामस्वभावो यो यस्य न शक्यः तं प्रमार्जितुम् ॥
न हि दुष्टात्मना [4] मार्यं आवसत्यालये चिरम् ।

---

* रामस्य सर्वलोकनाथत्वानभ्युपगमेऽपि, भवानिव रामोऽपि कश्चन राजैव । एवं सति परस्परराजमर्यादातिलङ्घनं युक्तं वेत्याशयः । † परः अस्य यत विगर्हयेत्, न तत् समाचरेदित्यन्वयः । ‡ स्वदाराणां परैरपहरणादौ यो भावो भवेत्, सः स्वेन परदारापहरणादावपि विवेकिना स्मरणीय इति तात्पर्यम् । § 'पापस्वभावः' इत्यादि-श्लोकद्वयं 'राजमूलं प्रवर्तते' (श्लो. 11½) इत्येतदनन्तरं गोविन्दराजीयादिषु पठ्यते । ‖ त्वं दुष्कृतिः—निषिद्धकर्मा विमानमिव ऐश्वर्यं कथं संप्राप्तः—रा. त्वं दुष्कृतिः विमानं—देवार्हं विमानमिव ऐश्वर्यमभि-ऐश्वर्यं प्रति कथं संप्राप्तः—योग्यः । एवं विषयचपलश्चेत् ऐश्वर्यात् भ्रष्टो भविष्यसीति भावः—गो. ¶ यो यस्य स्वभावः—औत्पत्तिकः, स धर्मः कामं—अत्यन्तं परिमार्जितुं न शक्यः—उपदेशेन निवर्तयितुं न शक्य इत्यर्थः । तथाहि—आर्यं—सदुपदेशरूपं कर्म दुष्टात्मनां आलये—हृदये चिरं नावसति—न तिष्ठति—गो. काममित्यभ्युपगमार्थकमव्ययं वा ॥

[1] विमर्शता—ङ. विमर्शनात्—ज. [2] मिह—ङ. [3] कामं—ङ.
[4] मार्या आवसन्त्यालये—ङ.

अयं धर्मः पापेषु न तिष्ठतीत्याह—कामेति। यः पुमान् कामस्वभावो भवति, सोऽसौ तं तं स्वभावं प्रमार्जितुं न शक्यः। कुतः इत्यत आह—न हीत्यादि। हि—यस्मात् दुष्टात्मनां आलये—चित्ते आर्यं—पूज्यं—पुण्यं चिरं—चिरायापि नावसति। तस्मादेव "धर्मेण पापमपनुदति" इति श्रुतेः धर्म एव कामादि-पापस्य निवृत्तिसाधनं, पापिषु तदभावात् पापस्वभावः अशक्य-मार्जनः केनापीति भावः ॥ ९ ॥

[1]अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतम् ॥ १० ॥
व्यवस्यन्ति [2]न राजानः धर्मं, पौलस्त्यनन्दन ! ।

शास्त्रेष्वनागतमिति। अप्रतिपादितमित्यर्थः। न व्यव-स्यन्तीति। नेच्छन्तीत्यर्थः ॥ १० ॥

राजा [*]धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः ॥ ११ ॥
धर्मः शुभं वा [3]पापं वा राजमूलं प्रवर्तते।

राजेत्यादि। द्रव्याणां—उत्तमवस्तूनां निधिः राजैव। कामश्चेति। प्रजानामिति शेषः। कुतः इत्यतः—धर्मः शुभं वेत्यादि। शुभं—शुभाचारः यतो राजमूलं प्रवर्तते ततः इति योजना ॥ ११ ॥

विषये वा पुरे वा ते यदा रामो महाबलः ॥ १२ ॥
नापराध्यति धर्मात्मा कथं तस्यापराध्यसि।

यदा राम इति। यस्मादित्यर्थः ॥ १२ ॥

यदि शूर्पणखाहेतोः जनस्थानगतः खरः ॥ १३ ॥
अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा।

---

[*] धर्मादिशब्दाः धर्मादिप्रवर्तकपराः—गो.

[1] धर्ममर्थं च कामं च—ङ. [2] अनुराजानं—ज्ञ. [3] कामो वा—ङ

अत्र ब्रूहि यथातत्त्वं को रामस्य व्यतिक्रमः ॥ १४ ॥
यस्य त्वं लोकनाथस्य भार्यां हृत्वा गमिष्यसि ।

अनपराधोऽसिद्धः इत्याशङ्क्य परिहरति—यदीत्यादि । अनपराधे हेतुः—पूर्वमतिवृत्त इति । उचितमतिक्रम्य जायमानं वृत्तं यस्य स तथा ॥ १३-१४ ॥

क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षुषा ॥ १५ ॥
दहेत् [1] दहनभूतेन वृत्रमिन्द्राशनिर्यथा ।

मा त्वा । त्वामिति यावत् । घोरेण चक्षुषा मा दहेत् । राम इति शेषः । इन्द्रस्य अशनिः—इन्द्राशनिः ॥ १५ ॥

सर्पमाशीविषं बद्ध्वा वस्त्रान्ते नावबुध्यसे ॥ १६ ॥
ग्रीवायां [2] प्रतिमुक्तं च कालपाशं न पश्यसि ।

स भारः, सौम्य ! भर्तव्यः यो नरं नावसादयेत् ॥ १७ ॥
तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् * ।

स भार इति । भारद्रव्यमित्यर्थः । अनामयं—रोगानुत्पादकम् ॥

यत् कृत्वा न भवेत् धर्मः न † कीर्तिः न यशो [3] भुवि ॥
शरीरस्य भवेत् खेदः [4] कस्तत् कर्म समाचरेत् ।

यत् कृत्वेत्यादि । कीर्तिः—पारलौकिकी पुण्यातिशयजा । बलैश्वर्यातिशयजं—यशः । यस्मात् धर्मादिः नास्ति, अपि तु शरीरस्य खेद एव केवलं भवति, तत् कर्म कः समाचरेत् । न कोऽपि विपश्चिदित्यर्थः ॥

---

* अनामयं सत्—रोगानुत्पादकं सत् जीर्यति । अनामयमिति क्रियाविशेषणं वा । सीताऽपहरणं त्वया जीर्णयितुं न शक्यमिति भावः ॥ † कीर्तिः—ऐश्वर्यादिजनिता प्रथा । यशः—भोगित्वकृतप्रथा—गो. यशः—प्रभावव्याप्तिः, तत्फलं—कीर्तिः—इति वा ।

[1] दहनकल्पेन—ङ. [2] प्रतिसक्तं—ङ. [3] ध्रुवम्—ज. [4] न तत्—ङ.

षष्टिर्वर्षसहस्राणि मम जातस्य, रावण ॥ १९ ॥
पितृपैतामहं राज्यं यथावदनुतिष्ठतः ।

राज्यमिति । पक्षिगणाधिपत्यमित्यर्थः ॥ १९ ॥

वृद्धोऽहं त्वं युवा धन्वी सशरः कवची रथी ॥ २० ॥
तथाऽप्यादाय वैदेहीं कुशली न गमिष्यसि ।

न शक्तः त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः ॥ २१ ॥
*हेतुभिः न्यायसंसिद्धैः ध्रुवां वेदश्रुतीमिव ।

मम पश्यतः इत्यनादरे षष्ठी । हेतुभिरित्यादि । न्याय-संसिद्धैः—पूर्वापरमीमांसासूत्रसम्यक्समर्थितैः हेतुभिः—स्ववाक्य-श्रुतोपपत्तिभिः ध्रुवां—सुप्रतिष्ठितधर्मब्रह्मलक्षणार्थां वेदश्रुतीं. छान्दसो दीर्घः, उक्तधर्मब्रह्मतत्त्ववेदनसाधनभूतां श्रुतिं-त्रयीं असुं इव हर्तुं न शक्तोऽसीति योजना ॥ २१ ॥

†युद्धयस्व यदि शूरोऽसि मुहूर्तं तिष्ठ, रावण ! ॥ २२ ॥
शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ।

शयिष्यस इति शीङः सेट्त्वात् ॥ २२ ॥

---

* न्यायसंयुतैः—वैशेषिकाद्युक्ततर्काभासयुक्तैः हेतुभिः—हेत्वाभासैः ध्रुवां—सनातनीं धर्मब्रह्मपरां वेदश्रुतिम्—तच्छास्त्राध्येता यथा पूर्वापरमीमांसान्यायावदोऽग्रे हर्तुं—अन्यथाकर्तुं न शक्नोति, तद्वदित्यर्थः—नि. न्यायसंसिद्धैः—न्यायशास्त्रसंसिद्धैः हेतुभिः—अनुमानैः ध्रुवां—निश्चाल्यां, अविचाल्यप्रामाण्यामिति यावत्, वेदश्रुतीमिव—वेदयतीति वेदः, स्वतः प्रमाणभूतां श्रुतिमित्यर्थः । यथा वेदविदग्रेसरे पश्यति सति हेतुकैः न्यायसिद्धैर्हेतुभिः श्रुतिः अन्यथा—अन्यपरा नेतुं न शक्यते, तद्वदिति भावः—गो. तर्कः किल सर्वत्राप्यनुकूलः सुलभ एव—इत्याशयः । † पूर्वं रामेण हतः खर इव युद्धे मया हतः त्वं भूमौ शयिष्यसि । यद्वा—यदि शूरोऽसि तदा मया युध्यस्व । अथवा रामागमनपर्यन्तं मुहूर्तं तिष्ठ, तेन हतः शयिष्यसे इति—गो. वृद्धस्य जटायुषः स्वाशक्तिं, कालस्यातिक्रमणीयतां च पश्यतः ङालायमानमनस्त्वात् विचित्रा वाक्प्रवृत्तिरिति भाति । अनन्तरसर्गस्य २९ तम श्लोकोऽप्यत्र द्रष्टव्यः ॥

असकृत् संयुगे येन निहताः [1]दैत्यदानवाः ॥ २३ ॥
न चिराच्चीरवासास्त्वां रामो युधि वधिष्यति ।
संयुगे, रामेणेति शेषः ॥ २३ ॥

*किं नु शक्यं मया कर्तुं ? गतौ दूरं नृपात्मजौ ॥ २४ ॥
क्षिप्रं त्वं नश्यसे, नीच ! †तयो र्भीतो न संशयः ।
नश्यसे इति न संशयः इत्यन्वयः ॥ २४ ॥

न हि मे जीवमानस्य नयिष्यसि शुभामिमाम् ॥ २५ ॥
सीतां कमलपत्राक्षीं रामस्य महिषीं प्रियाम् ।
जीवमानस्य-जीवतः इति यावत् । नयिष्यसि-नेष्यसीति यावत् ॥

अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ॥ २६ ॥
जीवितेनापि रामस्य तथा दशरथस्य च ।

तिष्ठ तिष्ठ, दशग्रीव ! मुहूर्तं पश्य, रावण ! ॥ २७ ॥
युद्धातिथ्यं प्रदास्यामि [2]यथाप्राणं, निशाचर ! ।
वृन्तादिव फलं [3]त्वां तु पातयेयं रथोत्तमात् ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चाशः सर्गः

यथाप्राणं—यथाबलम् । (चारु)जर (२८)मानः सर्गः ॥ २८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चाशः सर्गः

---

* एवमुक्तेऽपि पलायमानं प्रत्याह— किं न्विति । किं नु शक्यं—किं वा शक्यम् । नश्यसे—अदर्शनं प्राप्नोषि । तयोः—ताभ्याम्—गो. † रामलक्ष्मणयोः भयात् किल त्वं परोक्षे सीतां हरसीत्यर्थः ।

[1] देव—ङ. [2] यावत्प्राणं—ङ. [3] पक्वं—ङ

एकपञ्चाशः सर्गः

[जटायुश्शातनम्]

[1]इत्युक्तः क्रोधताम्राक्षः तप्तकाञ्चन[2]कुण्डलः ।
राक्षसेन्द्रोऽभिदुद्राव पतगेन्द्रममर्षणः ॥ १ ॥

अथ रावणजटायुयुद्धम् । इत्युक्त इत्यादि ॥ १ ॥

ससंग्रहारस्तुमुलः तयोस्तस्मिन् [3]महावने ।
बभूव [4]वातोद्धुतयोः मेघयोर्गगने यथा ॥ २ ॥

वातोद्धुतयोः—वातेन उद्धुतयोः—प्रवर्तितयोः ॥ २ ॥

तत् बभूवाद्भुतं युद्धं गृध्रराक्षसयोर्यथा ।
सपक्षयोः *माल्यवतोः महापर्वतयोरिव ॥ ३ ॥

सपक्षयोः—पक्षसहितयोः । माल्यवतोः—माल्यवदाख्ययोः, "हिमवान् निषधो विन्ध्यो माल्यवान्" इति कुलाचलः । स एवासौ महागिरिः । दण्डकारण्येऽप्येको माल्यवान् गिरिरस्तीति प्रसिद्धिमात्रम् । वस्तुतस्तु अभूतोपमा ॥ ३ ॥

ततो †नालीकनाराचैः तीक्ष्णाग्रैश्च विकर्णिभिः ।
अभ्यवर्षत् महाघोरैः गृध्रराजं [5]महाबलः ॥ ४ ॥

नालीकनाराचाः शतशो व्याकृताः ॥ ४ ॥

---

* माल्यवान्नामानौ द्वौ पर्वतौ। एको दण्डकारण्ये पूर्वं (49 सर्गेऽधिकपाठे) उक्तः। अन्यः किष्किन्धासमीपे (किष्किन्धाकाण्डे 28-1) वक्ष्यति—गो. † नालीकैः—नालमात्रशरैः। नाराचैः—आयसशरैः। विकर्णिभिः—अङ्कुशाग्रशरै—गो.

[1] संरक्तनयनः कोपात्—ङ. एतच्छ्लोकात् पूर्वं—"इत्युक्तस्य यथान्यायं रावणस्य जटायुषा। क्रुद्धस्याग्निनिभाः सर्वाः रेजुर्विंशतिदृष्टयः ॥"—इत्यधिकम्—ङ.
[2] भूषणः—ङ. [3] महामृधे—ज. [4] वातोद्धतयोः—ङ. [5] महाबलम्—ज.

स तानि शरजालानि गृध्रः पत्ररथेश्वरः ।
जटायुः प्रतिजग्राह *[1]रावणास्त्राणि संयुगे ॥ ५ ॥

रावणास्त्राणि । रावणविसृष्टानीत्यर्थः । शरजालस्य विशेषणमिदम् । औणादिकः त्रन् ॥ ५ ॥

तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां विपोथयन् ।
चकार बहुधा गात्रे व्रणान् पतगसत्तमः ॥ ६ ॥

पुथ संक्लेशे, विपोथयन्—पीडयन् । तस्य गात्रे इत्यन्वयः ॥

अथ [2]क्रोधात् दशग्रीवः जग्राह दश मार्गणान् ।
मृत्युदण्डनिभान् घोरान् [3]शत्रुमर्दनकांक्षया ॥ ७ ॥

स तैर्बाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः ।
बिभेद निशितैस्तीक्ष्णैः गृध्रं घोरैः †शिलीमुखैः ॥ ८ ॥

स [4]राक्षसरथे पश्यन् ‡जानकीं बाष्पलोचनाम् ।
अचिन्तयित्वा तान् बाणान् राक्षसं समभिद्रवत् ॥ ९ ॥

ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् ।
चरणाभ्यां महातेजाः बभञ्ज [5]पतगेश्वरः ॥ १० ॥

ततोऽन्यद्धनुरादाय रावणः क्रोधमूर्छितः ।
ववर्ष शरवर्षाणि शतैरथोऽथ सहस्रशः ॥ ११ ॥

---

* रावणास्त्राणि—रावणक्षिप्तानीति शरजालविशेषणम् । अस्यतेरौणादिकस्त्रन् । 'रावणास्त्रानि' इति पाठस्तु सुगम एव-ति. † शिलीमुखैः—शिली—शब्दं मुखे येषां तैः बाणैः-गो. ‡ जानकीञ्यथादर्शनेन स्वसंकटाचिन्तनम् ।

[1] सवणास्त्रानि-ङ. [2] क्रुद्धः-ङ. [3] शत्रोर्निधन-ज. [4] रावणरथे-ङ. [5] पतगोत्तमः-ज.

शरैरावारितस्तस्य* संयुगे पतगेश्वरः ।
कुलायमुपसंप्राप्तः पक्षीव प्रबभौ तदा ॥ १२ ॥

आवारितः—आसमन्ताद्व्याप्तः ॥ १२ ॥

स तानि शरवर्षाणि †पक्षाभ्यां च विधूय च ।
चरणाभ्यां महातेजाः बभञ्जास्य महद्धनुः ॥ १३ ॥

‡तच्चाग्निसदृशं दीप्तं रावणस्य [1]शरासनम् ।
पक्षाभ्यां स [2]महावीर्यः व्याधुनोत् पतगेश्वरः ॥ १४ ॥

तच्चेति । द्वितीयमपि धनुः इत्यर्थः । व्याधुनोत्—कम्पयति स्म । रावणमिति शेषः ॥ १४ ॥

§काञ्चनोरश्छदान् दिव्यान् पिशाचवदनान् खरान् ।
तांश्चास्य जवसंपन्नान् जघान समरे बली ॥ १५ ॥

जघान—हतवान् ॥ १५ ॥

[3]वरं त्रिवेणुसंपन्नं कामगं पावकार्चिषम् ।
[4]मणिहेमविचित्राङ्गं बभञ्ज च महारथम् ॥ १६ ॥

त्रिवेणुः—युगन्धरः ॥ १६ ॥

पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैः सह ।
पातयामास वेगेन ग्राहिभी राक्षसैः सह ॥ १७ ॥

---

*तस्य शरैरित्यन्वयः । †तानि च शरवर्षाणि पक्षाभ्यां विधूय चरणाभ्यां महद्धनुः (द्वितीयं धनुः) बभञ्ज—गो. ‡तत् प्रसिद्धं शरावरं—कवचं व्याधुनोत्—पातयामास । शरासनमिति पाठे, तच्च द्वितीयं धनुः बभञ्जेत्यर्थः—ति. शरावरं—कवचं—गो. रा. §काञ्चनोरश्छदान् —स्वर्णमयकवचयुक्तान् तांश्च खरान् जघान ।

[1] शरावरम्—छ. ज. [2] महातेजाः—ज. [3] अथ—ज. [4] मणिसोपानचित्राङ्गं—ज.

सारथेश्चास्य वेगेन तुण्डेनैव महच्छिरः ।
पुनः व्यपाहरत् श्रीमान् पक्षिराजो महाबलः ॥ १८ ॥

स भग्नधन्वा विरथः हताश्वः हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ १९ ॥

दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनम् ।
साधु साध्विति भूतानि गृध्रराजमपूजयन् ॥ २० ॥

परिश्रान्तं तु तं दृष्ट्वा जरया पक्षियूथपम् ।
उत्पपात पुनर्हृष्टः मैथिलीं गृह्य रावणः ॥ २१ ॥

तं प्रहृष्टं निधायाङ्के गच्छन्तं जनकात्मजाम्[1] ॥

गृध्रराजः समुत्पत्य समभिद्रुत्य रावणम् ।
[2]समावार्य महातेजाः जटायुरिदमब्रवीत् ॥ २२ ॥

समावार्येति । संनिरुध्येत्यर्थः ॥ २२ ॥

*वज्रसंस्पर्शबाणस्य भार्यां रामस्य, रावण !
अल्पबुद्धे ! हरस्येनां वधाय खलु रक्षसाम् ॥ २३ ॥

समित्रबन्धुः सामात्यः सबलः सपरिच्छदः ।
विषपानं पिबस्येतत् †पिपासित इवोदकम् ॥ २४ ॥

सबलः—चतुरङ्गबलसहितः । परिच्छदः—दासदासीजनः ।
न शिष्यसीत्यध्याहार्यम् ॥ २४ ॥

---

* वज्रसंस्पर्शाः—वज्रसमस्पर्शाः बाणाः यस्य—गो. † बुद्धिपूर्वकप्रवृत्तौ दृष्टान्तः—पिपासित इत्यादि ।

[1] एतदनन्तरं— " गच्छन्तं खड्गशेषं च प्रणष्टहतसाधनम् "—इत्यधिकं—ज.

[2] समावार्य—ङ.

*अनुबन्धमजानन्तः कर्मणामविचक्षणाः ।
शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २५ ॥

अनुबन्धं—अनु बध्यते इत्यनुबन्धः—कर्मफलम् ॥ २५ ॥

बद्धस्त्वं कालपाशेन क्व गतः †तस्य मोक्ष्यसे ।
वधाय बडिशं गृह्य सामिषं जलजो यथा ॥ २६ ॥

क्व गतस्तस्य मोक्ष्यसे इति व्यत्ययात् षष्ठी । क्व गत्वा तं कालपाशं मोक्ष्यसे । न क्वापि ते तन्मोक्षः इत्यर्थः । 'बडिशं मत्स्य-वेधनम्' । जलजः—मत्स्यः यथा नश्यति, तथा नशिष्यसीति शेषः ॥

न हि जातु दुराधर्षौ काकुत्स्थौ तव, रावण !
धर्षणं चाश्रमस्यास्य क्षमिष्येते तु राघवौ ॥ २७ ॥

अस्याश्रमस्य तव धर्षणं—अभिभवं न क्षमिष्येते ॥ २७ ॥

यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् ।
तस्कराचरितो मार्गः नैष वीरनिषेवितः ॥ २८ ॥

यथा त्वया कृतं कर्म, एष तस्कराचरितो मार्गः न वीर-निषेवितः, पापस्पर्श इवेत्यर्थः ॥ २८ ॥

युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ, रावण !
शयिष्यसे हतो भूमौ यथा भ्राता खरस्तथा ॥ २९ ॥

‡परेतकाले पुरुषः यत्कर्म प्रतिपद्यते ।
विनाशायात्मनोऽधर्म्यं प्रतिपन्नोऽसि कर्म तत् ॥ ३० ॥

---

* अनुबन्धः—परिणामः । † तस्य—तस्मात् रामादिति वा । ‡ मृत्यौ सन्निहिते एव एतादृशी प्रवृत्तिः स्यादित्याशयः ।

*पापानुबन्धो वै यस्य कर्मणः कर्म को नु तत् ।
कुर्वीत लोकाधिपतिः स्वयंभू[1]र्भगवानपि ॥ ३१ ॥

पापानुबन्ध इत्यादि । यस्य कर्मणः कर्तुः पापानुबन्धः—पापफलसंबन्धः आवश्यकः शास्त्रदृष्टः को नु प्राणी तत् कर्म कुर्वीत ? माऽस्तु प्राणिभिस्तत् कर्मकरणं, तत् फलवारणासामर्थ्यात्, ईश्वरास्तु कुर्वन्त्येव इत्यत्राह—लोकाधिपतिरिति । इन्द्रोऽपि महेश्वरोऽपि पापफलकं कर्म न कुर्यादेव । स्वयंभूर्भगवान् पापपुण्यतदधिकारितत्फलस्रष्टा भगवानपि कर्तुमकर्तुं अन्यथाकर्तुं शक्तोऽपि न पापकर्म कुर्यात् ईश्वरोऽपि मर्यादापरिपालनाय । तस्मादैश्वर्यमत्तेन त्वया क्रियमाणं दुष्कर्म दुर्वारभोगस्वफलं अचिरादेव भविष्यति इति तात्पर्यम् ॥ ३१ ॥

एवमुक्त्वा शुभं वाक्यं जटायुस्तस्य रक्षसः ।
निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ ३२ ॥

पृष्ठे—पश्चाद्भागे । "पृष्ठं तु चरमं तनोः" ॥ ३२ ॥

तं गृहीत्वा नखैस्तीक्ष्णैः [2]विरराद समन्ततः ।
†अधिरूढो गजारोहः यथा स्यात् दुष्टवारणम् ॥ ३३ ॥

[2]विरराद ‡नखैरस्य तुण्डं पृष्ठे समर्पयन् ।
केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३४ ॥

---

* यस्य कर्मणः पापानुबन्धः—पापोत्तरत्वं स्पष्टं, तादृशं कर्म लोकाधिपतिरपि सन् को नु कुर्वीत—बुद्धिपूर्वकपापाचरणे शक्तस्यापि न प्रवृत्तिर्भवेत इत्यर्थः ।
† दुष्टवारणमधिरूढो गजारोहः यथा स्यात्—तमलक्षीकृत्य पलायमानं गजं अङ्कुशादिना यथा निरुन्ध्यात्, तथा निरुद्धवान् रावणमिति भावः । ‡ अस्य—रावणस्य पृष्ठे नखैः सह तुण्डं समर्पयन्—व्यापारयन् सन् विददार केशांश्चोत्पाटयामास—गो.

[1] भगवानिव—ङ. [2] विददार—ज.

विरराद—विकीर्णवान्। अधिरूढः गजारोहः—हस्तिपकः दुष्टवारणं—दुष्टगजं प्रति यथा स्यात्—यथाव्यापारो भवति तथा-व्यापारोऽभूदित्यर्थः। स एव प्रकाश्यते—विरराजेत्यादि। अस्य पृष्ठे इत्यन्वयः॥ ३३-३४॥

स तथा गृध्रराजेन क्लिश्यमानो मुहुर्मुहुः।
अमर्षस्फुरितोष्ठः सन् प्राकम्पत स [1]रावणः॥ ३५॥
स परिष्वज्य वैदेहीं वामेनाङ्केन रावणः।
तलेनाभि[2]जघानाशु जटायुं क्रोधमूर्छितः॥ ३६॥
जटायुस्त*[3]मभिक्रम्य तुण्डेनास्य खगाधिपः।
वामबाहून् दश तदा व्यपाहरदरिन्दमः॥ ३७॥
संछिन्नबाहोः सद्यो वै बाहवः सहसाऽभवन्।
† विषज्वालावलीयुक्ताः वल्मीकादिव पन्नगाः॥ ३८॥

वल्मीकात् पन्नगा इव सद्यो वै बाहवः समभवन् इत्यन्वयः॥

ततः क्रोधात् दशग्रीवः सीतामुत्सृज्य [4]रावणः।
मुष्टिभ्यां चरणाभ्यां च गृध्रराजमपोथयत्॥ ३९॥
ततो मुहूर्तं संग्रामः बभूवातुलवीर्ययोः।
राक्षसानां च मुख्यस्य पक्षिणां प्रवरस्य च॥ ४०॥
तस्य व्यायच्छमानस्य रामस्यार्थे स रावणः।
पक्षौ पार्श्वौ च पादौ च खड्ग[5]मुद्धृत्य सोऽच्छिनत्॥

---

* अभिक्रम्य—अभितो गत्वा—गो. † विषज्वालेत्युपमानविशेषणात् बाहूनां सायुधत्वं गम्यते—गो.

[1] राक्षसः—ज. [2] जघानार्तः—ज. [3] अतिक्रम्य—ज. [4] वीर्यवान्—ज. [5] मुद्यम्य—ङ.

व्यायच्छमानस्य — व्यायामं — पराक्रमं कुर्वाणस्य । "आङो यमहनः" इति शानच् ॥ ४१ ॥

स छिन्नपक्षः सहसा रक्षसा [1]रौद्रकर्मणा ।
निपपात [2]हतो गृध्रः धरण्यामल्पजीवितः ॥ ४२ ॥

अल्पजीवितः—द्वित्रिघटिकाऽवस्थानोचितप्राणः इत्यर्थः॥ ४२॥

तं दृष्ट्वा पतितं भूमौ क्षतजार्द्रं जटायुषम् ।
अभ्यधावत वैदेही स्वबन्धुमिव दुःखिता ॥ ४३ ॥

तं नीलजीमूतनिकाशकल्पं
सपाण्डुरोरस्कमुदारवीर्यम् ।
ददर्श लङ्काधिपतिः पृथिव्यां
जटायुषं *शान्तमिवाग्निदावम् ॥ ४४ ॥

अग्निदावमिति । विशेषणस्य पूर्वनिपातः आर्षः । दावाग्निमिति यावत् ॥ ४४ ॥

ततस्तु तं पत्ररथं महीतले
निपातितं रावणवेगमर्दितम् ।
†पुनः परिष्वज्य शशिप्रभानना
रुरोद सीता जनकात्मजा तदा ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकपञ्चाशः सर्गः

अशैव(४५ १/२)मानः सर्गः ॥ ४५ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकपञ्चाशः सर्गः

---

* अनेन, रावणः जटायुषं मृतमेव मेने इति गम्यते । † पुनः—शशमिति वा । रावणेन सकृत् रुदाऽऽपीति वा ।

[1] घोरकर्मणा—ङ. [2] महागृध्रः—ज.

द्विपञ्चाशः सर्गः

[सीतानूपुरादिभ्रंशः]

*[1]सा तु ताराधिपमुखी रावणेन निरीक्ष्य तम् ।
गृध्रराजं विनिहतं विललाप सुदुःखिता ॥ १ ॥

अथ पातितगृध्रेण रावणेन अप्रत्यूहतः सीताहरणम् । सा त्वित्यादि । रावणेन विनिहतमित्यन्वयः ॥ १ ॥

†[2]आलिङ्ग्य गृध्रं निहतं रावणेन बलीयसा ।
विललाप सुदुःखार्ता सीता शशिनिभानना ॥ २ ॥
निमित्तं [3]लक्षणं स्वप्नं शकुनिस्वरदर्शनम् ।
अवश्यं सुखदुःखेषु नराणां [4]प्रतिदृश्यते ॥ ३ ॥

निमित्तमित्यादि । नराणां सुखदुःखेषु भाविषु तत्सूचकं—निमित्तम्—वामदक्षिणाक्षिदोःस्पन्दादिरूपं लक्षणं—चिह्नम् । "अथाप्यादर्शे वोदके वा जिह्मशिरसं वा अशिरसं वा आत्मानं पश्येत् जिह्मो न वा दृश्येयातां तदाप्येवमेव विद्यात्" इत्याद्युपनिषदुपदिश्यमानप्रत्यक्षदर्शनानि, "अथ स्वप्नाः पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" इत्यादितः उपदिश्यमानं स्वप्नज्ञानम्, शकुनीनां वामदक्षिणगमनविशेषदर्शनम्, काकगोमायुगौरीत्यादिस्वराणां शब्दानां च दर्शनं—अनुभवः तथा—एतत्सर्वं यथायोगं प्रतिदृश्यते सर्वेण ॥ ३ ॥

---

* पूर्वसर्गान्तिमश्लोकस्यैव विस्तरः अत्र षट् श्लोकाः । † विशेषान्तरं वक्तुं पुनरनुवदति—आलिङ्ग्येति—गो.

[1] एतत्पूर्वं—"तमप्यजीवितं गृध्रं स्फुरन्तं राक्षसाधिपः । ददर्श भूमौ पतितं समीपे राघवाश्रमात् ॥" इत्यधिकम्—ङ, ज. [2] अयं श्लोकः कुण्डलितः—ज. [3] लक्षणज्ञानं—ङ. [4] संप्रदृश्यते—ङ.

नूनं राम ! * न जानासि महद्व्यसनमात्मनः ।
धावन्ति नूनं [1] काकुत्स्थं मदर्थं मृगपक्षिणः ॥ ४ ॥

किं ततः इत्याह—नूनमित्यादि । मदर्थं—मदपहारसूचनप्रयोजनमुद्दिश्य ? काकुत्स्थमिति । नूनं मृगपक्षिणः अशुभसूचनमार्गेण धावन्त्येव । तत्सूचितं आत्मनः महद्व्यसनं हे राम ! नूनं त्वं न जानासि । जानासि चेत् नोपेक्षेथाः इति शेषः ॥ ४ ॥

अयं हि † [2] पापचारेण मां त्रातुमभिसङ्गतः ।
शेते विनिहतो भूमौ ममाभाग्याद्विहङ्गमः [3] ॥ ५ ॥
त्राहि मामद्य, काकुत्स्थ ! लक्ष्मणेति वराङ्गना ।
सुसंत्रस्ता समाक्रन्दत् ‡ शृण्वतां तु यथाऽन्तिके ॥ ६ ॥

यथाऽन्तिके इति । श्रवणं भवेदिति शेषः ॥ ६ ॥

---

* न जानासि किमिति काकुः । काकुत्स्थं त्वां—गो. † मां त्रातुं पापाचारेण रावणेन सह सङ्गतः—युद्धार्थं प्राप्तः—रा. अयं विहङ्गमः पापाचारेण रावणेन विनिहतः शेते—गो. ‡ यथा अन्तिके—निकटस्थितानां शृण्वतां श्रवणं भवेत, तथा समाक्रन्दत ; न तूच्चैः, शीघ्रं रामागमनं मा भूदिति तात्पर्येण—ति. शृण्वतामन्तिके यथा—शृण्वतां समीप इव दूरस्थितं रामं लक्ष्मणं च रामेति लक्ष्मणेति च संबोध्य आक्रन्दत—गो. इन्त ! पार्श्व एव तौ तिष्ठन्ताविव सीता समाक्रन्दत, परन्तु को वा शृणुयादिति भावः ।

[1] काकुत्स्थ—ज. [2] कृपया राम—ज. [3] एतदनन्तरं—"रावणेन हृतां मां हि कथयित्वा विहङ्गम ! राघवाभ्यां यथातत्त्वं अथो ह्यस्यसि जीवितम् ॥ आदेहपातं पक्षीश ! युध्यता रावणेन यत् । त्वया विदर्शितस्नेहौ श्वशुरे मम राघवौ ॥ जटायो हरणं यावत् मम रामाय वक्ष्यसि । तावच्छरीरे ते प्राणाः सङ्करिष्यन्ति धीरपि ॥ इति पक्षि समालिङ्ग्य स्मृत्वा श्वशुरमेव च । उच्चैः स्वरेण चुक्रोश हा राघव न पश्यसि ॥"—इत्यधिकं—ङ.

तां क्लिष्टमाल्याभरणां विलपन्तीमनाथवत् ।
अभ्यधावत वैदेहीं *रावणो राक्षसाधिपः ॥ ७ ॥
†तां लतामिव वेष्टन्तीं आलिङ्गन्तीं महाद्रुमान् ।
मुञ्च मुञ्चेति बहुशः [1]प्रवदन् राक्षसाधिपः ॥ ८ ॥
क्रोशन्तीं राम रामेति रामेण रहितां वने ।
जीवितान्ताय केशेषु जग्राहान्तकसंनिभः ॥ ९ ॥
प्रधर्षितायां सीतायां बभूव सचराचरम् ।
जगत्सर्वममर्यादं तमसाऽन्धेन संवृतम् ॥ १० ॥
न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः ।

अमर्यादं-भिन्नस्वस्वप्रकृतिकमित्यर्थः । अन्धेन तमसा—बाह्येन आभ्यन्तरेण चेत्यर्थः ॥ १० ॥

‡दृष्ट्वा सीतां परामृष्टां [2]दीनां दिव्येन चक्षुषा ॥ ११ ॥
§कृतं कार्यमिति श्रीमान् व्याजहार पितामहः ।

श्रीमान्—निस्तुलाधिकभूमविद्यैश्वर्यवान् भगवान् पितामहः—श्रीमदादिगुरुः ब्रह्मा ब्रह्मलोकस्थः दिव्येन चक्षुषा सीतां—

---

* क्षणं विश्रान्तः रावणः—गो. अभ्यधावत विश्रान्तः इति पाठः एतत्सम्मतः स्याद्वा । † वेष्टन्तीं लतामिव वृक्षानालिङ्गन्तीं—ति. महाद्रुमान् आलिङ्गन्तीं, अत एव लतामिव वेष्टन्तीं—रा. लतामिव भूतले वेष्टन्तीं—गो. ‡ यद्यपि 49 सर्ग एव 'जग्राह रावणः सीतां' (16) इत्यत्रैव अस्य श्लोकस्यास्त्यवसरः, तथाऽपि मध्ये जटायुषा प्रतिरोधसंभावनया, इदानीमेव सीतापहारस्य निश्चयादत्र प्रवृत्तोऽयं श्लोकः ॥ § कार्यं—बालकाण्डे विष्णुना प्रतिज्ञातं कृतमिति व्याजहार—प्रीत्यतिशयेन पुरुषान्तरासन्निधानेऽप्युदाहरत्—गो. यदर्थं अवतीर्णः देवानां तत् कार्यं कृतं—सिद्धमित्यब्रवीत्—ति.

[1] प्राप तां—ज्ञ. [2] देवीं—ज्ञ.

त्रिपदात्मिकां स्वशक्तिं भूगतां रक्षसा परामृष्टां दृष्ट्वा, कार्यं कृतमिति-यत् कार्यं—भूमेर्वैराजसकललोकशोधनलक्षणमुद्दिश्य वैराजपुरुषद्वारा यः स्वांशोऽवतारितः तेन तत् कार्यं कृतमित्येव—सिद्धकल्पमित्येव व्याजहार। तूलतृणकाष्ठादिनिचयस्य अग्निज्वालासंयोगवत् स्वशक्तित्रिपादब्रह्माग्निसीतास्पर्शननिमित्तस्य सिद्धत्वादित्याशयः। एवं ब्रह्मप्रीत्या च ब्रह्मावतारितो ब्रह्मांशः रामः इति सुस्पष्टम् ॥ ११ ॥

प्रहृष्टाः व्यथिताश्वासन् सर्वे ते परमर्षयः ॥ १२ ॥
दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः।
रावणस्य विनाशं च प्राप्तं [1]बुद्ध्वा यदृच्छया ॥ १३ ॥

प्रहृष्टाः व्यथिताः इति उभयहेतुप्रदर्शनं व्युत्क्रमतः—दृष्ट्वा इत्यादि ॥ १२-१३ ॥

स तु तां राम रामेति रुदन्तीं लक्ष्मणेति च।
जगामादाय चाकाशं रावणो राक्षसेश्वरः ॥ १४ ॥
* तप्ताभरण[2]वर्णाङ्गी पीतकौशेयवासिनी।
रराज राजपुत्री तु विद्युत् सौदामिनी यथा ॥ १५ ॥

तप्ताभरणवर्णाङ्गी इति प्राचीनः पाठः। तप्तकाञ्चनाभरणजालङ्कारोपेताङ्गयुक्तेत्यर्थः। विद्युत्—भ्राजादिक्विप्, विशेषेण द्योतवन्ती। सौदामिनीति। 'तेनैकदिक्' इत्यणि ङीप्, तटिदित्यर्थः। १५ ॥

---

* तप्ताभरणसर्वाङ्गी—तप्ताभरणं—तप्तकाञ्चनाभरणं, तत्तुल्यवर्णाङ्गी—गो. तप्ताभरणानि सर्वेष्वङ्गेषु यस्या इति वा।

[1] दृष्ट्वा—ङ. [2] सर्वाङ्गी—ङ.

* उद्भूतेन च वस्त्रेण तस्याः पीतेन रावणः ।
अधिकं [1]प्रतिबभ्राज गिरिर्दीप्त इवाग्निना ॥ १६ ॥

प्राप्यनाश्यत्वभावाभ्यां स्वशुभाशुभकर्मतः । सङ्गोऽतः रक्षसा सङ्गमपि वर्णयते कविः—उद्भूतेन चेत्यादि ॥ १६ ॥

तस्याः परमकल्याण्याः ताम्राणि सुरभीणि च ।
पद्मपत्राणि वैदेह्याः अभ्यकीर्यन्त रावणम् ॥ १७ ॥

रावणं अभ्यकीर्यन्त—रावणाङ्गेषु पतितान्यभूवन्नित्यर्थः । १७ ॥

तस्याः कौशेयमुद्भूतं आकाशे कनकप्रभम् ।
बभौ चादित्यरागेण ताम्रमभ्रमिवातपे † ॥ १८ ॥

आदित्यरागेण—रागयुक्तादित्यकिरणेन । अत एव—आतपे इति । अनेन ईषत्ताप उच्यते । आतपः—संध्याकालः ॥ १८ ॥

तस्याः तत् [2]सुनसं वक्त्रं आकाशे रावणाङ्कगम् ।
न रराज विना रामं विनालमिव पङ्कजम् ॥ १९ ॥

सुनसमिति । 'उपसर्गाच्च' इति नसादेशः ॥ १९ ॥

बभूव जलदं नीलं भित्त्वा चन्द्र इवोदितः ।
सुललाटं सुकशान्तं ‡ पद्मगर्भाभमव्रणम् ॥ २० ॥

---

* असङ्गाया अपि चिच्छक्तेः तस्या रावणविनाशसान्निध्यद्योतनाय कविः रावणेन तस्या आसक्तिं वर्णयति—**ति.** † आतपे—ईषत्तापे सन्ध्याकाले—**ति. रा.** आतपे—मध्याह्ने आदित्यरागेण ताम्रं—अरुणं अभ्रमिव बभौ । अनेन रावणविनाशपिशुनोत्पातः सूचितः—**गो.** ‡ पद्मगर्भाभं—विकसितपद्माभम् । अव्रणं—निर्दोषम्—**गो.**

[1] परिबभ्राज—**ज.** [2] विमलं—**ज.**

पद्मस्य गर्भः—गर्भप्रदेशः। नीलं जलदं भित्त्वेति। तन्मध्य इति शेषः ॥ २० ॥

*शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलङ्कृतम्।
तस्याः [1]तद्विमलं वक्त्रं आकाशे रावणाङ्कगम् ॥ २१ ॥
रुदितं व्यपमृष्टास्रं चन्द्रवत् प्रियदर्शनम्।
[2]सुनासं [3]चारु ताम्रोष्ठं आकाशे हाटकप्रभम् ॥ २२ ॥

रुदितं, मत्वर्थीयाजन्तः—रोदनवत्। व्यपमृष्टास्रं—अपमार्जिताश्रुकम् ॥ २२ ॥

†[4]राक्षसेन समाधूतं तस्याः तद्वदनं शुभम्।
शुशुभे न विना रामं दिवा चन्द्र इवोदितः ॥ २३ ॥

दिवोदितचन्द्रवत् अपगतशोभमित्यर्थः ॥ २३ ॥

सा हेमवर्णा [5]नीलाङ्गं मैथिली राक्षसाधिपम्।
शुशुभे काञ्चनी काञ्ची नीलं ‡[6]मणिमिवाश्रिता ॥ २४ ॥

काञ्चनी—स्वर्णमयी ॥ २४ ॥

सा ॥[7]पद्मगौरी हेमाभा रावणं जनकात्मजा।
विद्युद्घनमिवाविश्य शुशुभे तप्तभूषणा ॥ २५ ॥

---

* 'शुक्लैः' इत्यादिश्लोकत्रयं प्रत्येकं प्रत्येकं वाच्यम्। 'न शुशुभे' इति क्रियापदं श्लोकत्रयसाधारणम्। श्लोकत्रयस्य एकवाक्यत्वे तु पदानां पौनरुक्त्यादिप्रसङ्गः ॥

† राक्षसेन निमित्तेन समाधूतं—भयकम्पितम्—गो. राक्षसेन्द्रसमाधूतं—राक्षसेन्द्रात् प्राप्तकम्पं—रा. ‡ नीलं गजमाश्रिता काञ्चीव काञ्चनी शुशुभे—ति. ॥ पद्मगौरी—पद्मकेसरवत् गौरदेहा—रा.

[1] स्तत्सुनसं—ङ. सुनयनं—ज. [2] सुनेत्रं—ङ. [3] चारुदन्तोष्ठं—ङ. [4] राक्षसेन्द्रसमाधूतं—ज. [5] नीलाभं—ङ. [6] गज—ज. [7] पद्मगीता—ज.

पद्मवत् गौरी—पीतदेहा। अत एव—हेमाभा पीतप्रभावती, घनमाविश्य विद्युदिव शुशुभे ॥ २५ ॥

* तरुप्रवालरक्ता सा नीलाङ्गं राक्षसेश्वरम्।
प्राशोभयत वैदेही गजं कक्ष्येव काञ्चनी ॥ २६ ॥

तरुप्रवाळेति। पीतप्रवाळवदित्यर्थः। रक्ता, रागः—वर्णः, पीतकिसलयवद्वर्णेति यावत् ॥ २६ ॥

तस्या भूषणघोषेण वैदेह्या राक्षसाधिपः।
[1] बभौ सचपलो नीलः सघोष इव तोयदः ॥ २७ ॥

सचपलः—चपलया विद्युता सहितः ॥ २७ ॥

उत्तमाङ्गात् च्युता तस्याः पुष्पवृष्टिः समन्ततः।
सीतायाः ह्रियमाणायाः पपात धरणीतले ॥ २८ ॥
सा तु रावणवेगेन पुष्पवृष्टिः समन्ततः।
† समाधूता दशग्रीवं पुनरेवा[2]भ्यवर्तत ॥ २९ ॥

सा त्विति। धरणीतले पतन्तीत्यर्थः। तत्काल इति शेषः ॥

अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजम्।
नक्षत्रमाला विमला [3] मेरुं नगमिवोन्नतम् ॥ ३० ॥

अभ्यावृत्तपुष्पवृष्टिः कविनोत्प्रेक्ष्यते—अभ्यवर्तेत्यादि। मेरुमिवाभ्यवर्तत—अभितोऽवर्तिष्ट तां सीतामित्यन्वयः ॥ ३० ॥

---

* ज पुस्तके अयं श्लोकः 'विद्युन्मण्डलसंकाशं' (श्लो. 31) इत्येतदनन्तरं दृश्यते।

† रावणगमनवेगजनितवायुना समाधूताऽपि पुनर्दशग्रीवमेव अभ्यवर्तत—अभितोऽवर्तिष्ट; अनवरतं जायमानत्वात्—ति. अतिवेगेन शकटादौ गच्छति, लघूनां वस्तूनां कियदूरं शकटादिभिः सार्कं अनुगमनं लोके दृष्टं, तद्वाऽत्र विवक्षितम्॥

[1] बभूव विमलः—ज. [2] भ्यधावत, भ्यवर्षत—ङ. [3] मेरुशृङ्गमिवोत्तमम्—ङ.

* चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम् ।
विद्युन्मण्डलसङ्काशं पपात [1] मधुरस्वनम् ॥ ३१ ॥
तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा ।
जहाराकाशमाविश्य सीतां वैश्रवणानुजः ॥ ३२ ॥
तस्याः तान्यग्निवर्णानि † भूषणानि महीतले ।
सघोषाण्य[2]वकीर्यन्त क्षीणास्तारा इवाम्बरात् ॥ ३३ ॥

क्षीणाः—क्षीणपुण्याः तारा:—तारारूपावस्थिताः, पुण्यकृत इत्यर्थः ॥ ३३ ॥

तस्याः स्तनान्तरात् भ्रष्टः हारः ताराधिपद्युतिः ।
वैदेह्या निपतन् ‡ भाति गङ्गेव गगनाच्च्युता ॥ ३४ ॥

---

* चरणात्—वामचरणात्—गो. एकवचनदर्शनात्, रावणेन वामहस्तेन केशेषु ग्रहणात्, ऋश्यमूकपर्वतोपरि सुग्रीवादिभ्यः प्रक्षिप्तभूषणेषु नूपुरान्तरदर्शनाच्च—वामचरणात्—इत्युक्तमिति—भाति । परन्तु 'नूपुरे त्वभिजानामि' (किष्कि-6-22) इति द्विवचनदर्शनात् सुग्रीवेण नूपुरद्वयमेव प्रदर्शितमिति गम्यते । अत्रेदं विमर्शनीयम्—अत्र प्रतिपादितानां पुष्पवृष्टिनूपुरभ्रंशादीनां क्रियाणां देशतः कालतश्च अत्यन्ताव्यवहितत्वं न विवक्षितम् । आहृत्य रावणेन आकाशमार्गेण सीताया अपहरणकाले जातानां संभवानां वर्णना क्रोडीकृत्यात्राकारि । अतश्च पुष्पवृष्ट्यादिः वृक्षादिकं परित्यजन्त्याः सीतायाः रावणेन धर्षणकालिकः । तदानीं च भूषणानां लेशा अपि अंशतश्च्युता इति उत्तर(64-39)श्लोकादवगम्यते । अथवा रामेण दृष्टा पुष्पवृष्टिः, अत्रोच्यमाना च विभिन्नैव स्यात् । परन्तु नूपुरादिभ्रंशः प्रायः पंपासरस्समीपगमनकाल एव स्यात् । अत एवात्र रामेण तेषामनुपलंभः, सुग्रीवेणोपलंभश्च । वैदेह्या भूषणादीनां मोक्षणकथनावसरे 'स च पंपामतिक्रम्य' (54-5) इति दर्शनात्, तत्र तत्र भ्रष्टं आभरणं पंपोपवनसञ्चारिभिः सुग्रीवादिभिः संगृहीतमिति गम्यते । अतः न पूर्वापरश्लोकानां विरोधः ॥ † भूषणानि—उपात्तनूपुरादिभिन्नानि—गो. परन्तु ३१ श्लोकटिप्पण्यनुसारेण इदं सामान्यवर्णनरूपमिति युक्तम् । ‡ भाति—भाति स्म—गो. वर्णनीयमयीभावाद्वा क्त्ट् ।

[1] धरणीतले—ङ्ग. [2] वशीर्यन्त—ङ्ग.

*[1] उत्पातवाताभिहताः नानाद्विजगणायुताः ।
मा भैरिति विधूताग्राः व्याजह्रुरिव पादपाः ॥ ३५ ॥
नलिन्यो ध्वस्तकमलाः त्रस्तमीनजलेचराः ।
सखीमिव [2] गतोच्छ्वासाः अन्वशोचन्त मैथिलीम् ॥ ३६ ॥

त्रस्ताः मीनाः जलेचराश्च यासां तास्तथा । अलुक् छान्दसः । गतोच्छ्वासाः—गतप्राणाः ॥ ३६ ॥

समन्तादभिसंपत्य सिंहव्याघ्रमृग[3]द्विजाः ।
अन्वधावंस्तदा रोषात् सीतां छायानुगामिनः ॥ ३७ ॥
जलप्रपातास्रमुखाः शृङ्गैः उच्छ्रित[4]बाहवः ।
सीतायां ह्रियमाणायां विक्रोशन्तीव पर्वताः ॥ ३८ ॥

जलप्रपातरूपाणि असृजाणि मुखे येषां ते तथा ॥ ३८ ॥

ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ।
[5] प्रतिध्वस्तप्रभः श्रीमान् आसीत् पाण्डरमण्डलः ॥ ३९ ॥
† नास्ति धर्मः, कुतः सत्यं ? नार्जवं, नानृशंसता ।
[6] यत्र रामस्य वैदेहीं [7] भार्यां हरति रावणः ।
इति सर्वाणि भूतानि गणशः पर्यदेवयन् ॥ ४० ॥

यत्र—यस्मात् । गणशः—"बहुल्पार्थात्" इति शस्, सङ्घशः इत्यर्थः ॥ ४० ॥

---

* उत्पातकालिकः वातः—उत्पातवातः । 'उत्पन्नवात' इति पाठे (गो.) रावणवेगोत्पन्नेत्यर्थः । † सर्वधारकः धर्मः, तस्यैवाभावे तदधीनानामितरेषां कावकाशः ? इत्यर्थः ।

[1] उत्पन्न-ङ्ग. [2] गतोच्छ्वासां—गतोत्साहां-ज्ञ. [3] द्विपाः-ङ. [4] बाहुभिः-ज्ञ. [5] प्रविध्वस्त-ज्ञ [6] प्रियां-ङ. [7] सीतां-ज्ञ.

[1] विस्रस्तकाः दीनमुखाः रुरुदुः मृगपोतकाः ।
उद्वीक्ष्योद्वीक्ष्य नयनैः [2] आस्रपातविलेक्षणाः ॥ ४१ ॥

विस्रस्तकाः, स्वार्थे कन् । मृगपोतकाः—बालमृगाः ॥ ४१ ॥

सुप्रवेपितगात्राश्च बभूवुः वनदेवताः ।
विक्रोशन्तीं दृढं सीतां दृष्ट्वा [3] दुःखं तथा गताम् ॥ ४२ ॥
* तां तु, लक्ष्मण ! रामेति क्रोशन्तीं [4] मधुरस्वरम् ।
† अवेक्षमाणां बहुशः वैदेहीं धरणीतलम् ॥ ४३ ॥
[5] स तामाकुलकेशान्तां विप्रमृष्टविशेषकाम् ।
जहारात्मविनाशाय [6] दशग्रीवो मनस्विनीम् ॥ ४४ ॥

विप्रमृष्टः—विलुलितः विशेषकः—तिलकः यस्याः सा तथा ॥

ततस्तु [7] सा चारुदती शुचिस्मिता
विनाकृता बन्धुजनेन मैथिली ।
अपश्यती राघवलक्ष्मणावुभौ
विवर्णवक्त्रा भयभारपीडिता ‡ ॥ ४५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्विपञ्चाशः सर्गः

चारुदती । 'वयसि दन्तस्य' इति दन्त्रादेशः । अशैव-(४५ १/२)मानः सर्गः ॥ ४५ १/२ ॥

इति श्रीमद्रामायणशतकतकटीकायां अरण्यकाण्डे द्विपञ्चाशः सर्गः

---

* सुप्रवेपितेति श्लोकद्वयमेकान्वयं—गो. तामित्यार्धचतुष्टयमेकान्वयि—रा. परन्तु—अनन्तरश्लोकेऽपि 'तां' इति सत्त्वात् श्लोकत्रयमपि भिन्नं वाक्यं वा । द्वितीयश्लोके—स जहारेति क्रियापदं आकृष्टव्यम् । † धरणीतलं बहुशः अवेक्षमाणां, रामलक्ष्मण-प्रत्याशयेति भावः—गो. ‡ बभूवेति शेषः—गो. रा.

[1] विस्तास्राः—ङ. [2] भयादिव विलक्षणैः—ज. [3] दुःखसमाहताम्—ङ. [4] मधुरस्वराम्—ज. [5] सीता—ङ. [6] दशग्रीवस्तपस्विनीम्—ङ. [7] सीता वदती—ङ.

त्रिपञ्चाशः सर्गः

[रावणगर्हणम्]

*खमुत्पतन्तं तं दृष्ट्वा मैथिली जनकात्मजा ।
दुःखिता †परमोद्विग्ना भये महति वर्तिनी ॥ १ ॥

अथ सीतया क्रियमाणपारुष्य एव तां हरति स्म रावणः । खमित्यादि । वर्तिनीति । असुप्यपि णिनिरार्षः ॥ १ ॥

रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् ।
रुदन्ती करुणं सीता ह्रियमाणेदमब्रवीत् ॥ २ ॥

रोषरोदनाभ्यां हेतुभ्यां ताम्राक्षी ॥ २ ॥

न व्यपत्रपसे, नीच ! कर्मणाऽनेन, रावण !
[1]ज्ञात्वा विरहितां यन्मां चोरयित्वा पलायसे ॥ ३ ॥

विरहितां इति । रामलक्ष्मणाभ्यामिति शेषः ॥ ३ ॥

त्वयैव नूनं, दुष्टात्मन् ! भीरुणा हर्तुमिच्छता ।
ममापवाहितो भर्ता मृगरूपेण मायया ॥ ४ ॥
यो हि मां उद्यतः त्रातुं सोऽप्ययं विनिपातितः ।
गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम ॥ ५ ॥

पुराणः—वृद्धः ॥ ५ ॥

---

* नात्र वर्ण्यमानवृत्तानां अत्यन्ताव्यवधानं विवक्षितमिति गतसर्गे ३१ श्लोकटिप्पण्यामेवोक्तम् । आहृत्य वृत्तानां वृत्तान्तानां कथनमिदम् । अत एवात्र 'खमुत्पतन्तं' इत्युक्तेर्न विरोधः । तत्कालवृत्तान्तत्वादस्य ॥ † परमोद्विग्ना—कम्पिता—गो.

[1]भर्त्रा—रु.

परमं खलु ते वीर्यं दृश्यते, राक्षसाधम !
विश्राव्य नामधेयं हि [1]युद्धेनास्मि जिता त्वया ॥ ६ ॥

परमं स्वस्वित्यादिस्तु व्यङ्ग्योक्तिः ॥ ६ ॥

ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे ।
स्त्रियाश्च हरणं, नीच ! *रहिते तु परस्य च ॥ ७ ॥

परस्य स्त्रियाः इत्यन्वयः ॥ ७ ॥

कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् ।
सुनृशंसमधर्मिष्ठं तव शौण्डीर्यमानिनः ॥ ८ ॥

शौण्डीर्यमानिनः—शूरमानिनः ॥ ८ ॥

धिक् ! ते [2]शौर्यं च सत्त्वं च यत् [3]त्वं कथितवांस्तदा ।
कुलाक्रोशकरं लोके धिक् ते चारित्रमीदृशम् ॥ ९ ॥

तदेति । अपहरणात् पूर्वकाले इत्यर्थः । कुलाक्रोशकरं—कुलनिन्दाकरम् ॥ ९ ॥

†किं कर्तुं शक्यमेवं हि यज्जवेनैव धावसि [4] ।
मुहूर्त[5]मपि तिष्ठ त्वं न जीवन् प्रतियास्यसि ॥ १० ॥

मुहूर्तमपि तिष्ठ त्वं, यदि शूरः इति शेषः ॥ १० ॥

---

* स्त्रिया हरणमेव लज्जावहं, तत्रापि परस्य, तत्रापि असहायावस्थायामिति भावः ॥

† त्वं जवेन पलायनमन्तरा किमन्यत् भवता कर्तुं शक्यम् । यदि शक्यं तिष्ठ मुहूर्तं—इत्यर्थः ।

[1] युद्धेनापहृता—ङ. [2] वीर्यं च शौर्यं च—ङ. [3] स्वया कथितं तदा—ज. [4] ततदनन्तरं—"स्वयैव नूनं दुष्टात्मन् यद्वीर्यं कथितं मम"—इत्यधिकं—ङ. [5] मुपतिष्ठ—ङ.

न हि चक्षुष्पथं प्राप्य तयोः पार्थिवपुत्रयोः ।
ससैन्योऽपि समर्थस्त्वं मुहूर्तमपि जीवितुम् ॥ ११ ॥
न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन ।
वने प्रज्वलितस्येव स्पर्शमग्निर्विहङ्गमः ॥ १२ ॥
*साधु कृत्वाऽऽत्मनः पथ्यं साधु मां मुञ्च, रावण !
मत्प्रधर्षण[1]रुष्टो हि भ्रात्रा सह पतिर्मम ।
विधास्यति †विनाशाय त्वं मां यदि न मुञ्चसि ॥ १३ ॥
विनाशाय विधास्यतीति । यत्नमिति शेषः ॥ १३ ॥

येन त्वं व्यवसायेन बलान्मां हर्तुमिच्छसि ।
व्यवसायः स ते, नीच ! भविष्यति निरर्थकः ॥ १४ ॥
येन व्यवसायेन—स्त्रीभोगव्यवसायेन ॥ १४ ॥

न ह्यहं तमपश्यन्ती भर्तारं [2]विबुधोपमम् ।
उत्सहे शत्रुवशगा प्राणान् धारयितुं ‡चिरम् ॥ १५ ॥
तन्नैरर्थक्यमेव दर्शयति—न ह्यहमित्यादि ॥ १५ ॥

न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे ।
मृत्युकाले यथा मर्त्यः विपरीतानि सेवते ॥ १६ ॥
§वा इति पदम् । यथा सेवते तथा त्वमपीति शेषः ॥ १६ ॥

---

* आत्मनः पथ्यं साधु—सम्यक् कृत्वा—आलोच्य, भवतः साधु यथा भवेत् तथा मां मुञ्च । † विनाशाय—त्वद्विनाशाय । ‡ इदानीं कथं धारयसीत्यत्र परिहारः—चिरमिति—गो. रामो मां मोचयेदचिरादिति प्रत्याशया जीवामि । यदा च तादृशप्रत्याशा हता भवति तदैव प्राणान् हास्यामि इति भावः । § 'वासं' इति पदच्छेदभ्रान्तिवारणायेदमुक्तम् ।

[1] संकुद्धः—ज. [2] वासवोपमम्—क.

मुमूर्षूणां हि सर्वेषां यत् पथ्यं तन्न रोचते ।
पश्याम्यद्य हि कण्ठे त्वां कालपाशावपाशितम् ॥ १७ ॥

यथा चास्मिन् भयस्थाने न बिभेषि, [1] दशानन !
* व्यक्तं हिरण्मयान् हि त्वं संपश्यसि महीरुहान् ॥

नदीं वैतरणीं घोरां रुधिरौघनिवाहिनीम् ।
[2] असिपत्रवनं चैव भीमं पश्यसि, रावण ! ॥ १९ ॥

तप्तकाञ्चन[3]पुष्पां च वैडूर्यप्रवरच्छदाम् ।
द्रक्ष्यसे शाल्मलीं [4] तीक्ष्णां आयसैः कण्टकैश्चिताम् ॥

शाल्मली—यातनावृक्षः ॥ २० ॥

न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः ।
[5] धरितुं शक्ष्यसि चिरं विषं पीत्वेव, † निर्घृण ! ॥ २१ ॥

धरितुं—धर्तुमिति यावत् । जीवितमिति शेषः ॥ २१ ॥

बद्धस्त्वं कालपाशेन दुर्निवारेण, रावण !
क्व गतो लप्स्यसे शर्म ‡ भर्तुर्मम महात्मनः ॥ २२ ॥

भर्तुः इति । अपराद्ध इति शेषः ॥ २२ ॥

---

* पूर्वमपि (47–38) एवमुक्तम् । 68–11 श्लोकोऽपि द्रष्टव्यः ।
† 'निर्घृणः' इति पाठे निर्घृणस्त्वमित्यन्वयः । ‡ भर्तुरिति हेतौ पञ्चमी । तस्मात् हेतोः क गतस्सन् शर्म लप्स्यसे—गो.

[1] निशाचर—ज्ञ. [2] खड्गपत्र—ज्ञ. [3] चित्रां—ङ. [4] तीक्ष्णैः—ज्ञ.
[5] धारितुं—ज्ञ.

* निमेषान्तरमात्रेण विना [1]भ्रात्रा महावने ।
राक्षसा निहता येन सहस्राणि चतुर्दश ॥ २३ ॥

विना भ्रात्रेति । एकाकिनेति यावत् ॥ २३ ॥

स कथं राघवो वीरः सर्वास्त्रकुशलो बली ।
न त्वां हन्यात् शरैस्तीक्ष्णैः [2]इष्टभार्यापहारिणम् ॥ २४ ॥

एतच्चान्यच्च † परुषं वैदेही रावणाङ्कगा ।
भयशोकसमाविष्टा करुणं विललाप ह ॥ २५ ॥

[3]तथा भृशार्तां [4]बहु चैव भाषिणीं
‡ विलापपूर्वं करुणं च भामिनीम् ।
जहार पापः [5]करुणं [6]विवेष्टतीं
नृपात्मजां आगतगात्र[7]वेपथुम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रिपञ्चाशः सर्गः

विलापः—परिदेवनम् । अचारु(२६ १-२)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रिपञ्चाशः सर्गः

---

* निमेषान्तरमात्रेण—निमेषावकाशमात्रेण—गो. † परुषं करुणं च विललाप । परुषं उक्त्वा करुणं विललापेति वा । ‡ विलापपूर्वं करुणं च यथा तथा भाविणीं, करुणं यथा तथा विवेष्टतीं—गो.

[1] भ्रातरमाहवे—ज्ञ. [2] दृष्ट्वा भार्यां—ङ. [3] तदा—ज्ञ. [4] बहुरूप—ङ. [5] करुणीं—ज्ञ. [6] विचेष्टतीं—ज्ञ. [7] वेपथुः—ज्ञ.

चतुःपञ्चाशः सर्गः

[लङ्काप्रापणम्]

ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ।
ददर्श गिरिशृङ्गस्थान् पञ्च वानरपुङ्गवान् ॥ १ ॥

अथ रावणः सीतां लङ्कां नीत्वा राक्षसीभ्यो रक्षायै प्रदाय जनस्थानरक्षणार्थं अष्टौ राक्षसान् प्राहिणोत् । ह्रियमाणा त्वित्यादि । अपश्यती— अपश्यन्तीति यावत् ॥ १ ॥

तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम् ।
*उत्तरीयं वरारोहा शुभान्याभरणानि च ॥ २ ॥
मुमोच यदि रामाय शंसेयुरिति [1]मैथिली ।

यदि रामाय शंसेयुरितीति । दैवगत्या दृष्टाय रामाय शंसेयुरिति प्रत्याशयेत्यर्थः ॥ २ ॥

†वस्त्रमुत्सृज्य तन्मध्ये निक्षिप्तं सहभूषणम् ॥ ३ ॥
संभ्रमात्तु दशग्रीवः तत् कर्म न स बुद्धवान् ।

उत्तरीयं वस्त्रमुत्सृज्य तन्मध्ये सहभूषणं निक्षिप्तं—बद्धं पश्चादुत्सृष्टं च तत्कर्म—भूषणोत्सर्जनरूपं कर्म दशग्रीवः सम्भ्रमात्—सभयं अपहरणजचित्तक्षोभात् न च बुद्धवान् । यदि बुध्येत गृह्णीयादेव प्रत्यावृत्येत्याशयः ॥ ३ ॥

पिङ्गाक्षाः तां विशालाक्षीं नेत्रैरनिमिषैरिव ॥ ४ ॥

---

*आभरणानि कौशेये बध्वा मुमोचेत्यर्थः—गो. †तन्मध्ये—वानरमध्ये सहभूषणं—भूषणसहितं निक्षिप्तम् । तयेति शेषः—ति. एतद्दीत्या पूर्वार्धं प्रत्येकं वाक्यम् । पूर्वश्लोकोक्तमोचनप्रकार एव स्पष्टीक्रियते अत्र ।

[1] मैथिली—मु.

विक्रोशन्तीं तथा सीतां ददृशुः वानरर्षभाः ।
*स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम् ॥ ५ ॥
जगाम रुदतीं गृह्य [1]वैदेहीं राक्षसेश्वरः ।
तां जहार सुसंहृष्टः रावणो मृत्युमात्मनः ॥ ६ ॥
उत्सङ्गेनेव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम् ।
वनानि सरितः शैलान् सरांसि च विहायसा ॥ ७ ॥
स क्षिप्रं समतीयाय शरश्चापादिव च्युतः ।

विहायसा—आकाशमार्गेण ॥ ७ ॥

तिमिनक्रनिकेतं तु वरुणालयमक्षयम् ॥ ८ ॥
सरितां शरणं [2]गत्वा समतीयाय सागरम् ।

तिमिः—मत्स्यविशेषः ॥ ८ ॥

संभ्रमात् †परिवृत्तोर्मिः रुद्धमीनमहोरगः ॥ ९ ॥
वैदेह्यां ह्रियमाणायां बभूव वरुणालयः ।

संभ्रमात्—सीतापहारदर्शनजक्षोभात् । परिवृत्तोर्मिः—स्वभावप्राप्तोर्मिप्रवृत्तिरहितः । रुद्धाः—रुद्धप्रचाराः मीनादयो यस्य स तथा ॥

अन्तरिक्षगता वाचः ससृजुः चारणास्तदा ॥ १० ॥

---

*पम्पां—पम्पोपर्याकाशम् । लङ्काममिमुखः इत्यनेन एतावत्पर्यन्तं रामाश्रमदत्तदृष्टिगतः ; ततः स्वच्छन्दं गतवानिति गम्यते । अत एव सुसंहृष्ट इति वक्ष्यते—गो. अथवा—उत्तरत्र सीतान्वेषणप्रकरणे दक्षिणां दिशं हनुमदादीनां प्रेषणोपयोगितया सुग्रीवेण रावणगमनदिक्प्रदेशावधानसूचनाय वा लङ्काममिमुख इत्युक्तिः स्यात् ।
†परिवृत्तोर्मिः—उद्वेलत्तरङ्गः क्षुभितोर्मिरिति वा ।

[1] मैथिलीं—क. [2] रम्यं—क.

*एतदन्तो दशग्रीवः इति सिद्धास्तदाऽब्रुवन् ।

चारणाः—देवजातिभेदाः ॥ १० ॥

स तु सीतां [1]विवेष्टन्तीं अङ्केनादाय रावणः ॥ ११ ॥
प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः ।
सोऽभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम् ॥ १२ ॥
संरूढकक्ष्याबहुलं स्वमन्तःपुरमाविशत् ।

संरूढं—प्रतिष्ठितम् ॥ १२ ॥

तत्र [2]तामसितापाङ्गां शोकमोह[3]परायणाम् ॥ १३ ॥
निदधे रावणः सीतां †मयो [4]मायामिव स्त्रियम् ।

तत्र—अन्तःपुरे ॥ १३ ॥

अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ॥ १४ ॥
यथा नेमां पुमान् स्त्री वा सीतां पश्यत्यसंमतः ।

यथेत्यादि । इमां सीतां असंमतः—अस्मदननुज्ञातः पुमान् स्त्री वा अननुज्ञाता यश्चा चेत् न पश्यति, तथा रक्षतेति शेषः ॥ १४ ॥

मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥ १५ ॥
यद्यदेच्छेत् तदा चास्या देयं ‡मच्छन्दतो यथा ।

---

* पथः—सीतापहारः अन्तः—अवसानकालः यस्य । रावणस्य मृत्युस्सन्निहित इति यावत् । † मयः—त्रिपुराधिपतिः मायां—मायामयीं, आश्चर्यशक्तियुक्तामित्यर्थः । स्त्रियं—स्वयंप्रभां विले यथा निदधे, तथेत्यर्थः—गो. ‡ मच्छन्दतः—मदाज्ञातः यथा—यथावत् देयम्—गो. मच्छन्दानुवर्तनं यथा भवद्भिः क्रियते, तथा सीताया अपि भूषणादीच्छा तदैव भवद्भिः पूरणीयेत्यर्थः ॥

[1] विचेष्टन्तीं—ज. [2] तामसितापार्श्वां—ज. [3] समन्विताम्—ज.
[4] मायामिवासुरीम्—ज.

"यद्यदिच्छेत् तदा चास्या देयं मच्छन्दतो यथा" इति पाश्चः पाठः। यद्यद्वस्तु यदा इच्छेत् तदैव च यथाऽस्या इष्टं भवति, तथैव तत् सर्वं देयं, मच्छन्दतः---मद्वशप्राप्तिसिद्ध्यर्थमेव ॥ १५॥

या च वक्ष्यति वैदेहीं वचनं किंचिदप्रियम् ॥ १६ ॥
अज्ञानाद्यदि वा ज्ञानात् * न तस्या जीवितं प्रियम् ।

तां प्रति अनिष्टवचनमपि न कयाऽपि कर्तव्यमित्यनुशास्ति—या चेत्यादि । या च वक्ष्यति तस्याः स्वीयं जीवितं न प्रियम् । तां मारयामीत्यर्थः ॥ १६ ॥

तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान् ॥ १७ ॥
निष्क्रम्यान्तःपुरात् तस्मात् † किंकृत्यमिति चिन्तयन् ।
ददर्शाष्टौ महावीर्यान् राक्षसान् पिशिताशनान् ॥ १८ ॥
स तान् दृष्ट्वा महावीर्यः ‡ वरदानेन मोहितः ।
उवाचैतानिदं वाक्यं प्रशस्य बलवीर्यतः ॥ १९ ॥

वरदानेन पैतामहेन मोहितः—"रामशतादपि नास्माकं काचित् भीतिः" इति चिन्तयमानः इत्यर्थः । बलवीर्यतः इति । तद्वशेनेत्यर्थः ॥ १९ ॥

नानाप्रहरणाः क्षिप्रं इतो गच्छत [1]सत्वराः ।
जनस्थानं हतस्थानं § भूतपूर्वं खरालयम् ॥ २० ॥

---

* यदि भर्तां जीवनेच्छा स्यात्, तर्हि अप्रियं न वक्तव्यम् इत्यभिप्रायः। † कृत्यं—कर्तव्यं, इदानीं अवशिष्टं कर्तव्यं किमस्ति? इति चिन्तयामास। तदा तत्र सन्निहितान्, आहूतान् वा राक्षसान् ददर्श। ‡ वरं—मानुषादन्यत्रावध्यत्वरूपम्। तादृशस्य मे रामः किं कुर्यादिति मोहितः। § पूर्वं खरालयभूतं, अद्य हतस्थानं जनस्थानं गच्छतेत्यन्वयः।

[1] राक्षसाः—ङ.

खरालयं—मृतपूर्वम्। पूर्वं खरालयत्वं मृतः—प्राप्तः। 'मृतपूर्वे चरट्' इत्यादिनिर्देशात् समासः ॥ २० ॥

[1]तत्रोष्यतां जनस्थाने शून्ये निहतराक्षसे।
पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥ २१ ॥
[2]बलं हि सुमहद्यन्मे जनस्थाने निवेशितम्।
सदूषणखरं युद्धे हतं रामेण सायकैः ॥ २२ ॥
*तत्र क्रोधो [3]ममामर्षात् धैर्यस्योपरि [4]वर्तते।
वैरं च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २३ ॥

तत्र—वधनिमित्तम्। धैर्यस्योपरि क्रोधः इति। न तु भीत्या, नापि वृथा क्रोध इत्यर्थः ॥ २३ ॥

†निर्यातयितुमिच्छामि तच्च [5]वैरमहं रिपोः।
न हि लप्स्याम्यहं निद्रां अहत्वा संयुगे रिपुम् ॥ २४ ॥

निर्यातयितुं—अपनेतुम् ॥ २४ ॥

तं त्विदानीमहं हत्वा खरदूषणघातिनम्।
रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २५ ॥
‡जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता।
प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः ॥ २६ ॥

---

* तत्र—तन्निमित्तं जातात् अमर्षात्—असहनात: धैर्यस्योपरि क्रोध: वर्तते, न तु अशक्तयप्रतीकारात क्रोध इति भाव:। †'वैरशुद्धि: प्रतीकार: वैरनिर्यातनं च सा' इत्यमर:। ‡रामवधोपयोगितया तस्य गत्यागत्यादिकं भवद्भि: ज्ञेयमिति भाव:।

[1] तत्रास्तां—ज. [2] बहु सैन्यं महावीर्यं—ज. [3] ममापूर्वो—ज. [4] वर्धते—ज. [5] वैरं महारिपो:—ज.

अप्रमादाच्च गन्तव्यं सर्वैरपि निशाचरैः ।
कर्तव्यश्च सदा यत्नः राघवस्य वधं प्रति ॥ २७ ॥

युष्माकं च बलज्ञोऽहं बहुशो रणमूर्धनि ।
अतश्चास्मिन् जनस्थाने मया यूयं [1]नियोजिताः ॥ २८ ॥

ततः प्रियं वाक्यमुपेत्य राक्षसाः
महार्थमष्टावभिवाद्य रावणम् ।
विहाय लङ्कां सहिताः प्रतस्थिरे
*यतो जनस्थानमलक्ष्यदर्शनाः ॥ २९ ॥

महान् अर्थः—अभिधेयः यस्य तत् तथा ॥ २९ ॥

ततस्तु सीतामुपलभ्य [2]रावणः
सुसंप्रहृष्टः †परिगृह्य [3]मैथिलीम् ।
प्रसज्य रामेण च वैरमुत्तमं
बभूव मोहात् मुदितः स [4]राक्षसः ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे चतुःपञ्चाशः सर्गः

उपलभ्य—प्राप्य । परिगृह्य—परिग्रहत्वेन विभाव्य चेत्यर्थः । तथा उत्तरसर्गान्तेऽपि 'ममेयमिति मन्यते' इति । प्रसज्य—संपाद्य । नाग(३०)मानः सर्गः ॥ ३० ॥

इति श्रीमद्रामायणामृतकतकटीकायां आरण्यकाण्डे चतुःपञ्चाशः सर्गः

---

* यतः—यद्दिशि जनस्थानं तद्दिशीत्यर्थः । अलक्ष्यदर्शनाः, अन्तर्धानविद्यया (कामरूपा हि ते इति भाव)-नि. अलक्ष्यदर्शनाः—वेगातिशयेन दुष्प्रेक्षस्वरूपाः-गो.

† एवं मैथिलीप्राप्त्या, तस्यां मोहात् रामेण जातं स्वप्राणान्तकरं वैरमपि नावगतवान् रावण इति भावः ।

[1] निवेशिताः-ज्ञ. [2] मैथिली-ज्ञ. [3] रावणः-ज्ञ. [4] रावणः-ङ.

पञ्चपञ्चाशः सर्गः

[सीताप्रलोभनप्रयत्नः]

* संदिश्य राक्षसान् घोरान् रावणोऽष्टौ महाबलान् ।
आत्मानं बुद्धिवैक्लव्यात् कृतकृत्यममन्यत ॥ १ ॥

अथ रावणस्य स्वैश्वर्यप्रदर्शनपूर्वं स्त्रीभावप्रार्थनम् । संदिश्येत्यादि ॥ १ ॥

स चिन्तयानो वैदेहीं [1] कामबाणसमर्पितः ।
प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥ २ ॥
स प्रविश्य तु तद्वेश्म रावणो राक्षसाधिपः ।
अपश्यद्राक्षसीमध्ये सीतां शोकपरायणाम् ॥ ३ ॥
† अश्रुपूर्णमुखीं दीनां शोकभाराभिपीडिताम् ।
वायुवेगैरिवाक्रान्तां मज्जन्तीं नावमर्णवे ॥ ४ ॥
मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृताम् ।
अधोमुखमुखीं [2] सीतां ‡ अभ्येत्य च निशाचरः ॥ ५ ॥

अधोमुखं मुखं यस्याः सा तथा ॥ ५ ॥

तां तु [3] शोकपरां दीनां अवशां राक्षसाधिपः ।
[4] स बलात् दर्शयामास गृहं देवगृहोपमम् ॥ ६ ॥

---

* पूर्वं स्वप्रभावकथनमुखेन प्रलोभनं कृतवान् । अथ भोगोपकरणप्रदर्शनमुखेन प्रलोभयति पञ्चपञ्चाशे—गो. † अश्रित्यादिश्लोकत्रयमेकं वाक्यम्—गो. वस्तुतस्तु स प्रविश्येत्यारभ्य श्लोकत्रयमेकं वाक्यम् । गृहं प्रविश्य, सीतामभ्येत्य उक्तविशेषणां सीतामपश्यदिति योजना । अथवा—स प्रविश इत्यादिश्लोकस्यैव विस्तरः-अश्रित्यादिश्लोकद्वयम् । अतः अपश्यदित्यस्यैवाकर्षः । ‡ अभ्येत्य—तत्समीपं प्राप्य, अतिष्ठदिति शेषः—रा.

[1] कामबाणैः प्रपीडितः—ज. [2] दीनां तामभ्येत्य—ङ. [3] शोकवशात्—ज. [4] विविधं, स्वबलं—ङ.

*हर्म्यप्रासादसंबाधं स्त्रीसहस्रनिषेवितम् ।
नानापक्षिगणैर्जुष्टं नानारत्न[1]समन्वितम् ॥ ७ ॥
[2]काञ्चनैस्तापनीयैश्च स्फाटिकैः राजतैरपि ।
वज्रवैदूर्यचित्रैश्च †स्तम्भैः [3]दृष्टिमनोहरैः ॥ ८ ॥
‡दिव्यदुन्दुभि[4]निर्हादं तप्तकाञ्चन[5]तोरणम् ।
सोपानं काञ्चनं चित्रं आरुरोह तया सह ॥ ९ ॥

तया सह आरुरोह—सीतया सहेत्यर्थः ॥ ९ ॥

दान्तका राजताश्चैव गवाक्षाः प्रियदर्शनाः ।
हेमजालावृताश्चासन् तत्र प्रासादपङ्क्तयः ॥ १० ॥

हेममयाः जालाः —गवाक्षाणि तथा ॥ १० ॥

सुधामणि[6]विचित्राणि भूमि[7]भागानि सर्वशः ।
दशग्रीवः स्वभवने प्रादर्शयत मैथिलीम् ॥ ११ ॥

सुधया—वज्रलेपेन मणिभिः—रत्नैश्च विचित्राणि तथा । भूमिभागानीत्यार्षं नपुंसकम् ॥ ११ ॥

दीर्घिकाः पुष्करिण्यश्च §नाना[8]वृक्षसमन्विताः ।
रावणो दर्शयामास सीतां शोकपरायणाम् ॥ १२ ॥

---

* हर्म्यप्रासादेत्यादि गृहविशेषणम् । †स्तम्भैः च जुष्टं गृहं दर्शयामास । श्लोकत्रयमेकं वाक्यम् । ‡पूर्वार्धमपि गृहविशेषणं, तादृशं गृहं दर्शयितुं सोपानमारुरोह इति केचित् । वस्तुतः —तोरणं—पुरद्वारम् । तत्र च मेर्यादिवादनं राजगृहप्रसिद्धम् । अतः दिव्येत्यादि तोरणस्यैव विशेषणम् । सोपानं—सोपानवदित्यर्थः । अथवा तादृशं तोरणमारोढुं सोपानमारुरोह । §नानावृक्षसमन्विताः, आभत इति ऊह्यम् ।

[1] विभूषितम्—ङ. [2] दान्तकै—ज. [3] जुष्टं मनो—ङ. [4] निर्घोषं—ज. [5] भूषणम्—ज. [6] विचित्रांश्च—ङ. [7] भागान् सहस्रशः—ङ. [8] पुष्प—ज.

दर्शयित्वा तु वैदेह्याः कृत्स्नं तद् भवनोत्तमम् ।
उवाच वाक्यं पापात्मा [1]सीतां लोभितुमिच्छया ॥ १३ ॥

लोभितुं—प्रलोभयितुम् ॥ १३ ॥

दश राक्षसकोट्यश्च द्वाविंशतिरथापराः ।
[2]तेषां प्रभुरहं, सीते ! सर्वेषां भीमकर्मणाम् ॥ १४ ॥

दशेत्यादि । द्वात्रिंशत्कोटिसंख्याः इत्यर्थः ॥ १४ ॥

* वर्जयित्वा [3]जराबृद्धान् बालांश्च रजनीचरान् ।
सहस्रं जनमेकस्य मम कार्यपुरःसरम् ॥ १५ ॥

सहस्रं—अनेकम् । जनमिति आर्षं नपुंसकत्वम् । एकस्य मम कार्यपुरःसरं—कार्ये—प्रयोजने साधकतया पुरः सरतीति तथा । अस्तीति शेषः ॥ १५ ॥

† यदिदं [4]राजतन्त्रं मे त्वयि सर्वं प्रतिष्ठितम् ।
जीवितं च, विशालाक्षि ! त्वं मे प्राणैर्गरीयसी ॥ १६ ॥

यदिदं—उक्तरूपं राजतन्त्रं—राजपरिकरम् । तत् सर्वं त्वयि प्रतिष्ठितम् ॥ १६ ॥

---

* इदमर्धं ज पुस्तके 'तेषां प्रभुरहं' इत्यतः पूर्वं दृश्यते । तदानीं तु अन्वयः स्वरसः । यथापाठेऽपि अन्वयस्तु पूर्वेणैव युक्तः । गोविन्दराजस्तु बालवृद्धान् वर्जयित्वा सहस्रं परिचारकजातमस्तीति व्याचख्यौ ॥ † राजतन्त्रं—राजशासनं सर्वमिति वा । राज्यतन्त्रमिति पाठे न क्लेशः ।

[1] रावणो जनकात्मजाम्—ङ. [2] येषां—ङ. [3] जनान् वृद्धान्—ज. [4] राज्यतन्त्रं—ज.

*[1] बहूनां स्त्रीसहस्राणां मम योऽसौ परिग्रहः ।
तासां [2] त्वमीश्वरा, सीते! मम भार्या भव, प्रिये! ॥१७॥

ईश्वरा भवेति । पुंयोगाभावात् टाबेव । पाङ्क्तः पाठश्च टाबन्तः साधुः ॥ १७ ॥

† साधु, किं तेऽन्यथाबुद्ध्या, रोचयस्व वचो मम ।
[3] भजस्व माऽभितप्तस्य प्रसादं कर्तुमर्हसि ॥ १८ ॥

मम वचः इत्यन्वयः । मा——माम् । अभितप्तस्येति । कामाभितप्तस्येत्यर्थः ॥ १८ ॥

परिक्षिप्ता ‡[4] समुद्रेण लङ्केयं शतयोजना ।
नेयं धर्षयितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १९ ॥

शतयोजनेति । भूमेरिति शेषः ॥ १९ ॥

न देवेषु न यक्षेषु न [5] गन्धर्वेषु § पक्षिषु ।
अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ॥ २० ॥
राज्यभ्रष्टेन दीनेन तापसेन [6] गतायुषा ।
किं करिष्यसि रामेण मानुषेणाल्प[7]तेजसा ॥ २१ ॥
भजस्व, सीते! मामेव भर्तारं सदृशस्तव ।
यौवनं ह्यध्रुवं, भीरु! रमस्वेह मया सह ॥ २२ ॥

---

* बहूनां स्त्रीसहस्राणां मध्ये मम योऽसौ परिग्रहः—पत्नी समुदायः अस्ति तादृशपत्नीनामपि त्वं ईश्वरा भव । † 'साधु' इति लोकव्यवहारशैली । ‡ सदस्रेण—अनेकराक्षसैः परिक्षिप्ता—परिवृता—गो. § जटायुषः स्मरणात् पक्षिण्वित स्यात् ।

[1] बहूनामुत्तमस्त्रीणां—ज. [2] त्वमीश्वरी—ङ. [3] भज कामाभि—ङ. [4] सदस्रेण—ङ. [5] गन्धर्वेषूरगेषु च—ङ. गन्धर्वेषु नरेषु—ज. [6] पदातिना—ज. [7] चेतसा—ङ.

*दर्शने मा कृथा बुद्धिं राघवस्य, वरानने ।
काऽस्य शक्तिरिहागन्तुमपि, सीते! †मनोरथैः ॥ २३ ॥
न शक्यो वायुराकाशे पाशैर्बद्धुं[1] महाजवः ।
दीप्यमानस्य वाप्यग्नेः ग्रहीतुं [2]विमलां शिखाम् ॥ २४ ॥

अशक्यार्थे दृष्टान्तः—न शक्य इत्यादि ॥ २४ ॥

त्रयाणामपि लोकानां न तं पश्यामि, शोभने ।
विक्रमेण नयेद्यस्त्वां मद्बाहु[3]परिपालिताम् ॥ २५ ॥
[4]लङ्कायां सुमहद्राज्यं इदं त्वमनुपालय ।
त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि [5]चराचराः ॥ २६ ॥

'त्वत्प्रेष्या मद्विधाश्चैव देवाश्चापि चराचराः' इतीदमेकं घुणाक्षरन्यायेन सम्यगागतं रावणमुखात् ॥ २६ ॥

अभिषेकोदकक्लिन्ना तुष्टा च रमयस्व माम् ।
‡दुष्कृतं यत् पुराकर्म वनवासेन तत् गतम् ।
[6]यश्च ते सुकृतो धर्मः तस्येह फलमाप्नुहि ॥ २७ ॥

अभिषेकोदकक्लिन्नेति । अभिषेकः—भोगाय स्नानम् । तदुदकेनार्द्रा तथा । वनवासेन तद्गतमिति । वनवासदुःखानुभवेन क्षपितमित्यर्थः ॥ २७ ॥

---

* राघवस्य दर्शने बुद्धिमित्यन्वयः । †मनोरथैरप्यागन्तुं—अत्रागमनचिन्तां कर्तुमपि न शक्तिरित्यर्थः । ‡भवत्या पुरा यत् पापं कृतं, तत् वनवासेन—वनवासक्लेशानुभवेन गतः—क्षपितम् । इतः परं तु पुण्यफलस्यैवानुभवकाल इत्यर्थः ।

[1] मनोजवः—ङ. [2] विमला शिखा—ज. [3] बल—ङ. [4] लङ्कायाः—ज. [5] चराचरम्—ज. [6] यच्च ते सुकृतं कर्म—ज.

इह माल्यानि सर्वाणि दिव्यगन्धानि, मैथिलि ।
भूषणानि च मुख्यानि सेवस्व च मया सह ॥ २८ ॥

पुष्पकं नाम, सुश्रोणि ! भ्रातुर्वैश्रवणस्य मे ।
विमानं सूर्यसङ्काशं तरसा [1] निर्जितं मया ॥ २९ ॥

विशालं रमणीयं च [2] तद्विमानमनुत्तमम् ।
तत्र, सीते ! मया सार्धं विहरस्व यथासुखम् ॥ ३० ॥

वदनं पद्मसङ्काशं विमलं चारुदर्शनम् ।
शोकार्तं तु, वरारोहे ! न भ्राजति, वरानने ! ॥ ३१ ॥

एवं वदति तस्मिन् सा वस्त्रान्तेन वराङ्गना
पिधायेन्दुनिभं सीता [3] मुखमश्रूण्यवर्तयत् ॥ ३२ ॥

ध्यायन्तीं तामिवास्वस्थां [4] दीनां चिन्ताहतप्रभाम् ।
उवाच वचनं [5] पापः रावणो [6] राक्षसेश्वरः ॥ ३३ ॥

अस्वस्थामिवेति । भूताविष्टामिवेत्यर्थः ॥ ३३ ॥

* अलं व्रीडेन, वैदेहि ! धर्म[7]लोपकृतेन च ।

---

* व्रीडेन अलं, धर्मलोपकृते च न-न शोचनीयं —इति केचित् । अथवा व्रीडेन—लोकसहजलज्जया अलम् । धर्मलोपकृतेन व्रीडेन च अलम् । चकारसत्त्वात् एव व्याख्या सरसा ॥

[1] चार्जितं रणे-ङ. [2] तद्विमानं मनोजवम्-ज. [3] मन्द-ज. [4] सीतां-ज. [5] सीतां-ङ. वीरः-ज. [6] रजनीचरः-ज. [7] लोपेन तेन ते-ङ.

* आर्षोऽयं [1]देवि! निष्यन्दः यस्त्वामभि[2]भविष्यति ॥

तूष्णीमवस्थानात् व्रीळया जोषमवस्थितिं मन्यमानः आह—अलं व्रीडेनेत्यादि । धर्मलोपः—स्वभर्तृपरित्यागपरप्राप्तिलक्षणः, तत्कृतेन व्रीडेन—लज्जया अलं—मास्तु इत्यर्थः । कुतः? इत्यतः—आर्षोऽयमित्यादि । 'देवि निष्यन्दः' इति पाठः । देवि! त्वां अभि—उद्दिश्य मया क्रियमाणः यो निष्यन्दः—स्नेहसंबन्धः, सोऽयं आर्षो भविष्यति—ऋषिदृष्ट एव ब्राह्मो विवाहः भविष्यति । "आहूय" इत्यादिना प्रतिपाद्यमानविवाहभेदेषु "बलात्कारेण राक्षसः" इति स्वकुलोचितांविवाहतया धर्म एव तत्सम्बन्धवचः, तव च परतन्त्रस्त्रीस्वभाववत्याः इत्यर्थः । स्वामिनि एवमपि किं धर्मः? न—कन्याया एव बलात्कारग्रहः आर्षस्तु राक्षसविवाह इत्यर्थः ॥ ३४ ॥

---

* यो दैवनिष्यन्दः—दैवकृतसम्बन्धः त्वामभिगमिष्यति, अयं—सम्बन्धः आर्षः—ऋषिप्रोक्तः, न स्वधर्म इत्यर्थः । अत्र नारदः—'परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ताः स्वयंभुवा । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा । कन्या वाऽक्षतयोनिर्वा पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारकर्मणा ॥ देशधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता ॥ मृते भर्तरि तु प्राप्ता देवरादीनपास्य या । उपगच्छेत् परं कामात् सा तृतीया प्रकीर्तिता ॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या । तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता' इति—गो. लोके स्वैराचारा अपि शास्त्रैकदेशवचनादिकं स्वकृत्ये प्रमाणत्वेन नयन्तः स्वकृत्यस्य धर्मत्वं यथा वा प्रकटयन्ति, तथा राक्षसविवाहस्य ऋषिभिः विवाहविशेषत्ववचनमात्रेण तस्यार्षत्वमभिमत्याह रावणः कामान्धः इति केचित् । अपरे तु—य इति परोक्षेणात्मनो निर्देशः । यो रावणः त्वामभिगमिष्यति—स्वलाभमेव पुरुषार्थं मन्यमान आस्ते, नासौ प्राकृतवत् विज्ञेयः, किं तर्हि, दैवनिष्यन्दः—देवस्य चतुर्मुखस्य वंशजः, आर्षः—ऋषेर्विश्रवसः पुत्रः । न खल्वेवंभूतः जातुचित् लोकविरुद्धं धर्मविरुद्धं वाऽऽचरेत् । तस्मात् नास्मिन् विषये तव लज्जा, धर्मलोपशङ्का वा युक्ता—इति व्याचख्युः ॥

[1] दैवनिष्यन्दः—ङ. [2] गमिष्यति—ङ.

एतौ पादौ *[1] मया †स्निग्धौ शिरोभिः परिपीडितौ ।
प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥ ३५ ॥

इमाः ‡[2]शून्याः मया वाचः शुष्यमाणेन भाषिताः ।
न चापि रावणः कांचित् मूर्ध्ना स्त्रीं प्रणमेत ह ॥ ३६ ॥

इमाः शून्याः—शून्यचित्तप्रवृत्ताः ; कामैकवृत्त्या हताशेष-वृत्तित्वात् शून्यत्वं चित्तस्य, ताः इमाः वाचः शुष्यमाणेन—काम-परितप्यमानेन मया भाषिताः । एवं दासोऽहमित्यन्ताभाषणं त्वदन्यत्र न क्वापि रावणस्याभूदित्याह—न चापीति ॥ ३६ ॥

एवमुक्त्वा दशग्रीवः मैथिलीं जनकात्मजाम् ।
कृतान्तवशमापन्नः ममेयमिति मन्यते ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे पञ्चपञ्चाशः सर्गः

मन्यते—अमंस्त । असंग(३७ १/२)मानः सर्गः ॥ ३७ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां आरण्यकाण्डे पञ्चपञ्चाशः सर्गः

---

*मया कर्त्रा ; शिरोभिः, करणैः परिपीडितौ इत्यन्वयः । †स्निग्धौ—परस्परानुरूपाविति यावत् । ‡शुष्यमाणेन—अनक्षेन तप्यमानेन मया इमाः शून्याः—नीचाः वाचः भाषिताः, कुतः ? यस्मात् रावणः स्त्रीं न प्रणमेत—प्रणमेत । अदृष्टपूर्वत्वात् नीचोक्तिः स्वस्यापि विस्मयावहा जातेति भावः—गो. शून्या इति काकुर्वा । इमा वाचः निरर्था वा इति ॥

[1] सहास्निग्धौ—क्ष. [2] शून्यमयाः—ञ.

षट्पञ्चाशः सर्गः

[वत्सरावधिकरणम्]

सा तथोक्ता तु वैदेही निर्भया शोककर्शिता ।
तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत ॥ १ ॥

तथोक्तया सीतया पारुष्यप्रत्युत्तरो रावणः आनुकूल्यप्रतीक्षां द्वादशमासावधिकां प्रतिज्ञाय अथ अन्तःपुरात् अशोकवनिकायां स्थापयामास । ननु बलात् संस्पृष्ट्वा गृहीत्वा स्वान्तःपुरं नीतवतः बलादुपभोगे ईषत्करे किमिति कालप्रतीक्षा ? अन्ततोऽपि प्रातराशार्थमेव अर्चाकल्पात् । न तु बलादुपभोगाय । उच्यते—स्त्रियो बलादुपभोगे मूर्धा ते विपतिष्यतीति दिव्याप्सरश्शापवशात्* तदशक्यं तेन । अतः आनुकूल्यप्रतीक्षा । पाण्डुवत् मरणमप्यनादृत्य काममोहितो भोगाप्रवृत्तिः अन्तर्यामितद्भगवद्ब्रह्माज्ञया† । एवं अक्षतत्वादेव सर्वदैवतैस्तथोक्त्या च अन्ते पुनः प्रतिग्राहिता । तस्मात् अशङ्क्यदोषा माता वैदेही । त्रिपदप्राथिमवतां योगिनां अयमर्थः अम्बया सुस्पष्टीकृतः । सा तथोक्तेत्यादि । निर्भयेति । बलादुपभोगे देहं योगतः त्यक्ष्यामीति परमदार्ढ्यबलात् इति शेषः । तृणमन्तरतः कृत्वेति । साक्षात् पापात्मकपरपुरुषसंभाषणदोषपरिहारायेति शेषः ॥ १ ॥

---

* नलकूबरमभिसरन्तीं रंभां धर्षितवते रावणाय तथा नलकूबरेण शापो दत्तः—इति उत्तरकाण्डे २६ सर्गे वर्ण्यते ।

† वस्तुतः—अद्य, श्वो वा, परश्वो वा सीता स्ववशे भविष्यत्येवेति प्रत्याशया तथा चिरभोगानुभवं प्रतीक्षतो रावणस्य, सकृद्भोगेन मरणसंपादने न प्रवृत्तिरभूदिति ज्ञायते । 'प्रातराशार्थं वधिष्यन्ति' इत्यादिकमपि भीषणायैव । अथवा रत्युपक्रममात्रेणैव मरणं भवेत् शापवशात् । अतश्च भोगोऽपि न सिध्येदिति भीतिः हेतुः स्यात् ॥

राजा दशरथो नाम * धर्मसेतुरिवाचलः ।
सत्यसन्धः परिज्ञातः यस्य पुत्रः स राघवः ॥ २ ॥

धर्मसेतुरिवेत्येकं पदम् . 'इवेन विभक्त्यलोपः समासश्च' इति । सेतुः—मर्यादया अवस्थितिहेतुः । धर्मस्य सेतुरिव मर्यादाप्रतिष्ठापकः इत्यर्थः । परिज्ञातः—प्रसिद्धः ॥ २ ॥

रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः ।
दीर्घबाहुः विशालाक्षः दैवतं हि पतिर्मम ॥ ३ ॥
इक्ष्वाकूणां कुले जातः सिंहस्कन्धो महाद्युतिः ।
लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान् [1] हरिष्यति ॥ ४ ॥
प्रत्यक्षं यद्यहं तस्य त्वया स्यां धर्षिता बलात् ।
शयिता त्वं इतः संख्ये जनस्थाने यथा खरः ॥ ५ ॥
य एते राक्षसाः † प्रोक्ताः घोररूपा महाबलाः ।
राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥ ६ ॥

य एते प्रोक्ता इति । त्वया मत्पुरतः इति शेषः ॥ ६ ॥

तस्य ज्याविप्रमुक्तास्ते शराः काञ्चनभूषणाः ।
शरीरं विधमिष्यन्ति गङ्गाकूलमिवोर्मयः ॥ ७ ॥
‡ असुरैर्वा सुरैर्वा त्वं यद्यवध्योऽसि, रावण !
§ उत्पाद्य सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥ ८ ॥

---

* धर्मेति पृथक्पदं लुप्तषष्ठीकम् । धर्मस्य अचलः सेतुरिव मर्यादाप्रतिष्ठापकः—ति. धर्मसेतुः—धर्मस्य सेतुरिव मर्यादास्थापकः इत्यर्थः । अचलः—स्थिरः—गो. † प्रोक्ताः—गमनाय प्रेरिताः—रा. रामवधार्थमिति शेषः । ‡ रामः सुरासुरानपि अतिशेत इत्यर्थः । § त्वद्विषये तस्य वैरमुत्पाद्य—तादृशं कर्म कृत्वेत्यर्थः ।

[1] वधिष्यति—ज.

तस्य वैरं—तस्य रामस्य क्रोधमित्यर्थः । जीवन् न मोक्ष्यसे । तत्सन्निधिं प्राप्तस्तेनेति शेषः ॥ ८ ॥

स ते जीवितशेषस्य राघवोऽन्तकरो बली ।
पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥ ९ ॥

तदेव प्रपञ्चयते—स त इत्यादि ॥ ९ ॥

यदि पश्येत् स रामस्त्वां रोषदीप्तेन चक्षुषा ।
रक्षस्त्वमद्य निर्दग्धः [1]गच्छेः सद्यः पराभवम् ॥ १० ॥
यश्चन्द्रं नभसो भूमौ पातयेन्नाशयेत वा ।
सागरं शोषयेद्वाऽपि *स सीतां मोचयेदिह ॥ ११ ॥

पातयेदित्यादि लिङ् शक्त्यर्थे । सागरं वाऽपि शोषयेदिति । सागरं विशोषयितुं शक्तः । स तु इहस्थितां सीतां मोचयिष्यति ॥

†[2] गतायुस्त्वं गतश्रीकः गतसत्त्वो गतेन्द्रियः ।
लङ्का वैधव्यसंयुक्ता ‡त्वत्कृतेन भविष्यति ॥ १२ ॥

त्वत्कृतेनेति । त्वन्नाशनिमित्तेनेत्यर्थः ॥ १२ ॥

[3]न ते पापमिदं कर्म [4]सुखोदर्कं भविष्यति ।
याऽहं नीता विनाभावं पतिपार्श्वात्त्वया [5]वने ॥ १३ ॥

विनाभावं—वियोगम् ॥ १३ ॥

---

*'न सीतां' इति पाठे काकुरूपं वाक्यम् । †त्वत्कृतेन परदाराभिमर्शन-रूपपापेन त्वं आयुरादिहीनो भविष्यसि, लङ्का च वैधव्यसंयुक्ता भविष्यति ; 'आयुर्बलं यशो लक्ष्मीः परदाराभिमर्शनात् । सप्त एव विनश्यन्ति' इति स्मृतेः—गो. पूर्वार्ध प्रत्येकं वाक्यं वा ॥ ‡त्वत्कृते लङ्काऽपि न भविष्यति । अस्य विवरणरूपं विशेषणं वैधव्यसंयुक्तेति—इति केचित् ।

[1] यथा रुद्रेण मन्मथः—ङ. [2] गतायुस्त्वं—ज्ञ. [3] तेन—ङ. [4] दुःखोदर्कं—ङ. [5] बलात्—ज्ञ.

स हि * [1]देवरसंयुक्तः मम भर्ता महाद्युतिः ।
निर्भयो वीर्यमाश्रित्य शून्ये वसति दण्डके ॥ १४ ॥

देवरः—स्वदेवरः—लक्ष्मण इत्यर्थः ॥ १४ ॥

स ते दर्पं बलं वीर्यं उत्सेकं च तथाविधम् ।
अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५ ॥
यदा विनाशो भूतानां दृश्यते कालचोदितः ।
तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः ॥ १६ ॥

कार्ये प्रमाद्यन्तीति । उचितकर्तव्यवैपरीत्यं प्राप्नुवन्तीत्यर्थः ॥ १६ ॥

मां प्रधृष्य स ते कालः प्राप्तोऽयं राक्षसाधम !
आत्मनो राक्षसानां च वधायान्तःपुरस्य † च ॥ १७ ॥

स ते काल इति । कालकृतो विनाशकालः इत्यर्थः ॥ १७ ॥

न शक्या यज्ञमध्यस्था वेदिः सुग्भाण्डमण्डिता ।
द्विजातिमन्त्रपूता च चण्डालेना[2]वमर्दितुम् ॥ १८ ॥

---

* दैवतसंयुक्तः—दैवबलसंयुक्तः । दीनः तापसः रामः किं करिष्यतीति पूर्वं रावणेनोक्तस्योत्तरमिदम्—गो. † स्वमरणेन वैधव्यमेव अन्तःपुरवधः—ति. स्त्रीवधस्य रामेण असंभवात् एवं व्याख्यानम् । परन्तु 'राक्षसानां' इत्यत्र सर्वराक्षसानां विवक्षा आवश्यकी । 'अवश्यं न भविष्यन्ति सर्वे रावण राक्षसाः' (48-22) इति च निर्देशः स्पष्टः । अतः विशिष्य प्रातिस्विकतया स्त्रीवधस्यासंभवेऽपि, लङ्काराज्यस्यैव निर्मूलने प्राप्ते तदन्तर्गतानां सर्वेषामपि नाशोऽवश्यंभाव्येव । अतः सामान्योक्तिरेवायम् । 'अन्तःपुरस्य च' इति विशिष्यकथनं तु वृद्धीच्छया मूलक्षय इव 'मयि स्त्रीलौल्यात् विद्यमानभोगस्यापि क्षयः सिद्धः स्त्रीलोलस्य तव' इति प्रतिपादनाय ॥

[1] दैवत—ज. [2] भिमर्शितुम्—ङ.

यज्ञमध्यस्था—यज्ञशालामध्यगता। स्रुग्भाण्डमण्डिता—स्रुगादि-यज्ञोपकरणमण्डिता वेदिः चण्डालेन यथा अभिमर्शितुं न शक्या, तथेति योजना ॥ १८ ॥

तथाऽहं *धर्मनित्यस्य धर्मपत्नी [1] पतिव्रता।
त्वया स्प्रष्टुं न शक्याऽस्मि, राक्षसाधम! पापिना ॥१९॥
क्रीडन्ती राजहंसेन पद्मषण्डेषु [2] नित्यदा।
हंसी सा तृणषण्डस्थं कथं द्रक्ष्येत मद्गुकम्? ॥ २० ॥

तृणषण्डस्थं—जलजनील्यादितृणमध्यस्थमित्यर्थः। द्रक्ष्येतेति। पश्येदिति यावत्। कुत्सितो मद्गुः—मद्गुकः, जलवायसः इत्यर्थः ॥२०॥

इदं शरीरं † निःसंज्ञं बन्ध वा खादयस्व वा।
नेदं शरीरं रक्ष्यं मे जीवितं वाऽपि, राक्षस! ॥ २१ ॥
न तु शक्ष्या[3]म्युपक्रोशं पृथिव्यां दातुमात्मनः।

एवं निर्भयोक्तिर्धैर्यकारणं आदावस्मदुक्तं प्रदर्श्यते—इदं शरीरमित्यादि। निःसंज्ञमिति। निर्गतदेहाभिमानमित्यर्थः। आत्मनः उपक्रोशमिति। सीता असती जातेति निन्दामित्यर्थः ॥ २१ ॥

एवमुक्त्वा तु वैदेही क्रोधात् सुपरुषं वचः ॥ २२ ॥
रावणं ‡मैथिली तत्र पुनर्नोवाच किंचन।
सीताया वचनं श्रुत्वा परुषं रोमहर्षणम् ॥ २३ ॥

---

* धर्मः नित्यं यस्य—धर्मैकरतस्येत्यर्थः। † तावत्येव मम प्राणानामुत्क्रान्त्या निस्संज्ञम्। ‡ क्रियाभेदात् पुनः मैथिलीशब्दप्रयोग.—गो.

[1] यशस्विनी—ङ्. दृढव्रता—ञ्. [2] नित्यशः—ञ्. [3] म्यप—ङ्.

[1] प्रत्युवाच ततः सीतां भयसन्दर्शनं वचः ।

भयसन्दर्शनं—भयप्रकाशकम्* ॥ २३ ॥

शृणु, मैथिलि ! मद्वाक्यं मासान् द्वादश, भामिनि !
कालेनानेन नाभ्येषि यदि मां, चारुहासिनि !
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः ॥ २५ ॥

द्वादश भामिनीति । प्रतीक्ष इति शेषः । नाभ्येषि यदीति । स्वारस्येनेति शेषः ॥ २४–२५ ॥

इत्युक्त्वा परुषं वाक्यं रावणः शत्रुरावणः ।
राक्षसीश्च ततः क्रुद्धः इदं वचनमब्रवीत् ॥ २६ ॥

शत्रून् रावयति—क्रोशयतीति शत्रुरावणः ॥ २६ ॥

शीघ्रमेव हि राक्षस्यः [2] विकृता घोरदर्शनाः ।
दर्पमस्यापनेष्यन्तु मांसशोणितभोजनाः ॥ २७ ॥

अस्यापनेष्यन्तीति । अस्या अपनयन्त्विति यावत् ॥ २७ ॥

वचनादेव तास्तस्य [3] सुघोरा [4] राक्षसीगणाः ।
† कृतप्राञ्जलयो भूत्वा मैथिलीं पर्यवारयन् ॥ २८ ॥
स ताः प्रोवाच राजा तु रावणो घोरदर्शनः ।
‡ प्रचाल्य चरणोत्कर्षैः दारयन्निव मेदिनीम् ॥ २९ ॥

---

* भयोत्पादकमिति यावत् । † रावणाय कृतप्राञ्जलय इत्यर्थः । ‡ प्रचाल्य—द्वित्राणि पदानि चलित्वा–ति. प्रचाल्य—गत्वा, उत्थाय वा–गो. वस्तुतस्तु, क्रोधात भूमौ पादाहतिकरणं उग्राणां स्वभावः । तादृशपादाहतिं कृत्वेति तात्पर्यम् । मेदिनीं दारयन्निव चरणोत्कर्षैः–पादप्रक्षेपैः मेदिनीं प्रचाल्य-चालयित्वा ॥

[1] एतत्स्थाने—रावणः परमक्रुद्धः इदं वचनमब्रवीत्—इति–ङ. [2] विरूपाः–ज. [3] विकृताः–ङ. [4] घोरदर्शनाः–ज.

चरणोत्कर्षैः—पादोत्क्षेपैः मेदिनीं दारयन्निव प्रचाल्य—उत्थाय ॥ २९ ॥

* अशोकवनिकामध्ये मैथिली नीयतामियम् ।
तत्रेयं रक्ष्यतां गूढं युष्माभिः परिवारिता ॥ ३० ॥
तत्रैनां तर्जनैः घोरैः पुनः सान्त्वैश्च मैथिलीम् ।
आनयध्वं वशं सर्वाः वन्यां गजवधूमिव ॥ ३१ ॥
इति प्रतिसमादिष्टाः राक्षस्यो रावणेन ताः ।
अशोकवनिकां जग्मुः मैथिलीं प्रतिगृह्य तु ॥ ३२ ॥
† [1]सर्वकामफलैः वृक्षैः नानापुष्पफलैर्वृताम् ।
[2]सर्वकालमदैश्चापि द्विजैः समुपसेविताम् ॥ ३३ ॥

सर्वकामफलैरिति । काम्यन्त इति कामाः वस्त्राभरण-स्रगादिलक्षणाः, तद्रूपं फलं येभ्यः ते तथा । तादृशैः वृक्षैः—कल्पवृक्षैरिति यावत् । मदः—सन्तोषः । द्विजाः—पक्षिणः ॥ ३३ ॥

सा तु शोकपरीताङ्गी मैथिली जनकात्मजा ।
‡ राक्षसीवशमापन्ना [3]व्याघ्रीणां हरिणी यथा ॥ ३४ ॥
शोकेन महता [4]ग्रस्ता मैथिली जनकात्मजा ।
न शर्म लभते भीरुः पाशबद्धा मृगी यथा ॥ ३५ ॥

---

* तर्जनभीषणाद्यनुकूलतया विविक्ताशोकवनिकाप्रापणम् । † सर्वस्मिन्नपि काले (पा.) फलानि येषां ते । एवमुत्तरत्रापि—गो ‡ राक्षसीत्यविभक्तिकनिर्देशः, राक्षसीनामित्यर्थः—गो. 'वशमापन्ना' इत्यस्य हरिण्यामप्यन्वयसौकर्याय एवं व्याख्यानम् । श्लोकद्वयं भिन्नं वाक्यम् ॥

[1] सर्वकाल—ङ्. [2] सर्वकामप्रदै—ङ्. [3] व्याघ्राणां—ज्ञ. [4] त्रस्ता—ज्ञ.

न विन्दते तत्र तु शर्म मैथिली
विरूपनेत्राभिरतीव तर्जिता ।
पतिं स्मरन्ती दयितं च [1]दैवतं
विचेतनाऽभूत् भयशोकपीडिता * ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे षट्पञ्चाशः सर्गः

विचेतनेति । पतिज्ञानेन विकल्पज्ञानरहितेति यावत् ।
अचल(३६)मानः सर्गः ॥ ३६ ॥

इति श्रीमद्रामायणवृतकतकटीकायां आरण्यकाण्डे षट्पञ्चाशः सर्गः

---

* ननु सीता लक्ष्म्या अवतार इति सिद्धम् । वक्ष्यति हि—'सीता लक्ष्मीः भवान् विष्णुः' (युद्ध. 120-28) इति । विष्णुपुराणे चोक्तम्—'राघवत्वेऽभवत् सीता' इति । एवंभूतां सीतां समरसीमनि जनितमूर्छालक्षणं लक्ष्मणमप्युद्धर्तुमसमर्थो रावणः कथं बलात्करोति स्म । वक्ष्यति हि—'हिमवान् मन्दरो मेरुः त्रैलोक्य वा सहामरैः । शक्यं भुजाभ्यामुद्धर्तुं न संख्ये भरतानुजः' ( ) इति—उच्यते—वेदवतीरूपपूर्वजन्मनि देवी तथा सङ्कल्पितवती । उक्तं ह्युत्तरकाण्डे—'यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने । तस्मात् तव वधार्थं वै उत्पत्स्येऽहं महीतले' (उत्त. 17-31) इति । देवकार्यनिर्वाहाय स्वयमेव स्वधर्षणमङ्गीचकार । प्रजायां कूपपतितायां यथा माता स्वयं तदुपरि पतति वात्सल्यातिशयेन, तथा रावणबन्दीकृत-देवस्त्रीरक्षणाय स्वयं तत्र स्वगमनमनुमतवती । वक्ष्यति सुन्दरकाण्डे—'नापहर्तुमहं शक्या तस्य रामस्य धीमतः । विधिस्तव वधार्थाय विहितो नात्र संशयः' (सुन्द. 22-21) इति । तर्हि सीता प्रलापादिकं किमर्थं कृतवतीति चेत्—शृणु—पतिविरहे पतिव्रतया एवं वर्तितव्यमिति लोकहितप्रवर्तनाय प्रलापादिकमकरोदिति—यो परन्तु—पुत्रप्राप्तीच्छया प्रसववेदनां महतीमपि सहर्षं सोढुं स्वयं सन्नद्धानां स्त्रीणां प्रसववेदनानुभवकालिकः प्रलापः केवलं अभिनय एव स्यादिति कथने कः समाधिरिति चिन्त्यम् । अधिकमन्यत्र । उत्तरत्र 64-56 श्लोके कतकव्याख्याऽपि द्रष्टव्या ॥

[1] देवरं—ज्ञ.

[प्रक्षिप्तः सर्गः]

प्रवेशितायां सीतायां लङ्कां प्रति पितामहः ।
तदा प्रोवाच देवेन्द्रं परितुष्टं शतक्रतुम् ॥ १ ॥
त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च ।
लङ्कां प्रवेशिता सीता रावणेन दुरात्मना ॥ २ ॥
पतिव्रता महाभागा नित्यं चैव सुखैधिता ।
अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनम् ॥ ३ ॥
राक्षसीभिः परिवृता भर्तृदर्शनलालसा ।
निविष्टा हि पुरी लङ्का तीरे नदनदीपतेः ॥ ४ ॥
कथं ज्ञास्यति तां राम तत्रस्थां तामनिन्दिताम् ।
दुःखं सञ्चिन्तयन्ती सा बहुशः परिदुर्लभा ॥ ५ ॥
प्राणयात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयम् ।
स भूयः संशयो जातः सीतायाः प्राणसंक्षये ॥ ६ ॥
स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननाम् ।
प्रविश्य नगरीं लङ्कां प्रयच्छ हविरुत्तमम् ॥ ७ ॥
एवमुक्तोऽथ देवेन्द्रः पुरीं रावणपालिताम् ।
आगच्छन्निद्रया सार्धं भगवान् पाकशासनः ॥ ८ ॥
निद्रां चोवाच गच्छ त्वं राक्षसान् संप्रमोहय ।
सा तथोक्ता मघवता देवी परमहर्षिता ॥ ९ ॥
देवकार्यार्थसिद्ध्यर्थं प्रामोहयत राक्षसान् ।
एतस्मिन्नन्तरे देवः सहस्राक्ष शचीपतिः ॥ १० ॥
आससाद वनस्थां तां वचनं चेदमब्रवीत् ।
देवराजोऽस्मि भद्रं ते इह चास्मि, शुचिस्मिते ! ॥ ११ ॥
अहं त्वां कार्यसिद्ध्यर्थं राघवस्य महात्मनः ।
साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे ॥ १२ ॥
मत्प्रसादात् समुद्रं सः तरिष्यति बलैः सह ।
मयैवेह च राक्षस्यः मायया मोहिताः शुभे ! ॥ १३ ॥
तस्मादन्नमिदं, सीते ! हविष्यान्नमहं स्वकम् ।
एतत् त्वां संगृह्य, वैदेहि ! आगतः सह निद्रया ॥ १४ ॥

पतदत्स्यसि मद्धस्तात् न त्वां बाधिष्यते, शुभे !
क्षुधा तृषा च, रम्भोरु ! वर्षाणामयुतैरपि ॥ १५ ॥
एवमुक्ता तु देवेन्द्रं उवाच परिशङ्किता ।
कथं जानामि देवेन्द्रं त्वामिहस्थं शचीपतिम् ॥ १६ ॥
देवलिङ्गानि दृष्टानि रामलक्ष्मण संनिधौ ।
तानि दर्शय, देवेन्द्र ! यदि त्वं देवराट् स्वयम् ॥ १७ ॥
सीतायाः वचनं श्रुत्वा तथा चक्रे शचीपतिः ।
पृथिवीं नास्पृशत् पद्भ्यां अनिमेषेक्षणानि च ॥ १८ ॥
अरजोऽम्बरधारी च न म्लानकुसुमस्तथा ।
तं ज्ञात्वा लक्षणैः सीता वासवं परिहर्षिता ॥ १९ ॥
उवाच वाक्यं रुदती भगवद्राघवं प्रति ।
सह भ्रात्रा महाबाहुः दिष्ट्या मे श्रुतिमागतः ॥ २० ॥
यथा मे श्वशुरो राजा यथा च मिथिलाधिपः ।
तथा त्वामद्य पश्यामि सनाथो मे पतिस्त्वया ॥ २१ ॥
तवाज्ञया च, देवेन्द्र ! पयोभूतमिदं हविः ।
अश्नियामि त्वया दत्तं रघूणां कुलवर्धनम् ॥ २२ ॥
इन्द्रहस्तात् गृहीत्वा तत् पायसं सा शुचिस्मिता ।
न्यवेदयत भर्त्रे सा लक्ष्मणाय च मैथिली ॥ २३ ॥
यदि जीवति मे भर्ता सह भ्रात्रा महाबलः ।
इदमस्तु तयोर्भक्त्या तदाश्नात् पायसं स्वयम् ॥ २४ ॥
इतीव तत् प्राश्य हविर्वरानना
जहौ क्षुधादुःखसमुद्भवं च तम् ।
इन्द्रात् प्रवृत्तिमुपलभ्य जानकी
काकुत्स्थयोः प्रीतमना बभूव ॥ २५ ॥
स चापि शक्रः त्रिदिवालयं तदा
प्रीतो ययौ राघवकार्यसिद्धये ।
आमन्त्र्य सीतां स ततो महात्मा
जगाम निद्रासहितः स्वमालयम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे प्रक्षिप्तः सर्गः

सप्तपञ्चाशः सर्गः

[रामप्रत्यागमनम्]

राक्षसं मृगरूपेण * चरन्तं कामरूपिणम् ।
निहत्य रामो मारीचं तूर्णं पथि [1] निवर्तते ॥ १ ॥

एवं कविः सीतावृत्तान्तं अशोकवनिकाऽवस्थित्यन्तमुपवर्ण्य, वाचः क्रमिकत्वतः, पश्चात् रामवृत्तान्तमुपवर्णयति । राक्षसमित्यादि । तत्र राक्षसं मृगरूपेणेत्यादिना दुर्निमित्तशतशङ्क्यमानसीताविपत्तिकस्य रामस्य प्रत्यावृत्तिः ॥ १ ॥

तस्य संत्वरमाणस्य द्रष्टुकामस्य मैथिलीम् ।
क्रूरस्वनोऽथ गोमायुः विननादास्य † पृष्ठतः ॥ २ ॥

यदा‡ पथि निवर्तते, तदा तस्य पृष्ठतः गोमायुः विननादेत्यन्वयः ॥ २ ॥

§ स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् ।
[2] चिन्तयामास गोमायोः स्वरेण परिशङ्कितः ॥ ३ ॥
अशुभं बत मन्येऽहं गोमायु[3]र्वाश्यते यथा ।
स्वस्ति स्यादपि वैदेह्याः ‖ राक्षसैर्भक्षणं विना ॥ ४ ॥

---

* चरन्तं, निवर्तत इति च वर्तमानप्रयोगः तादात्विकानुभवकृतः स्यात् । † एकस्य गोमायोः पृष्ठतः क्रूरस्वरकरणं दुर्निमित्तमिति भावः—गो. गोमायुदर्शनस्य शुभनिमित्तत्वात् तदभावसूचनाय 'पृष्ठतः' इत्युक्तिः स्यात् । ‡ 'यदा पथि निवर्तते तदा' इत्येतत् वृत्तानुवादः, 'तस्य' इति तच्छब्दपरामृष्टः । § पूर्वमेव स्वरेण—मारीचस्वरेण परिशङ्कितः—सञ्जातशङ्कः सः रामः, तस्य—गोमायोः स्वरं आज्ञाय—श्रुत्वा चिन्तयामास—गो. आज्ञाय—निश्चित्य—रा. ‖ राक्षसैः भक्षणाभावरूपं स्वस्ति अपि स्यात्—त्ति.

[1] न्यवर्तत—ज. [2] रामः प्रोवाच—ङ. शङ्कयामास—ज. [3] वाशते—ज.

गोमायुर्वाश्यते यथेति। यथा स्पष्टा भवति अशुभाऽऽयतिः, तथा क्रोशतीत्यर्थः। तथाऽग्रेऽपि। वैदेह्याः स्वस्तीति। "चतुर्थ्यर्थे बहुलं छन्दसि" इति षष्ठी। अपिः कामप्रवेदने ॥ ४ ॥

मारीचेन तु * विज्ञाय स्वर[1]मालम्ब्य मामकम्।
विक्रुष्टं मृगरूपेण लक्ष्मणः शृणुयाद्यदि ॥ ५ ॥
स सौमित्रिः स्वरं श्रुत्वा तां च हित्वा च मैथिलीम्।
तयैव प्रहितः क्षिप्रं मत्सकाशमिहैष्यति ॥ ६ ॥

स्वरं श्रुत्वेति। मदीयत्वभ्रान्त्येति शेषः ॥ ६ ॥

राक्षसैः † सहितैर्नूनं सीताया ईप्सितो वधः।
काञ्चनश्च मृगो भूत्वा व्यपनीयाश्रमात्तु माम् ॥ ७ ॥

सहितैः ईप्सित इति। कर्तव्यमीप्सितः इत्यर्थः ॥ ७ ॥

‡ दूरं नीत्वा तु मारीचः राक्षसोऽभूच्छराहतः।
हा लक्ष्मण! हतोऽस्मीति यद्वाक्यं व्याजहार च ॥ ८ ॥

राक्षसोऽभूदिति। न तु चर्मप्रयोजनमृगोऽभूदित्यर्थः। हतोऽस्मीति व्याजहार यत्, तस्मात् क्षिप्रमेष्यतीति पूर्वेणान्वयः ॥ ८ ॥

---

* मामकं स्वर विज्ञाय तमालम्ब्य विक्रुष्ट स्वरं लक्ष्मणः शृणुयाद्यदि तदा स सौमित्रः तं स्वरं श्रुत्वा—श्लोकद्वयमेकं वाक्यम्। † एकपार्श्वे मदपनयनं, वञ्चनया लक्ष्मणस्यापनयनं, पार्श्वान्तरे सीतावधः इत्यादिकं संभूय मिलित्वा आलोच्य राक्षसैः वैरनिर्यातन कृतमिति 'सहितैः' इत्यनेन उच्यते। ‡ कथमिदमवगम्यत इत्यत्राह—दूरमित्यादि। यत्—यस्मात् दूरं नीत्वैव शराहतोऽभूत्, न तु समीप एव तस्यावकाशं ददौ, यस्माच्च हा लक्ष्मणेत्यादिकं व्याजहार च, अतः—राक्षसैः सहितैरेवेदं कृतमित्यर्थः।

[1] मालक्ष्य- ज्ञ.

अपि स्वस्ति भवेत् *[1]ताभ्यां [2]रहिताभ्यां [3]महावने ।
जनस्थाननिमित्तं हि कृतवैरोऽस्मि राक्षसैः ॥ ९ ॥
निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च ।
इत्येवं चिन्तयन् रामः श्रुत्वा गोमायुनिःस्वनम् ॥ १० ॥
†आत्मनश्चा[4]पनयनं मृगरूपेण रक्षसा ।
आजगाम जनस्थानं राघवः परिशङ्कितः ॥ ११ ॥
तं [5]दीनमानसं दीनं आसेदुः मृगपक्षिणः ।
‡सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान् ॥ १२ ॥

दीनमानसमिति । उपलक्षिताः इति शेषः ॥ १२ ॥

तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः ।
न्यवर्ततार्थ त्वरितः जवेनाश्रममात्मनः ॥ १३ ॥
स तु §सीतां वरारोहां लक्ष्मणं च महाबलम् ।
आजगाम जनस्थानं चिन्तयन्नेव राघवः ॥ १४ ॥

जनस्थानमाजगामेति । जनस्थानदेशवर्ति स्वाश्रममित्यर्थः ॥

ततो लक्ष्मणमायान्तं ददर्श विगतप्रभम् ।
‖ततोऽविदूरे रामेण समीयाय स लक्ष्मणः ॥ १५ ॥

---

* 'न च सीता त्वया हीना न चाहमपि राघव ! मुहूर्तमपि जीवावः जलान्मत्स्याविवोद्धृतौ' (अयो. 53-31) इति लक्ष्मणस्वरूपज्ञः रामः स्वविपत्तिशङ्कया विमूढयोरुभयोरपि विपत्तिं शङ्कते । † रक्षसा आत्मनश्चापनयनं चिन्तयन्, तत एव परिशङ्कितः । ‡ सव्यं कृत्वा —अप्रदक्षिणं कृत्वा—गो. § सीतां लक्ष्मणं च चिन्तयन् । ‖ गतौ त्वरां सूचयति—'अविदूरे' इति ।

[1] द्वाभ्यां—ज. [2] राक्षसानां ङ. [3] मया वने—ज. [4] पनयनात्—ङ.
[5] दीनमनसः—ङ. दीनमनसं—ज.

विषण्णः सुविषण्णेन दुःखितो दुःखभागिना ।
अविदूरे–समीपे । समीयाय–संगतोऽभूत् ॥ १५ ॥

स जगर्हेऽथ तं भ्राता [1]दृष्ट्वा लक्ष्मणमागतम् ॥ १६ ॥
विहाय सीतां विजने वने राक्षससेविते ।
*गृहीत्वा च करं [2]सव्यं लक्ष्मणं रघुनन्दनः ॥ १७ ॥

स जगर्हे इत्यादि । सः रघुनन्दनः सीतां विहायागतं लक्ष्मणं दृष्ट्वा तस्य करं गृहीत्वा जगर्हे इत्यन्वयः ॥ १६–१७ ॥

उवाच †मधुरोदर्कं इदं परुष[3]मार्तवत् ‡ ।
अहो, लक्ष्मण ! गर्ह्यं ते §कृतं यस्त्वं विहाय ताम् ॥
सीतामिहागतः, सौम्य ! कच्चित् स्वस्ति भवेदिह ।

उवाचेत्यादि । मधुरोदर्कं–शब्दतः माधुर्योत्तरं अर्थतः परुषं इमं वक्ष्यमाणलक्षणं आर्तवत्–आर्तः सन् उवाच । ते कृतमिति । त्वया कृतमिति यावत् ॥ १८ ॥

न मेऽस्ति संशयः वीर ! सर्वथा जनकात्मजा ॥ १९ ॥
विनष्टा भक्षिता वाऽपि राक्षसैर्वनचारिभिः ।
अशुभान्येव भूयिष्ठं यथा प्रादुर्भवन्ति मे ॥ २० ॥

---

*प्रीत्यतिशयात् करग्रहणम् । पुरतः स्थितस्य, स्वदक्षिणकरेण सव्यकरग्रहणं सहजप्राप्तम् । †मधुरोदर्क—हितमिति यावत् । परुषं—अप्रियमिति यावत् । अप्रियमपि हितं उवाचेति भावः । ‡आर्तिमत्—आर्तियुक्तं, सर्वमिदं क्रियाविशेषणम् —गो. §कृतं—भावे क्तः, तव कर्म गर्ह्यं इति वा ।

[1] ज्येष्ठः—ङ. [2] तस्य—ङ. [3] मार्तिवत्—ङ.

अथ, लक्ष्मण! सीतायाः *[1] सामग्र्यं प्राप्नुयावहे।
जीवन्त्याः, पुरुषव्याघ्र! सुताया जनकस्य वै ॥ २१ ॥

प्राप्नुयावहै अथ। अथेति प्रश्ने। प्राप्नुयावेति यावत् ॥ २१ ॥

यथा वै मृगसङ्घाश्च गोमायुश्चैव भैरवम्।
[2]वाश्यन्ते शकुनाश्चापि †प्रदीप्तामभितो दिशम्।
अपि स्वस्ति भवेत् तस्याः राजपुत्र्याः, महाबल! ॥ २२ ॥

प्रदीप्तां दिशमिति। उत्पातवशादिति शेषः ॥ २२ ॥

इदं हि रक्षो मृगसन्निकाशं
प्रलोभ्य मां दूरमनु[3]प्रयातम्।
‡हतं कथंचिन्महता श्रमेण
स राक्षसोऽभून्म्रियमाण एव ॥ २३ ॥

मृगसंनिकाशं—मृगवत् प्रतिभासमानम्। म्रियमाण एव—तदवस्थापन्न एव, न तु ततः पूर्वमित्यर्थः ॥ २३ ॥

---

* सामग्र्यं—क्षेमं अनपहरणरूपं—**ति.** अविच्छिन्नावयवत्वं—**रा.** अक्षतत्व—**गो** लोके कस्यचिदपाये प्राप्ते, तत्रापि राक्षसीभिः भक्षणादिरूपे प्राप्ते 'पूर्णं तत् पश्येयं वा' इत्येवमाकारा व्यथा अनुभवसिद्धैव। † प्रदीप्तां—सूर्याधिष्ठितां—**ति.** सूर्याक्रान्तत्वेन प्रकाशितां दिशं, सूर्याभिमुखमित्यर्थः—**रा.** सूर्याधिष्ठिता, तत्पार्श्वद्वयदिशो च प्रदीप्ता, तमभिमुखं वाश्यन्ते—नदन्ति। तेन वायसादिपक्षिणां शृगालकृष्णसारादिमृगाणां च सूर्याधिष्ठितदिशि क्रूजनं दुःखसूचकमित्युक्तम्—**गो.** ‡ महता श्रमेण उपलक्षितं मां प्रलोभ्य कथञ्चित हतम्। कथञ्चिदित्यनेन चिरं लक्ष्यवधाप्राप्तिर्द्योत्यते—**गो.** 'कथञ्चित' 'महता श्रमेण' इत्यनयोः समानार्थकत्वमभिमत्य एवं व्याख्यातं प्रतिभाति। परन्तु लोकव्यवहारदृशा—'महता श्रमेण कथञ्चित हतम्' इत्यन्वय एव स्वरसः। 69–26 श्लोकटिप्पणी द्रष्टव्या ॥

[1] सकाशं—**ङ.** [2] वाशन्ते—**ज.** [3] प्रयान्तम्—**ङ.**

मनश्च मे दीनमिहाप्रहृष्टं
चक्षुश्च सव्यं कुरुते विकारम् ।
असंशयं, लक्ष्मण! नास्ति सीता
हृता मृता वा *पथि वर्तते वा ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्तपञ्चाशः सर्गः

हृता—निर्वृत्तहरणा । पथि वर्तते वा । ह्रियमाणा वेत्यर्थः । अवर(२४ २-२)मानः सर्गः ॥ २४ २-२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे सप्तपञ्चाशः सर्गः

अष्टपञ्चाशः सर्गः

[लक्ष्मणदर्शनम्]

स दृष्ट्वा लक्ष्मणं [1] दीनं †[2] शून्यं दशरथात्मजः ।
पर्यपृच्छत धर्मात्मा‡ वैदेहीमागतं विना ॥ १ ॥

अथ सीतां संपृच्छ्यमानस्य रामस्य स्वाश्रमगमनम् । स दृष्ट्वेत्यादि । शून्यं—सन्तोषादिशून्यचित्तम् । वैदेहीं विना आगतमिति । विसृज्यागतमित्यर्थः ॥ १ ॥

---

* पथि वर्तते वा—त्वां प्रेषयित्वाऽपि निर्वृतेरप्राप्त्या साऽपि मां द्रष्टुं आश्रमं विहाय प्रस्थिता वा । एतादृशे महावने तादृशसुकुमार्याः आश्रमं विहाय विना रक्षकं बहिर्निर्गमने हि अपायः सिद्ध एव । अतश्च पथि वर्तते वा इत्यस्य—निश्चितसन्निहितापहरणा, निश्चितसन्निहितमरणा वा इत्यर्थः हृदयंगमः ॥ † शून्ये (पा.) वने वैदेहीं विनाऽऽगतं—गो. ‡ वैदेहीं विनाऽऽगतमित्यनेन, यदि नाम तत्रागमनं अत्यन्तावश्यकं स्यात्, तदा वैदेह्या अपि सहैवानयनमेव युक्तमिति रामस्याशयः स्यादिति प्रतिभाति । अनन्तरसर्गे ४ श्लोकोऽपि द्रष्टव्यः ।

[1] दीनः—ङ. [2] शून्ये—ङ.

प्रस्थितं दण्डकारण्यं या मामनुजगाम ह ।
क्व सा, लक्ष्मण ! वैदेही यां हित्वा त्वमिहागतः ॥

राज्यभ्रष्टस्य दीनस्य दण्डकान् परिधावतः ।
क्व सा दुःखसहाया मे वैदेही तनुमध्यमा ॥ ३ ॥

यां विना नोत्सहे, वीर ! मुहूर्तमपि जीवितुम् ।
क्व सा प्राणसहाया मे सीता सुरसुतोपमा ॥ ४ ॥

पतित्वममराणां वा पृथिव्याश्चापि, लक्ष्मण !
तां विना [1] तपनीयाभां नेच्छेयं जनकात्मजाम् ॥ ५ ॥

अमराणां पतित्वमिति । इन्द्रत्वमिति यावत् ॥ ५ ॥

कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम ।
*कच्चित् प्रव्राजनं, [2] सौम्य ! न मे मिथ्या भविष्यति ॥

मे प्रव्राजनं—चतुर्दशसमाः वनप्रव्राजनप्रतिज्ञा तु सीताजीविनेन मज्जीवनात् न मिथ्या भविष्यति कच्चित् ॥ ६ ॥

सीतानिमित्तं, सौमित्रे ! मृते मयि †गते त्वयि ।
कच्चित् सकामा सुखिता कैकेयी सा भविष्यति ॥ ७ ॥

अथ विपरीतशङ्का, मनसो निरर्गलत्वात्—सीतानिमित्तमित्यादि । सीताविनाशनिमित्तमित्यर्थः । त्वयि गते इति । अयोध्यामिति शेषः ॥

---

* चतुर्दशवर्षसमाप्तावेव सीतावियोगजं जीववियोगं किं प्राप्स्यामीत्यर्थः—गो.
† सीतानिमित्तं मयि त्वयि च मृते—राक्षसमृतत्वे गते—प्राप्ते सति—रा. वस्तुतस्तु गतिशब्दस्यैव मरणार्थकत्वं प्रसिद्धमेव । मयि मृते, तेन च त्वय्यपि गते—मृते इत्येवार्थः । लक्ष्मणस्य रामपक्षपातस्य कैकेय्या विदिततया, लक्ष्मणेऽपि मृते—इत्येवार्थः युक्तः ॥

[1] तपनीयाङ्गीं—ङ. [2] वीर—ज.

सपुत्रराज्यां सिद्धार्थां मृतपुत्रा तपस्विनी।
उपस्थास्यति कौसल्या क्वचित् *[1] सौम्येन कैकयीम्॥

सौम्येनेति। निरस्तप्राभवा दासीभावेनेत्यर्थः॥ ८॥

यदि जीवति वैदेही गमिष्याम्याश्रमं [2] पुनः।
† [3] सुवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि, लक्ष्मण!॥

यदि वृत्तेति। अपहृता मृता वेत्यर्थः॥ ९॥

‡ यदि मामाश्रमगतं वैदेही नाभिभाषते।
[4] पुनः प्रहसिता सीता, विनशिष्यामि, लक्ष्मण!॥

प्रहसिता—हसितमुखीति यावत्॥ १०॥

ब्रूहि, लक्ष्मण! वैदेही यदि जीवति वा न वा।
§ त्वयि ‖ प्रमत्ते रक्षोभिः भक्षिता वा तपस्विनी॥

त्वयि प्रमत्त इति। अनुचितकारिणीत्यर्थः॥ ११॥

सुकुमारी च बाला च नित्यं [5] चादुःख[6] दर्शिनी।
¶ मद्वियोगेन वैदेही व्यक्तं शोचति [7] दुर्मनाः॥ १२॥
सर्वथा रक्षसा तेन जिह्मेन सुदुरात्मना।
वदता लक्ष्मणेत्युच्चैः तवापि जनितं भयम्॥ १३॥

तवापीति। सुज्ञातमद्बलवीर्यादिमतोऽपीत्यर्थः॥ १३॥

---

* सौम्येन—विनयेन—ति. † सुवृत्ता—सद्वृत्ता। संवृत्तेत्यपि तथैव॥ ‡ यदि पुनः इत्यन्वयः। § न वेत्यस्य विवरणं—त्वयीत्यादि—गो. ‖ प्रमत्तः—प्रमादः—अनवधान, अनवहितः। ¶ शोचति—अशोचत—गो. मद्वियोगेनेति—तां परित्यज्य मम निर्गमनमेव न सांप्रतमिति भावः। अपहरणपक्षे वा इयमुक्तिः॥

[1] सौम्य न—ङ. [2] प्रति—ङ. [3] संवृत्ता—ज. [4] पुरः—ज. [5] सा दुःख—ङ. [6] भागिनी—ज. [7] दुःखिता—ङ.

*श्रुतस्तु [1]शङ्के वैदेह्या स स्वरः सदृशो मम ।
त्रस्तया प्रेषितः त्वं च [2]द्रष्टुं मां शीघ्रमागतः ॥ १४ ॥

सदृशो ममेति । स्वरेणेति शेषः । यस्मात् आगतः तस्मात् सः स्वरस्तु वैदेह्या श्रुतः इति शङ्के इत्यन्वयः ॥ १४ ॥

सर्वथा तु कृतं कष्टं सीतामुत्सृजता वने ।
प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरम् ॥ १५ ॥

प्रतिकर्तुं—मत्कृतापकारस्य प्रत्यपकारं कर्तुं । अन्तरमपेक्षिणामिति शेषः । अन्तरं—अवकाशः दत्तम् ॥ १५ ॥

दुःखिताः खरघातेन राक्षसाः पिशिताशनाः ।
तैः सीता निहता घोरैः भविष्यति न संशयः ॥ १६ ॥
[3]अहोऽस्मिन् व्यसने मग्नः सर्वथा, शत्रुसूदन !
किं न्विदानीं करिष्यामि ? शङ्के प्राप्तव्यमीदृशम् ॥ १७ ॥

अन्ततो धैर्यावलम्बनं—शङ्के प्राप्तव्यमीदृशमिति । प्रारब्धवशतः ईदृशदुःखमनुभवितव्यमेवेत्येव मन्ये इति भावः ॥ १७ ॥

इति सीतां वरारोहां चिन्तयन्नेव राघवः ।
आजगाम †जनस्थानं त्वरया सहलक्ष्मणः ॥ १८ ॥

---

* स्वरः श्रुतः, त्रस्तया त्वं प्रेषितश्च —इति यथाश्रुतान्वयो वा । † जनस्थानं—तद्वर्तिस्वाश्रमम्-ति.

[1] मन्ये—ज. [2] यातुं—ङ. [3] अहोऽस्मि—ज.

* विगर्हमाणोऽनुजमार्तरूपं †
‡ क्षुधा [1] श्रमाच्चैव पिपासया च ।
विनिःश्वसन् शुष्कमुखो [2] विवर्णः
प्रतिश्रयं प्राप्य समीक्ष्य शून्यम् ॥ १९ ॥
स्वमाश्रमं संप्रविगाह्य [3] वीरः
विहारदेशाननुसृत्य कांश्चित्
एतत्तदित्येव निवासभूमौ
§ प्रहृष्टरोमा व्यथितो बभूव ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टपञ्चाशः सर्गः

श्रमात्–बहुदूरधावनजात् । प्रतिश्रयं प्राप्येत्यादि वक्ष्यमाणानेक(५९–६३)सर्गार्थसंक्षेपः । प्रतिश्रयं–स्वाश्रयसमीपदेशं समीक्ष्य शून्यमिति । सीताशून्यमित्यर्थः । तं प्रतिश्रयमित्यनुकर्षः । अनन्तरं स्वं आश्रमं संप्रविगाह्य, तमपि शून्यं समीक्ष्य, ततः सीतायाः कांश्चित् विहारदेशान् अनुसृत्य–विचित्य तत्रत्यनिवासभूमौ क्रीडास्थाने । एतत्तदिति—तादृशमेतादृशमिति विहारविशेषं स्मृत्वा हृष्टरोमाः शोकेन प्रव्यथितो बभूव । नारी(२०)मानः सर्गः ॥ १९–२० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे अष्टपञ्चाशः सर्गः

---

* श्लोकद्वयमेकान्वयं, वक्ष्यमाणानेक (५९–६३) सर्गार्थसंग्रहरूपम्–गो.
† स्वकर्तव्यभ्रंशपरिज्ञानात् आर्तरूपं लक्ष्मणम् । ‡ क्षुत्पिपासयोः बहुदूरधावनादिश्रमजन्यत्वात् श्रमशब्दस्य मध्ये प्रयोगः पञ्चम्यन्तता च । § प्रहृष्टरोमा सन् व्यथितो बभूव–गो.

[1] श्रमेणैव–ज. [2] विषण्णः–ज. [3] धीरः–ङ.

एकोनषष्टितमः सर्गः

[लक्ष्मणगर्हणम्]

अथाश्रमादुपावृत्तं अन्तरा रघुनन्दनः ।
परिपप्रच्छ सौमित्रिं रामो [1]दुःखार्दितं पुनः ॥ १ ॥

पूर्वं आश्रमप्राप्त्यादिकं संक्षिप्योक्तम् । तत्र स्वप्रतिश्रय-प्रतिनिवर्तनसमये मध्येमार्गं लक्ष्मणः आपृच्छ्यमानवृत्तान्तः सर्वं यथातत्त्वं वदति । अथेत्यादि । आश्रमात् उपावृत्तं—सीता-वचनात् स्वसमीप प्राप्तम् , अन्तरा—मध्येमार्गम् ॥ १ ॥

तमुवाच किमर्थं त्वं आगतोऽपास्य मैथिलीम् ।
***यदा सा तव विश्वासात् वने विरहिता मया ॥ २ ॥**

यदा—यस्मात् तव विश्वासात् सा वने मया विरहिता—'रह त्यागे', त्यक्ता, तस्मात् ॥ २ ॥

दृष्ट्वैवाभ्यागतं त्वां मे मैथिलीं त्यज्य, लक्ष्मण !
शङ्कमानं महत्पापं यत् †सत्यं व्यथितं मनः ॥ ३ ॥

त्वां मैथिलीं त्यक्त्वा अभ्यागतं दृष्ट्वैव—दर्शनमात्रेणैव महत्पापं—अपहारलक्षणं शङ्कमानं मे मनः यत् सत्यं—सत्यपर्यायं ध्रुवं व्यथितं—खिन्नम् ॥ ३ ॥

स्फुरते नयनं सव्यं बाहुश्च हृदयं च मे ।
दृष्ट्वा, लक्ष्मण ! दूरे ‡त्वां सीताविरहितं पथि ॥ ४ ॥

---

* यदा इत्यस्य कालवाचकत्वेऽपि, लोके एतादृशव्यवहारस्य स्वरसत्वात् न विरोधः । † मे मनः व्यथितमिति यत्, तत् सत्यम्—गो. ‡ यदि चात्रागमनं तव अनिवार्यं, तदा तयैव सह खल्वागन्तव्यं, न तु तामेकान्ते परित्यज्येत्याशयः । गतसर्गे १ श्लोकोऽप्यत्र स्मर्तव्यः ॥

[1] दुःखादितं—ज.

ननु मदागममात्रतः कुतः पापशङ्का ? तत्राह—स्फुरत इति । स्फुरतीति यावत् ॥ ४ ॥

एवमुक्तस्तु सौमित्रिः लक्ष्मणः शुभलक्षणः ।
*** भूयो दुःखसमाविष्टः दुःखितं राममब्रवीत् ॥ ५ ॥**

भूयो दुःखसमाविष्ट इति । पूर्वं सीतावचनतो दुःखाक्रान्तः इदानीं रामेण च 'त्वयाऽकृत्यं कृतं' इत्युच्यमानत्वात् भूयो दुःखसमाविष्टत्वम् ॥ ५ ॥

न स्वयं [1]कामकारेण तां त्यक्ताऽहमिहागतः ।
प्रचोदित[2]स्तयैवोग्रैः त्वत्सकाशमिहागतः ॥ ६ ॥

कामकारेण—स्वेच्छया । उग्रैः—दुःश्रवैः । वचोभिरिति शेषः ॥ ६ ॥

[3]आर्येण हि परिक्रुष्टं लक्ष्मणेति सुविस्वरम् ।
परित्राहीति यद्वाक्यं मैथिल्याः तच्छ्रुतिं गतम् ॥ ७ ॥

आर्येणेत्यादि । "आर्येण हि परिक्रुष्टं लक्ष्मणेति सुविस्वरम् । परित्राहीति यद्वाक्यं मैथिल्याः तच्छ्रुतिं गतम्" इति पाङ्क्तः पाठः । लक्ष्मणेति परित्राहीति च सुविस्वरं—सुशब्दं विस्वरं च यद्धि वाक्यं आर्येण—आर्यस्वरसदृशस्वरेण परिक्रुष्टं तत्तु मैथिल्याः श्रुतिं गतम् ॥ ७ ॥

---

* स्वहृदयशुद्धिं अजानन्त्या सीतया परुषकथनात् पूर्वं दुःखितः, इदानीं तादृशकारणमपृष्ट्वैव रामेण गर्हणात् भूयः दुःखसमाविष्टः । स एवायं वेगः 'न स्वयं कामकारेण' इत्याद्यनन्तरश्लोकेऽपि स्फुरति ।

[1] कामचारेण—ङ. [2] स्तयैवाहं—ङ. [3] आर्येणेव पराक्रुष्टं हा सीते लक्ष्मणेति च—ङ.

सा तमार्तस्वरं श्रुत्वा तव स्नेहेन मैथिली ।
गच्छ गच्छेति मामाह रुदन्ती भयविह्वला ॥ ८ ॥
* प्रचोद्यमानेन मया गच्छेति बहुशस्तया ।
प्रत्युक्ता मैथिली वाक्यं इदं †[1] तत्प्रत्ययान्वितम् ॥ ९ ॥

तत्प्रत्ययान्वितं—तस्या अपि प्रत्ययेन—विश्वसनीयत्वेनान्वितं तत्त्वेन योग्यमिदं वक्ष्यमाणं वाक्यं मैथिली प्रत्युक्ता—प्रतिवचनत्वेनोक्ता ॥ ९ ॥

न तत् पश्याम्यहं रक्षः यदस्य भय[2]मावहेत् ।
निर्वृता भव ‡[3]नास्यैतत् केनाप्येवमुदाहृतम् ॥ १० ॥

किं तदित्यतः—न तादित्यादि । एतत्—दुर्वचनम् । स्वात्मनः अन्यत्राणार्थकत्वात् ॥ १० ॥

विगर्हितं च नीचं च कथमार्योऽभिधास्यति ।
§ त्राहीति वचनं, सीते! यः त्रायेत् त्रिदशानपि ॥ ११ ॥
‖ किंनिमित्तं तु केनापि भ्रातुरालम्ब्य मे स्वरम् ।
[4]राक्षसेनेरितं वाक्यं [5]त्राहि त्राहीति, शोभने! ॥ १२ ॥

---

* गच्छेति बहुशः प्रचोद्यमानेनेत्यन्वयः । †त्वत्प्रत्ययान्वितं—त्वयि प्रत्ययः—दुराधर्षत्वदैन्यराहित्यविषयो विश्वासः, तेनान्वितम्—गो. ‡ 'नास्त्येतत्' इति पाठे, एतत्—कातरवचनं रामस्य नास्ति, अन्येन केनापि एवं उदाहृतं, इत्यर्थः । § यः त्रिदशानपि त्रायेत्, स कथं 'सीते त्राहि' इति वचनमभिधास्यति—गो. ‖ किंनिमित्तं—किमपि प्रयोजनमुद्दिश्य केनापि राक्षसेन, मे भ्रातुः स्वरमालम्ब्य—गो.

[1] त्वत्प्रत्यया—ङ. [2] मानयेत्—ङ. [3] नास्त्येतत्—ङ. [4] इदमर्धं 'विस्वरं' इत्याद्यनन्तरं पठनीयं—ज्ञ. [5] त्रासात्—ज्ञ.

विगर्हितं—निन्दितं क्षत्रियस्य नीचं—कुत्सितं च त्राहीतिवचनं यः त्रिदशानपि त्रायेत्, स तु किंनिमित्तं त्राहीति वचनं उक्तविशेषणं अभिधास्यतीत्यन्वयः। यदेवं अतः—'केनापी'त्यादि ॥ १२ ॥

*विस्वरं व्याहृतं वाक्यं, लक्ष्मण! त्राहि मामिति।
न भवत्या व्यथा कार्या कुनारीजनसेविता ॥ १३ ॥
अलं[1] वैक्लव्यमालम्ब्य स्वस्था भव †निरुत्सुका।
वैक्लव्यमालम्ब्य अलं—मास्तु ॥ १४ ॥

न सोऽस्ति त्रिषु लोकेषु पुमान् वै राघवं रणे ॥ १४ ॥
जातो वा जायमानो वा संयुगे यः पराजयेत्।
‡[2]न जय्यो राघवो युद्धे देवैः शक्रपुरोगमैः ॥ १५ ॥
एवमुक्ता तु वैदेही परिमोहितचेतना।
उवाचाश्रूणि मुञ्चन्ती दारुणं मामिदं वचः ॥ १६ ॥
भावो मयि तवात्यर्थं [3]पाप एव निवेशितः।
विनष्टे भ्रातरि भ्रातुं न च त्वं मामवाप्स्यसि ॥ १७ ॥
भावो मयीत्याद्याः उक्तानुवादाः § गतार्थाः ॥ १७ ॥

सङ्केतात् भरतेन त्वं रामं समनुगच्छसि।
क्रोशन्तं हि [4]यथाऽत्यर्थं नैवमभ्यवपद्यसे ॥ १८ ॥

---

* स्वरप्रकारविशेषशोधनेऽपि नायं रामस्वरः इत्यर्थः—गो. अत्र शिरोमण्यादिदृष्ट्या 'राक्षसेनेरितं' इत्यर्धं 'विस्वरं व्याहृतं' इत्येतदनन्तरं पठनीयम्। † निरुत्सुका—मत्प्रास्थापनोद्योगरहिता—गो. निरुत्कण्ठा वा। ‡ पूर्वं एकैकेन अजय्यत्वमुक्तं, संप्रति मिलितैरिति विशेषः—गो. § अर्थानुवादो विवक्षितः।

[1] विक्लवतां गन्तुं—ज. [2] अजय्यो—ङ. अजेयो—ज. [3] पापाचारनिवेशितः—ङ. [4] यदत्यर्थं—ङ.

रिपुः प्रच्छन्नचारी त्वं मदर्थमनुगच्छसि ।
राघवस्यान्तरप्रेप्सुः * तथैनं नाभिपद्यसे ॥ १९ ॥

एवमुक्तो हि वैदेह्या संरब्धो रक्तलोचनः ।
क्रोधात् प्रस्फुरमाणोष्ठः आश्रमादभिनिर्गतः ॥ २० ॥

एवं ब्रुवाणं सौमित्रिं रामः संतापमोहितः ।
अब्रवीत् दुष्कृतं, सौम्य! तां विना यत् त्वमागतः ॥२१॥

दुष्कृतमिति । अकृत्यमित्यर्थः । कृतमिति शेषः ॥ २१ ॥

जानन्नपि समर्थं मां रक्षसां विनिवारणे ।
अनेन क्रोधवाक्येन मैथिल्या [1]निःसृतो भवान् ॥ २२ ॥

कथमेवमित्यतः—जानन्नपीत्यादि ॥ २२ ॥

न हि ते परितुष्यामि † त्यक्त्वा [2] यदसि मैथिलीम् ।
क्रुद्धायाः परुषं श्रुत्वा [3] स्त्रियाश्च त्वमिहागतः ॥ २३ ॥

इहागतोऽसीति योजना ॥ २३ ॥

सर्वथा ‡ [4]त्वपनीतं ते सीतया यत् प्रचोदितः ।
क्रोधस्य वश[5]मापन्नः नाकरोः शासनं मम ॥ २४ ॥

§ असौ हि राक्षसः शेते शरेणाभिहतो मया ।
मृगरूपेण येनाहं आश्रमादपवाहितः ॥ २५ ॥

---

* तथा —तेनैव प्रकारेण, तस्मादेव हेतोरिति यावत् । † अत्रापि ४ श्लोकभावः स्फुरति । ‡ अपनीतं—अपनयः, भावप्रत्ययः । § अपनीतिमेवोपपादयितुं स्वरान्यथाभावं दर्शयति—असावित्यादिश्लोकत्रयेण—गो.

[1] गर्हितो—ङ., निर्गतो—ज. [2] यद्यसि—ङ. [3] विहाय—ङ. [4] विनिन्दन्ते ते, त्वविनीतं ते—ङ. [5] वशमागम्य—ज.

एवं लक्ष्मणवृत्तान्तं श्रुत्वा स्ववृत्तान्तं लक्ष्मणस्याह—असौ हीत्यादि। असाविति धीसन्निहितत्वान्निर्देशः ॥ २५ ॥

विकृष्य चापं [1]परिधाय सायकं
*[2]सलीलबाणेन च ताडितो मया।
मार्गीं तनुं त्यज्य स विकृतस्वरः
बभूव केयूरधरः स राक्षसः ॥ २६ ॥

परिधाय। संधायेति यावत्। सलीलबाणेनेति। नातिविकृष्य मुक्तेनेत्यर्थः ॥ २६ ॥

शराहतेनैव तदार्तया गिरा
स्वरं ममालम्ब्य सुदूर[3]संश्रवम्।
उदाहृतं तद्वचनं सुदारुणं
त्वमागतो येन विहाय मैथिलीम् ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकोनषष्टितमः सर्गः

सुदूरसंश्रवं—सुदूरेऽपि संश्रवः—सुश्रवणं यस्य स तथा, तम्। सार(२७)मानः सर्गः ॥ २७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकोनषष्टितमः सर्गः

---

* यद्यपि 'हतं कथञ्चिन्महता श्रमेण' इति (57–23) रामेणैव पूर्वमुक्तं, अथापि, तत्र तावद्दूरपरिभ्रमणादिजन्यश्रमः, तस्य मृगस्य सजीवग्रहणप्रयत्नप्रयुक्तश्रमश्च विवक्षितः, न तु तस्य वधे श्रम इत्यवगन्तव्यम् ॥

[1] प्रणिधाय—ङ्. [2] स एष बाणेन—ङ्. [3] सुश्रवम्—ज्ञ.

षष्टितमः सर्गः

[शून्याश्रमदर्शनम्]

[1]भृशमाव्रजमानस्य *तस्याधोवामलोचनम् ।
प्रास्फुरच्चास्खलद्रामः वेपथु[2]श्चाप्यजायत ॥ १ ॥

अथ आश्रमं प्राप्य अदृष्ट्वा च सीतां तस्यान्वेषणं सप्रलापम् । भृशमाव्रजमानस्येत्यादि । व्रज गतौ । आगच्छतः इत्यर्थः । भृशं प्रास्फुरत् इत्यन्वयः ॥ १ ॥

उपालक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः ।
अपि क्षेमं नु सीतायाः? इति वै व्याजहार च ॥ २ ॥

त्वरमाणो जगामाथ सीतादर्शनलालसः ।
शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः ॥ ३ ॥

† उद्भ्रमन्निव वेगेन ‡विक्षिपन् रघुनन्दनः ।
[3]तत्र तत्रोटजस्थानं अभिवीक्ष्य समन्ततः ॥ ४ ॥

ददर्श पर्णशालां च रहितां सीतया तदा ।
श्रिया विरहितां ध्वस्तां [4]हेमन्ते पद्मिनीमिव ॥ ५ ॥

---

* अधोवामलोचनं— वामलोचनस्याधः पक्ष्म । 'अधो वामदृशः स्फूर्तौ बहुनिष्टो भवेत् पुमान्' इति लक्षणम् । स्वयमस्खलत्—'प्रयाणकाले स्खलनं करोतीष्टस्य भञ्जनम्'—गो. † श्लोकद्वयमेकान्वयम् ॥ ‡ विक्षिपन्—हस्तादीनितस्ततः क्षिपन्—गो.

[1] व्रजमानस्य तस्याधोवामलोचनमस्फुरत् । प्रास्खलच्चासकृत्पादे वेपथुश्चास्य जायत—ङ. [2] श्चास्य जायते—ज. [3] तत्र तत्र जनस्थानं—ङ. [4] हिमान्ते—ङ.

उद्भ्रमन्निव—उद्वच्छन्निव विशेषेण इतस्ततो भ्रमन्निव च ॥४-५॥

* रुदन्तमिव वृक्षैश्च म्लानपुष्पमृगद्विजम् ।
श्रिया विहीनं विध्वस्तं [1]संत्यक्तवनदेवतम् ॥ ६ ॥

† विप्रकीर्णाजिनकुशं [2]विप्राविद्धबृसीकटम् ।
दृष्ट्वा [3]शून्यं निजस्थानं विललाप [4]पुनः पुनः ॥ ७ ॥

वृक्षैः रुदन्तमिव स्थितं । वृक्षाणां निश्शोभत्वात् तैरपि रुदद्भिरिव स्थितं निजस्थानमित्यन्वयः ॥ ६-७ ॥

हृता मृता वा ‡ नष्टा वा भक्षिता वा भविष्यति ।
निलीनाऽप्यथवा भीरुः अथवा § वनमाश्रिता ॥ ८ ॥

नष्टा—अदर्शनं गता ॥ ८ ॥

गता विचेतुं पुष्पाणि फलान्यपि च वा पुनः ।
अथवा पक्षिनीं याता जलार्थं वा नदीं गता ॥ ९ ॥

---

* श्लोकद्वयमेकान्वयम् । † रावणागमनकालिकमेतत् । 'इयं बृसी' (46-35) इत्यादिश्लोकोऽत्रानुसन्धेयः ॥ ‡ नष्टा—यादृच्छिकमदर्शनं गता । निलीना—विनोदाय व्यवहिता—**गो.** 'पथि वर्तते वा' (57-24) इत्युक्तरीत्या (तत्रत्यटिप्पणी द्रष्टव्या) आश्रमं विहाय प्रस्थिता मार्गभ्रंशादिना अबुद्धिपूर्वकं अदर्शनं प्राप्ता—नष्टा । बुद्धिपूर्वकमेवान्तरिता—निलीना ॥ § निर्जनतया, भीरुः सती गूढं वनं आश्रिता—आगता—**गो.** अत्र मार्गभ्रंशाभावेऽपि, वने मामन्वेष्टुं गता इत्यर्थः । यद्वा उत्तरश्लोकदर्शने—अभीरुः—वनभयमजानन्ती विनोदाय वनं प्रविष्टा वा इत्यर्थः । तादृशस्थितौ कथं विनोद इति तु अनन्तरश्लोकस्यापि समानम् ॥

[1] संत्यक्तं—**ज.** [2] विप्रकीर्ण—**ङ.** [3] शून्योटजस्थानं—**ज.** [4] सुदुःखितः—**ङ.**

यत्नात् मृगयमाणस्तु नाससाद वने प्रियाम् ।
शोकरक्तेक्षणः [1]शोकात् * उन्मत्त इव लक्ष्यते ॥ १० ॥

वृक्षात् वृक्षं प्रधावन् सः गिरेश्चाद्रिं नदान्नदीम् ।
[2]बभूव विलपन् रामः शोकपङ्कार्णवाप्लुतः ॥ ११ ॥

अपि क्वचित् त्वया दृष्टा सा [3]कदम्बप्रिया प्रिया ?
कदम्ब ! यदि जानीषे शंस सीतां शुभाननाम् ॥ १२ ॥

---

* एतत्सर्वं लोकव्यवहारनटन, भगवतश्चित्स्वरूपस्य, लोके भार्या सर्वतो प्रियतमेति बोधयितुम् । अत एव मातापितृवियोगो नैतावच्छोककारणम्-**ति.** इवशब्देन—वस्तुतस्तु न तादृशः श्रीराम इत्यर्थः । अत एव सीतादीन् प्रति विलापादिकं, सीतान्वेषणसमये सीतामुद्दिश्य वृक्षमृगादीन् प्रति प्रश्नादिकं सर्वं श्रीरामेण लोकशिक्षार्थं नटनं कृतमिति प्रदर्शयितुमेव सर्वज्ञेन भगवता श्रीवाल्मीकिना 'उद्भ्रमन्निव' 'उन्मत्त इव' इत्यादौ इवशब्दः प्रयुक्तः । किञ्च बहुविधदुःखप्रलापस्य देहादावात्मबुद्धिपूर्वकत्वात्, तद्बुद्धेरज्ञानमूलकत्वात् स्वकृतलीलाश्रवणद्वारा सर्वलोकानां मुक्तिप्रदानाय। नृपरूपेणावतीर्णस्य सच्चिदानन्दघनविग्रहस्य परमात्मनः श्रीरामस्य मायाधिष्ठातुः परमेश्वरस्य मृगशापादिनाप्यज्ञानगन्धोऽप्यस्तीति वक्तुमशक्यत्वात् एतद्विधं विलापादिकं सर्वं श्रीरामेण लोकशिक्षार्थमेव कृतं वेदितव्यम्-**ती. परन्तु**—एतादृशे संकटे समापतितेऽपि रामः धैर्यमालम्ब्य वर्तेत चेत्, तेन लोकशिक्षणं कृतं भवेत्। तत् परित्यज्य अत्यन्तपामरवत् विलापेन लोकः कथं शिक्षणीयः ? इति चिन्त्यम् । किञ्च रामः सर्वथा परमात्मैव, रावणस्तु तत्त्वं न ज्ञातवान्—इति कथने—रावणेन तथाऽज्ञानेऽपि, तस्मै वरं दत्तवता चतुर्मुखेन वा ज्ञातत्वावश्यं भावेन—मानुषादन्येनावध्यत्ववरस्य तेन दत्तस्य का गतिरित्यपि चिन्त्यम् । 'अनृतं नोक्तपूर्वं मे' इति वदता रामेण 'आत्मानं मानुषं मन्ये' (युद्ध. 120–11) इत्युक्तिर्वा कथम् इत्यपि चिन्त्यम् । अपि चैवं सर्वेषां केवलनटनमात्रत्वे अवतारोऽपि नटनमात्रमेव खलु स्यादिति मूलोच्छेद एव न स्याद्देत्यपि चिन्तनीयम् । अतः उपरितनेषु विषयेषु यथार्थमुत्तरमन्वेषणीयम्, न तु केवलोहापोहाभिः विषयाननुगुणम् । उत्तरत्र 64–56 श्लोककतक्व्याख्याऽपि द्रष्टव्या। अत्र वक्तव्यं सर्वं अन्यत्र विचारयामः ॥

[1] श्रीमान्-**ज.** [2] बभ्राम-**ज.** [3] कदम्बवनप्रिया-**ङ.**

स्निग्धपल्लव[1]संकाशा पीतकौशेय[2]वासिनी ।
शंसस्व [3]यदि वा दृष्टा बिल्व ! बिल्वोपमस्तनी ॥ १३ ॥

अथवार्ज्जुन ! शंस त्वं प्रियां तामर्जुनप्रियाम् ।
जनकस्य सुता [4]भीरुः यदि जीवति वा न वा ? ॥१४॥

अर्जुनः—करवीरः । ' करवीरः करालश्च करवीरी तथार्ज्जुनः ' इति ओषधिनिघण्टुः ॥ १४ ॥

* ककुभः [5]ककुभोरुं तां व्यक्तं जानाति मैथिलीम् ।
[6]यथा पल्लवपुष्पाढ्यः भाति ह्येष वनस्पतिः ॥ १५ ॥

ककुभः—मरुवकः । ककुभस्य बहिस्त्वचोऽपि श्लक्ष्णत्वात् ककुभोरुः—श्लक्ष्णोरुः । एवं पाङ्कः । यथा—अपरोक्षतया अनुभूयमानः इत्यर्थः । एवमग्रेऽपि । अपुष्पः सफलः—वनस्पतिः । व्यक्तं जानातीत्यनुकर्षः ॥ १५ ॥

भ्रमरैरुपगीतश्च यथा द्रुमवरो ह्ययम् ।
एष व्यक्तं विजानाति तिलकः तिलकप्रियाम् ॥ १६ ॥

उपगीतः—उप—समीपे क्रियमाणझोङ्कार इत्यर्थः ॥ १६ ॥

अशोक ! शोकापनुद ! शोकोपहत[7]चेतसम् ।
त्वन्नामानं कुरु क्षिप्रं प्रियासंदर्शनेन माम् ॥ १७ ॥

त्वन्नामानं कुरु—अशोकं मां कुर्वित्यर्थः ॥ १७ ॥

---

* केचित् करभोरुमिति वदन्ति, तत् प्रकृतशैलीविरुद्धम्—गो.

[1] संकाशां—ज. [2] वासिनीम्—ज. [3] यदि सा—ज. [4] तन्वी—ज [5] करभोरुं—ङ. [6] लता—ज. [7] चेतनम्—ज.

यदि, ताल ! त्वया दृष्टा पक्वतालफलस्तनी ।
कथयस्व वरारोहां कारुण्यं यदि ते मयि ॥ १८ ॥

यदि दृष्टा त्वया सीता, [1]जम्बु ! *जम्बुफलोपमाम् ।
प्रियां यदि विजानीषे निःशङ्कः कथयस्व मे ॥ १९ ॥

अहो त्वं [2]कर्णिकाराद्य [3]सुपुष्पैः शोभसे भृशम् ।
कर्णिकार[4]प्रिया साध्वी शंस, दृष्टा प्रिया यदि ॥ २० ॥

†चूतनीपमहासालान् पनसान् कुरवान् धवान् ।
दाडिमानसनान् गत्वा दृष्ट्वा रामो महायशाः ॥ २१ ॥

[5]मल्लिकामाधवीश्चैव चम्पकान् केतकीस्तथा ।
[6]पृच्छन् रामो वने भ्रान्तः ‡उन्मत्त इव लक्ष्यते ॥ २२ ॥

§अथवा मृगशाबाक्षीं, मृग ! जानासि मैथिलीम् ?
मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत् ॥ २३ ॥

मृगीभिः सहिता भवेत् इत्यादौ संभावनायां लिङ् । एवं तत्र तत्र संभावनाबीजं तत्तत् किञ्चिद्धर्मसंबन्धः । मृगविप्रेक्षणीत्वमत्र ॥

---

*स्निग्धताऽऽकारेण जम्बूफलौपम्यम्—गो. प्रेमाज्ञानसूचकपदेषु जम्बूफलवाचकमपि कैश्चित् ग्रामीणैः देशभाषात्मकं पदं प्रयुज्यत इत्यध्यवधेयम् ॥ †श्लोकद्वयमेकान्वयम्—गो. ‡उन्मत्त इव—वस्तुतः नोन्मत्त इत्यर्थः—ति. परन्तु लोकेऽप्येतादृशस्थले 'किमयं उन्मत्तवत् प्रलपति' इति स्वरसः प्रयोगो दृश्यत इत्यवधेयमेतत् । §इति वृक्षान् पृष्ट्वा मृगान् पृच्छति—अथेति—मृगवत् विविधं प्रेक्षत इति—मृगविप्रेक्षणी—गो. मृगशाबाक्षीमित्यनेन अवयवसाम्यं, मृगविप्रेक्षणीत्यनेन इन्द्रियव्यापारसाम्यञ्चोक्यत इति भावः ॥

[1] जाम्बूनदसमप्रभा—ज. [2] कर्णिकाराङ्ग—ङ. [3] पुष्पितः—ज. [4] प्रियां साध्वीं—ज. [5] बकुलानथ पुन्नागान् चन्दनान् केतकांस्तथा—ज. [6] गच्छन्—ङ.

गज! सा *गजनासोरूः यदि दृष्टा त्वया भवेत् ।
तां मन्ये विदितां तुभ्यं आख्याहि, वरवारण! ॥ २४ ॥

शार्दूल! यदि सा दृष्टा प्रिया चन्द्रनिभानना ।
मैथिली मम विस्रब्धं कथयस्व न ते भयम् ॥ २५ ॥

शार्दूले बलगत्यादिकिञ्चिद्धर्मसंबन्धः । न ते भयमिति । तथा कथनेऽपि प्रीतात् मत्तः तव न भयमित्यर्थः ॥ २५ ॥

†किं धावसि, प्रिये! दूरं दृष्टाऽसि, कमलेक्षणे!
वृक्षैराच्छाद्य चात्मानं किं मां न प्रतिभाषसे? ॥ २६ ॥

तिष्ठ तिष्ठ वरारोहे! न तेऽस्ति करुणा मयि ।
‡नात्यर्थं हास्यशीलाऽसि किमर्थं मामुपेक्षसे? ॥ २७ ॥

अत्यर्थं हासशीला—परिहासशीला ॥ २७ ॥

पीतकौशेयकेनासि सूचिता, वरवर्णिनि!
धावन्त्यपि मया दृष्टा तिष्ठ, यद्यस्ति सौहृदम् ॥ २८ ॥

कौशेयकेन सूचितासीति । मोहात् तत्प्रतिभासः ॥ २८ ॥

§नैव सा नूनमथवा[1]ऽहिंसिता चारु[2]हासिनी ।
कृच्छ्रं प्राप्तं न मां नूनं यथोपेक्षितुमर्हति ॥ २९ ॥

---

*गजनासः—गजकरः । †मोहपारवश्यात् सीताया दर्शनं अकाण्ड एव । ‡'नात्यर्थं हास्यशीलासि' इति तस्याः स्वभावानुवादः । §अथवा साऽत्र नैव विद्यते, किन्तु हिंसिता । अत्र हेतुमाह—कृच्छ्रमिति—गो. एतादृगवस्थमपि मां सा यतो नोपयाति, अतः सा अत्र नास्ति किं तु हिंसिता इति किञ्चिन्निवृत्तमोहस्य उक्तिः । कतकदृष्ट्या—नैव सा नूनम् । अथवा सती अपि मदवस्थया न पीडिता, एतादृशं मां दृष्ट्वाऽपि तस्या मनः न सानुकम्पं जातमिति भावः ॥

[1] हिंसिता—ङ, ञ. [2] वर्णिनी-ङ.

नैव सेत्यादि । अहिंसितेति पदम् । चारुहासिनी सा अथवा नूनं अहिंसिता न हिंसितैव । अतः यथा—एवंप्रकारेण कृच्छ्रप्राप्तं मां नूनं उपेक्षितुं नार्हति ॥ २९ ॥

*व्यक्तं सा भक्षिता बाला राक्षसैः पिशिताशनैः ।
[1]विभज्याङ्गानि सर्वाणि मया विरहिता प्रिया ॥ ३० ॥

† उक्त एवार्थः स्पष्टीक्रियते—व्यक्तमित्यादि ॥ ३० ॥

नूनं तत् शुभदन्तोष्ठं सुनासं [2]चारुकुण्डलम् ।
पूर्णचन्द्र[3]मिव ग्रस्तं मुखं निष्प्रभतां गतम् ॥ ३१ ॥

निष्प्रभतां गतं इति । मारणादिति शेषः ॥ ३१ ॥

सा हि चम्पकवर्णाभा ग्रीवा ग्रैवेयशोभिता ।
कोमला विलपन्त्यास्तु कान्ताया भक्षिता [4]शुभा ॥ ३२ ॥

उच्यमानविशेषणा सा हि ग्रीवा भक्षितेत्यन्वयः ॥ ३२ ॥

नूनं विक्षिप्यमाणौ तौ बाहू पल्लवकोमलौ ।
भक्षितौ वेपमानाग्रौ सहस्ताभरणाङ्गदौ ॥ ३३ ॥

मया विरहिता बाला रक्षसां भक्षणाय वै ।
‡[5]सार्थेनेव [6]परित्यक्ता भक्षिता बहुबान्धवा ॥ ३४ ॥

---

* हिंसितेत्यस्यैव विवरणं—व्यक्तमित्यादि ॥ † उक्त एवार्थः—नैव सा नूनं इत्यनेनोक्तः अर्थः ॥ ‡ सार्थेन—पथिकसमुदायेन—गो. वने पथिकसमुदायेन परित्यक्ता या काचित् यथा दुष्टमृगादिभिः भक्षिताभ वेत्, तथा बहुबान्धवाऽपि मया विरहिता रक्षसां भक्षणाय परित्यक्ता ॥

[1] विभिन्द्याङ्गानि-ङ. [2] शुभ-ज. [3] निभं-ज. [4] बलात्-ङ.
[5] सा वनेऽस्मिन्-ङ. [6] परिभ्रष्टा-ङ.

हा लक्ष्मण! महाबाहो! पश्यसि त्वं प्रियां क्वचित्?
हा प्रिये! क्व गता? भद्रे! हा सीतेति पुनः पुनः ॥३५॥

इत्येवं विलपन् रामः [1]परिधावन् वनाद्वनम्।
क्वचिदुद्भ्रमते [2]वेगात् क्वचिद्विभ्रमते बलात् ॥ ३६ ॥
*उद्भ्रमविभ्रमौ प्रागुक्तार्थौ ॥ ३६ ॥

†क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः।
‡स वनानि नदीः शैलान् गिरिप्रस्रवणानि च।
काननानि च वेगेन [3]भ्रमत्यपरिसंस्थितः ॥ ३७ ॥
अपरिसंस्थितः—अप्रतिष्ठितः भ्रमति स्म ॥ ३७ ॥

तथा स गत्वा विपुलं महद्वनं
परीत्य सर्वं त्वथ§ मैथिलीं प्रति।
[4]अनिष्ठिताशः स चकार मार्गणे
पुनः प्रियायाः परमं परिश्रमम् ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षष्टितमः सर्गः

अनिष्ठिताशः—अनिवृत्ताशः। मार्गणे—अन्वेषणे। पुनः पुनः परिश्रमं चकार। अदुर्ग(३८ १/२)मानः सर्गः ॥ ३८ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे षष्टितमः सर्गः

---

*चतुर्थश्लोकटिप्पणी द्रष्टव्येत्यर्थः। †मत्त इवाभाति, मत्तवत् परिभ्रमति चेत्यर्थः—गो. ‡सुगमानि वनानि दुर्गमाणि—काननानि—गो. §मैथिलीं प्रति—मैथिलीलाभं प्रति—गो.

[1] पर्यधावत्—ङ. [2] योगात्—ज. [3] भ्रमन् विपरि—ङ. [4] अधिष्ठिताशः—ङ.

एकषष्टितमः सर्गः

[सीताऽन्वेषणम्]

*दृष्ट्वाऽऽश्रमपदं शून्यं रामो दशरथात्मजः ।
रहितां पर्णशालां च विध्वस्तान्यासनानि च ॥ १ ॥
अदृष्ट्वा तत्र वैदेहीं संनिरीक्ष्य च सर्वशः ।
उवाच † रामः प्राकुश्य प्रगृह्य रुचिरौ भुजौ ॥ २ ॥

पुनश्चान्वेषणप्रलापौ 'अर्धो वा एष आत्मनः यत्पत्नी' इति श्रुतेः सर्वाकारसम्पत्तिमत्स्त्रीवियोगे गतकल्पात्मार्धत्वात् यथानिमित्तप्राप्ततमसा आवृतसत्त्वरजःशक्तित्वाच्च स्वभावप्राप्तौ तौ । न हि केवलसत्त्वमात्रात् सत्त्वरजोमात्राद्वा क्वचिदपि देहः कश्चिदपि भवति । तथाहि गीयते—

"न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ॥"

इति । दृष्ट्वाऽऽश्रमपदमित्यादि । प्रगृह्य-उत्क्षिप्य ॥ १-२ ॥

क्व नु, लक्ष्मण ! वैदेही [1]कं वा देशमितो गता ?
केनाहृता ‡ वा ? सौमित्रे ! भक्षिता केन वा प्रिया ?
वृक्षेण[2]च्छाद्य यदि मां, सीते ! हसितुमिच्छसि ।
अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥ ४ ॥

वृक्षेणेत्यादिः प्रलापः ॥ ४ ॥

---

* दृष्ट्वा अत्युद्विग्नोऽभवदिति शेषः—रा. श्लोकद्वयमेकान्वयम्—गो. † पुनरपि रामग्रहणं क्रियाभेदात्—गो. सीतारहितां पर्णशालां, अत एव मृगपक्ष्यादिभिरपि शून्यं आश्रमपदं दृष्ट्वा, तत्र सर्वशः वैदेहीं सन्निरीक्ष्य—अन्विष्य, तां अदृष्ट्वा उवाचेत्यन्वयः—गो. ‡ आहृता—अपहृता ।

[1] क्व वा दिश—ङ. [2] वार्य—ज.

यैः सह क्रीडसे, सीते ! विश्वस्तैः मृगपोतकैः ।
एते हीनाः त्वया सौम्ये !* ध्यायन्त्यास्राविलेक्षणाः ॥५॥

ध्यायन्तीति । त्वामिति शेषः ॥ ५ ॥

सीतया रहितोऽहं वै न हि जीवामि, लक्ष्मण !
[1]मृतं शोकेन महता सीताहरणजेन माम् ॥ ६ ॥
परलोके महाराजः नूनं द्रक्ष्यति मे पिता ।
† कथं प्रतिज्ञां संश्रुत्य यया त्वमसि [2]योजितः ॥ ७ ॥
अपूरयित्वा तं कालं मत्सकाश[3]मिहागतः ।

परलोकेऽपि मम धिक्कारः एव मरणेऽपि प्राप्नोतीत्याह—कथं प्रतिज्ञामिति । अभियोजितः । नियुक्त इत्यर्थः ॥ ७ ॥

‡ कामवृत्तमनार्यं मां मृषावादिनमेव च ॥ ८ ॥
धिक् त्वामिति परे लोके व्यक्तं वक्ष्यति मे पिता ।
विवशं शोकसंतप्तं दीनं भग्नमनोरथम् ॥ ९ ॥
मामिहोत्सृज्य करुणं § कीर्तिर्नरमिवानृजुम् ।
क्व गच्छसि ? वरारोहे ! मां नोत्सृज, सुमध्यमे ! ॥१०॥
त्वया विरहितश्चाहं [4]मोक्ष्ये जीवितमात्मनः ।
मामिहोत्सृज्य क्व गच्छसि इत्यन्वयः ॥ ८-१० ॥

---

* किमपि ध्यायन्ति—गो. चिन्तामग्ना इति यावत् । † कथं मत्सकाशं इह आगत इत्यन्वयः । ‡ कामवृत्तं—स्वैरम् । § अनृजुं नरं कीर्तिरिव करुणं मामुत्सृज्य क्व गच्छसि ।

[1] वृतं—ज्ञ. [2] चोदितः—ङ. [3] मितो गतः—ङ. [4] त्यक्ष्ये—ज्ञ.

[1]इतीव विलपन् रामः सीतादर्शनलालसः ॥ ११ ॥
न ददर्श सुदुःखार्तः राघवो जनकात्मजाम् ।
अनासादयमानं तं सीतां [2] दशरथात्मजम् ॥ १२ ॥
पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम् ।
लक्ष्मणो राममत्यर्थं उवाच हितकाम्यया ॥ १३ ॥
मा [3]विषादं [4]महाबाहो ! कुरु यत्नं मया सह ।

कुरु यत्नमिति । अन्वेषण इति शेषः ॥ १३ ॥

इदं च हि वनं, शूर ! बहु कन्दरशोभितम् ॥ १४ ॥
प्रियकाननसंचारा *वनोन्मत्ता च मैथिली ।
सा वनं वा प्रविष्टा स्यात्, नलिनीं वा सुपुष्पिताम् ॥
सरितं वाऽपि संप्राप्ता मीनवञ्जुलसेविताम् ।
[5]स्नातुकामा निलीना स्यात् असकामा वने क्वचित् ॥

प्रियः काननसंचारः यस्याः सा तथा । वनोन्मत्ता—वनसंचारवशादुन्मादवती । अत एव सा वनादिकं प्राणापायनिमित्तभूतं प्रविष्टा स्यात् । संभावने लिङ् । वञ्जुलः—निचुलः தீர்வஞ்சி ॥

[6]वित्रासयितुकामा वा लीना स्यात् कानने क्वचित् ।
†जिज्ञासमाना वैदेही त्वां मां च, पुरुषर्षभ ! ॥ १७ ॥
तस्या ह्यन्वेषणे, श्रीमन् ! क्षिप्रमेव यतावहे ।

---

*वनं—जलं, [6]जीवनं भुवनं वनम्' इत्यमरः; वनेन—वनदर्शनेन उन्मादवती—अतिप्रियसलिलेत्यर्थः । यथाक्रमं तत्कार्यमाह – सेति—गो. †जिज्ञासमाना—स्वस्मिन् आवयोः प्रीतिं परीक्षितुकामा इति वा ।

[1] इत्येवं—ङ. [2] शोकपरायणम्—ज. [3] विषीद—ङ. [4] महाबुद्धे—ज.
[5] इदं कुत्रचिदधिकं—ङ, ज. [6] इदं कुत्रचिन्न—ज.

त्वां मां च जिज्ञासमानेति । युष्यदस्मदन्वेषणादिसामर्थ्यमित्यर्थः । यतावहे—यत्नं कुर्वः ॥ १७ ॥

वनं सर्वं विचिनुवः यत्र सा जनकात्मजा ॥ १८ ॥
मन्यसे यदि, काकुत्स्थ ! मा स्म शोके मनः कृथाः ।
एवमुक्तस्तु * सौहार्दात् लक्ष्मणेन समाहितः ॥ १९ ॥
सह सौमित्रिणा रामः विचेतुमुपचक्रमे ।

विचेतुं—अन्वेष्टुम् ॥ १९ ॥

तौ वनानि गिरींश्चैव सरितश्च सरांसि च ॥ २० ॥
निखिलेन [1] विचिन्वानौ सीतां दशरथात्मजौ † ।
तस्य शैलस्य सानूनि गुहाश्च शिखराणि च ॥ २१ ॥
निखिलेन [1] विचिन्वानौ नैव तामभिजग्मतुः ।
विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत् ॥ २२ ॥
नेह पश्यामि, सौमित्रे ! वैदेहीं पर्वते शुभाम् ।
‡ ततो दुःखाभिसंतप्तः लक्ष्मणो वाक्यमब्रवीत् ॥ २३ ॥
विचरन् दण्डकारण्यं भ्रातरं दीप्ततेजसम् ।

---

* सौहार्दात् एवमुक्तः, अत एव समाहितः । † 'नैव तामभिजग्मतुः' इत्युत्तरश्लोकादाकर्षः । ‡ 'प्रियकाननसञ्चारा' 'वनं सर्वं विचिनुमः' इत्यादिना सीतायाः समीप एव यत्र क्वचित् सद्भावः संभावितोऽभूत् । 'विचरन् दण्डकारण्यं' इत्यनेन सा संभावना गलिता । अत एव 'नेह पश्यामि वैदेहीं' इति रामवचनमङ्गीकर्तव्यमापतितं । तत एव दुःखाभिसन्तप्तः 'नेहास्ति मैथिली' इतीममेवार्थं—'प्राप्स्यसि त्वं मैथिलीं' इति पर्यायेण अंगीचकार इति भावः । 'प्राप्स्यसि त्वं' इत्यनेन हि तदानीं निराशत्वं प्रकटीकृतम् । अतः 'दुःखाभिसन्तप्तः' इत्युक्तिः युक्ता । अत्र सर्गान्तिमश्लोकः द्रष्टव्यः ।

[1] विचिन्वन्तौ—ज.

'नेह पश्यामि सौमित्रे वैदेहीं ! पर्वते शुभां' इत्युक्तोऽपि पुनर्विलापपरिहाराय लक्ष्मणो ब्रूते—ततो दुःखाभिसंतप्तः इत्यादि । दीप्ततेजसं भ्रातरं लक्ष्मणो वाक्यं अब्रवीत् ॥ २३ ॥

प्राप्स्यसि त्वं, महाप्राज्ञ ! मैथिलीं जनकात्मजाम् ॥२४॥
यथा विष्णुः महाबाहुः बलिं बद्ध्वा महीमिमाम् ।

किमिति ? दण्डकारण्यं विचरन् त्वं सीतां प्राप्स्यसीति । तत्र दृष्टान्तः—यथा विष्णुरित्यादि ॥ २४ ॥

एवमुक्तस्तु [1] सौहार्दात् लक्ष्मणेन स राघवः ॥ २५ ॥
उवाच दीनया वाचा दुःखाभिहतचेतनः ।
वनं सर्वं सुविचितं पद्मिन्यः फुल्लपङ्कजाः ॥ २६ ॥
गिरिश्चायं, महाप्राज्ञ ! बहुकन्दरनिर्झरः ।
नेह पश्यामि वैदेहीं प्राणेभ्योऽपि गरीयसीम् ॥ २७ ॥

एवं लक्ष्मणास्तु कृतं, करुणेन किमित्याह—वनं सर्वमित्यादि । अत्र 'नेह पश्यामी'त्यादिमार्षश्लोकत्रयं प्राचीनपाठे पाठ्यम् । तत्तु कैश्चित् पुनरुक्तदुर्बुद्ध्या त्यक्तम् ॥ २७ ॥

एवं स विलपन् रामः सीताहरणकर्शितः ।
दीनः शोकसमाविष्टः मुहूर्तं विह्वलोऽभवत् ॥ २८ ॥

विह्वलः—परवशः ॥ २८ ॥

---

[1] वीरेण—ज्ञ.

*[1] संतप्तो ह्यवसन्नाङ्गो गतबुद्धिः विचेतनः ।
[2] विषसादातुरो दीनः [3] निःश्वस्याशीतमायतम् ॥ २९ ॥

अशीतं—उष्णम् । आयतं—दीर्घम् ॥ २९ ॥

बहुलं स तु निःश्वस्य रामो राजीवलोचनः ।
हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥ ३० ॥
तं ततः सान्त्वयामास लक्ष्मणः प्रिय[4]बान्धवः ।
बहुप्रकारं [5] धर्मज्ञः [6] प्रश्रितं प्रश्रिताञ्जलिः ॥ ३१ ॥

प्रश्रितं—विनयोपेतं यथा तथा बद्धाञ्जलिः—प्रश्रिताञ्जलिः ॥

अनादृत्य तु तद्वाक्यं † लक्ष्मणोष्ठपुटाच्च्युतम् ।
अपश्यंस्तां प्रियां सीतां प्राक्रोशत् स पुनः पुनः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकषष्टितमः सर्गः

रङ्ग(३२)मानः सर्गः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकषष्टितमः सर्गः

---

* अवसन्नाङ्गः—कृशाङ्गः । गतबुद्धिः—निरसंज्ञः । विचेतनः—निश्चेष्टः—गो.

† यतः लक्ष्मणोष्ठपुटात् च्युतं, न तु हृदयात्, अतः तद्वाक्यं अनादृत्य । २३ श्लोकटिप्पणी द्रष्टव्या ।

[1] स विह्वलितसर्वाङ्गः—ज. [2] निषसादा—ङ. [3] निश्वसंश्च मुहुर्मुहुः—ङ. [4] बान्धवम्—ज. [5] शोकार्तः—ङ. [6] प्रश्रितः—ङ, ज.

द्विषष्टितमः सर्गः

[रामविलापः]

सीतामपश्यन् *धर्मात्मा [1]कामोपहतचेतनः।
विललाप महाबाहुः रामः कमललोचनः॥ १॥

"यो हि बीजफलं भुङ्क्ते संसारी सकलोऽपि च"(?) अतः पुनश्चविलापः—सीतामपश्यन्नित्यादि॥ १॥

†पश्यन्निव स तां सीतां अपश्यन् मदनार्दितः।
उवाच राघवो वाक्यं [2]विलापाश्रयदुर्वचम्॥ २॥

पश्यन्निवोवाचेति। मोहजतया प्रतिभासवशादिति शेषः। २॥

त्वमशोकस्य शाखाभिः पुष्पप्रियतया, प्रिये।
‡आवृणोषि शरीरं ते मम शोकविवर्धनी॥ ३॥
कदली[3]काण्डसदृशौ कदल्या संवृतावुभौ।
ऊरू पश्यामि ते, देवि! नासि शक्ता निगूहितुम्॥ ४॥
कर्णिकारवनं, भद्रे! हसन्ती, देवि! सेवसे।
अलं ते परिहासेन मम बाधावहेन वै॥ ५॥
[4]परिहासेन किं, सीते! परिश्रान्तस्य मे, प्रिये!
अयं स परिहासोऽपि साधु, देवि! न रोचते॥ ६॥

---

*धर्मात्मा, कामोपहतचेतन इत्याभ्यां धर्माविरुद्धकामस्यानिन्द्यत्वमुक्तं—गो.

†पुरोवर्तित्वाभावेन सीतामपश्यन्नपि मदनार्दितः—मदनपरवशः तां पश्यन्निव संबोध्योवाच। तद्वाक्यं विलापाश्रयत्वेन दुर्वचं, गद्गदकण्ठत्वादिति भावः। यद्वा विलाप-सम्बन्धात् अस्माभिः वक्तुमशक्यम्, अनुवदितुमशक्यमित्यर्थः—गो. ‡आवृणोषि—किं तेनावरणेन? मया दृष्टत्वादिति भावः—गो.

[1] शोको—ज्ञ. [2] विरहा—ङ. [3] स्कन्ध—ङ. [4] अयं श्लोकः कुण्डलितः—ज्ञ.

विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते ।
अवगच्छामि ते शीलं परिहासप्रियं, प्रिये ! ॥ ७ ॥
आगच्छ त्वं, विशालाक्षि ! शून्योऽयमुटजस्तव ।
* सुव्यक्तं राक्षसैः सीता भक्षिता वा हृतापि वा ॥ ८ ॥
न हि सा विलपन्तं मां उपसंप्रैति, लक्ष्मण ।

विवेकपूर्ववचनं सुव्यक्तं राक्षसैरित्यादि । उपसंप्रैति—उपसंप्राप्नोति । उपेक्षतेऽपि वे(उपेक्षितेऽपि वे)त्यर्थः ॥ ८ ॥

एतानि मृगयूथानि साश्रुनेत्राणि, लक्ष्मण ॥ ९ ॥
शंसन्तीव हि वैदेहीं भक्षितां रजनीचरैः ।
हा ममार्ये ! क्व यातोऽसि ? हा साध्वि ! वरवर्णिनि ! ॥ १० ॥
† हा सकामा त्वया, देवि ! कैकेयी सा भविष्यति ।
सीतया सह निर्यातः विना सीतामुपागतः ॥ ११ ॥
कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं [1]पुनः ? ।
निर्वीर्य इति लोको मां निर्दयश्चेति वक्ष्यति ॥ १२ ॥
‡ कातरत्वं प्रकाशं हि सीतापनयनेन मे ।

सकामा त्वयेति, भक्षितेति शेषः । कातरत्वं—अधीरत्वं, सीतापनयनेन—सीताविनाशनेनेत्यर्थः ॥ १२ ॥

---

* लक्ष्मणं प्रत्याह—सुव्यक्तमित्यादि । † त्वां विना यतोऽहं म्रियेय—अतः कैकेयी सकामा भविष्यतीत्यर्थः । कथञ्चित् जीवनेऽपि कथं अयोध्यां गच्छेयं इत्याह—सीतयेत्यादि । ‡ कातरत्वं—अधीरत्वं, जीवितधारणाशक्तिरिति भावः—गो. वस्तुतस्तु—भार्यायामपहृतायामपि, केवलस्वरक्षणदृष्ट्या पलाय्यागतं मां जानीयुरिति भावः ।

[1] मम—ज.

निवृत्तवनवासश्च जनकं मिथिलाधिपम् ॥ १३ ॥
कुशलं परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुम् ।
विदेहराजो नूनं मां दृष्ट्वा विरहितं [1]तया ॥ १४ ॥
[2]सुतास्नेहेन संतप्तः मोहस्य वशमेष्यति ।

तया—सीतया विरहितं—वियुक्तम् ॥ १४ ॥

*[3] तात एव कृतार्थः स तत्रैव वसताद्धृतः ॥ १५ ॥

"तात एव कृतार्थः सः तत्रैव वसताद्धृतः" इति प्राचीनं पाङ्क्तमेकमर्धं दृश्यते। इदं पौराणिकाः दुर्योजतः त्यजन्ति, न लिखन्ति, कुण्डलयन्ति वा। तातो दशरथ एव कृतार्थः सीता-विरहितं आगतं मां दृष्ट्वा यतः स्वर्गगतः तत्त्वतो दुःखं न प्राप्स्यतीति यत् तस्मात् स तातः तत्रैव स्वर्ग एव वसतात्। अधीष्टे लोट्। अथ लडर्थे लोटं व्यत्ययादङ्गीकृत्य तु योजनं—तातः तत्रैव स्वर्ग एव वसतीति यत् अतः स एव कृतार्थः, न तु जीवन्ती कौसल्येत्यर्थः॥

अथवा न गमिष्यामि पुरीं भरतपालिताम् ।
स्वर्गोऽपि सीतया हीनः शून्य एव मतो मम ॥ १६ ॥

उक्तदोषपरिहाराय पक्षान्तरमादत्ते—अथवेत्यादि॥ १६ ॥

[4]मामिहोत्सृज्य हि वने गच्छायोध्यां पुरीं शुभाम् ।
न त्वहं तां विना सीतां जीवेयं हि कथंचन ॥ १७ ॥

---

* 'तात एव कृतार्थः स तत्रैव वसताद्धृतः' इत्यर्धमधिकं कृतकपाठे। तातो दशरथ एव कृतार्थः वसतात्, लोट् व्यत्ययेन। यतः स तत्रैव—स्वर्ग एव वसति, न तु जीवन्ती कौसल्येत्यर्थः—ति.

[1] त्वया—ङ. [2] सुताविनाश—ज. [3] इदमर्धं कुण्डलितं—ङ. [4] ता—ङ.

गाढमाश्लिष्य भरतो वाच्यो मद्वचनात् त्वया ।
अनुज्ञातोऽसि रामेण पालयेति वसुन्धराम् ॥ १८ ॥
अम्बा च मम कैकेयी सुमित्रा च त्वया, विभो ।
कौसल्या च यथान्यायमभिवाद्या ममाज्ञया ॥ १९ ॥
रक्षणीया प्रयत्नेन भवता [1]सोक्तकारिणा ।

सेति। कौसल्येति यावत् ॥ १९ ॥

सीतायाश्च विनाशोऽयं * मम चामित्र[2]कर्शन !
विस्तरेण जनन्या मे विनिवेद्यस्त्वया भवेत् ॥ २० ॥

इति विलपति राघवे सुदीने
वनमुपगम्य † तया विना सुकेश्या ।
भयविकलमुखस्तु लक्ष्मणोऽपि
व्यथितमना भृशमातुरो बभूव ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्विषष्टितमः सर्गः

अकर(२१ १/२)मानः सर्गः ॥ २१ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्विषष्टितमः सर्गः

---

* मम च विनाशः—इत्यन्वयः। 'न त्वहं तां विना सीतां जीवेयं' इत्यनुपदं युक्तम्। † तया विनाकृतं वनमुपगम्येत्यर्थः—गो. वनमुपगम्य, तया विना विलपतीत्यन्वयः स्वरसः।

[1] युक्त—ङ, सूक्त—ज. [2] सूदन—ज.

त्रिषष्टितमः सर्गः

[शोकानुचिन्तनम्]

स राजपुत्रः प्रियया विहीनः
*[1] शोकेन मोहेन च पीड्यमानः।
विषादयन् भ्रातरमार्तरूपः
भूयो विषादं प्रविवेश तीव्रम् ॥ १ ॥

अथ रामस्य दुःखप्रसङ्गात् सकलस्वकदुःखानुस्मृतिः। स राजपुत्र इत्यादि। शोकः—इष्टवियोगजः चित्तपरितापः, मोहः—कामजचित्तवैवश्यम् ॥ १ ॥

स लक्ष्मणं शोकवशाभिपन्नं
शोके निमग्नो [2] विपुलेऽति रामः।
उवाच वाक्यं व्यसनानुरूपं
उष्णं विनिःश्वस्य रुदन् [3] सशोकम् ॥ २ ॥

अति रामः इति। अतिशोके इत्यन्वयः। व्यसनानुरूपमिति। लोकवद्दुःखप्रसङ्गोचितमित्यर्थः ॥ २ ॥

न मद्विधो दुष्कृत[4]कर्मकारी
मन्ये द्वितीयोऽस्ति वसुन्धरायाम्।
† [5]शोकानुशोको हि परम्परायाः
मामेति भिन्दन् हृदयं मनश्च ॥ ३ ॥

---

* ('कामेन शोकेन' इति पाठः) कामेन—प्रियास्मरणजेन, शोकेन—प्रियाविरहजन्येन—गो. † परंपरायाः—परंपरारूपेणागतः शोकेन शोकः (पा.) शोकाच्छोकः हृदयं मनश्च भिन्दन् मामेति। मनोऽधिष्ठानं हृदयम्—गो. परंपरायाः—परंपरया—रा.

[1] कामेन शोकेन च—ङ. [2] विपुले तु—ङ, ज. [3] सशोकः—ङ. [4] कामकारी—ङ. [5] शोकेन शोको—ङ.

एकं शोकमनु—अनुक्षणं प्रवृत्तः शोकानुशोकः। परम्परायाः—अविच्छेदेन प्राप्तेर्हेतोः। हृदयं—तदधिष्ठानमात्मानं मनश्च भिन्दन् एति ॥ ३ ॥

पूर्वं मया नूनमभीप्सितानि *
पापानि [1] कर्माण्यसकृत् कृतानि।
तत्रायमद्यापतितो विपाकः
† दुःखेन दुःखं यदहं विशामि ॥ ४ ॥

उक्त एव प्रकाश्यते—पूर्वमित्यादि। अभीप्सितानि चिकीर्षा-विषयं प्राप्तानि इत्यर्थः। विपाकः—परिणामः ॥ ४ ॥

राज्यप्रणाशः स्वजनैर्वियोगः
पितुर्विनाशो जननीवियोगः।
सर्वाणि मे, लक्ष्मण! शोकवेगं
आपूरयन्ति प्रविचिन्तितानि ॥ ५ ॥

अथ शोकानुशोकः प्रदर्श्यते—राज्येत्यादि। शोकवेगमा-पूरयन्तीति। इदानीन्तनमिति शेषः ॥ ५ ॥

सर्वं तु दुःखं मम लक्ष्मणेदं
‡ शान्तं शरीरे वनमेत्य [2] शून्यम्।
सीतावियोगात् पुनरप्युदीर्णं
काष्ठैरिवाग्निः सहसा प्रदीप्तः ॥ ६ ॥

शरीरे शान्तमिति। शरीरक्लेशे विस्मृतमित्यर्थः ॥ ६ ॥

---

* बुद्धिपूर्वकमिति भावः। † दुःखेन दुःखं—दुःखपरंपरामित्यर्थः—ति.
‡ वनं एत्य—प्राप्य शरीरे क्लेशमनुभूयापि सीतासन्निधानात् सर्वं शान्तम्। अद्य सीता-वियोगात् पुनरुदीर्णं—वृद्धिं प्राप्तम्—ति. शून्यं—निर्जनं वनमेत्य स्थितस्य मम शरीरे शान्तं—शरीरक्लेशेन विस्मृतम्—गो.

[1] सर्वा—ङ. [2] क्लेशम्—ज.

सा नूनमार्या मम राक्षसेन
[1]बलाद्धृता खं समुपेत्य भीरुः ।
*[2]अपस्वरं [3]सस्वरविप्रलापा
भयेन विक्रन्दितवत्यभीक्ष्णम् ॥ ७ ॥

खं समुपेत्य नूनं विक्रन्दितवतीत्यन्वयः ॥ ७ ॥

तौ लोहितस्य प्रियदर्शनस्य
सदोचितौ उत्तमचन्दनस्य ।
वृत्तौ स्तनौ शोणितपङ्कदिग्धौ
नूनं प्रियाया मम †[4]नाभिपातः ॥ ८ ॥

लोहितस्य — कुङ्कुमादिना रक्तवर्णस्य । स्तनौ शोणितपङ्कदिग्धौ, भक्षणाय राक्षसैः विशसनादिति शेषः । मम नाभिपातः — मम देहाभिपातो न जायते इत्यर्थः ॥ ८ ॥

तच्छलक्ष्णसुव्यक्तमृदुप्रलापं ‡
तस्या मुखं कुञ्चितकेशभारम् ।
रक्षोवशं नूनमुपागतायाः
न भ्राजते राहुमुखे यथेन्दुः ॥ ९ ॥

---

* अप्यस्वरं — अपगतनिजस्वरं यथा तथा — गो. †नाभिभातः (पा.) — न प्रकाशते । नाभिपात इति पाठान्तरे — एवमपि मम देहपातो न जायत इत्यर्थः — गो. ‡ प्रलापः — संलापः ।

[1] ह्यभ्याहृता दुःखमुपेत्य — ङ. [2] अप्यस्वरं — ज. [3] सुस्वर — ङ.
[4] नाभिभातः — ङ.

तं हारपाशस्य सदोचितायाः
*ग्रीवां प्रियाया मम सुव्रतायाः ।
रक्षांसि नूनं [1]परिपीतवन्ति
विभिद्य शून्ये रुधिराशनानि ॥ १० ॥

मया विहीना विजने वने या
रक्षोभि[2]राहृत्य विकृष्यमाणा ।
नूनं †विनादं कुररीव दीना
सा मुक्तवत्यायतकान्तनेत्रा ॥ ११ ॥

हारपाशस्य—हारमालायाः । परिपीतवन्ति—पानकर्मवन्ति । भविष्यन्तीति शेषः ॥ ११ ॥

अस्मिन् मया सार्धमुदारशीला
शिलातले पूर्व[3]मुपोपविष्टा ।
कान्तस्मिता, लक्ष्मण ! जातहासा
[4]त्वामाह सीता बहुवाक्यजातम् ॥ १२ ॥

उपोपविष्टा—समीपावस्थितेत्यर्थः ॥ १२ ॥

गोदावरीयं सरितां वरिष्ठा
प्रिया प्रियाया मम नित्यकालम् ।
अप्यत्र गच्छेदिति चिन्तयामि
नैकाकिनी याति हि सा कदाचित् ॥ १३ ॥

अत्रेति । गोदावर्यामित्यर्थः ॥ १३ ॥

---

* ग्रीवां शून्ये – एकान्ते विभिद्य – रुधिररूपाणि अशनानि—पानानि परिपीतवन्ति नूनम्–गो. रुधिराशनानीति रक्षांसि इत्यस्य विशेषणं वा। रक्षांसि परिपीतवन्ति नूनमित्यन्वयः। † विनादं मुक्तवतीत्यन्वयः।

[1] रुधिरं पिबन्ति–ङ. [2] रावृत्य–ज. [3] मिहो–ङ. [4] मा–ङ.

पद्मानना पद्म[1]विशालनेत्रा
पद्मानि वाऽऽनेतुमभिप्रयाता ।
तदप्ययुक्तं न हि सा कदाचित्
मया विना गच्छति * पङ्कजानि ॥ १४ ॥

कामं त्विदं पुष्पितवृक्षषण्डं
नानाविधैः पक्षिगणैरुपेतम् ।
वनं प्रयाता नु तदप्ययुक्तं
एकाकिनी साऽतिबिभेति भीरुः ॥ १५ ॥

अतिबिभेति—अत्यन्तं भीता भवति ॥ १५ ॥

आदित्य ! भो लोककृताकृतज्ञ !
लोकस्य सत्यानृतकर्मसाक्षिन् † ।
मम प्रिया सा क्व गता ? हृता वा ?
शंसस्व मे शोक[2]वशस्य नित्यम् ॥ १६ ॥

लोकेषु सर्वेषु [3]च नास्ति किञ्चित्
यत्ते न नित्यं विदितं भवेत्तत् ।
शंसस्व, वायो ! कुल[4]शालिनीं तां
हृता मृता वा ‡ पथि वर्तते वा ॥ १७ ॥

---

* पङ्कजानीत्यत्राप्यानेतुमित्यनुषज्यते—गो. † आदित्य चन्द्रावनिलोऽनलश्च द्यौर्भूमि रापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम् ” ॥ ‡ यत्र कुत्रचिद्गता इदानीमत्र आगच्छन्ती वर्तते वा—इत्यर्थः ।

[1] पलाश—ज. [2] हृतस्य सर्वम्—ज. [3] न नास्ति—ज. [4] पालिनीं—ज.

[1]इतीव तं शोकविधेयदेहं *
रामं विसंज्ञं विलपन्त[2]मेवम् ।
उवाच सौमित्रिरदीनसत्त्वः
न्याये स्थितः काल[3]युतं च वाक्यम् ॥ १८ ॥

इतीवार्तीवशब्दौ प्रायशः इह पर्यायौ । कालयुतं—कालोचितमित्यर्थः ॥ १८ ॥

शोकं [4]विमुञ्चार्य ! धृतिं भजस्व
सोत्साहता चास्तु विमार्गणेऽस्याः ।
उत्साहवन्तो हि नरा न लोके
सीदन्ति [5]कर्मस्वतिदुष्करेषु ॥ १९ ॥

इतीव सौमित्रिमुदग्रपौरुषं
ब्रुवन्त[6]मार्तो रघुवंशवर्धनः ।
† न चिन्तयामास धृतिं विमुक्तवान्
पुनश्च दुःखं महदभ्युपागमत् ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रिषष्टितमः सर्गः

नारी(२०)मानः सर्गः ॥ २० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रिषष्टितमः सर्गः

---

* शोकविधेयः—शोकपरवशः- गो. † सौमित्रे न चिन्तयामास—न गणयामास । तदुक्तिं न श्रद्दधावित्यर्थः ।

[1] अतीव—ङ. [2] मेव—ज. [3] हितं—ङ. [4] विसृज्याथ—ज. [5] कर्मस्वपि—ङ. [6] मार्तं—ज.

चतुष्षष्टितमः सर्गः

[रामरौद्रावेशः]

*[1] स दीनो दीनया वाचा लक्ष्मणं वाक्यमब्रवीत् ।
शीघ्रं, लक्ष्मण ! जानीहि गत्वा गोदावरीं नदीम् ॥ २ ॥
अपि गोदावरीं सीता पद्मान्यानयितुं गता ?

अथ अन्वेषयन् लिङ्गदर्शनैः हृतां विज्ञाय अथ देवा आपदि तां न दत्तवन्तः इति देवेभ्योऽधिचुक्रोध । स दीन इत्यादि ॥ २ ॥

एवमुक्तस्तु रामेण लक्ष्मणः [2]परवीरहा ॥ २ ॥
नदीं गोदावरीं रम्यां जगाम †लघुविक्रमः ।
तां लक्ष्मणः तीर्थवतीं विचित्वा राममब्रवीत् ॥ ३ ॥
नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे ‡ ।
तीर्थवतीं—अवतारवतीं, पुण्योदकवतीं च ।

---

* एवं शोककरणं—चारद्वारा श्रवणेन रावणस्य मनुष्यत्वबुद्धिदार्ढ्यपूर्वकं स्ववध्यत्वसंपादनायेति बोध्यम्—**ति.** † लघुविक्रमः—त्वरितपदविन्यासः—**गो.** ‡ उच्चस्वरेण आह्वानेऽपि नोत्तरं लब्धमिति भावः ।

[1] एतदधस्थाने—स दीनो दीनया वाचा संशुष्कवदनो भृशम् ।
अभिराममिदं रामः विललापाकुलेन्द्रियः ।
त्रिलोकाधिपतिं देवं शक्रं त्वां वेदयाम्यहम् ।
पुरन्दर विहारार्हप्रिया भार्या जहाति माम् ।
यस्मिन् काले स्त्रियं कामी लब्ध्वा भूयोऽभिनन्दति ।
तस्मिन् सुखोदये काले प्रिया भार्या जहाति माम् ।
निर्वीर्य इव मातङ्गः परिवृत्त इवोत्सवः ।
प्रतिभात्ययमावासः गतध्वज इवाहवः ।
रतिं नैव च विन्दामि तां विना पद्मलोचनाम् ।
नाशयत्येव सर्वस्वं अनुशोचामि भामिनीम् ।
इति शोकसमाविष्टः लक्ष्मणं वाक्यमब्रवीत्—**ङ.** [2] पुनरेव हि—**ज.**

कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी ? ॥ ४ ॥
न ह्यहं वेद तं देशं यत्र सा जनकात्मजा ।

क्लेशनाशिनीति । सति दर्शने इति शेषः ॥ ४ ॥

लक्ष्मणस्य वचः श्रुत्वा दीनः सन्ताप[1]मोहितः ॥ ५ ॥
रामः समभिचक्राम स्वयं गोदावरीं नदीम् ।
स तामुपस्थितो रामः क्व सीतेत्येवमब्रवीत् ॥ ६ ॥

तां—गोदावरीम् ॥ ६ ॥

* भूतानि राक्षसेन्द्रेण वधार्हेण हृतामपि ।
न तां शशंसू रामाय तथा गोदावरी नदी ॥ ७ ॥

भूतानीत्यादि । भूतानि पूर्वोक्तरूपेण पृच्छ्यमानान्यपि राक्षसेन्द्रेण हृतां ज्ञात्वाऽपि तद्भयात् रामाय सीतां न शशंसुः । तथा गोदावरी च न शशंसेति विपरिणामः ॥ ७ ॥

ततः प्रचोदिता भूतैः शंसास्मै तां प्रियामिति ।
न तु साऽभ्यवदत् सीतां पृष्टा रामेण शोचता ॥ ८ ॥

अपि च भूतैः 'अस्मै सीतां शंसे' ति प्रचोदितापि गोदावरी तां सीतां पृष्टाऽपि नाभ्यवदत् ।

रावणस्य च तद्रूपं कर्माणि च दुरात्मनः ।
ध्यात्वा भयात्तु वैदेहीं सा नदी न शशंस ताम् ॥ ९ ॥

कुतः इत्यतः—रावणस्येत्यादि ॥ ९ ॥

---

* भूतानि—वन्यानि सत्त्वानि, दृष्टान्तार्थम्—गो.

[1] कर्शितः—ङ.

*निराशस्तु तया नद्या सीताया दर्शने कृतः ।
उवाच रामः सौमित्रिं सीताऽदर्शनकर्शितः ॥ १० ॥

तया नद्या सीतामशंसन्त्या तु रामः सीताया दर्शने निराशः कृतः; इयं गोदावरी दिव्यदेवता न ब्रूते, अतः कथं मया द्रष्टुं शक्या? इति निराशोऽभूदित्यर्थः । तदेवोच्यते उवाचेत्यादि ॥ १० ॥

एषा गोदावरी, सौम्य ! किंचिन्न प्रतिभाषते ।
किं नु, लक्ष्मण ! वक्ष्यामि समेत्य जनकं वचः? ॥११॥
मातरं चैव वैदेह्या विना तामहमप्रियम् † ।
या मे राज्यविहीनस्य वने वन्येन जीवतः ॥ १२ ॥
सर्वं [1] व्यपनयेच्छोकं वैदेही क्व नु सा गता?
‡ [2] ज्ञातिपक्षविहीनस्य [3] राजपुत्रीमपश्यतः ॥ १३ ॥
मन्ये दीर्घा भविष्यन्ति रात्रयो मम जाग्रतः ।
मन्दाकिनीं जनस्थानं इमं प्रस्रवणं गिरिम् ॥ १४ ॥
§ [4] सर्वाण्यनुचरिष्यामि यदि सीता हि [5] दृश्यते ।

अथ समीपदेशान्वेषणप्रवृत्तिः—मन्दाकिनीमित्यादि । सा तु काचिन्नदी, प्रस्रवणं तदास्थम् ॥ १४ ॥

---

* सीतादर्शनविषये निराशः कृत इत्यन्वयः । तस्या अलब्ध्योत्तर इति यावत् । † तां विना जनकं समेत्य किं नु अप्रियं वचः वक्ष्ये इत्यन्वयः । ‡ ज्ञातिभिः, सहायकैर्वा विहीनस्य । दीर्घाः—यापयितुमशक्याः । अहनि तदन्वेषणादिना कथञ्चिद्यापनेऽपि रात्रिरेवातिक्लेशकरीत्यर्थः । § यदि सीता लभ्येत, तदा सर्वमप्येतादृशं क्लेशं सहिष्य इति भावः ।

[1] व्यपानये–ज. [2] ज्ञातिवर्ग–ज. [3] वैदेहीमप्यपश्यतः–ज. [4] संदृष्टो विचरिष्यामि–ङ. [5] लभ्यते–ज.

एते [1]मृगा महावीर्याः मामीक्षन्ते [2]मुहुर्मुहुः ॥ १५ ॥
वक्तुकामा [3]इव हि मे इङ्गितान्युपलक्षये ।
तांस्तु दृष्ट्वा नरव्याघ्रः राघवः प्रत्युवाच ह ॥ १६ ॥
क्व सीतेति निरीक्षन् वै बाष्प[4]संरुद्धया [5]दृशा ।

तांस्त्विति । इङ्गितैः वक्तुकामानवस्थितान् मृगानित्यर्थः ॥

एवमुक्ता नरेन्द्रेण ते मृगाः सहसोत्थिताः ॥ १७ ॥
दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभःस्थलम् * ।

एवमुक्ताः—एवं पृष्टाः इत्यर्थः । दर्शयन्तो नभःस्थलमिति । उन्मुखतया आकाशावलोकनेङ्गितेनेति शेषः ॥ १७ ॥

मैथिली ह्रियमाणा सा दिशं यामन्वपद्यत ॥ १८ ॥
तेन मार्गेण [6]धावन्तो निरीक्षन्ते नराधिपम् † ।

यां दिशं अन्वपद्यत तेन मार्गेणेति । तद्दिङ्मार्गेणेत्यर्थः ॥

येन मार्गं च भूमिं च निरीक्षन्ते स्म ते मृगाः ॥ १९ ॥
‡ [7]पुनश्च मार्गमिच्छन्ति लक्ष्मणेनोपलक्षिताः ।
तेषां वचनसर्वस्वं लक्षयामास चेङ्गितम् ॥ २० ॥

---

* आकाशमार्गेण दक्षिणदिग्गतं रावणं सूचयितुमेवं क्रिया मृगाणाम् । एतदेवानन्तरश्लोके स्पष्टीक्रियते । † स्वेङ्गितं स पश्यति वेति जिज्ञासया नराधिपं रामं ईक्षन्ते । ‡ पुनः पुनः एवं मार्गं सूचयितुं ते मृगा इच्छन्ति । ते च लक्ष्मणेनोपलक्षिताः । तेषां सारं अभिप्रायं च लक्ष्मणो ज्ञातवानित्यर्थः । वचनसाररूपं इङ्गितमित्यर्थः ।

[1] महामृगा वीराः—ज. [2] पुनः पुनः—ज. [3] इह—ज. [4] संदिग्धया—ङ. [5] गिरा—ज. [6] गच्छन्तः—ज. [7] पुननेदन्तो गच्छन्ति—ज.

एवमिङ्गितं लक्ष्मणोऽपश्यदित्याह—येन मार्गमित्यादि। येन हेतुना, मार्गं च—आकाशमार्गं च पुनः भूमौ गमनाय मार्गमिच्छन्तो भूमिं च ते मृगाः निरीक्षन्ते स्म। एवमिङ्गितास्ते मृगाः लक्ष्मणेनोपलक्षिताः—तेषां वचनसर्वस्वं तत्कल्पितमिङ्गितं च लक्ष्मणो लक्षयामास ॥ १९–२० ॥

उवाच लक्ष्मणो ज्येष्ठं धीमान् भ्रातरमार्तवत् * ।
क्व सीतेति त्वया पृष्टा [1] यथेमे सहसोत्थिताः ॥ २१ ॥

अथ वक्तीत्याह—उवाचेत्यादि। आर्तवत्—आर्तः सन् यथा—स्वानुभवसिद्धतया ॥ २१ ॥

दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः।
साधु गच्छावहै, देव! दिशमेतां हि नैर्ऋतीम् ॥ २२ ॥
यदि [2] तस्यागमः † कश्चित् आर्या वा साऽथ लक्ष्यते।

नैर्ऋतीमेतां दिशमिति। निर्ऋतिदिक्प्राधान्येन एतां दक्षिणां दिशमित्यर्थः। तस्यागम इति सन्धिः छान्दसः। आगमः—ज्ञापक इत्यर्थः ॥ २२ ॥

बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशम् ॥ २३ ॥
लक्ष्मणानुगतः श्रीमान् वीक्षमाणो वसुन्धराम्।
एवं संभाषमाणौ तौ अन्योन्यं भ्रातरावुभौ ॥ २४ ॥
वसुन्धरायां पतितं पुष्पमार्गमपश्यताम्।

पुष्पमार्गं—पुष्पोपेतमार्गमित्यर्थः ॥ २४ ॥

---

* आर्तवत्। आर्तमिति क्रियाविशेषणं, क्तवतुप्रत्ययः—गो. † आगमः—सीतादर्शनोपायः—गो. [1] स्यादागमः [2] इति—गो. पाठः।

[1] यदिमे—ज, [2] स्यादागमः—ङ.

तां पुष्पवृष्टिं पतितां दृष्ट्वा रामो महीतले ॥ २५ ॥

उवाच लक्ष्मणं वीरः दुःखितो दुःखितं वचः ।
अभिजानामि पुष्पाणि तानीमानीह, लक्ष्मण ॥ २६ ॥

[1]अपिनद्धानि वैदेह्या मया दत्तानि कानने ।

अभिजानामीति । तानीमानि प्रत्यभिजानामीत्यर्थः । तामेव स्वप्रत्यभिज्ञां विशदयति—अपिनद्धानीत्यादि । बद्धानीत्यर्थः ॥ २६ ॥

*मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी ॥ २७ ॥

अभिरक्षन्ति पुष्पाणि प्रकुर्वन्तो मम प्रियम् ।

अभिरक्षन्तीति । अम्लानतया, अनन्यापहारतः, स्थापनेन चेति शेषः ॥ २७ ॥

एवमुक्त्वा [2]महाबाहुं लक्ष्मणं [3]पुरुषर्षभः ॥ २८ ॥
उवाच रामो धर्मात्मा गिरिं [4]प्रस्रवणाकुलम् ।
कच्चित् क्षितिभृतां नाथ! दृष्टा सर्वाङ्गसुन्दरी ? ॥ २९ ॥

[5]रामा रम्ये वनोद्देशे मया विरहिता †त्वया ।
‡क्रुद्धोऽब्रवीत् गिरिं तत्र सिंहः क्षुद्रमृगं यथा ॥ ३० ॥

---

* अम्लानीकरणात् सूर्यः, अनुत्क्षेपणात् वायुः, धारणात् भूमिश्च रक्षन्तीति भावः—गो. † त्वया दृष्टा कच्चिदित्यन्वयः । ‡ गिरिणा प्रत्युत्तरादानात् क्रुद्धः पुनः गिरिमब्रवीत् ।

[1] पिनद्धानीह—ङ. [2] महाबाहुः—ज. [3] पुरुषर्षभम—ज.
[4] प्रस्रवणाभिधम—ङ. [5] सीता—ङ.

तां *हेमवर्णां [1]हेमाभां सीतां दर्शय, पर्वत!
यावत् सानूनि सर्वाणि न ते विध्वंसयाम्यहम् ॥ ३१ ॥

गिरिं क्रुद्धोऽब्रवीदिति। तदधिष्ठानदेवतोद्देशेन एवं वादः ॥ ३१ ॥

एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति।
†[2]शंसन्निव ततः सीतां नादर्शयत राघवे ॥ ३२ ॥

शंसन्निवेति। स्वदेशवर्तिवक्ष्यमाणलिङ्गद्वारेति शेषः। अर्वाक्त्वात् स्थूलाकारस्य। नादर्शयत, साक्षादित्यर्थः। राघवे तद्विषये ॥ ३२ ॥

ततो दाशरथी रामः उवाच च शिलोच्चयम्।
मम [3]बाणाग्निनिर्दग्धः भस्मीभूतो भविष्यसि ॥ ३३ ॥

‡असेव्यः [4]सततं चैव निस्तृणद्रुमपल्लवः।
इमां वा सरितं चाद्य शोषयिष्यामि, लक्ष्मण! ॥ ३४ ॥

यदि नाख्याति मे सीतां [5]आर्यां चंद्रनिभाननाम्।
एवं स रुषितो रामः दिधक्षन्निव चक्षुषा ॥ ३५ ॥

---

* हेमवर्णां—हेमप्रतिमासदृशीं, हेमाभां—स्वर्णतुल्यकान्तिं—गो. हेमवर्णां—सुवर्णवर्णसदृशवर्णविशिष्टां, अत एव—हेमाङ्गीं—हेममयाङ्गीत्वेन प्रतीयमानां—रा. हेमाभामित्यनेन लावण्यनिर्देशः। हरिद्रादौ हेमवर्णसद्भावेऽपि लावण्याभावादुभयनिर्देशः।

† दर्शयन्—जानन्नपि राघवे राघवसमीपे नादर्शयत्—रा. नादर्शयत—वागिन्द्रिय राहित्येन साक्षादिति शेषः—ति. शंसन्निव—प्रतिध्वनिना कथयन्निव—स्वपृष्टस्यैवानुवादेन अनादरोक्तिं रामोऽमन्यतेति भावः—गो.

‡ निस्तृणद्रुमपल्लवत्वात् केनापि सेवितुमनर्हः॥

[1] सुमुखां—ङ, हेमाङ्गीं—ज. [2] दर्शयन्निवतां—ज. [3] बाणास्त्र—ङ. [4] पर्वतश्चैव—ङ. [5] अथ—ज.

ददर्श भूमौ * निष्क्रान्तं राक्षसस्य पदं महत् ।
निष्क्रान्तं, क्रमु पादविक्षेपे —प्रवृत्तपादविक्षेपम् ॥ ३५ ॥

त्रस्तायाः रामकांक्षिण्याः प्रधावन्त्या इतस्ततः ॥ ३६ ॥

राक्षसेना[1]नुसृप्तायाः मैथिल्याश्च पदान्यथ † ।
अनुसृप्तायाः—अनुधाव्यमानायाः । जटायुयुद्धसमये सीता रावणेन भूमौ विसृज्य गृहीतत्वात् पाददर्शनम् ॥ ३७ ॥

‡ स समीक्ष्य परिक्रान्तं सीतायाः राक्षसस्य च ॥ ३७ ॥

भग्नं धनुश्च तूणीं च विकीर्णं बहुधा रथम् ।
संभ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम् ॥ ३८ ॥

पश्य, लक्ष्मण! वैदेह्याः[2] शीर्णाः कनकबिन्दवः ।
भूषणानां हि, सौमित्रे! माल्यानि विविधानि च ॥३९॥
कनकबिन्दवः—भूषणावयवभूतस्वर्णशकलानि ॥ ३९ ॥

---

* निष्क्रान्तं—प्रादुर्भूतं, इतः पूर्वमदर्शनादेवमुक्तम्—गो. वस्तुतस्तु—निष्क्रान्तं पदं—आश्रमप्रदेशात् बहिर्निर्गमनसूचकं पदविक्षेपमिति स्वरसम् । रावणो हि आश्रमप्रवेशकाले परिव्राजकरूपधृत् (अर. 46-2) 'उपानही' (46-3) चागतः । निर्गमनकाले तु 'सद्यः सौम्यं परित्यज्य भिक्षुरूपं स रावणः । स्वं रूपं कालरूपाभं भेजे वैश्रवणानुजः' (49-6) 'स परिव्राजकच्छद्म महाकायो विहाय तत् । प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः' (49-9) इति राक्षसरूपं स्वीचकार । अतश्च तत्र सीतामादाय गच्छतो रावणस्य पदानि निष्क्रमणसूचकान्येव स्युः । मध्ये मध्ये रावणादात्मानं मोचयितुं प्रयतितवत्याः सीतायाः अपि पदानि तत्र स्युः । एवं पदविक्षेपदर्शनात् रामः पुनः किञ्चित्परिक्रम्य भग्नधनुरादिकं ददर्शेति ज्ञायते । अत एव 'स समीक्ष्य परिक्रान्तं' इति विच्छित्तिपूर्वकमुपक्रम इति भाति । † भूमौ ददर्शेत्यनुकर्षः । ‡ सीताया राक्षसस्य च परिक्रान्तं समीक्ष्य, ततः भग्नं धनुरादिकं च समीक्ष्य भ्रातरं शशंसेत्यन्वयः ।

[1] नुवृत्ताया:, भितप्ताया:—ङ. [2] कीर्णा:—ज.

*तप्तबिन्दुनिकाशैश्च चित्रैः क्षतजबिन्दुभिः ।
आवृतं पश्य, सौमित्रे! सर्वतो धरणीतलम् ॥ ४० ॥
मन्ये, लक्ष्मण! वैदेही राक्षसैः कामरूपिभिः ।
भित्त्वा भित्त्वा [1]विभक्ता वा भक्षिता वा भविष्यति ॥४१॥
†तस्या निमित्तं [2]वैदेह्याः द्वयोर्विवदमानयोः ।
बभूव युद्धं, सौमित्रे! घोरं राक्षसयोरिह ॥ ४२ ॥
तस्या निमित्तमिति । सुन्दोपसुन्दवत् तत्परिग्रहार्थमित्यर्थः ॥

मुक्तामणि[3]चितं चेदं [4]तपनीय[5]विभूषितम् ।
धरण्यां पतितं, सौम्य! कस्य भग्नं महद्धनुः ? ॥ ४३ ॥
[6]राक्षसानामिदं, वत्स! सुराणामथवाऽपि वा ।
तरुणादित्यसङ्काशं ‡वैडूर्यगुलिकाचितम् ॥ ४४ ॥
विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनम् ?
गुलिकाः—बन्धगुलिकाः ॥ ४४ ॥

छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ॥ ४५ ॥
भग्नदण्डमिदं [7]कस्य भूमौ [8]सम्यङ्निपातितम् ?
§काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः ॥ ४६ ॥
भीमरूपा महाकायाः कस्य वा निहता रणे ?

---

* तप्त-स्वर्ण-गो. † सीताया वा इमे रुधिरबिन्दवः, सीतानिमित्तं सुन्दोपसुन्दवत् युध्यमानयोः रक्षसोर्वेति विकल्पः श्लोकद्वयेनोक्तः-ति. ‡ वैडूर्यगुलिकाचितं—वैडूर्यमणिखचितम्-गो. § काञ्चनमयकवचविशिष्टाः पिशाचवदनाः खराः—'पिशाचवदनैर्युक्तं खरैः' (अर. 35-6) इति ह्युक्तम् ।

[1] विभक्ताङ्गं-ङ. [2] सीतायाः-ज. [3] मयं-ङ. [4] रमणीयं-ज. [5] विभूषणम्-ङ. [6] इदमर्धं कुण्डलितं-ङ. [7] सौम्य-ज. [8] सौम्य-ङ, कस्य नि-ज.

काञ्चनं उरश्छदं ननुत्राणि येषां ते तथा ॥ ४६ ॥

* दीप्तपावकसंकाशः द्युतिमान् समरध्वजः ॥ ४७ ॥

अपविद्धश्च भग्नश्च कस्य साङ्ग्रामिको रथः ?

समरे नाथप्रकाशको ध्वजः—समरध्वजः ॥ ४७ ॥

† रथाक्षमात्रा विशिखाः तपनीय[1]विभूषणाः ॥ ४८ ॥

कस्येमे[2]ऽभिहता बाणाः प्रकीर्णा [3] घोरकर्मणः ?

रथाक्षमात्राः—रथचक्रस्याक्षः आधारदण्डं तद्वत् दीर्घप्रमाणा इत्यर्थः । ‡ विशिखाः—विगतफलभागाः हताः—भग्नाः ॥ ४८ ॥

शरावरौ शरैः पूर्णौ विध्वस्तौ पश्य, लक्ष्मण ॥ ४९ ॥

प्रतोदाभीषुहस्तो वै कस्यायं सारथिर्हतः ?

शरान् आवृणोति स्वान्तः इति शरावरः—निषङ्गः । प्रतोदः—तोत्रम्, अभीषवः—प्रग्रहाः हस्ते यस्य स तथा ॥ ४९ ॥

[4] सारथिं हतवान् को वा महाबलपराक्रमः ? ॥ ५० ॥

[5] कस्येमौ, पुरुषव्याघ्र ! शयाते निहतौ युधि ।
चामरग्राहिणौ, सौम्य ! सोष्णीषमणिकुण्डलौ ? ॥५१॥

---

* समरध्वजः अपविद्धः, रथश्च भग्नः इति संबन्धः—गो. समरे स्वामिप्रकाशको ध्वजः यत्र सः समरध्वज इति रथविशेषणम् तादृशो रथः अपविद्धः—परिवृत्त्य पातितः, भग्नश्चेत्युत्तरेणान्वयः—ति. † रथाक्षमात्राः—चतुरशताङ्गुलदीर्घाः—ति. रा. ‡ विशिख इति बाणपर्यायः—'पृषत्कबाणविशिखाः' इत्यमरः ।

[1] विभूषिताः—ङ. [2] विद्धताः—ङ, निहताः—ज. [3] भीम—ङ.
[4] इदमर्धं कुण्डलितं—ङ. [5] अयं श्लोकः कुण्डलितः—ज.

पदवी पुरुषस्यैषा व्यक्तं कस्यापि रक्षसः ।
वैरं शतगुणं[1] पश्य *ममेदं जीवितान्तकम् ॥ ५२ ॥

मम राक्षसैः सह इदं वैरं एतन्निमित्तजं शतगुणं सत्. तेषां जीवितान्तकं अन्तं करोतीत्यन्तकं-संपन्नं पश्य ॥ ५२ ॥

[2]सुघोरहृदयैः, सौम्य ! राक्षसैः कामरूपिभिः ।
हृता †मृता वा[3]सीता सा भक्षिता वा तपस्विनी ॥५३॥
न धर्मस्त्रायते सीतां ह्रियमाणां महावने ।

अथ रक्षोभिः सीताविपत्तिं निश्चित्य तस्यां धर्मेण त्राणादर्शनात् एतावत्कालं धर्मापेक्षया विहृष्टप्राधान्यं पौरुषमेव ग्राह्यम्, प्राधान्येनेत्याशयेनाह—न धर्म इत्यादि । महावने ह्रियमाणां सीतां धर्मः न त्रायते स्म ॥ ५३ ॥

‡भक्षितायां हि[4]वैदेह्यां हृतायामपि, लक्ष्मण ! ॥ ५४ ॥
के हि[5]लोकेऽप्रियं कर्तुं शक्ताः, सौम्य ! ममेश्वराः ?

तथा भक्षितायां सीतायां, अपि वा अपहृतायां सत्यां के हि लोकेश्वराः इन्द्रादयः मम अप्रियं कर्तुं शक्ताः ? न केऽपि । §धर्मासाध्यार्थे ते अकिञ्चित्करा इत्यर्थः ॥ ५४ ॥

---

*मम जीवितान्तकं—जीवितान्तकरं इति वा । उत्तरश्लोकोऽप्यत्रानुकूलः । सीतामरणे, स्वमरणस्य पूर्वमेव स्पष्टीकृतत्वात् । †मृता—मारिता—गो. ‡यदि नाम सीता भक्षिता स्यात्, तदा यत्किञ्चिदपि कर्तुं समर्थस्य मम प्रवृत्तिं को वा निरोद्धुं शक्त इत्यर्थः । इदानीं वा कथमप्रियं कृतमित्यत्रोक्तं—कर्तारमित्यादि 'प्रियं' इति पदविभागे तु, सीतां नाशयित्वा किं वा प्रियं कर्तुं शक्यते ? मूलस्यैव छेदे वृक्षस्य जलसेचनवदित्याशयः । §धर्म एव न रक्षति चेत्, किं देवाः रक्षितुं शक्ताः ? इति भावः ।

[1]पापैः-ङ. [2]सा घोर-ङ. [3]वैदेही-ज. [4]सीतायां-ङ. [5]लोके प्रियं-ज.

* कर्तारमपि लोकानां शूरं करुणवेदिनम् ॥ ५५ ॥
अज्ञानादवमन्येरन् सर्वभूतानि, लक्ष्मण !

अथ पौरुषमेवावलम्ब्यमित्युक्तिशेषतया लोकस्थितिः काचित् प्रदर्श्यते—कर्तारमपीत्यादि । सर्वेषामपि लोकानां साक्षात् संहारकर्तारं शूरं — श्रुतिस्मृतिप्रसिद्धत्रिपुरसंहारादिविषयकनिरतिशयशौर्यं महेश्वरमपि करुणवेदिनं—करुणं यथा तथा वेदितुं शीलमस्त्यस्येति तथा, दयादृष्ट्या तूष्णीं अवस्थितं महेश्वरमपि अज्ञानात् तद्वैभवापरिज्ञानात् अवमन्येरन् । किमयं करिष्यति कुपितोऽपीति न गणयन्तीत्यर्थः ॥ ५५ ॥

मृदुं लोकहिते युक्तं दान्तं करुण[1]वेदिनम् ॥ ५६ ॥
निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ।

यदेवं अतः—मृदुमित्यादि । लोकहिते—प्राणिसौख्यसंपादने युक्तं—युक्तचित्तं, अत एव मृदुं—मृदुस्वभावावलम्बिनं, इदं तु लोकानामभिगमनीयत्वाय, दान्तं—नानाप्रकारपरस्वहरणप्रवृत्तिरहितेन्द्रियवर्गम् ; करुणवेदिनं मां नूनं त्रिदशेश्वराः—इन्द्रादयः निर्वीर्यं मन्यन्ते । यतः स्वावगतहरणामपि मदीयामुपेक्षन्ते । ननु मनुष्येण कथं निजोपास्यत्रिदशेश्वरस्पर्धा शक्या ? मनुष्यत्वबुद्ध्यभावादेव । तर्हि देवताबुद्धौ सार्वज्ञ्यतः सीतागतिपरिज्ञानतः प्रलापाद्ययोगात्—उच्यते—स्वानुभवेनैव खरादिसंहारे स्वबलनिस्तुलाधिकत्वज्ञानस्य सिद्धत्वात् ।

---

* अत्र कर्तारमपीत्यादि सामान्योक्तिः । मृदुमित्यादि च स्वविषयोक्तिः । एवञ्च स्वस्य जगत्कर्तृत्वादिकं स्वेनैव प्रकटितमित्याद्युक्तेः, तन्मूलविवादादेश्च नावसरः ॥

[1] वादिनम्—क्ष.

'यद्यद्विभूतिमत् सत्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥'

इतिन्यायेन स्वस्य जगत्कारणश्रीमदादिब्रह्मणः तेजोंऽशत्वस्यानुमानतः स्ववसायात्, अपरोक्षमनुष्योपाधितो मनुष्यभावानपायाच्च सर्वात्मना वास्तवस्वकब्रह्मत्वमतौ रावणस्य देवावध्यतः स्वावतारप्रयोजनप्रसङ्गात्, तमश्शक्त्या ब्रह्मत्वतत्प्रयुक्तसार्वज्ञ्यादिकं कार्यार्थं भगवदिच्छया आवृतमेवेति सर्वमुक्तं वक्ष्यमाणं च सूपपन्नम् ॥ ५६ ॥

मां प्राप्य हि गुणो दोषः संवृत्तः पश्य, लक्ष्मण ॥५७॥
अद्यैव सर्वभूतानां रक्षसामभवाय च ।
*** संहृत्यैव शशिज्योत्स्नां महान् सूर्य इवोदितः ॥ ५८ ॥**
संहृत्यैव गुणान् सर्वान् मम तेजः प्रकाशते ।

अथ निस्तुलाधिकं निजपौरुषमेवावलम्बनीयमित्याह—मां प्राप्येत्यादि । गुणः—लोकप्रसिद्धो गुणः धर्मावलम्बनमृदुत्वादिः मां प्राप्य दोषः संवृत्तः—अनिष्टसाधनत्वेन संवृत्तः । अतः इमं हित्वा मामकं पौरुषावलम्बनवैभवं पश्येत्याह—पश्य लक्ष्मणेत्यादि † । अद्य मम तेज एव प्रकाशत इत्यन्वयः । किमर्थमित्यतः—सर्वभूतानामभवायेत्यादि । भवः—उत्पत्तिः, अभवः—नाशः । शशिज्योत्स्नां—तत्तुल्यां, मामकमृदुत्वादिगुणान् संहृत्यैव युगान्तकाले उदितः सूर्य इव मम तेज एवाद्य प्रकाशते ॥ ५८ ॥

---

* यथा उदितः सूर्यः शशिज्योत्स्नां—शीतलचन्द्रिकां संहृत्यैव प्रकाशते, तथा मम तेजः गुणान्—मृदुत्वादीन् संहृत्यैव—निरस्यैव प्रकाशते—**गो.** † अथवा लोकवत्—एवं खलु संवृत्तः, पश्य—इत्येकं वाक्यम् ।

नैव यक्षा न गन्धर्वाः न पिशाचा न राक्षसाः ॥ ५९ ॥
किन्नरा वा मनुष्या वा सुखं प्राप्स्यन्ति, लक्ष्मण !

नैव प्रतिज्ञा प्रपञ्च्यते आसर्गान्तेन—नैव यक्षा इत्यादि। अयं क्रूरभावः निस्तुलाधिकसाम्राज्यभूमरजःशक्त्यावेशात्। तत्तु खरसंग्रामे एतादृशक्रूरभावकाले आविष्टतेजा इति द्विरुक्त्या दर्शितं कविना ॥ ५९ ॥

* **ममास्त्रबाणसंपूर्णं आकाशं पश्य, लक्ष्मण ॥ ६० ॥**
[1] **निःसम्पातं करिष्यामि ह्यद्य त्रैलोक्यचारिणाम्।**

पश्येति। अचिरादिति शेषः। त्रैलोक्यचारिणां निःसम्पातं बाणप्रचारतः अशक्यसंचारतः परस्परसङ्गमराहित्यमित्यर्थः ॥ ६० ॥

संनिरुद्धग्रहगणं आवारितनिशाकरम् ॥ ६१ ॥
† **विप्रनष्टानलमरुद्भास्करद्युति[2]संवृतम्।**
विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् ॥ ६२ ॥
ध्वस्तद्रुमलतागुल्मं विप्रणाशितसागरम्।
त्रैलोक्यं तु करिष्यामि संयुक्तं ‡ काल[3]धर्मणा ॥ ६३ ॥

सन्निरुद्धाः—निरुद्धचाराः ग्रहगणाः यस्मिन् त्रैलोक्ये तत्तथा। विप्रनष्टानिलमरुद्भास्करद्युतिव एव संवृतं—तिमिरसंवृतं। कालधर्मणेति। कालसाध्यो धर्मः—नाशः कालधर्मः। अनिच् तत्पुरुषे आर्षः ॥६२-६३॥

---

* अस्त्राणि समन्त्राणि, अमन्त्राः बाणाः। तैः संपूर्णत्वात् आकाशं त्रैलोक्यचारिणां सञ्चारानर्हं करिष्यामीत्यर्थः। † विप्रणष्टानलमरुत्—नष्टाग्निवातं। भास्करद्युतिसंवृतं—संवृतभास्करद्युति, आहिताग्न्यादिः—गो. ‡ कालकर्मणा—कालसाध्यं कर्म नाशः, तेन—ति.

[1] असंपातं—ज. [2] वर्जितम्—ङ. [3] कर्मणा—ज.

*न तां कुशलिनीं सीतां प्रदास्यन्ति [1]ममेश्वराः ।
अस्मिन् मुहूर्ते, सौमित्रे! मम द्रक्ष्यन्ति विक्रमम् ॥६४॥
नाकाशमुत्पतिष्यन्ति सर्वभूतानि, लक्ष्मण! ।

नाकाशमिति । आकाशमित्यर्थः ॥ ६४ ॥

[2]मम [3]चापगुणोन्मुक्तैः बाणजालैर्निरन्तरम् ॥ ६५ ॥
[4]अर्दितं मम नाराचैः ध्वस्तभ्रान्तमृगद्विजम् ।
समाकुलममर्यादं जगत् [5]पश्यार्य लक्ष्मण! ॥ ६६ ॥

अमर्यादं त्यक्तस्वस्वप्रकृत्यवस्थानम् ॥ ६६ ॥

आकर्णपूर्णैः इषुभिः जीव[6]लोकं †दुरावरैः ।
करिष्ये मैथिलीहेतोः अपिशाचमराक्षसम् ॥ ६७ ॥

दुरावरशब्दः स्खलन्तः ॥ ६७ ॥

मम ‡रोष[7]प्रयुक्तानां [8]सायकानां बलं सुराः ।
[9]द्रक्ष्यन्त्यद्य विमुक्तानां [10]अतिदूरातिगामिनाम् ॥६८॥
नैव देवा न [11]दैतेयाः न पिशाचा न राक्षसाः ।
भविष्यन्ति मम क्रोधात् त्रैलोक्ये विप्रणाशिते ॥ ६९ ॥

---

*यदीति पूरयितव्यम् । सिद्धवदुक्तिर्वा । †दुरावैरः – दुर्वारैः –गो.
‡रोषप्रयुक्तानां–रोषसंप्रयुक्तानां । अतिदूरातिगामिनां–अतिदूरातिपातिनाम्–गो.

[1] यदीश्वराः–ङ. [2] अयं श्लोकः कुण्डलिः–ज. [3] चापमुखा–ङ.
[4] मर्दितं–ङ. [5] पश्यार्य–ज. [6] लोक–ज [7] प्रमुक्तानां–ङ. [8] विशिखानां–ज.
[9] द्रक्ष्यन्ति ज्या–ङ. [10] अमर्षादूर–ज. [11] गन्धर्वाः–ङ.

देवदानवयक्षाणां लोका ये रक्षसामपि ।
* बहुधा [1] न भविष्यन्ति बाणौघैः शकलीकृताः ॥ ७० ॥

निर्मर्यादान् [2] इमान् लोकान् करिष्याम्यद्य सायकैः ।
हृतां मृतां वा, सौमित्रे न दास्यन्ति [3] ममेश्वराः ॥ ७१ ॥

हृतां मृतां वा न दास्यन्तीति। यथापूर्वस्वभावामिति शेषः ॥ ७० ॥

[4] तथारूपां हि वैदेहीं न दास्यन्ति यदि प्रियाम् ।
नाशयामि जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ ७२ ॥

तदेवोक्तं—तथारूपामिति ॥ ७२ ॥

इत्युक्त्वा रोषताम्राक्षः रामो † निष्पीड्य कार्मुकम् ।
शरमादाय संदीप्तं घोरमाशीविषोपमम् ॥ ७३ ॥

[5] सन्धाय धनुषि श्रीमान् रामः परपुरञ्जयः ।
युगान्ताग्निरिव क्रुद्धः इदं वचनमब्रवीत् ॥ ७४ ॥

यथा जरा यथा मृत्युः यथा कालो यथा विधिः ।
नित्यं न प्रतिहन्यन्ते सर्वभूतेषु, लक्ष्मण ॥ ७५ ॥

तथाऽहं क्रोधसंयुक्तः न निवार्योऽ[6]स्मि सर्वथा ।

विधिः—स्वसुकृतदुष्कृतकर्म, नित्यं—नियमेन ॥ ७५ ॥

---

* बहुधा शकलीकृता इत्यन्वयः । † निष्पीड्य—दृढमुष्टिबलेन गृहीत्वा—गो.

[1] निपतिष्यन्ति—ज. [2] अहं लोकान्—ङ. [3] यदीश्वराः—ङ. [4] यथारूपां—ङ.
[5] सन्दधे—ज. [6] स्म्यसंशयम्—ज.

* पुरेव मे चारुदतीमनिन्दितां
दिशन्ति सीतां यदि नाद्य मैथिलीम् ।
सदेवगन्धर्वमनुष्यपन्नगं
जगत् सशैलं † परिवर्तयाम्यहम् ॥ ७६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे चतुष्षष्टितमः सर्गः

परिवर्तयामि इति । नाशयामीत्यर्थः‡ । ननु 'नैव यक्षाः' इत्यादि 'परिवर्तयामी'त्यन्तवादः 'मृत्युं मरणधर्मेण योजयामी'-त्यादिरावणवचनवत् क्रोधजल्पमात्रम्, ? उत संभाव्यम् ? उच्यते— अस्मदुक्तरीत्या साम्राज्यभूमरजश्शक्त्यावेशे तु संभाव्यमेव, तया तथा सम्पादनस्येषत्करत्वात् । अन्यथा तु जल्पमात्रं, अशक्यार्थत्वात् एवं ब्रह्मसृष्टसंहारस्य ब्रह्मातिरिक्तेन मनसाऽपि दुःस्मरत्वात् स्वस्यैव निराश्रयतो नाशप्रसङ्गात् सुस्पष्टं अखिलाश्रयाखिलजगत्प्रपञ्चकृत्य-

---

* ननु एवं क्रोधः कथमस्य ? किमर्थं च ? इति चेत्— शृणु। मनुष्यदेहधारणेन तद्व्यवहारनटनमेवैतत् । किञ्च ईदृशदुःखकालेऽप्यस्य क्रोधाभावे रावणो मनुष्यबुद्धिं कुर्यात् ; तथा च तद्वधः शक्यः स्यादित्येतदर्थं च । 'मृत्युं मरणधर्मेण योजयामि' (अर—31-6) इत्यादिवचोऽपि रावणवचोवदेव अरोपितक्रोधमूलकत्वात्। अत एव शरैर्विषमिष्यामीत्युक्तिः। लक्ष्मणस्तु तत्त्वज्ञोऽपि तद्देवातस्त्वज्ञ इव, तन्मायामोहितो वा, प्रलयकालिकरौद्रशक्त्यावेशं संभाव्यानुनयति स्म । किञ्चास्य क्रोधस्यारोपितत्वाभावे अद्य सीताया अलाभे सर्वजगत्परिवर्तनं प्रतिज्ञाय, कथं लक्ष्मणप्रार्थनयाऽपि तामन्यथयेत् । अन्यथा कैकेय्यग्रे कृतां वनवासप्रतिज्ञां कथं कौसल्यावचसा न त्यक्तवान् । तस्मात् सा यथार्था ; इयं तु आरोपितेत्येव सारम् । अनेन व्यवहारेण क्रोधादिकाले कृताया अयुक्ताया अपि प्रतिज्ञाया अपालनेऽत्यन्तदोषाभाव इत्यपि सूचितम्—ति. † वक्ष्यते हि—'यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् । अस्या हेतोर्विशालाक्ष्या युक्तमित्येव मे मतिः' (सुन्द—16-13) इति—गो. ‡ अधरोत्तरं करिष्यामीति वा ।

प्रवर्तकब्रह्मावतारो रामः इति। स्थूलोपाधिस्तु—विराड्विष्णुप्रधानः बलवत्तनुः सम्राट्प्रधाना सूक्ष्मा सर्वकारणमान्तरं ब्रह्मप्रधानमेव तत्-प्राधान्यमेव रामस्य भूतपत्यादिब्रह्मलोकनिर्याणान्तनिसर्गसिद्धम् ॥ ७६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुष्षष्टितमः सर्गः

पञ्चषष्टितमः सर्गः

[लक्ष्मणप्रार्थना]

तप्यमानं तथा रामं सीताहरणकर्शितम् ।
लोकाना[1]मभवे युक्तं [2]सांवर्तकमिवानलम् ॥ १ ॥
वीक्षमाणं धनुः सज्यं निःश्वसन्तं [3]पुनः पुनः ।
[4]दग्धुकामं जगत् सर्वं युगान्ते तु यथा हरम् ॥ २ ॥
अदृष्टपूर्वं संक्रुद्धं दृष्ट्वा रामं तु लक्ष्मणः ।
अब्रवीत् प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता ॥ ३ ॥

अथ रामस्य लोकनाशनप्रवृत्तिं लक्ष्मणो वारयति । तप्यमान-मित्यादि । युक्तं—उद्युक्तम् । हरं—कालाग्निं चतुर्मुखं रुद्रमित्यर्थः । अदृष्टपूर्वं—पूर्वमेवं कदाप्यदृष्टभूमरजः संहाररुद्रशक्त्यावेशम् ॥ १-३ ॥

पुरा भूत्वा मृदुः दान्तः सर्वभूतहिते रतः ।
न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ४ ॥

प्रकृतिमिति । सर्वभूतसदाहितावहां ब्राह्मीं धार्मिकीं च प्रकृतिमित्यर्थः ॥ ४ ॥

---

[1] महिते—ङ. [2] संवर्तक—ज्ञ. [3] मुहुर्मुहुः—ङ. [4] हन्तुकाम पशुं रुद्र क्रुद्ध दक्षक्रतौ यथा—ङ.

*चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा।
एतच्च नियतं [1]सर्वं त्वयि चानुत्तमं यशः ॥ ५ ॥
एकस्य नापराधेन लोकान् हन्तुं त्वमर्हसि।

एतदिति। उक्तचतुष्टयमपीत्यर्थः ॥ ५ ॥

†ननु जानामि कस्यायं भग्नः साङ्ग्रामिको रथः ॥ ६ ॥
‡केन वा कस्य वा हेतोः [2]सायुधः सपरिच्छदः ?
[3]खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः ॥ ७ ॥
देशो निर्वृत्तसङ्ग्रामः सुघोरः, पार्थिवात्मज !।
एकस्य तु विमर्दोऽयं न द्वयोः, वदतां वर ! ॥ ८ ॥
न हि वृत्तं हि पश्यामि बलस्य महतः पदम्।
नैकस्य तु कृते लोकान् विनाशयितुमर्हसि ॥ ९ ॥

ननु एकस्यापराधः इति कथं ज्ञायते ? इत्यत्राह—नन्वित्यादि। जानामि ननु—जानाम्येवैक एवापराद्धेत्यर्थः। कुतो निश्चिनोषीत्यतः—कस्यायं भग्न इत्यादि। कस्यचिदेव न तु केषांचिदित्यर्थः। सपरिच्छदः—सपरिकरो भग्न इत्यन्वयः। खुरनेमिक्षतत्वादिविशेषणकोऽयं देशश्च निर्वृत्तसङ्ग्रामो दृश्यते इति शेषः। उक्तहेतुभिः—एकस्येत्यादि। विमर्दः—संग्रामः। वृत्तं—सिद्धम्। यदेवमतः—नैकस्येत्यादि ॥ ६-९ ॥

---

* लक्ष्म्यादिकं एकैकस्य प्रतिनियतं, त्वयि तु एतत्सर्वं च यशश्च प्रतिनियतमित्यर्थः—गो. † तर्हि को वाऽपराधीत्यत्राह—न त्विति (पा.)। केन प्रतिपक्षिणा, कस्य प्रयोजनस्य हेतोः, 'षष्ठी हेतुप्रयोगे' इति षष्ठी, प्रकृतात् अन्यस्माद्वा निमित्तादिति न जानामि, तच्चिन्तनीयमित्यर्थः—गो. ‡ केन भग्नः केन हेतुनेत्येतत्तु न जानामीति शेषः—ति.

[1] नित्यं—ज. [2] सयुगः—ज. [3] रथ—ङ.

युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः ।
सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ॥ १० ॥

को नु दारप्रणाशं ते साधु मन्येत ? राघव !

अद्य त्वद्दारप्रणाशनं लोककर्तृकं लोकानुमतं वा यदि स्यात्, तदा लोकनाशनप्रवृत्तिः युज्यते । न तदस्तीत्याह—को न्वित्यादि ॥

सरितः सागराः शैलाः देवगन्धर्वदानवाः ॥ ११ ॥

नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः ।
येन, राजन् ! हृता सीता तमन्वेषितुमर्हसि ॥ १२ ॥

सद्वितीयो धनुष्पाणिः सहायैः *परमर्षिभिः ।
समुद्रं च विचेष्यामः पर्वतांश्च वनानि च ॥ १३ ॥

गुहाश्च विविधा घोराः [1]नदीः पद्मवनानि च ।
देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः ॥ १४ ॥

यावन्नाधिगमिष्यामः तव भार्यापहारिणम् ।
न चेत् साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः ॥१५॥

कोसलेन्द्र ! ततः पश्चात् †[2] प्राप्तकालं करिष्यसि ।

नालं—न स्पृहावन्त इत्यर्थः । तत्र दृष्टान्तः—दीक्षितस्येत्यादि । साधवः—ऋत्विगादय इत्यर्थः । अहं द्वितीयः सहायः यस्य सः

---

* परमर्षिभिः, एतद्वनस्थैः—गो. † प्राप्तः चतुर्थोपायकालः यस्मिन् कर्मणि, तत्तथा—गो.

[1] पद्मिन्यो विविधास्तथा—ञ. [2] बाणमोक्षं विधास्यसि—ङ.

महितीयः। समुद्रादिविचयनार्थं परमर्षिभिः सहायैरित्युक्तम् ॥ १४ ॥ न चेत् साम्ना प्रदास्यन्तीति। जीवन्त्या मृताया वाऽपि त्रैलोक्ये क्वचित् अवर्ज्यावस्थानस्य प्राप्तत्वात् लोकेश्वरैः तद्दानं प्राप्तम्। तद्यदि अस्मादन्वेषणाशक्यत्वे तु न कृतं स्यात् साम्ना, ततः पश्चादेव तद्विषयकोपः प्राप्तकाल इत्यर्थः ॥ १५ ॥

[1] शीलेन साम्ना विनयेन सीतां
नयेन न प्राप्स्यसि चेन्नरेन्द्र !
ततः [*2] समुत्सादय हेमपुङ्खैः
महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे पञ्चषष्टितमः सर्गः

उक्तार्थस्योपसंहारः—शीलेनेत्यादि। शीलं—सुचरित्रम्। साम—साधुवादः। विनयः—प्रश्रयः। नयः—नीतिः। अतर्क्यमानः सर्गः ॥ १६ १२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे पञ्चषष्टितमः सर्गः

---

* समुत्सादय—विवक्षितकार्यमिति शेषः। समुत्सादयेति पाठे लोकानिति शेषः। एवं लक्ष्मणप्रसादेन रामकोपशान्तिप्रपञ्चनात् रावणाराधिततत्पक्षपातिरुद्रसङ्कल्पात् रामकोपो भग्न इति वदन् मूर्ख इत्यवगन्तव्यः—गो. एवं हि सति अग्रे रावणवधोऽपि असङ्गतः स्यादितितदाशयः।

[1] शिवेन—ङ. [2] समुत्पादय, समुत्पाटय—ङ.

षट्षष्टितमः सर्गः

[लक्ष्मणहितवचनम्]

तं तथा शोकसंतप्तं विलपन्तमनाथवत् ।
मोहेन महताऽऽविष्टं * परिद्यून[1]मचेतसम् ॥ १ ॥

ततः सौमित्रिराश्वास्य मुहूर्तादिव लक्ष्मणः ।
रामं † संबोधयामास चरणौ चाभिपीडयन् ॥ २ ॥

एवं लक्ष्मणः रजोऽभिभवप्रवृत्तं क्रोधमुपशमय्य सहजतत्त्व-प्रकृत्यापत्तये बोधनं करोति । तं तथेत्यादि । परिद्यूनं—क्षीणम् । अचेतसं— अस्वस्थचित्तम् ॥

मुहूर्तादिव—मुहूर्तादेव ॥ १–२ ॥

महता तपसा, राम! महता चापि कर्मणा ।
राज्ञा दशरथेनासि लब्धोऽमृतमिवामरैः ॥ ३ ॥

संबोधनप्रकारः—महतेत्यादि । कर्मणा—ऋष्यशृङ्गानय-नादिपूर्वोक्तमहायागैरित्यर्थः ॥ ३ ॥

‡ तव चैव गुणैर्बद्धः त्वद्वियोगान्महीपतिः ।
राजा देवत्वमापन्नः § भरतस्य यथा श्रुतम् ॥ ४ ॥

भरतस्य यथा श्रुतमिति । मुखादिति शेषः । यथा—अनुभवमनतिक्रम्य श्रुतं तथा ॥ ४ ॥

---

* परिद्यूनं—परिदेवनं प्राप्तम्–गो. † संबोधयामास—ज्ञापयामास–गो. ‡एवकारेण इतरपुत्रव्यावृत्तिः । तवैव गुणैर्बद्धः–त्वद्गुणैकपरवशः–गो. § भरतस्य—भरतात्–गो. रा.

[1] मचेतनम्–ङ.

यदि[1] दुःखमिदं प्राप्तं, काकुत्स्थ! न सहिष्यसे।
प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति ॥ ५ ॥

[2]दुःखितो हि भवान् लोकान् तेजसा यदि धक्ष्यते।
आर्ताः प्रजाः, नरव्याघ्र! *कं नु यास्यन्ति निर्वृतिम्?।

[3]आश्वसिहि, नरश्रेष्ठ! प्राणिनः कस्य नापदः?
संस्पृशन्त्यग्निवद्राजन्! क्षणेन व्यपयान्ति च॥

लोकस्वभाव एवैषः †ययातिर्नहुषात्मजः।
गतः[4] शक्रेण सालोक्यं[5] अनयस्तं समस्पृशत् ॥ ७॥

"न ह्वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" इति श्रुतेः महतामपि संसारदशायां अवर्ज्यदुःखं कर्मवशतः प्राप्यते, अतो भवादृशैः

---

*आर्ताः—एवं पीडिताः प्रजाः—सामान्य (दुर्बला) जनाः भार्यापहारे लोकनाशनमेव प्रतीकारश्चेत् लोके संभवतां दुर्बलपुरुषभार्यापहारिणां कः प्रतीकार इति वा भावः। कं=कीदृशे प्रतीकारे आचरिते निर्वृतिं प्रयुयुः। †ययातिर्हि स्वर्गगतोऽपि इन्द्रेणासूयाकलुषेण 'भवद्राज्ये को वा श्रेष्ठः' इति पृष्टः सत्यवादितयाऽहमेवेत्युक्तान्, इन्द्रेणात्मश्लाघी त्वं न स्वर्गार्ह इति पातित इति पुराणप्रसिद्धिः। नहुषात्मज इत्यनेन नहुषानीतिरपि व्यज्यते। स च सप्तर्षीन् स्ववाहकान् शचीस्मरणेन सर्प सर्पेत्युक्तान्, सर्पो भवेत्यगस्त्यशप्तः चिरं तथाभूतस्तथौ—गो. ययातिकथा अयोध्याकाण्डटिप्पण्यां (11 पुटे) एवं वर्णिता—'महाभारते (आदि 82) श्रूयते। स्वसत्कर्मणा स्वर्गं प्राप्तं ययातिं इन्द्रः परिक्षार्थं 'केनासि तुल्यस्तपसा ययाते' इत्यपृच्छत्। ययातिस्तु गर्वात् 'नाहं देवमनुष्येषु गन्धर्वेषु महर्षिषु। आत्मनस्तपसातुल्यं कञ्चित् पश्यामि वासव' इत्यवदत्। एवं सर्वभूतावमाननात् 'पतितोऽस्यवराजन्' इतीन्द्रेणाभिहितः सः 'इच्छाम्यहं सुरलोकात् विहीनः सतां मध्ये पतितुं देवराज?' इति प्रार्थयामासेन्द्रम्। तथैव साधुसहवासं च प्राप।

[1] दुःखमिव—ङ. [2] अयं श्लोकः कुण्डलितः—ज. [3] अयंश्लोकः कुण्डलितः—ङ. ज. पुस्तके अयंश्लोकः 'यदिदुःखं' इत्यतः परतो दृश्यते। [4] शक्रस्य—ङ. [5] अपतत् स तमःस्पृशन्—ङ.

तत्रैव न चलितव्यं इत्याशयेन यथोक्तलोकस्वभावं महापुरुषविषये दर्शयति—लोकेत्यादि। लोकस्य—संसारिणः स्वभावप्राप्तः एषः औपाधिकदुःखसंबन्ध इत्यर्थः। तदेव प्रदर्शयति—ययातिरित्यादि। अनयः—अनयमूलं दुःखमित्यर्थः। स तु महर्षिभिः स्वर्गं नीयमानः स्वानयेन स्वर्गात् भ्रष्टः सर्पत्वरूपं दुःखं प्राप्तः ॥ ७ ॥

महर्षिर्यो वसिष्ठस्तु यः पितुः नः *पुरोहितः।
†अह्ना पुत्रशतं जज्ञे तथैवास्यपुनर्हतम् ॥ ८ ॥

तथैवास्यपुनर्हतमिति। एकाहेन पुनः अस्य वसिष्ठस्य पुत्रशतमपि हतं—तद्दुःखं प्राप्तम्। विश्वामित्रकोपात ॥ ८ ॥

या चेयं जगतां माता[1] देवी लोकनमस्कृता।
अस्याश्च चलनं भूमेः दृश्यते, सत्य[2]संश्रव! ॥ ९ ॥

भूमेश्चलनमिति। कदाचित् चलनदुःखमित्यर्थः ॥ ९ ॥

यौ धर्मौ जगतां नेत्रौ ‡यत्र सर्वं प्रतिष्ठितम्।
आदित्यचन्द्रौ ग्रहणमभ्युपेतौ महाबलौ ॥ १० ॥

यौ धर्मौ—विद्याधर्ममयपरावरधर्मप्रवर्तकौ, अत एव जगतां नेत्रौ—जनिमृतिचक्रसंसरत्सर्वस्रोतसां सर्वस्य प्रपञ्चकृत्यस्य नेतारौ, औणादिकः तुन् नयतेः कर्तरि। यत्र सर्वं भूमविग्रहशोभादि त्रियोगकृत्यं च साक्षात् प्रतिष्ठितं तौ च ग्रहणं—राहुग्रासदुःखं अभ्युपेतौ ॥ १० ॥

---

*नः पितुरित्यन्वयः ॥ †अह्ना पुत्रशतं हतं—विश्वामित्रकोपेन युगपत् पुत्रशतनाशदुःखमनुभूतमिति भावः—गो. (बाल—59 सर्गे अयं वृत्तान्तो द्रष्टव्यः)। ‡सूर्यस्य वर्षहेतुत्वात् चन्द्रस्य ओषधिहेतुत्वाच्च—गो.

[1] सर्व—ज. [2] संभय—ङ.

सुमहान्त्यपि भूतानि देवाश्च, पुरुषर्षभ !
न दैवस्य प्रमुञ्चन्ति *सर्वभूतादिदेहिनः ॥ ११ ॥

दैवस्य प्रमुञ्चन्तीति । कर्मणो वशं न मुञ्चन्तीत्यर्थः ॥ ११ ॥

शक्रादिष्वपि देवेषु वर्तमानौ नयानयौ ।
श्रूयेते, नरशार्दूल ! न त्वं [1]शोचितुमर्हसि ॥ १२ ॥

नयानयौ—तन्मूलसुखदुःखे इत्यर्थः ॥ १२ ॥

[2]नष्टायामपि वैदेह्यां [3]हतायामपि चानघ !
शोचितुं नार्हसे, वीर ! यथाऽन्यः प्राकृतस्तथा ॥ १३ ॥
त्वद्विधा न हि शोचन्ति सततं [4]सत्यदर्शिनः ।
सुमहत्स्वपि कृच्छ्रेषु रामानिर्विण्णदर्शनाः ॥ १४ ॥

अनिर्विण्णदर्शनाः—निर्वाणो नाशः, अनिर्विण्णं—अविनष्टं दर्शनं—कृत्याकृत्यतत्त्वज्ञानं येषां ते तथा ॥ १४ ॥

तत्त्वतो हि, नरश्रेष्ठ ! बुद्ध्या समनुचिन्तय ।
बुद्ध्या युक्ता महाप्राज्ञाः विजानन्ति शुभाशुभे ॥ १५ ॥

तत्त्वतः चिन्तयेति । युक्तायुक्तकृत्याकृत्यमिति शेषः ॥

---

*सुमहान्ति भूतानि—मान्धातृनलप्रभृतिमहाजना अपि सर्वभूतादिदेहिनः—सर्वभूतानि आदिदेहोऽस्यास्तीति तथा, सर्वभूतान्तर्यामिण इत्यर्थः, दैवस्य—परमात्मनः पञ्चम्यर्थे षष्ठी, न प्रमुञ्चन्ति—सर्वेऽपि तत्संकल्पं नातिक्रामन्तीत्यर्थः—गो. किं पुनर्वक्तव्यं देहिनः सर्वभूतानि—देहवन्ति सर्वभूतानि न मुञ्चन्तीति । देहिन इति पुंस्त्वमार्षम् ।—ति. सुमहान्ति भूतानि—पथिव्यादीनि देहिनः—अतिप्रवृद्धाः, देवाश्च दैवस्य नित्यप्रमोदविशिष्टस्य सर्वभूतस्य—सर्वाणि भूतानि यस्मात्, तस्य ब्रह्मणः न प्रमुञ्चन्ति—तदाज्ञापितं न जहति—रा.

[1] व्यथितु—ज. [2] मृताया—ज. [3] नष्टायामपि राघव—ज. [4] समदर्शनाः—ङ. सर्वदर्शनाः—ज.

अदृष्टगुणदोषाणां [1] अधृतानां च कर्मणाम् ।
*** नान्तरेण क्रियां तेषां फलमिष्टं प्रवर्तते ॥ १६ ॥**

अथ निर्हेतुककार्यायोगात् एवं दुःखमूलं प्राचीनं दुरदृष्टं बुद्ध्या अनुचिन्त्य सोढ्वा स्थातव्यमित्याह—अदृष्टेत्यादि । शास्त्रैक-समधिगम्यतया प्रत्यक्षतो द्रष्टुमशक्यगुणत्वदोषत्वानां शुभाशुभत्वानां च अधृतानां—पुरा एवमेवं कर्म कृतमिति निश्चेतुमशक्यानां कर्मणां निष्पत्तिः क्रियामन्तरेण—तत्तत्पुरुषव्यापारमन्तरेण न भवति । तथाहि

"अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टाः दैवं चैवात्र पञ्चमम् ।
शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः । इति ।

अथ स्वसम्पादितानां तेषां कर्मणां इष्टं फलं, चात् अनिष्टंच सर्वथा प्रवर्तते—प्रवर्ततेव, अतः सोढव्यमिति शेषः ॥ १६ ॥

[2]मामेवं हि पुरा [3]राम! [4]त्वमेव बहुशोक्तवान् ।
अनुशिष्याद्धि को नु त्वां अपि साक्षात् बृहस्पतिः? ॥

इयं च बुद्धिः त्वदृतैव मे, अतो न मया त्वदनवगतार्थ उपदिश्यते इत्याह—मामेवमित्यादि । क्रोधवशमापन्नमिति शेषः ।

---

* कर्मणां इष्टं फलं क्रियां—अनुष्ठानमन्तरेण न प्रवर्तते—पूर्वकर्मानुष्ठानं विना इदानीं फलं नोत्पद्यते—**गो.** अथवा तेषां कर्मणां क्रियां स्वफलकरणमन्तरेण इष्टं—सम्मतं फलं अन्यत् फलं न प्रवर्तते । अस्य कर्मणः इदं फलमिति शास्त्रसम्मत फलकरणमन्तरेण अन्यत् फलं नहि भवितुं शक्यमिति भावः । 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति भावः ।

[1] अश्रुतानां—**ङ.** अश्रुवाणां—**ज.** [2] वीर—**ज.** [3] त्वमेव—**ङ.** [4] मामेवं—**ङ.**

बहुशोक्तवान् इति सन्धिरार्षः। अनुशिष्यादित्यादि। साक्षाद् बृहस्पतिरपि त्वां अनुशिष्याद्धि—अनुशासितुं शक्तः किम्? हिशब्दस्वारस्येन न शक्त एवेत्यर्थः। अतो मादृशः को नु त्वा अनुशिष्यात्? ॥ १७ ॥

बुद्धिश्च ते, महाप्राज्ञ! [1]देवैरपि * दुरन्वया।
शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहम् ॥ १८ ॥

दुरन्वया—अन्वेतुं गन्तुमशक्या ॥ १८ ॥

† दिव्यं च मानुषं [2]च त्वं आत्मनश्च पराक्रमम्।
इक्ष्वाकुवृषभावेक्ष्य यतस्व द्विषतां वधे ॥ १९ ॥

दिव्यं—देवोचितम्। मानुषं मनुष्योचितम्। देवोचितपराक्रमः परशुरामादिविषयः, अन्यः रक्षोविषयः ॥ १९ ॥

किं ते सर्वविनाशेन कृतेन, पुरुषर्षभ!
तमेव त्वं रिपुं पापं विज्ञायोद्धर्तुमर्हसि ‡ ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे षट्षष्टितमः सर्गः

सर्वेषां विनाशः—सर्वविनाशः। कृतेन-अनुष्ठितेन। नारी(२०)मानः सर्गः ॥ २० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे षट्षष्टितमः सर्गः

---

* दुरन्वया—ज्ञातुमशक्या—गो. † दिव्यं—दिविभवं प्राणिजातं देवगन्धर्वादिकं, तच्च सात्त्विकं वधानर्हं; मानुषं—मनुष्यलोकोद्भवं ब्राह्मणादिकं, तदपि वधानर्हं; सर्वलोकसंहारसमर्थं आत्मनः पराक्रमं च अवेक्ष्य—विचार्य द्विषतामेव वधे यतस्व—गो. इक्ष्वाकुवृषभ इति सम्बुद्धिः। ‡ उद्धर्तुं—नाशितुं—गो.

[1] लोकैरपि—ङ. [2] रूपं—ङ.

सप्तषष्टितमः सर्गः

[जटायुर्दर्शनम्]

पूर्वजोऽप्युक्त[1]मात्रस्तु लक्ष्मणेन सुभाषितम् ।
सारग्राही महासारं प्रतिजग्राह राघवः ॥ १ ॥

अथ लक्ष्मणवचनात् पुनश्च जनस्थान एव विचिन्वतो गृध्रराजस्य दर्शनं । पूर्वजोऽपीत्यादि । सुभाषितं—सुभाषितार्थम् ॥१॥

[2]संनिगृह्य महाबाहुः [3]प्रवृत्तं कोपमात्मनः ।
अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत् ॥ २ ॥
किं करिष्यावहे ? वत्स ! क्व वा गच्छाव ? लक्ष्मण !
केनोपायेन पश्येयं [4]सीतामिति विचिन्तय ॥ ३ ॥
तं तथा परितापार्तं लक्ष्मणो [5]राममब्रवीत् ।
इदमेव जनस्थानं त्वमन्वेषितुमर्हसि ॥ ४ ॥
राक्षसैः बहुभिः कीर्णं नानाद्रुमलतायुतम् ।
सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च ॥ ५ ॥
गुहाश्च विविधा घोराः नानामृगगणाकुलाः ।
आवासाः किन्नराणां च गन्धर्वभवनानि च ॥ ६ ॥
तानि युक्तो मया सार्धं त्वमन्वेषितुमर्हसि ।

इह गिरिदुर्गाणीति । इह जनस्थाने गिरिगतानि दुर्गाणि—गन्तुमशक्यप्रदेशा इत्यर्थः । निर्दराः—विदीर्णपाषाणाः ॥ ६ ॥

---

[1] वाक्यस्तु-ज. [2] स निगृह्य-ज. [3] प्रवृद्धं रोष-ज. [4] सीतां सुरसुतोपमाम्-ङ. [5] वाक्य-ज.

त्वद्विधा बुद्धिसम्पन्नाः महात्मानः [1]नरर्षभ !
*आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः ॥ ७ ॥
इत्युक्तः तद्वनं [2]सर्वं विचचार सलक्ष्मणः ॥ ८ ॥
क्रुद्धो रामः शरं घोरं सन्धाय धनुषि †क्षुरम् ।

क्षुरं—क्षुरप्रख्यं शरविशेषं धनुषि सन्धाय सर्वं वनं संचचार ॥

ततः पर्वतकूटाभं [3]महाभागं ‡द्विजोत्तमम् ॥ ९ ॥
ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम् ।
तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत् ॥ १० ॥
अनेन [4]सीता वैदेही भक्षिता नात्र संशयः ।
गृध्ररूपमिदं रक्षः व्यक्तं [5]भवति कानने ॥ ११ ॥
भक्षयित्वा विशालाक्षीं आस्ते सीतां यथासुखम् ।
एनं वधिष्ये [6]दीप्तास्यैः घोरैः बाणैः अजिह्मगैः ॥ १२ ॥
इत्युक्त्वाऽभ्यपतत् [7]गृध्रं सन्धाय धनुषि क्षुरम् ।
क्रुद्धो रामः [8]समुद्रान्तां [9]कम्पयन्निव मेदिनीम् ॥ १३ ॥
तं [10]दीनं दीनया वाचा सफेनं रुधिरं वमन् ।
अभ्यभाषत पक्षी तु रामं दशरथात्मजम् ॥ १४ ॥

सफेनं—फेनसहितम् ॥ १४ ॥

---

*आपत्सु—आपत्स्वपि । †क्षुरं—तद्वन्निशितं—ति. ‡द्विजोत्तमं—पक्षिश्रेष्ठम् ।

[1] नरर्षभाः—ज. [2] घोरं—ङ. [3] महाकार्यं—ङ. [4] किल—ङ. [5] भ्रमति—ज. [6] दीप्ताग्रैः—ज. [7] द्रष्टुं—ज. [8] सुसंभ्रान्तः—ङ. [9] चालयन्निव—ज. [10] दीनो—ङ. दीनदीनया—ज.

* यामोषधिमिवायुष्मन्! अन्वेषसि महावने।
सा देवी मम च प्राणाः रावणेनोभयं हृतम् ॥ १५ ॥

अन्वेषसि। एषृ गतौ। व्यत्ययात् परस्मैपदम् ॥ १५ ॥

त्वया विरहिता देवी लक्ष्मणेन च, राघव!
ह्रियमाणा मया दृष्टा रावणेन बलीयसा ॥ १६ ॥
† सीतामभ्यवपन्नोऽहं रावणश्च रणे [1] मया।
विध्वंसितरथ[2]च्छत्रः पातितो धरणीतले ॥ १७ ॥

सीतामभ्यवपन्नः—सीतापरित्राणमुद्दिश्य अभ्यवपन्नः—अभिगतवानस्मि। अत एव मया रणे रावणश्च विध्वंसितरथच्छत्रः धरणीतले पातितश्च ॥ १७ ॥

एतदस्य धनुर्भग्नं [3] एतदस्य शरावरम्।
अयमस्य [4] रथः, राम! भग्नः साङ्ग्रामिको [5] मया ॥ १८ ॥
अयं तु सारथिस्तस्य मत्पक्षनिहतो युधि।
परिश्रान्तस्य मे पक्षौ छित्त्वा [6] खड्गेन रावणः ॥ १९ ॥
सीतामादाय वैदेहीं उत्पपात विहायसम्।
रक्षसा निहतं पूर्वं न मां हन्तुं त्वमर्हसि ॥ २० ॥

---

* मृतसंजीविन्यादिरूपं ओषधिं यथा महत्या श्रद्धयाऽन्विष्येत तथा यां अन्वेषसे—इत्यर्थः ॥ † अभ्यवपन्नः—अभिमुख्येन गतः, ह्रियमाणां सीतामवलोक्य तदभिमुखमागतः—गो.

[1] प्रभो—ज्ञ. [2] श्चात्र-ङ. [3] एते चास्य शरास्तथा—ज्ञ. [4] रणे—ज्ञ. [5] रथः—ज्ञ. [6] स्वस्थः स—ङ.

रामस्तस्य * तु विज्ञाय [1](बाष्पपूर्णमुखस्तदा।
द्विगुणीकृततापार्तः) सीतासक्तां प्रियां कथाम् [2]।
गृध्रराजं परिष्वज्य परित्यज्य महद्धनुः ॥ २१ ॥
[3] निपपातावशो भूमौ रुरोद सहलक्ष्मणः।
† द्विगुणीकृततापार्तः रामो धीरतरोऽपि सन् ॥ २२ ॥

तस्य तु विज्ञायेति। स्वरूपमिति शेषः ॥ २१-२२ ॥

‡ एकमेकायने कृच्छ्रे निःश्वसन्तं कथञ्चन।
समीक्ष्य दुःखिततरः रामः सौमित्रिमब्रवीत् ॥ २३ ॥

एकं-असहायम्। एकायने-एकस्मिन् ऊर्ध्वतालक्षणे अयने-श्वासमार्गे कृच्छ्रे मुहुर्मुहुः निःश्वसन्तम् ॥ २३ ॥

§ [4] राज्याद् भ्रंशो वने वासः सीता नष्टा द्विजो [5] हतः।
ईदृशीयं ममालक्ष्मीः निर्दहेदपि पावकम् ॥ २४ ॥

ममालक्ष्मीः—मदुष्कर्मवशसंबंधा अलक्ष्मीः—अश्रीः पावकमपि निर्दहेत्, किमुत मच्छ्वियं दहेदिति ॥ २४ ॥

॥ संपूर्णमपि [6] चेदद्य प्रतरेयं महोदधिम्।
सोऽपि नूनं ममालक्ष्म्या विशुष्येत् सरितांपतिः ॥ २५ ॥

---

* तस्य—गृध्रस्य सम्बन्धिनी—गो. तस्य—तस्मादिति यावत्। † सीताऽपहारतः, जटायुवधाच्च द्विगुणीकृतः तापः। अथवा—आत्मार्थं प्राणानेव दत्तवति जटायुषि अन्यथाभावनया 'एनं वधिष्ये' (12) इति प्रवृत्त्या द्विगुणीकृतः तापः। ‡ एकायने—एकपद्यां, एकं—असहायं—गो. § यद्यपि 'न चास्य महतीं लक्ष्मीं राज्यनाशोऽपकर्षति' 'वनवासो महोदयः' इत्यभिमततमतया प्रोक्तौ राज्यनाशवनवासौ; तथाऽपि संप्रति सीताविश्लेषकारित्वात् जटायुवियोगफलकत्वाच्च तावेवानर्थकरौ जातौ इत्याह—गो. ॥ 'समुद्रोऽपि जानुदघ्नः पापिनः' इति लोकोक्तिमनुसृत्येदमुच्यते।

[1] अयं भागः कुण्डलितः—ज. [2] एतदनन्तरं—"श्रुत्वा जटायुषो वाक्यं रामः सौमित्रिणा सह"—इत्यधिकं—ङ. [3] इदमर्धं कुण्डलितं—ङ. [4] राज्यं भ्रष्टं—ज. [5] मृतः—ज. [6] पाथोभिः—ङ.

संपूर्णं महोदधिं दुःखपरितापशान्तये प्रतरेयं यद्यपि, तदा सोऽपि सरितां पतिः मम अलक्ष्म्या नूनं विशुष्येत्, मत्तापशान्त्यभावसंपादनायेति शेषः ॥ २५ ॥

नास्त्यभाग्यतरो लोके मत्तोऽस्मिन् सचराचरे ।
येनेयं महती प्राप्ता मया व्यसनवागुरा ॥ २६ ॥

अयं पितृवयस्यो मे गृध्रराजो [1]जरान्वितः ।
शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥ २७ ॥

पितुः वयस्यः—सखा ॥ २७ ॥

इत्येवमुक्त्वा बहुशः राघवः सहलक्ष्मणः ।
जटायुषं च पस्पर्श पितृस्नेहं [2]विदर्शयन् ॥ २८ ॥

तथा पितरीव स्नेहः पितृस्नेहः ॥ २८ ॥

निकृत्तपक्षं रुधिरावसक्तं
स गृध्रराजं [3]परिरभ्य रामः ।
क्व मैथिली प्राणसमा [4]मगेति
*विमुच्य [5]वाचं निपपात भूमौ ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्तषष्टितमः सर्गः

रोष(२९)मानः सर्गः ॥ २९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे सप्तषष्टितमः सर्गः

---

* विमुच्य—अवशादुच्चार्य ।

[1] महाबलः—ज. [2] निदर्शयन्—ज. [3] परिगृह्य—ज. [4] गतेति—ज. [5] बाष्पं—ङ.

अष्टषष्टितमः सर्गः

[सीतावृत्तान्तपरिज्ञानम्]

रामः संप्रेक्ष्य तं गृध्रं भुवि *रौद्रेण पातितम् ।
सौमित्रिं मित्रसम्पन्नं इदं वचनमब्रवीत् ॥ १ ॥

अथ जटायुमुखात् विशिष्यावगतसीतावृत्तान्तेन रामेण जटायोः संस्क्रियापूर्वं पुण्यलोकप्रदानं, राम इत्यादि । मित्रसंपन्नं—मित्रत्वेन-सर्वजनमैत्र्या सम्पन्नः तथा ॥ १ ॥

†गमायं नूनमर्थेषु यतमानो विहङ्गमः ।
राक्षसेन हतः संख्ये प्राणां[1]स्त्यजति [2]दुस्त्यजान् ॥ २ ॥

[3]अयमस्य शरीरेऽस्मिन् प्राणः, लक्ष्मण ! [4]विद्यते ।
तथा हि स्वरहीनोऽयं विक्लवः ‡समुदीक्षते ॥ ३ ॥

जटायो ! यदि शक्नोषि वाक्यं व्याहरितुं पुनः ।
सीतामाख्याहि, भद्रं ते, वधमाख्याहि चात्मनः ॥ ४ ॥

व्याहरितुमिति । व्याहर्तुमिति यावत् । वधं—वधप्रकारम् ॥

§किंनिमित्तोऽहरत् सीतां रावणस्तस्य किं मया ।
[5]अपराद्धं तु, यं दृष्ट्वा रावणेन हृता प्रिया ॥ ५ ॥

---

* रौद्रेण—रावणेन । मित्रसंपन्नं—सर्वजनमित्रमित्यर्थः । यद्वा परनिपातः, संपन्नमित्रं—गो. मित्रसंपन्नं—मित्रत्वं प्राप्तं—रा. रौद्रेणेति अतिदारुणं कर्म विवक्षितम् । 'स च्छिन्नपक्षः....रौद्रकर्मणा निपपात' (51–43) इतिपदान्यत्र प्रत्यभिज्ञाप्यन्ते । अथवा 'रौद्रेण रक्षसा' (28) इति निर्देशात् रावण एवार्थः ।

† मम अर्थेषु—इत्यन्वयः । ‡ समुदीक्षते, अस्मानिति शेषः । § किंनिमित्तः—किं निमित्तं यस्य असौ किंनिमित्तः, केन हेतुनाऽहरदित्यर्थः । किं भोगार्थं ? उत अपकारप्रतीकारार्थमित्यर्थः । चरमपक्षे तत्स्वरूपं पृच्छति—तस्येति—गो.

[1] स्त्यक्ष्यति—ङ. [2] मस्कृते—ज. [3] अतिखिन्नः—ज. [4] दृश्यते—ङ. [5] अपरार्धं—झ.

यं दृष्ट्वेति। यमपराधं दृष्ट्वेत्यर्थः ॥ ५ ॥

* कथं तत् चन्द्रसङ्काशं मुखमासीन्मनोहरम् ?
सीतया कानि चोक्तानि ? तस्मिन् काले, द्विजोत्तम ! ॥
कथंवीर्यः ? कथंरूपः ? किंकर्मा स च राक्षसः ?
क्व चास्य भवनं ? तात ! ब्रूहि मे परिपृच्छतः ॥ ७ ॥
तमुद्वीक्ष्याथ [1] दीनात्मा विलपन्त[2]मनन्तरम् ।
वाचाऽतिसन्नया रामं जटायुरिदमब्रवीत् ॥ ८ ॥
हृता सा राक्षसेन्द्रेण रावणेन [3] विहायसा ।
मायामास्थाय विपुलां † वातदुर्दिनसङ्कुलाम् ॥ ९ ॥
परि[4]श्रान्तस्य मे, तात ! पक्षौ छित्वा स राक्षसः ।
सीतामादाय वैदेहीं प्रयातो [5] दक्षिणां दिशम् ॥ १० ॥

किं कर्मेत्यस्य उत्तरं—मायामास्थायेति। वातेन दुर्दिनेन च सङ्कुला तथा ॥ १० ॥

उपरुध्यन्ति मे प्राणाः दृष्टिर्भ्रमति, राघव ! [6]
पश्यामि वृक्षान् सौवर्णान् उशीरकृतमूर्धजान् ॥११ ॥

क्व चास्य भवनमिति प्रश्नस्य उत्तरदानात् पूर्वं प्राणोपरोधमाह—उपरुध्यन्तीति। मरणवेदनया उपरुद्धा भवन्तीत्यर्थः। उशीरेणलामञ्जकेन कृताः—सम्पादिताः मूर्धजाः—केशाः येषां ते तथा ॥ ११ ॥

---

* मनोहरं मुखं कथमासीत्—कीदृशं विकारमापन्नम् । † अन्यैः अपरिज्ञानार्थं एवं माया कृता ।

[1] धर्मात्मा—ज. [2] मनाथवत्—ज. [3] दूरात्मना—ज. [4] क्रान्तस्य—ज. [5] दक्षिणामुखः—ज. [6] एतदनन्तरं—'सर्वक्लेशविमुक्तं मां बाहुभ्यां संपरिष्वज'—इति क्वचिदधिकं—झ.

येन यातो मुहूर्तेन सीतामादाय रावणः ।
विप्रणष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥ १२ ॥

*विन्दो नाम मुहूर्तोऽयं स च, काकुत्स्थ ! नाबुधत् ।

अथ परमं सिद्धान्तं कालज्ञानबलादावेदयति—येनेत्यादि । येन मुहूर्तेन निमित्तभूतेन सीतामादाय रावणो याति, तन्मुहूर्तबलात् तद्विप्रणष्टं धनं जीवाजीवरूपं, तत्स्वामी—ह्रियमाणधनस्वामी । क्षिप्रं प्रतिपद्यते—पुनः प्राप्नोति ॥ १२ ॥

[[1]त्वत्प्रियां जानकीं हृत्वा रावणो राक्षसेश्वरः ।]
झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥ १३ ॥

कोऽसौ मुहूर्तः ? इत्यत आह—विन्द इति । स च नाबुधादिति । बुध्यतेः शविकरणः व्यत्ययात् । स रावणः तं मुहूर्तं निजकर्मानुकूलं नावबुद्धवान् । अतः बडिशं गृह्य गृहीत्वा झषवत् क्षिप्रमेव विनश्यति ॥

न च त्वया व्यथा कार्या जनकस्य सुतां प्रति ।
[2]वैदेह्या [3]रंस्यसे क्षिप्रं हत्वा तं राक्षसं रणे ॥ १४ ॥

यदेवमतः—न च त्वयेत्यादि ॥ १४ ॥

†असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः ।
आस्यात् सुस्राव रुधिरं म्रियमाणस्य सामिषम् ॥ १५ ॥

असंमूढस्येति । एतावत्पर्यन्तमिति शेषः ॥ १५ ॥

---

* नष्टं धनं विन्दति—लभतेऽस्मिन्निति विन्दः—गो. † जटायुषो वक्ष्यमाण-सङ्गतिप्राप्तयानुकूल्यसूचनाय वा असंमूढस्येति । अथवा रामं प्रति भाषणकाले बुद्धिभ्रंशाभावः कथ्यते ।

[1] इदमर्धं कुण्डलितं—ज. [2] वैदेह्यां—ज. [3] योक्ष्यसे—ङ.

* पुत्रो विश्रवसः साक्षात् भ्राता वैश्रवणस्य च ।
इत्युक्त्वा दुर्लभान् प्राणान् मुमोच पतगेश्वरः ॥ १६ ॥

इत्युक्तेति । एतावन्मात्रमुक्त्वा उपरि तद्वीर्यतद्धन-तद्भवनादिकथनात् पूर्वमिति शेषः ॥ १६ ॥

ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जलेः ।
त्यक्त्वा शरीरं गृध्रस्य जग्मुः प्राणा विहायसम् ॥ १७ ॥
स निक्षिप्य शिरो भूमौ प्रसार्य चरणौ तदा ।
विक्षिप्य च शरीरं स्वं †पपात धरणीतले ॥ १८ ॥
तं गृध्रं प्रेक्ष्य ‡ताम्राक्षं गतासुमचलोपमम् ।
रामः सुबहुभिर्दुःखैः दीनः सौमित्रिमब्रवीत् ॥ १९ ॥
§बहूनि रक्षसां वासे वर्षाणि वसता सुखम् ।
[1][पक्षिराजेन मित्रेण तातमित्रेण नः सुखम् ।]
अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा ॥ २० ॥

रक्षसां वासे अस्मिन् दण्डकारण्ये, बहूनि वर्षाणि सुखं वसता अनेन पक्षिणा इहैव दण्डकारण्ये विशीर्ण—देहविशरणं प्राप्तम् ॥

---

* अस्योत्तरार्धं 'अध्यास्ते नगरीं लङ्कां रावणो राक्षसेश्वरः' इति बोध्यम् । उत्तरत्र (किष्कि. 58–19) संपातिवचने इदमेव पूर्वार्धमुपादाय अस्योत्तरार्धस्य कथनादिति लोकाचार्यैरुक्तम्—गो. † पपातेत्युक्तिरौपचारिकी-गो. पूर्वमेव खलु स पतित इत्याशयः । परन्तु यावत्प्राणं कन्धराद्यवयवधारणं, प्राणापगमक्षण एव अवयवानां पतनं इत्यनुभवसिद्धमेव । यदा धरणविगमः तदा पतनमिति सहजम् । ‡ ताम्राक्षं—अधश्शिरस्कतया पतनजक्षोभात्—गो. 'सनिक्षिप्य शिरो भूमौ' इत्युक्तेरेवं व्याख्यातं भाति । वस्तुतस्तु रुधिराक्षत्वात् ताम्राक्षं इति स्यात् । § निरन्तरापायवति देशे एतावता कालेन वसतोऽपि इह—अद्यैव विशीर्णम्—विशरणं प्राप्तम् । मदर्थमेवैतावता जीवितमिवेत्याशयः ॥

[1] इदमर्धं नास्ति—ज, झ.

अनेकवार्षिको [1]यस्तु चिरकाल[2]समुत्थितः ।
सोऽयमद्य हतः शेते कालो हि दुरतिक्रमः ॥ २१ ॥

अनेकवार्षिक इत्यस्यैव विवरणं—चिरकालसमुत्थितः इति ॥

पश्य, लक्ष्मण! गृध्रोऽयं उपकारी हतश्च मे ।
*सीतामभ्यवपन्नो वै रावणेन बलीयसा ॥ २२ ॥

गृध्रराज्यं परित्यज्य पितृपैतामहं महत् ।
मम हेतोरयं प्राणान् मुमोच पतगेश्वरः ॥ २३ ॥

सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः ।
शूराः शरण्याः, सौमित्रे! तिर्यग्योनिगतेष्वपि ॥ २४ ॥

सर्वत्रेति । सर्वजातिष्वपीत्यर्थः ॥ २४ ॥

†सीताहरणजं दुःखं न मे, सौम्य! तथाऽऽगतम् ।
यथा ‡विनाशो गृध्रस्य मत्कृते च, परन्तप ॥ २५ ॥

राजा दशरथः श्रीमान् यथा मम महायशाः ।
पूजनीयश्च मान्यश्च तथाऽयं पतगेश्वरः ॥ २६ ॥

सौमित्रे! हर काष्ठानि निर्मथिष्यामि पावकम् ।
गृध्रराजं दिधक्ष्यामि मत्कृते निधनं गतम् ॥ २७ ॥

---

*सीतामभ्यवपन्नः—सीतां मोचयितुं प्रवृत्तः—ति अभ्यासादनं—प्रहारादिनानिश्शक्तीकरणम् । षद्-पदधात्वोः गत्यर्थकत्वात्, सीतां प्रति रावणेन अभ्यवपन्नः—मर्मसु प्रहृतः निश्शक्तीकृत इत्यर्थः । †मदर्थं अनेन प्राणा एव त्यक्ताः । अतः एतज्जन्यदुःखं यथाऽऽगतं, न तथा सीताहरणजं दुःखं आगतं—प्राप्तम् । ‡विनाशशब्देन तज्जं दुःखमुच्यते—गो.

[1] वीरः—कु. [2] समृद्धिमान्—कु.

दिधक्ष्यामीति श्यन् छान्दसः। दग्धुमिच्छामीत्यर्थः। धक्ष्यामीति। दहेः स्ये घत्वभष्भावादिः। सद्भूतिसिद्धये इति शेषः॥

[1]नाथं पतगलोकस्य चिता[2]मारोप्य, राघव।
इमं धक्ष्यामि, सौमित्रे! हतं रौद्रेण रक्षसा[3] ॥ २८ ॥
*या गतिर्यज्ञशीलानां आहिताग्नेश्च या गतिः।
अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥ २९ ॥

---

* अनेन संकल्पमात्रात् कर्मानधिकृततिरश्चः साधनहीनस्यापि तल्लोकदानेन भगवान् रामः स्वस्वरूपांशे माययाऽऽवृतज्ञान इति प्रलपतां मुखं ध्वस्तम्। शोकादि तु नटनमित्युक्तमेवासकृत्—ति. गम्यत इति गतिः—लोकः। यज्ञशीलानां—यज्ञाः शीलं—वृत्तं येषां ते तथा, सदा यज्ञानुष्ठानपराणां, गृहस्थानामित्यर्थः। आहिताः—परितः स्थापिताः अग्नयः—पञ्चाग्नयः यस्य स तथा, सर्वदा तपश्शीलस्य, वानप्रस्थस्येत्यर्थः। अग्न्याधानस्य पूर्वेणैव सिद्धत्वात् पृथक्फलाभावाच्च। अपरावर्तिनां—'अरण्यमियात्ततो न पुनरेयात्' इत्युक्तानां सन्न्यासिनामित्यर्थः। रणादपलायितानामित्यर्थवर्णने, जटायोस्तादृशत्वेन तत्फलस्य स्वतस्सिद्धत्वेन अनुशातव्यत्वाभावात्। मुक्तानां धर्मप्रकरणे उक्तयसंभवात् भूमिप्रदायिनां—भूमिभोगत्यागिनां, नैष्ठिकानामित्यर्थः। ता गतीरिति यत्तदोर्नित्यसम्बन्धात् सिद्धम्। ता गतीः 'प्राजापत्यं गृहस्थानां ब्राह्मं संन्यासिनां स्मृतम्' इत्याद्युक्तस्थानाने, यद्वा यज्ञदानतपस्संन्यासिनामित्यर्थः। तेषां या या गतिः शास्त्रविहिता तां मया सत्कृतः व्रज। मया समनुज्ञातस्तु अनुत्तमान्—सर्वश्रेष्ठान् लोकान् 'अथ यदतःपरो + अनुत्तमेषूत्तमेषु' इत्यादिश्रुतिप्रसिद्धान् विष्णुलोकान् गच्छ; अवयव-

[1] देहं पतगराजस्य—ङ. [2] मारोपयाम्यहम्—ज. [3] एतदनन्तरं—

गोदावर्यास्तटे शुभ्रे चितां कुरु महाभुज।
एवमुक्त्वातु सौमित्रिं समालिङ्ग्य जटायुषम् ॥
समुद्धृत्यगतः श्रीमान् गोदावर्यास्तटं प्रति।
ततो गत्वा समालिङ्ग्यश्चभ्रे कुशसमन्विते ॥
अवतीर्य विनिक्षिप्य मथित्वाऽग्निं महायशाः।
लक्ष्मणेनाहृतैः काष्ठैः चितां कृत्वा महाभुजः ॥

—इत्यधिकम्—झ.

मया त्वं समनुज्ञातः गच्छ लोकाननुत्तमान् ।
गृध्रराज! महासत्त्व! संस्कृतश्च मया[1] व्रज ॥ ३० ॥

बहुत्वात् बहुवचनम् । अन्यथा गतिशब्देन पौनरुक्त्यं, अनन्वयश्च, समनुज्ञातः संस्कृतश्च इति पदद्वयानर्थक्यं च । ननु मानुषभावं भावयतः श्रीरामस्य कथं मुक्तिप्रदानं ? तस्य परत्वासाधारणचिह्नत्वादिति चेत्—'सत्येन लोकान् जयति' इत्युक्तरीत्या स्वार्जितधर्म-विशेषेण स्वाधीनसर्वलोकत्वाविरोधात् ।

केचित्तु—मया संस्कृतः ततोऽनुज्ञातस्त्वं यज्ञशीलादीनां या गतयः तान् लोकान् गच्छ, सर्वान्ते मां व्रज । न च निर्हेतुकमुक्तिदानेऽतिप्रसङ्गः, स्वकार्यमुद्दिश्य प्राणत्यागस्यैव हेतुत्वात्—इत्याहुः—**गो.** गम्यत इति गतिः—लोकः । यज्ञशीलादीनां लोकमार्गेण अपरावर्तिनां पुनरावृत्तिरहितानां मुक्तानां लोकान्, पूजायां बहुवचनम्, वैकुण्ठाख्यं लोकं व्रज—**ति.** ननु भगवता रामेण तिरश्चो गतायुषः संस्कारकरणं कथमिति चेत्—'न शूद्रा भगवद्भक्ताः' इत्यत्र शूद्रशब्दस्योपलक्षणार्थत्वात् भगवद्भक्तानां सर्वप्राणिनां मोक्षाधिकारस्य गम्यमानत्वात् । नन्वेवं सति जटायुषो मोक्षप्रदत्वात् रामस्य परमात्मत्वं प्रतीयते—एवं समस्तकल्याणगुणाकरस्य श्रीमन्नारायणस्य सीतामुद्दिश्य कथं विलाप इति चेत्—'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः'—इत्यनेन प्रकारेण सर्वेश्वरस्याप्याश्रित वत्सलत्वात् तेषां दुःखेन स्वयमपि दुःखित इव भाति—**तनिश्लोकी.** अधिकं तत्रैव द्रष्टव्यम् । अत्र प्रथमपादेन इष्टयागादिफलं, चतुर्थपादेन पूर्तखातादिफलं द्वितीयपादेन नित्यकर्मफलं तृतीयपादेन ब्रह्मोपासनफलं, वीरप्राप्यफलं वा स्वरसतो भाति । अत्र 'स्वार्जितं किञ्चिदप्यस्ति मया हि तपसः फलं । राजन् स्वतेजसा तस्य सशरीरो दिवं व्रज' (बाल–60-14) 'या गतिः सर्वसाधूनां स्वाध्यायात्तपसश्च या । देहन्यासभृतां या च तां गतिं गच्छ पुत्रक' (अयो. 64-44) अक्षया नरशार्दूल मया लोकाः जिताः शुभाः—प्रतिगृह्णीष्व मामकान्' (अर. 5-31) 'राघवो वाक्यमब्रवीत् । अहमेवाहरिष्यामि सर्वलोकान् महामुने' (अर. 5-33) 'सर्वान् लोकान् जितानाह मम पुण्येन कर्मणा । तेषु देवर्षिजुष्टेषु जितेषु तपसा मया । मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः' (अर. 7-12) 'अहमेवाहरिष्यामि स्वयं लोकान् महामुने' (अर. 7-14) इत्यादीनि वचनानि' 'आत्मानं मानुषं मन्ये रामं दशरथात्मजम् । योऽहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे' (युद्ध. 120-11) 'अनृतं नोक्तपूर्वं मे न च वक्ष्ये-कदाचन' (किष्कि. 14-14) 'कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे' (युद्ध. 120-7) इत्यादीनि वचनानि च विमर्शनीयानि ॥

[1] द्विज—**ङ.**

अपरावर्तिनामिति। रणे इति शेषः। यज्ञशीलादिभिः क्रमात् प्राप्यान् सावर्तसर्वपुण्यलोकान् प्राप्य, अथ मर्या ब्रह्मात्मकेन समनुज्ञातः सन् अनुमतमल्लोकगतिकः सन् अनुत्तमान् येभ्यः परे उत्तमा न सन्ति तान् सर्वोत्तमान् "अथ यदतः परो दिवो ज्योतिः दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषु उत्तमेषु" इत्यादि। श्रुतिप्रसिद्धान् ब्रह्मलोकान् गच्छ। एवं ब्रह्मलोकप्रदानकाले सहज-भूमसत्त्वस्य रजस्तमोऽभिभवनेनोन्मेषः। एवं कार्यवशात् कदाचित् सहजस्वब्रह्मत्वस्य प्रत्यभिज्ञानं अन्यदा हनुमत इव स्वैभवाच्छादनं कार्याय मनुष्यभावादनपायाः। अतः शिशोरपि राम ब्रह्मावतारत्वं सुस्पष्टम्। अत्र य इह रामो विष्णुः शङ्कर इति महान्तं यत्नं कुर्वन्ति † न तेनास्माकं विरोधः। स्थूलमूर्तौ विष्णुप्राधान्यस्य सर्वतोऽस्माभिः स्थाप्यमानत्वात्। स्थूलमात्रदर्शिनस्ते तावता समाप्ताः। वयमत्र किं कुर्मः तेषामभ्यधिकज्ञानाभावे? ॥ ३० ॥

एवमुक्त्वा चितां दीप्तां आरोप्य पतगेश्वरम्।
ददाह रामो धर्मात्मा * स्वबन्धुमिव दुःखितः ॥ ३१ ॥
रामोऽथ सहसौमित्रिः वनं गत्वा स वीर्यवान्।
स्थूलान् हत्वा महारोहीन् अनु तस्तार तं द्विजम् ॥ ३२ ॥

अथ स्थूलान् महारोहीन्—महामृगान्। इकारान्तोऽप्यस्ति मृगवाची रोहिशब्दः। तदेव व्यज्यते—रोहिमांसानि चेति प्रयोगेण च। योजना तु स्थूलान् महारोहीन् हत्वा—पिण्डप्रदानार्थमादायागत्य अनु—अनन्तरं तद्विजं पक्षिणमुद्दिश्य पिण्डदानाय शाद्वलतृणं (कुशान्) तस्तार ॥ ३२ ॥

---

* कृष्णपादादयः तनिश्लोक्यादौ तथा वर्णयन्ति। † स्वबन्धुमिवेत्यनेन मन्त्रपूर्वकत्वं दाहस्योच्यते—गो.

रोहिमांसानि चोत्कृत्य पेशीकृत्य महायशाः ।
[1]शकुनाय ददौ रामः रम्ये हरितशाद्वले ॥ ३३ ॥

तत्र रम्ये हरितशाद्वले रोहिमांसानि चोत्कृत्य पेशीकृत्य—पिण्डीकृत्य तस्मै शकुनाय ददौ ।

यत्तत्प्रेतस्य [2]मर्त्यस्य कथयन्ति द्विजातयः ।
तत् *स्वर्गगमनं [3]तस्य [4]पित्र्यं रामो जजाप ह ॥ ३४ ॥

यत्तु मंत्रजातं मर्त्यस्य प्रेतस्य स्वर्गादिगमनमुद्दिश्य कथयन्ति, तन्मन्त्रं जजाप । "ब्रह्मविदाप्नोति परम्" इत्यादिकः सः ॥ ३४ ॥

†ततो गोदावरीं गत्वा नदीं नरवरात्मजौ ।
उदकं ‡चक्रतुः तस्मै गृध्रराजाय तावुभौ ॥ ३५ ॥
§शास्त्रदृष्टेन विधिना जले गृध्राय राघवौ ।
स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा ॥ ३६ ॥

---

*स्वर्गो गम्यतेऽनेनेति स्वर्गगमनं—स्वर्गप्रापकं पित्र्यं—पितृदेवताकं तत् जजाप—याम्यसूक्तादिकं जजापेत्यर्थः—गो. †ततः—दाहानन्तरं, एतदर्थलाभस्तु पाठक्रमाद धैक्रमोबलीयानिति न्यायेन—रा. मध्ये पिण्डदानस्य कथनात् एवं व्याख्यातम् । ‡चक्रतुरिति लक्ष्मणस्य कर्तृत्वं सहकारितया—गो. §ननु वैदिकोत्तमो रामः कथं हीनजातिं तिर्यञ्चं वैदिकेन कर्मणा संस्कृतवान्—मैवम्—तस्यात्यन्त-भक्तत्वेन जातेरपगमात् । 'न शूद्रा भगवद्भक्ताः विप्रा भागवताःस्मृताः । सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने' इत्युक्तेः । न चेदं वचनं 'अपशवो वा अन्ये गो अश्वेभ्यः' इतिवत् प्रशंसापरमिति वक्तुं शक्यम् ; बाधकाभावात् । ब्राह्मणत्वादि-जातिर्हि शास्त्रैकसमधिगम्या, न तु गोत्वादिवदाकृतिगम्या, येन तत्तुल्यत्वमाशंक्येत । अत एव विश्वामित्रस्यापि क्षत्रियत्वजातिरपनीता, उपनीता च ब्राह्मणत्वजातिरित्युपपादितं बालकाण्डे, उपपादयिष्यते च श्रमणीवृत्तान्ते । इदं च द्रौपदीविवाहादिवत् ऐतिहासिक-विलक्षणव्यक्तिविशेषनियतमिति च नातिप्रसंगावकाशः—गो.

[1]शकुनीनां—कु. [2]मन्त्रं च—कु. [3]क्षिप्रं—ज. [4]याम्यसूक्तं—कु.

स गृध्रराजः कृतवान् यशस्करं
सुदुष्करं कर्म रणे निपातितः ।
महर्षिकल्पेन च संस्कृतस्तदा
जगाम पुण्यां गतिमात्मनः शुभाम् ॥ ३७ ॥

पुण्यां—पुण्यैकलभ्यां, अत एव—शुभां—सुखैकस्वभावाम् ॥

कृतोदकौ तावपि पक्षिसत्तमे
स्थिरां च बुद्धिं प्रणिधाय जग्मतुः ।
प्रवेश्य सीताधिगमे ततो मनः
वनं *सुरेन्द्राविव विष्णुवासवौ ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे अष्टषष्टितमः सर्गः ॥

पक्षिसत्तम इति । तद्वत्सीत्यर्थः । सीताधिगमे मनः प्रवेश्य विधाय वनं जग्मतुः इत्यन्वयः ॥ दुर्ग (३७) मानः ॥ ३८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे अष्टषष्टितमः सर्गः ॥

एकोनसप्ततितमः सर्गः

[कबन्धग्रहणम्]

कृत्वैवमुदकं तस्मै प्रस्थितौ रामलक्ष्मणौ ।
[1]अवेक्षन्तौ वने सीतां *पश्चिमां जग्मतुर्दिशम् ॥ १ ॥

---

* विष्णुवासवाविव इत्यनेन सीतान्वेषणं भावनामात्रमिति सूच्यते—गो. सुरेन्द्रौ देवश्रेष्ठौ विष्णुवासवाविव उपेन्द्र-इन्द्रतुल्यौ तादित्यन्वयः ॥ †पश्चिमां—दक्षिणपश्चिमामित्यर्थः । दक्षिणां दिशमिति । दक्षिणप श्चाम ह्युभयथा व्यवहर्तुं शक्या—गो. पश्चिमां—प्रतीपां, एतावता उक्तिदेशस्य प्रतीपभूता दिक् दक्षिणा उत्तरदेशत आगतयोः स्वदेशापेक्षया प्रतीपता दक्षिणेति वा ॥

[1] अन्वेषन्तौ-ङ.

[1] तौ दिशं दक्षिणां गत्वा शरचापासिधारिणौ ।
अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिपेदतुः ॥ २ ॥

अथ अधोमुखी विमुखीकरणपूर्वकं कबन्धदर्शनम् । कृत्वैव-मित्यादि । * दक्षिणां पश्चिमामिति नैर्ऋतीं दिशं जग्मतुरित्यर्थः । अविप्रहतं—खिलम् ॥ १—२ ॥

गुल्मैर्वृक्षैश्च बहुभिः लताभिश्च प्रवेष्टितम् ।
आवृतं सर्वतो दुर्गं गहनं घोरदर्शनम् ॥ ३ ॥
व्यतिक्रम्य तु वेगेन [2] व्यालसिंहनिषेवितम् ।
सुभीमं तन्महारण्यं [3] व्यतियातौ महाबलौ ॥ ४ ॥

व्यतियातौ—व्यतिक्रम्य गतौ ॥ ४ ॥

ततः परं [4] जनस्थानात् त्रिक्रोशं गम्य राघवौ ।
क्रौञ्चारण्यं विविशतुः गहनं तौ [5] महोजसौ ॥ ५ ॥

क्रौञ्चारण्यं—तदाख्यं, गहनं—वनम् ।

नानामेघघनप्रख्यं प्रहृष्टमिव सर्वतः ।
[6] नानापक्षिगणैः जुष्टं नानाव्यालमृगैर्युतम् ॥ ६ ॥
दिदृक्षमाणौ वैदेहीं तद्वनं तौ विचिक्यतुः ।
तत्र तत्रावतिष्ठन्तौ सीताहरण[7]कर्शितौ ॥ ७ ॥

---

* इदं श्लोकद्वयगतपदद्वयम् ॥

[1] पश्चिमां दक्षिणां—ङ. तौ दिशं पश्चिमां—ङ. [2] गृहीत्वा दक्षिणां दिशं—ज.झ. [3] व्यालसिंहनिषेवितम्—ज. [4] जनस्थानं हित्वा वेगेन—ङ. [5] महाजवौ—ङ. [6] नानावर्णैः शुभैः पुष्पैः मृगपक्षिगणैर्युतम्—ज. [7] दुःखितौ—ज.

ततः पूर्वेण तौ गत्वा त्रिक्रोशं भ्रातरौ तदा ।
*क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रम[1]मन्तरे ॥ ८ ॥
दृष्ट्वा तु तद्वनं घोरं बहुभीममृगद्विजम् ।
नाना[2]सत्त्वसमाकीर्णं सर्वं गहनपादपम् ॥ ९ ॥
ददृशाते [3]तु तौ तत्र दरीं दशरथात्मजौ ।
पातालसमगम्भीरां तमसा नित्यसंवृताम् ॥ १० ॥

ततः पूर्वेणेति, क्रौञ्चारण्यात् पूर्वदिगाश्रयेणेत्यर्थः । क्रौञ्चारण्यमतिक्रम्य गच्छन्तौ अन्तरे—मध्येमार्गं मतङ्गाश्रमं दृष्ट्वा, अथ घोरं अन्यद्वनं ददृशाते । सर्वं—कृत्स्नं । तद्वने उच्यमानविशेषणां दरीं च ददृशाते ॥ १० ॥

आसाद्य तौ नरव्याघ्रौ दर्यास्तस्याविदूरतः ।
ददृशाते महारूपां राक्षसीं [4]विकृताननाम् ॥ ११ ॥

अथ तौ दरीमासाद्य, तस्याविदूरतः इति संधिः छान्दसः तस्याः दर्याः समीपे इत्यर्थः ॥ ११ ॥

भयदामल्पसत्त्वानां †बीभत्सां रौद्रदर्शनाम् ।
लम्बोदरीं तीक्ष्णदंष्ट्रां करालां परुषत्वचम् ॥ १२ ॥
भक्षयन्तीं मृगान् भीमान् विकटां मुक्तमूर्धजाम् ।
प्रेक्षेतां तौ ततस्तत्र भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥

---

* क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्रमं पूर्वेण—मतङ्गाश्रमपूर्वदिग्भागे, 'एनपा द्वितीया' इति द्वितीया ; त्रिक्रोशं गत्वा अन्तरे—मतङ्गाश्रमक्रौञ्चारण्ययोर्मध्ये तद्वनं—मतङ्गाश्रमसम्बन्धिकिञ्चिद्वनं दृष्ट्वा—**गो.** श्लोकत्रयमेकान्वयम् । † अल्पसत्त्वानां—दुर्बलानाम् ।

[1] मन्तरा-**ङ.** [2] वृक्षमृगाकीर्णं-**ङ.** [3] गिरौ-**ज.** [4] विकृतेक्षणाम्-**ङ.**

बीभत्सां—जुगुप्सिताम्। परुषा—कर्कशा त्वक् अस्या सा तथा ॥ २२-२३ ॥

सा समासाद्य तौ वीरौ * व्रजन्तं भ्रातुरग्रतः।
एहि रंस्यावहेत्युक्त्वा समालम्बत लक्ष्मणम् ॥ १४ ॥
उवाच चैनं [1]वचनं सौमित्रिमुपगुह्य सा।

भ्रातुरग्रतः इति। रामस्याग्रत इत्यर्थः। रंस्यावहेत्युक्त्वेति संधिः छान्दसः। समालम्बत—गृहीतवती। उपगुह्य—आश्लिष्य ॥१४॥

अहं त्वयोमुखी [2]नाम लाभस्ते त्वमसि प्रियः ॥ १५ ॥
नाथ! [3]पर्वतकूटेषु नदीनां पुलिनेषु च।
[4]आयुःशेषमिमं, वीर! त्वं मया सह रंस्यसे ॥ १६ ॥

अयोमुखीत्यन्वर्थनामा अहं ते लाभः, निघ्यादिवत् लाभरूपा प्राप्ताऽस्मि, त्वं मे प्रियभर्तासि ॥ २६ ॥

एवमुक्तस्तु कुपितः खड्गमुद्धृत्य लक्ष्मणः।
[5]कर्णनासौ स्तनौ चास्याः निचकर्तारिसूदनः ॥ १७ ॥
कर्णनासे निकृत्ते तु विस्वरं सा विनद्य च।
यथाऽऽगतं प्रदुद्राव राक्षसी [6]भीमदर्शना ॥ १८ ॥

कर्णश्च नासा च कर्णनासे, निकृत्ते इत्यत्र द्वन्द्वैकवद्भावे सप्तमी ॥ १८ ॥

---

* लक्ष्मणस्य ग्रहणे हेतुः—भ्रातुरग्रतः व्रजन्तमिति।

[1] सौमित्रिमुपगृह्य महौजसम्-ङ. [2] नाम्ना—ङ. [3] पर्वतदुर्गेषु—ज. [4] आयुश्चिरमिदं—ज. [5] कर्णनासे स्तनौ—ङ. कर्णनासस्तनं—ज. [6] घोर—ज.

तस्यां गतायां गहनं [1]व्रजन्तौ वनमोजसा ।
आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥

तस्यां गतायां पश्चात् व्रजन्तौ तौ गहनं—दुष्प्रवेशं अन्यद्वनं ओजसा आसेदतुः ॥ १९ ॥

लक्ष्मणस्तु महातेजाः [2]सत्त्ववान् शीलवान् शुचिः ।
अब्रवीत् * प्राञ्जलिर्वाक्यं भ्रातरं दीप्ततेजसम् ॥ २० ॥
स्पन्दते मे दृढं बाहुः उद्विग्नमिव मे मनः ।
प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये ॥ २१ ॥

बाहुः स्पन्दत इति । वाम इति शेषः । अनिष्टानि—तत्सूचकानीत्यर्थः ॥ २१ ॥

तस्मात् सज्जीभवार्य ! त्वं कुरुष्व वचनं [3]हितम् ।
ममैव हि निमित्तानि [4]सद्यः शंसन्ति [5]संभ्रमम् ॥ २२ ॥

संभ्रमं—भयमित्यर्थः ॥ २२ ॥

† एष वञ्जुलको [6]नाम पक्षी परमदारुणः ।
आवयोर्विजयं युद्धे शंसन्निव विनर्दति ॥ २३ ॥

वञ्जुलकः —"वञ्जुलः कर्णवालः स्यात्" ॥ २३ ॥

---

* सीताया अलाभात् तदानीमपि रामस्योग्रत्वाद्वा, मायामृगप्रकरणे स्ववचनातिलङ्घनेनैव महानर्थप्राप्तेश्च तद्वन्मा भवत्विदानीमपि इति भावेन वा अञ्जलिकरणम् । अत एव 'त्वं कुरुष्व वचनं हितम्' 'ममैव हि निमित्तानि' इत्याद्युक्तिरुत्तरत्र । † ननु यदि दुर्निमित्तानि पश्यसि, तर्ह्यनिष्टं अनिवार्यमेव । किं सज्जीभवनेनेत्यतआह—एष इति—रा.

[1] विशन्ते—ङ्ग. [2] सत्यवान्—ङ्ग. [3] मम—ज. [4] सदा—ङ्ग. [5] विभ्रमम्—ङ्ग. [6] राम—ङ्ग.

तयोरन्वेषतोरेवं सर्वं तद्वनमोजसा ।
संजज्ञे विपुलः शब्दः प्रभञ्जन्निव तद्वनम् ॥ २४ ॥
संवेष्टितमिवात्यर्थं [1]गगनं मातरिश्वना ।
*[2]वनस्य तस्य शब्दोऽभूत् [3]दिवमापूरयन्निव ॥ २५ ॥

संवेष्टितं—व्याप्तम् ॥ २५ ॥

†तं शब्दं कांक्षमाणस्तु रामः [4]कक्षे सहानुजः ।
ददर्श सुमहाकायं राक्षसं विपुलो[5]रसम् ॥ २६ ॥

शब्दं कांक्षमाण इति । तदुत्पत्तिनिमित्तमित्यर्थः ॥ २६ ॥

‡[6]आसेदतुस्ततस्तत्र तावुभौ प्रमुखे स्थितम् ।
विवृद्धमशिरोग्रीवं कबन्धमुदरे मुखम् ॥ २७ ॥
रोमभिः निचितैस्तीक्ष्णैः महागिरिमिवोच्छ्रितम् ।
[7]नीलमेघनिभं रौद्रं मेघस्तनितनिःस्वनम् ॥ २८ ॥
अग्निज्वालानिकाशेन ललाटस्थेन दीप्यता ।
महापक्ष्मेण पिङ्गेन विपुलेनायतेन च ॥ २९ ॥

---

* वनस्य मध्ये शब्दोऽभूत्-**ति.** वनस्य सम्बन्धिनीं दिवं—आकाशं-**गो.** †तं शब्दं काङ्क्षमाणः—किमस्योत्पत्तिमूलमिति ज्ञातुमिच्छन्, गत्वेति शेषः, कक्षे—गुल्मे ददर्श, दूरादिति शेषः-**गो.** अयं श्लोकः आहत्यवादरूपः । अस्यैव प्रपञ्चः उत्तरश्लोकैः अष्टभिः । ‡ ददर्शेति पूर्वश्लोकोक्ताहत्यवादस्य प्रपञ्चः—आसेदतुरित्यादि । 'सहानुजो ददर्श' इति कथनात् अत्र उत्तरत्र च द्विवचनम् ।

[1] गहनं-**ज.** [2] गंभीरस्तस्य-**ङ.** [3] वन-**ज.** [4] खड्गी-**ज.** [5] दरम्-**ङ.** [6] आजग्मतु-**ङ.** [7] भीममेघ-**ङ.**

एकेनोरसि* घोरेण नयनेनाऽऽशुदर्शिना ।
महादंष्ट्रोपपन्नं तं लेलिहानं† महामुखम् ॥ ३० ॥

भक्षयन्तं महाघोरान् ऋक्षसिंहमृगद्विपान् ।
‡घोरौ भुजौ विकुर्वाणं उभौ योजनमायतौ ॥ ३१ ॥

कराभ्यां विविधान् गृह्य ऋक्षान् पक्षिगणान् मृगान् ।
आकर्षन्तं विकर्षन्तं अनेकान् मृगयूथपान् ॥ ३२ ॥

स्थितमावृत्य पन्थानं तयोः भ्रात्रोः प्रपन्नयोः ।

विवृद्धं—विवृद्धाकारं । अशिरोग्रीवं—अदृश्यमानशिराग्रीवं, अत एव कबन्धं—अन्वर्थतन्नामकं । उदरे मुखं । अमूर्धमस्तकादित्यलुक् । तीक्ष्णैः । उपलक्षितमिति शेषः । ललाटस्थेन उच्यमानविशेषणकेन उरःप्रदेशान्तर्गतशिरस्त्वेन उरसि—उरःप्रदेशे अन्तरुपलभ्यमानेन एकेनैव नयनेन उपलक्षितम् । अत्र महापक्ष्मेणेति अदन्तत्वमार्षम् । विकुर्वाणं—विक्षिपन्तम् । ऋक्षान्—भल्लूकान् । प्रपन्नयोरिति । §पन्थानमिति शेषः ॥ २७–३२ ॥

अथ तत् समभिक्रम्य क्रोशमात्रे ‖ ददर्शतुः ॥ ३३ ॥

---

* पूर्वं 'उदरे मुखं' इति कथनात् उरस्स्थाने ललाटस्य नयनस्य चास्थितिः । अतो 'ललाटस्थेन' इत्यनेन न विरोधः । † महामुखं—विपुलास्यरन्ध्रम्—गो. ‡ 'भक्षयन्तं' इत्यस्य विवरणरूपं—'घोरौ भुजौ' इत्यादि । §पन्थानमावृत्य स्थितं—इति वक्तव्यत्वात्, 'कं प्रपन्नयोः' इति प्रश्ने पन्थानमिति शेष इत्युक्तं भाति । पन्थानमित्यस्यावृत्तिर्वा । गोविन्दराजेन तु प्रपन्नयोः—समीपं प्राप्तयोः तयोः पन्थानमावृत्य स्थितं—इति व्याख्यातम् । ‖ सहानुजो ददर्शेत्यस्योपसंहारः—क्रोशमात्रे ददर्शतुरिति ।

महान्तं दारुणं [1]भीमं कबन्धं भुजसंवृतम् ।
कबन्धमिव संस्थानात् अतिघोरप्रदर्शनम् ॥ ३४ ॥

अथेत्यादि । अथ तत् भुजवेष्टनं समभिक्रम्य दूरे स्थितौ तं क्रोशमात्रे ददर्शतुः । भुजाभ्यामेव मृगादीनां संवृतं—संवरणं यस्य स तथा । संस्थानात्—देहस्थित्या । कबन्धमिव—सर्वथा अशिरस्कत्वलक्षणकबन्धवत् स्थितम् ॥ ३३–३४ ॥

स महाबाहुरत्यर्थं प्रसार्य विपुलौ भुजौ ।
जग्राह सहितावेव राघवौ पीडयन् बलात् ॥ ३५ ॥

सहिताविति । नैकमपि मुक्त्वेत्यर्थः ॥ ३५ ॥

खड्गिनौ दृढधन्वानौ [2]तिग्मतेजो[3]वपुर्धरौ ।
भ्रातरौ विवशं प्राप्तौ कृष्यमाणौ महाबलौ ॥ ३६ ॥

तिग्मं—खरं तेजः यस्य तत् तथा, तादृशवपुर्धरौ—वेषधरावित्यर्थः । विवशं प्राप्ताविति । बलात्कारेण कर्षणं प्राप्ताविवत्यर्थः ॥

तत्र धैर्येण शूरस्तु राघवो नैव विव्यथे ।
* बाल्यादनाश्रयाच्चैव लक्ष्मणस्त्वतिविव्यथे ॥ ३७ ॥

तत्र—तस्यामवस्थायाम् । बाल्यात्—बालबुद्धित्वात । अनाश्रयात्—धैर्यानालम्बनात् । अतिविव्यथे—अत्यन्तं व्यथितः—खिन्नो बभूव ॥ ३७ ॥

---

* बाल्यात्—रामवदप्रौढबुद्धित्वात्–गो. अनाश्रयत्वादिति पाठे—आश्रयभूतस्य रामस्यापि कबन्धावृतत्वादिति भावः–ति. अनाश्रयात्—रामरूपाश्रयराहित्यात्, रामस्यास्वस्थत्वेन परितप्यमानत्वात्–रा.

[1] भूतं–ङ. [2] तिग्मतेजो–ज. [3] धनुर्धरौ–ङ. महाभुजौ–ज.

उवाच च विषण्णः सन् राघवं राघवानुजः।
पश्य मां, वीर! *विवशं राक्षसस्य वशं गतम् ॥ ३८॥

मयैकेन विनिर्युक्तः परिमुञ्चस्व, राघव।
मां हि भूतबलिं दत्त्वा पलायस्व यथासुखम् ॥ ३९॥

तमेव दर्शयति वचनेन—उवाचेत्यादि। मया एकेन—अवशेन, विनिर्युक्तः—नियोजितरक्षोबलिः सन् त्वं किंचित् स्ववशं त्वदात्मानं परिमुञ्चयस्व। पलायनेनेति शेषः। उक्तार्थस्यैव विवरणं उत्तरार्धं—मां हीत्यादि। भूतबलिं। महाभूताकाररक्षोभक्षणमित्यर्थः॥

अधिगन्ताऽसि वैदेहीं अचिरेणेति मे मतिः।
प्रतिलभ्य च, काकुत्स्थ! पितृपैतामहीं महीम् ॥ ४०॥

तत्र मां, राम! †राज्यस्थः स्मर्तुमर्हसि सर्वदा।
[1]लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत् ॥ ४१॥

---

* विवशमित्यत्र हेतुः—राक्षसस्य वशंगतमिति। † 'स्मरणीयाः समये वयम्' इति लोकन्यायानुसारेणाह—राज्यस्थ इति।

[1] एतच्छलोकद्वयस्थाने ङ. पुस्तके—एवं अधिकः पाठः प्रदर्शितः—
न हि मे त्वत्समो बन्धुः कश्चनानघ! विद्यते। न मातुश्च ममाख्येयः विनाशश्च कथञ्चन॥
विषीदत्यतिमात्रं हि प्रियपुत्रा हि सा भृशम्। तं तु संपन्नया वाचा परितापार्तमातुरम्॥
आश्वासहेतोर्वचनमिदमाह परंतपः। पुत्रो दशरथस्यासि द्वितीयो मम चानुजः॥
स प्राकृत इवोदारः कथं नाम विषीदसि। मांसराशिमयः पापः रूपमात्रं हि भीषणम्॥
मा संत्रासं कृथा वीर! न हि त्वादृग्विषीदति। ततः सत्त्वानि तद्रक्षः क्षुधया चाग्रसत्तदा॥
खड्गिनौ दृढधन्वानौ तिग्मबाणौ धनुर्धरौ। भ्रातरावरणीं प्राप्य कृष्यमाणौ ददर्शतुः॥
महाजगरसंकाशौ खड्गरोमभिरावृतौ। तीक्ष्णरोमनखौ बाहू पञ्चास्याविव पन्नगौ॥
ताभ्यां तु कृष्यमाणौ तौ बाणपातमिवागतौ। कृच्छ्रेण दूरतस्तस्य तत्र दृष्ट्वा व्यवस्थितौ॥
ततः पिपासाविक्षिप्तः क्षुधया निभृतस्तदा। विनिक्षिप्तांसबाहुभ्यां मृगैस्सह महावने॥
भ्रातरौ निकटं प्राप्य कृष्यमाणौ ददर्श ह। तावुवाच महाबाहुः कबन्धो दानवोत्तमः॥ इति॥

मा स्म त्रासं कृथाः, वीर ! न हि त्वादृग्विषीदति ।
एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ ॥ ४२ ॥
पप्रच्छ घननिर्घोषः कबन्धो *दानवोत्तमः ।

एतस्मिन्नन्तर इति । लक्ष्मणविषादरामाश्वासनसमय इत्यर्थः ॥

कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ ॥ ४३ ॥
घोरं देशमिमं प्राप्तौ [1]दैवेन मम चाक्षुषौ ।

दैवेन–दैवगत्या, मम चाक्षुषौ—चक्षुर्गोचरौ ॥ ४३ ॥

वदतं कार्यमिह वां किमर्थं चागतौ युवाम् ॥ ४४ ॥
इमं देशमनुप्राप्तौ क्षुधार्तस्येह तिष्ठतः ।

अथ राक्षसः कार्यादिकं पृष्ट्वा, तदुपेक्ष्य, केवलं स्वप्रयोजनमेव संपन्नमित्याह— इमं देशमित्यादि । अनुप्राप्तौ इह तिष्ठतः—क्षुधार्तस्य मम आस्यमप्यनुसंप्राप्तौ स्थः ॥ ४४ ॥

सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ ॥ ४५ ॥
[2]ममास्यमनुसंप्राप्तौ दुर्लभं जीवितं [3]पुनः ।

किं ततः ? इत्यतः—दुर्लभमित्यादि ॥ ४५ ॥

तस्य तद्वचनं श्रुत्वा कबन्धस्य [4]दुरात्मनः ॥ ४६ ॥

---

*दानवोत्तम इत्युक्त्या दनुवंशोद्भवत्वेऽपि कर्मणा राक्षसत्वात् अन्यत्र राक्षसत्वोक्तिर्न विरुध्यते–रा.

[1] मम भक्षावुपस्थितौ–ङ. [2] मां तूर्णमनु–ज. [3] हि वाम्–ज. [4] महात्मनः–ङ.

उवाच लक्ष्मणं रामः * मुखेन परिशुष्यता ।

परिशुष्यता मुखेन उपलक्षितं लक्ष्मणं इत्यन्वयः ॥ ४६ ॥

कृच्छ्रात् कृच्छ्रतरं प्राप्य दारुणं, सत्यविक्रम ! ॥ ४७ ॥

व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियाम् ।

कृच्छ्रादित्यादि । हे सत्यविक्रम ! दारुणं कृच्छ्रात् कृच्छ्रतरं—राज्यभ्रंशपूर्वकवनवासदुःखं प्रियापहारान्तं प्राप्यापि स्थितयोः पुनश्च तां प्रियां अप्राप्यैव व्यवस्थितयोः जीवितान्ताय च व्यसनं—दुःखं प्राप्तम् ॥ ४७ ॥

कालस्य सुमहद्वीर्यं सर्वभूतेषु, लक्ष्मण ! ॥ ४८ ॥
त्वां च मां च, नरव्याघ्र ! व्यसनैः पश्य मोहितौ ।

यदेवमतः—कालस्येत्यादि । लक्ष्मण ! सर्वेष्वपि भूतेषु कालस्य वीर्यं सुमहत्—निरर्गलप्रचारम् । कुतः ? यतः—त्वां चेत्यादि । महाबलपराक्रमावपीत्यर्थः । मोहितावितिं । करोतीति शेषः ॥ ४८ ॥

† [1] न हि भारोऽस्ति दैवस्य सर्वभूतेषु, लक्ष्मण ! ॥ ४९ ॥

शूराश्च बलवन्तश्च कृतास्त्राश्च [2] रणाजिरे ।
[3] कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ ५० ॥

उक्तार्थस्यैव प्रपञ्चनं—न हीत्यादि ॥ ४९-५० ॥

---

* परिशुष्यता मुखेनोपलक्षितः राम उवाच—रा. उत्तरवाक्यानुसारादेवं व्याख्यातम् । † तत्तत्कर्मपरिपाककाले तत्तत्फलमवश्यमनुभाव्यमेव । एतद्विषये दैवं अधिकभारं न वहत्येवेति भावः ॥

[1] नातिभारो—ङ. [2] महारणे—ङ. [3] कालावपन्नाः—ङ.

इति ब्रुवाणो दृढसत्यविक्रमः
[1]महायशा दाशरथिः प्रतापवान् ।
अवेक्ष्य सौमित्रिमुदग्र[2]पौरुषः *
स्थिरां तदा स्वां मतिमात्मनाऽकरोत् ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकोनसप्ततितमः सर्गः

उदग्रपौरुषो रामः सौमित्रिमवेक्ष्य दीनमवेक्ष्य स्वां मतिं तु आत्मना—आत्मवैभवेन तदा स्थिरामकरोत् । न तु रक्षे निमित्त-भयलेशं विषादलेशमपि प्राप्तवान् इत्यर्थः । कर्म(५१)मानः सर्गः ॥ ५१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकोनसप्ततितमः सर्गः

सप्ततितमः सर्गः

[कबन्धनिग्रहः]

तौ तु तत्र [3]स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ ।
बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत् ॥ १ ॥

अथ कबन्धभुजच्छेदः, तदनन्तरं तस्य प्रत्यभिज्ञाप्राप्तिश्च । तौ तु तत्रेत्यादि । परिक्षिप्तौ—पाशप्रकारेण परिवृतौ व्याप्तौ ॥ १ ॥

---

* उदग्रपौरुषमिति पाठे तादृशलक्ष्मणदर्शनेन उत्तम्भितवीर्यः स्वयं प्रतिष्ठितोऽभू-दित्यर्थः । परस्परावष्टंभेन परस्परप्रत्यवस्थानं सहजमेव । अनन्तरसर्गस्थलक्ष्मणवाक्य-मप्यत्र द्रष्टव्यम् ॥

[1] महारथः—ङ. [2] पौरुषं, विक्रमं—ङ, विक्रमः—ज. [3] स्थितो—ङ.

तिष्ठतः किं नु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ ।
आहारार्थं तु संदिष्टौ दैवेन [1]गतचेतसौ ॥ २ ॥

तिष्ठत इत्यादि । क्षुधार्तं मां दृष्ट्वा भीतौ किं नु तिष्ठतः? व्यर्थमेव, न तु जीवनपरिहार इत्यर्थः । यतो गतचेतसौ युवां मे दैवेन आहारार्थं संदिष्टौ ॥ २ ॥

तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा ।
उवाचार्तिं समापन्नः विक्रमे कृत[2]लक्षणः ॥ ३ ॥

त्वां च मां च पुरा तूर्णं आदत्ते राक्षसाधमः ।
तस्मादसिभ्यामस्याशु बाहू छिन्दावहै गुरू ॥ ४ ॥

आदत्ते पुरा—आदास्यतीत्यर्थः ॥ ४ ॥

भीषणोऽयं [3]महाकायः राक्षसो * भुजविक्रमः ।
लोकं †[4]ह्यतिजितं कृत्वा ह्यावां हन्तुमिहेच्छति ॥ ५ ॥

भुजमात्रेण विक्रमो यस्य स तथा । लोकं–प्राणिजातम् ॥

‡निश्चेष्टानां वधो, राजन्! कुत्सितो [5]जगतीपतेः ।
[6]क्रतुमध्योपनीतानां पशूनामिव, राघव! ॥ ६ ॥

---

* 'बाहू छिन्दावहै' इत्यत्र हेतुः—भुजविक्रम इति । यतोऽस्य पराक्रमः भुजयोरेव, अतस्तयोश्छेदनेऽयं हत एवेति भावः । † अतिजितं—अत्यंतजितम्–गो. एवं सर्वजयाद्गर्वितोऽयमिति भावः । ‡ भुजच्छेदनमात्रं कर्तव्यं, न तु मारणमित्याह—निश्चेष्टानामिति । निश्चेष्टानां प्रतीकाराशक्तानाम् । जगतीपतेः—क्षत्रियस्य क्षत्रियकर्तृक इति यावत् । क्रतुमध्योपनीतानामिति निश्चेष्टानामित्यस्मिन्नर्थे प्रयुक्तम् । यद्वा 'पर्यग्नि-कृतानारण्यानुत्सृजन्त्यहिंसायै' इत्युक्तरीत्या अश्वमेधक्रतौ उपनीतानामारण्यपशूनां वधः कुत्सित एव–गो. क्रतुमध्यापनीतानां—क्रतुमध्यादन्यत्र नीतानाम् । क्रत्वनङ्गभूतानामिति

[1] हतचेतसौ–ङ. हतचेतनौ–ज. [2] निश्चयः–ज. [3] महाबाहुः–ङ. [4] ह्यपजितं–ङ. [5] जगतीपते–ङ. क्रतुमध्याप–ज.

बाहुच्छेदमात्रमेव कर्तव्यं, न तु प्राणवियोजनं युक्तमित्याह—निश्चेष्टानामिति। प्रतिप्रहाररहितानां इत्यर्थः। जगतीपतेः—क्षत्रियस्य। क्रतुमध्यपशुदृष्टान्तः निश्चेष्टत्वे ॥ ६ ॥

एतत् संजल्पितं श्रुत्वा तयोः क्रुद्धस्तु राक्षसः।
विदार्यास्यं तदा रौद्रः तौ भक्षयितुमारभत् ॥ ७ ॥

तयोः संजल्पितमित्यन्वयः। भक्षयितुमारभदिति। हस्ताभ्यामाकृष्टवानित्यर्थः ॥ ७ ॥

ततस्तौ *देशकालज्ञौ खड्गाभ्यामेव राघवौ।
अच्छिन्दतां सुसंहृष्टौ बाहू तस्यांसदेशतः ॥ ८ ॥

यावत्-तीव्र वस्तुतस्तु—यथाश्रुतपाठे, क्रतुमध्योपनीतानां निश्चेष्टानां पशूनामिव जगतीपतेः—क्षत्रियस्य वधः कुत्सितः। एकस्य क्षत्रियस्य अन्येन हनने प्रसक्ते, यज्ञपशुमिरिव तूष्णीं स्थित्वा स्वहननावकाशदानं अतिजुगुप्सितम्। यावत्प्राणं योद्धव्यमेव क्षत्रियेणेत्यर्थः। अथवा—निश्चेष्टानां वधः भवेदेवेति सामान्यन्यायपरं पृथग्वाक्यम्। स च जगतीपतेः—क्षत्रियस्य कुत्सित इत्यपरं वाक्यम्। जगतीपते इति पाठे तु—हे राजन्, जगतीपते, राघव, इति पदत्रयं योद्धव्यताया आवश्यकत्वसूचकम्। पूर्वपाठेऽपि संबुध्यन्तपदद्वयस्य सार्थक्यं एवमेव किल वक्तव्यम्। हे राघव क्रतुमध्योपनीतानां पशूनामिव निश्चेष्टानामस्माकं वधः कुत्सितः—गर्हितः, अतः प्रतीकारः कर्तव्य एवेत्यर्थः। एवं तर्हि कुतो बाहुच्छेदमात्रं वदति लक्ष्मण इति चेत्—तत्र मूलं उक्तं—भुजविक्रम इति। कबन्धस्यास्य भुजावेव परमसाधनौ। अतस्तयोश्छेद एव एतद्वधोपाय इति भावः। एवं व्याख्यां परित्यज्य, स्वभक्षणोद्यतं कबन्धमुद्दिश्य—अयं निश्चेष्टः, अतो न हन्तव्य इति कथनपरं व्याख्यानं न स्वरसम्। अथवा निश्चेष्टानां हि वधः कुत्सितः, स्वस्य तेनानपकारात्। अयं तु न निश्चेष्टः, किन्तु अस्मद्भननोद्यत एव। अतोऽस्य वधः युक्त एव। पशुदृष्टान्तस्तु निश्चेष्टत्वमात्रे ग्राह्यः ॥

*तस्य भुजयोः छेदनानुकूलदेशकालौ जानन्तौ, तदनुगुणदेशकाललाभात् सुसंहृष्टौ, खड्गाभ्यामेवाच्छिन्दताम्। धनुषोऽप्यपेक्षा नासीदिति भावः। एवमतिदुर्जयत्वेन पूर्वं गृहीतस्य तद्रक्षसः सुखतया तद्बाहुच्छेदानुगुणदेशकाललाभादेव—अत्यन्तसंहृष्टाविति। अत एव 'असक्तं' इत्युक्तिरनन्तरश्लोकेऽपि।

सुसंहृष्टाविति । कदलीदण्डवत् सुखच्छेदनलाभात् ॥

दक्षिणो दक्षिणं बाहुं *असक्तमसिना ततः ।
चिच्छेद रामो वेगेन सव्यं [1]वीरस्तु लक्ष्मणः ॥ ९ ॥

दक्षिणः—समर्थः । अथवा दक्षिणपार्श्वस्थः ॥ ९ ॥

स पपात महाबाहुः छिन्नबाहुर्महास्वनः ।
खं च गां च दिशश्चैव नादयन् जलदो यथा ॥ १० ॥

गां—भुवम् ॥ १० ॥

†स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः ।
दीनः पप्रच्छ तौ वीरौ कौ युवामिति दानवः ॥ ११ ॥

कौ युवामिति पप्रच्छेति । पूर्वं अप्राप्तोत्तरत्वात् पुनः प्रश्नः ॥

इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः ।
[2]शशंस राघवं तस्य कबन्धस्य महात्मनः ॥ १२ ॥
अयं‡मिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः ।
अस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणम् ॥ १३ ॥

इक्ष्वाकुदायाद इति । दशरथपुत्र इत्यर्थः ॥ १३ ॥

[3]मात्रा प्रतिहृते राज्ये रामः प्रव्राजितो वनम् ।
मया सह चरत्येष भार्यया च महद्वनम् ॥ १४ ॥

---

* असक्तं—आस्थारहितं यथा तथा—रा. आयासं विनेति यावत् । † एतावता केनाप्यकृतस्य महासाहसस्य करणात् स्तब्धः सः, स्वशापं च स्मरन्—कौ युवामिति पृच्छति । ‡ इक्ष्वाकुवंशप्राप्तदायरूपराज्याईः—अनेनेक्ष्वाकुवंशप्रभवत्वं, ज्येष्ठत्वं च सूचितम् ।

[1] धीरस्तु—ङ. [2] 'शशंस तस्य काकुत्स्थं कबन्धस्य महाबलः'—ज. [3] अयं श्लोकः कुण्डलितः—ङ.

अस्य देवप्रभावस्य वसतो विजने वने ।
रक्षसाऽपहृता [1]पत्नी यामिच्छन्ताविहागतौ ॥ १५ ॥

यामिच्छन्ताविति । अन्वेषयन्ताविति्यर्थः ॥ १५ ॥

त्वं तु को वा किमर्थं वा कबन्धसदृशो वने ।
आस्येनोरसि दीप्तेन भग्नजङ्घो [2]विवेष्टसे ॥ १६ ॥

विवेष्टस इति । लुठसीति यावत् ॥ १६ ॥

एवमुक्तः कबन्धस्तु लक्ष्मणेनो[3]त्तरं वचः ।
उवाच परमप्रीतः तदिन्द्रवचनं स्मरन् ॥ १७ ॥

शापमोक्षकालप्रत्यभिज्ञानात्—तदिन्द्रवचनमिति । उत्तरसर्ग-प्रतिपाद्यमानम् ॥ १७ ॥

स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि चाप्यहम् ।
दिष्ट्या चेमौ निकृत्तौ मे युवाभ्यां * बाहुबन्धनौ ॥ १८ ॥

बाह्वोः बन्धनं ययोः अंसदेशयोः, तौ बाहुबन्धनौ ॥ १८ ॥

विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद्यथा ।
तन्मे शृणु, नरव्याघ्र! तत्त्वतः शंसतस्तव ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे सप्ततितमः सर्गः

यथा येन कारणेन प्राप्तं तत् कारणं तत्त्वतः तव शंसतो मे सकाशात् शृणु ॥ १९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे सप्ततितमः सर्गः

---

* बाहुरूपबन्धनौ—उत्तरसर्गे 'यदा रामः तव बाहू छेत्स्यते, तदा स्वर्गं गमिष्यसि' इति शापमोचनदानात्, बाहू एव मम बन्धरूपौ जातौ इत्यर्थः इति वा ।

[1] भार्यां–ज. [2] विचेष्टसे–ज. [3] त्तमं–ङ.

एकसप्ततितमः सर्गः

[कबन्धवृत्तान्तः]

पुरा, राम! महाबाहो! महाबल[1]पराक्रमम्।
रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम्।
यथा सोमस्य शक्रस्य सूर्यस्य च यथा वपुः॥ १॥

अथ कबन्धः स्ववृत्तान्तोपदेशपूर्वं मनसा चास्योपकारं चिकीर्षुः शरीरस्य दाहं नियुनक्ति। पुरा रामेत्यादि। अचिन्त्यं—अचिन्त्यवैभवम्। तदेव प्रदर्श्यते—यथा सोमस्येत्यादि॥ १॥

सोऽहं* रूपमिदं कृत्वा लोकत्रासनं महत्।
ऋषीन् वनगतान्, राम! त्रासयामि ततस्ततः॥ २॥

लोकत्रासनं कृत्वेति। तेजोबलवैभवमहिम्नेति शेषः। त्रासयामि इति। अत्रासयमिति यावत्॥ २॥

ततः स्थूलशिरा नाम महर्षिः कोपितो मया।
सञ्चिन्वन् विविधं वन्यं रूपेणानेन धर्षितः॥ ३॥

तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना।
'एतदेव नृशंसं ते रूपमस्तु विगर्हितम्'॥ ४॥

एवमुक्तः इत्येवंशब्दार्थः—एतदेवेत्यादि। एतत्—दिव्यं रूपम्। नृशंसं—क्रूरम्, विगर्हितं चैवास्त्वित्यवदत्॥ ४॥

---

* इदं रूपं—रक्षोरूपं वैभवेन कृत्वा—ति. लोकानां भयजनकमिदं रूपं बुद्धिपूर्वकमेव दर्पाच्छीलया गृहीत्वा ऋषीन् अत्रासयम्।

[1] पराक्रम—ङ.

स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति ।
*अभिशापकृतस्येति तेनेदं भाषितं वचः ॥ ५ ॥
यदा छित्त्वा भुजौ रामः त्वां दहेत् विजने वने ।
तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम् ॥ ६ ॥

श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि, लक्ष्मण।

अभिशापकृतस्येति । मत्कर्तृकप्रधर्षणेन त्वत्कृतस्यास्य शापस्य अन्तः कदा मम भवेत् ? इति याचितः । तेन मयैवं याचितेनेत्यर्थः । स्वं रूपं कीदृशम् ? इत्यतः—विपुलमित्यादि विशेषणत्रयम् ॥ ५–६ ॥

इन्द्र[1]शापादिदं रूपं प्राप्तमेवं रणाजिरे ॥ ७ ॥

एवंवृत्तं मां साक्षात् दनोः पुत्रं विद्धि । ननु शक्रादितुल्यरूपस्य शापवशात् कुत्सिताकारापत्तावपि कुतः कबन्धरूपापत्तिः ? इत्यतस्तदाह—इन्द्रशापादिति । तेन इन्द्रेण सह रणाजिरे—युद्धाङ्गणे ॥ ७ ॥

अहं हि तपसोग्रेण पितामहमतोषयम् ।
दीर्घमायुः स मे प्रादात् [2]ततो मां †विश्रमोऽस्पृशत् ॥

---

* अभिशापशब्देन तन्निमित्तं धर्षणं लक्ष्यते—**गो.** अभिशापः—मिथ्यानिन्दा । मत्कृतमिथ्यानिन्दाफलस्य शापस्येति वा । अनन्तरश्लोकगतं 'श्रिया विराजितं' इत्येतदत्रान्वेतीति भावः । गोविन्दराजेन तु—तर्हि कबन्धरूपप्राप्तिः केन हेतुनेत्यत्राह—श्रियेति—इति व्याख्यातम् । अथवा पूर्वं श्रिया विराजितं दनोः पुत्रं मां विद्धीत्यर्थः ।
† विभ्रमः—अवध्यत्वेऽपि तदधिकक्लेशप्राप्त्यवाप्तज्ञानाभावकृतः । अयमर्थः ११ श्लोके व्यक्तः । इयञ्चासुराणां प्रकृतिरेव ।

[1] कोपा—**ङ.** [2] मानो मां च तदाऽस्पृशत्—**ङ.**

कथं ते इन्द्रेण युद्धे सामर्थ्यम्? कुपितेन भगवता मारणमकृत्वा कुत एतद्रूपसम्पादनं? इत्यत्राह—अहं हीत्यादि। अभिशापतो घोराकारप्राप्त्यनन्तरं उग्रेण तपसा पितामहमतोषयम्। स्वकुलनित्यारातिविष्णविन्द्रादिजिगीषयेति शेषः। विभ्रमः—गर्वः ॥ ८ ॥

दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति?
इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् ॥ ९ ॥

तस्य बाहुप्रमुक्तेन वज्रेण [1] शतपर्वणा।
सक्थिनी [2] चैव मूर्धा च शरीरे संप्रवेशितम् ॥ १० ॥

शतपर्वणा—शतधारेण। सक्थिनी—पृष्ठास्थिफलके। शरीरे मध्यदेहे उदरभागे सक्थ्नोः प्रवेशनं, उरोभागे शिरसः प्रवेशनम् ॥ १० ॥

[*] स मया याच्यमानः सन् नानयद्यमसादनम्।
पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् ॥ ११ ॥

अथ ऊर्ध्वाधरव्यवहाररहितोऽहं मरणमयाचिषं, तन्न श्रुतवानित्याह—स मयेति। किमर्थं नानयदित्यत्राह—पितामहेत्यादि। मम विषये तत् पितामहवचः सत्यमस्तु। न त्वां मारयामीत्यब्रवीदित्यर्थः ॥ ११ ॥

अनाहारः कथं शक्तः भग्न[3]सक्थिशिरोधरः।
वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम् ॥ १२ ॥

---

* एतादृशावस्थापेक्षया मरणमेव वरमिति भावनया मरणं याच्यमानः इन्द्रः, तदशक्यमित्याहेति भावः।

[1] नतपर्वणा—ङ. [2] च शिरश्चैव—ज. [3] स्कन्धशिरोधरः—ङ, स्कन्धशिरोमुखः—ज.

एवमुक्तस्तु मे शक्रः बाहू योजनमायतौ ।
*प्रादादास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत् ॥ १३ ॥

भग्ने सक्थिनी शिरोधरा च यस्य स तथा । कुक्षाविति । तत्स्थमुख इत्यर्थः ॥ १२-१३ ॥

सोऽहं भुजाभ्यां दीर्घाभ्यां [1]विकृष्यास्मिन् वने चरान् ।
सिंह[2]द्विपमृगव्याघ्रान् भक्षयामि समन्ततः ॥ १४ ॥

चरान्—संचारवतः ॥ १४ ॥

स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः ।
छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि ॥ १५ ॥
अनेन वपुषा, [3]राम ! वनेऽस्मिन्, [4]राजसत्तम !
यद्यत् पश्यामि [5]सर्वस्य ग्रहणं साधु रोचये ॥ १६ ॥

सर्वस्य ग्रहणं साधु रोचये—न किञ्चिदपि भक्ष्याभक्ष्यबुद्ध्या त्यजेयमित्यर्थः ॥ १६ ॥

†अवश्यं ग्रहणं रामो मन्येऽहं समुपैष्यति ।
‡इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः ॥ १७ ॥
स त्वं रामोऽसि, भद्रं ते, नाहमन्येन, राघव ।
शक्यो हन्तुं यथातत्त्वं एवमुक्तो महर्षिणा ॥ १८ ॥

---

*इदं उरसि चक्षुषोऽप्युपलक्षणम् । पूर्वसर्गे हि १९ श्लोके तथोक्तम् । †सर्वस्य ग्रहणे हेतुः—अवश्यमिति—रा. एवं सर्वस्यापि प्राप्तस्य ग्रहणाभावे, कतिपय-परित्यागे च, अकस्मात् रामोऽपि न गृहीतः स्यात्, अतश्च तेन बाहुच्छेदोऽपि न स्यादिति भावः । ‡इमां बुद्धिं पुरस्कृत्य देहन्यासे कृतश्रमो भवामि—विकृतदेहत्यागे कृतोद्योगो भवामि—गो. देहन्यासाय सर्वान् पीडयन् जागरूको वर्ते, तदा हि रामेण बाहुच्छेदः स्यादिति भावः । कतकदृष्टया तु इमामित्यादि उत्तरान्वयि ।

[1] समाकृष्य-ङ, संक्षिप्यास्मिन्-ज. [2] द्वीपि-ज. [3] तात-ज. [4] रघुसत्तम-ङ. [5] सर्वत्र-ङ.

अपि च इन्द्रवाक्यविश्वासात् ऋषिवाक्यविश्वासाच्च अवश्यं रामो मम हस्ते ग्रहणमुपैष्यतीति मन्ये—जानामि। यदेवमतः—इमामित्यादि। त्वदेकसाध्या मद्गतिः इत्युक्तरूपिणीमिमां बुद्धिं पुरस्कृत्य स त्वं राम! मम देहन्यासे—देहपरित्यागे कृतश्रमः—कृतयत्नः भव, ते भद्रमस्तु। अपि च त्वयैव उक्तयत्नः कर्तव्यः। कथं? हे राघव! अहं अन्येन—त्वद्व्यतिरिक्तेन केनापि न हन्तुं शक्यः इति यथातत्त्वं परमार्थतत्त्वमेव महर्षिणा उक्तोऽस्मि ॥१७-१८॥

अहं हि *मतिसाचिव्यं करिष्यामि, नरर्षभ!
मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना ॥ १९ ॥

ननु किमर्थः त्वद्देहत्यागयत्नो ममेत्यत्राह—अहं हीति। साचिव्यं—बुद्धिसाहाय्यं करिष्यामि, अपि च तद्विषयं मित्रं चोपदेक्ष्यामि, अपि तु युवाभ्यां वह्निना संस्कृतोऽपि भवेयम् ॥ १९ ॥

एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः।
इदं जगाद वचनं [1]लक्ष्मणस्योपशृण्वतः ॥ २० ॥

एवं मतिसाचिव्यमुक्तो रामस्तु, दहनमपि करिष्ये, मम साचिव्यं कुरु, दग्धेन †त्वया अशक्यवादादित्याशयेनाह—एवमुक्तः इत्यादि। दनुना—दनुसुतेनेत्यर्थः ॥ २० ॥

रावणेन हृता भार्या मम सीता यशस्विनी।
निष्क्रान्तस्य जनस्थानात् सह भ्रात्रा ‡यथासुखम् ॥ २१ ॥

यथासुखं हृतेत्यन्वयः ॥ २१ ॥

---

* स्वस्य गमनशक्तेरभावादाह—मतिसाचिव्यमिति। † 'युवाभ्यां संस्कृतः मतिसाचिव्यादिकं करोमि' इति तेनोक्ते, दाहानन्तरं कथमयं ब्रूयादिति मन्वानो रामः दाहात्पूर्वमेव तत् पृच्छतीत्यर्थः। सोऽप्युचितं उत्तरं दास्यति—उत्तरत्र २७-२८ श्लोकयोः। ‡ यथासुखं निष्क्रान्तस्य—गो.

[1] लक्ष्मणस्य च पश्यतः—ज.

नाममात्रं तु जानामि न रूपं तस्य रक्षसः ।
निवासं वा प्रभावं वा वयं तस्य *न विद्महे ॥ २२ ॥

नाममात्रमिति । †आप्तवाक्यादिति शेषः ॥ २२ ॥

शोकार्तानामनाथानां एवं विपरिधावताम् ।
कारुण्यं सदृशं कर्तुं ‡[1] उपकारेण वर्तताम् ॥ २३ ॥

उपकारेण वर्तितुं वर्तमानानां अस्माकं सदृशं—उचितं कारुण्यं—अनुग्रहं कर्तुमर्हसि ॥ २३ ॥

काष्ठान्यादाय शुष्काणि काले भग्नानि कुञ्जरैः ।
धक्ष्यामस्त्वां वयं, वीर ! श्वभ्रे महति कल्पिते ॥ २४ ॥

दाहसिद्धिविषये त्वया चिन्ता न कार्येत्याह—काष्ठानीति । कल्पिते—सज्जे ॥ २४ ॥

स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ।
कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः ॥ २५ ॥

कल्याणं—तत्त्वाख्यानरूपमित्यर्थः ॥ १५ ॥

एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ।
प्रोवाच कुशलो वक्तुं §वक्तारमपि राघवम् ॥ २६ ॥

---

*न विद्महे, अहं मत्परिजनाश्चेत्यर्थः—गो. वस्तुतः लोकोक्तथा बहुवचनम् । अत एवोत्तरश्लोकेष्वपि बहुवचनम् । †जटायुवचनादिति यावत् । ‡उपकारेण—तव निजरूपप्राप्त्यर्थेन । §वक्तारमपि राघवं वक्तुं कुशलः—गो. एवं इत्यस्यावृत्त्या एवं वक्तारमपि राघवं उवाच । राघववचसः साक्षादुत्तरदानेऽशक्त्या मध्ये स्वयमेवैवमाहेति वा ।

[1] उपकारे च—ङ.

एवं पृष्टः दाहमेव मे दिव्यज्ञानसाधनं, तत् कुरुत, ततः परं सर्वं वक्ष्यामीत्याह—एवमुक्त इत्यादि ॥ २६ ॥

दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् ।
यस्तां [1] ज्ञास्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः ॥ २७ ॥

यस्तामिति । सखेति शेषः ॥ २७ ॥

[2] योऽभिजानाति तद्भक्तः तं वक्ष्ये, राम ! तत्परम् ।
अदग्धस्य तु विज्ञातुं शक्तिरस्ति न मे, प्रभो ! ॥ २८ ॥
*राक्षसं तं महावीर्यं सीता येन हृता तव ।
विज्ञानं हि [3] मम भ्रष्टं शापदोषेण, राघव ! ॥ २९ ॥
स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ।

विज्ञानं—अतीन्द्रियविषयकम् । स्वकृतेनेत्यादि । अनुचितेनेति शेषः ॥ २९ ॥

किन्तु यावन्न यात्यस्तं सविता श्रान्तवाहनः ॥ ३० ॥
तावन्मामवटे क्षिप्त्वा दह, राम ! यथाविधि ।
दग्धस्त्वयाऽहमवटे न्यायेन, रघुनन्दन ! ॥ ३१ ॥
वक्ष्यामि [4] तमहं, वीर ! यस्तं ज्ञास्यति राक्षसम् ।
†तेन सख्यं च कर्तव्यं न्यायवृत्तेन, राघव !
कल्पयिष्यति ते [5] प्रीतः साहाय्यं लघु [6] विक्रमः ॥ ३२ ॥

---

* तं विज्ञातुमिति पूर्वेणान्वयः । † त्वया एवं कथनेऽपि सः मह्यं साहाय्यं कुर्यादित्यत्र कः समाश्वासः ? इत्यत्राह—तेनेत्यादि । तदनुगुणतया त्वया वर्तितव्यमिति भावः ।

[1] वक्ष्यति—ज. [2] इदं कुण्डलितं—ङ. [3] परिभ्रष्टं—ङ, महत् भ्रष्टं—ज. [4] तं महावीर—ज. [5] वीर—ज. [6] विक्रम—ज.

यः तं राक्षसं ज्ञास्यति, तेन सहायेनेत्यर्थः । न्यायवृत्तेन—सच्चरित्रेण ॥ ३१–३२ ॥

न हि तस्यास्त्यविज्ञातं त्रिषु लोकेषु, राघव !
सर्वान् [1] परिवृतो लोकान् पुराऽसौ * कारणान्तरे ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे एकसप्ततितमः सर्गः

असौ—मया वक्ष्यमाणः । कारणान्तरे—किञ्चिन्निमित्तान्तरे । अलिङ्ग(३३ १/२)मानः सर्गः ॥ ३३ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे एकसप्ततितमः सर्गः

---

* कारणान्तरे—अत्र किष्कि. 10-27 श्लोको द्रष्टव्यः । अत्र गोविन्दराजः—अयं कबन्धः रावणमेव न जानाति, सुग्रीवं तु जानाति । किन्तु तन्नाम न कथितवान् । दाहात्पूर्वं कथने कुत्सितशरीरदहने रामो वैमनस्यं कुर्यादिति—इत्याह । 'न हि तस्यास्त्यविदितं' 'सर्वान् परिवृतो लोकान्' इत्यादिसुग्रीवस्वरूपं जानतः तन्नामापि ज्ञातमेव स्यात् । अतः तदकथने रामोपेक्षाभयमेव हेतुः स्यादिति भावनया तेन तथा व्याख्यातं भाति । वस्तुतस्तु—रामेण सीतापहर्तुः रावणस्यैव स्थानादिकं पृष्टम् (श्लो. २३) । तच्च तेन न ज्ञातम् । यदि च दिव्यज्ञानेन ज्ञात्वा वक्तव्यं, तर्हि दहनमावश्यकम् । अदग्धस्य तं विज्ञातुं शक्तिर्नास्त्येव । 'दाहानन्तरं यदि दिव्यचक्षुषा ज्ञास्यामि, तर्हि वदेयं' इति कबन्धाशयः । ननु तर्हि 'यस्तां ज्ञास्यति तं वक्ष्ये दग्धः स्वं देहमाश्रितः' इत्युक्तिः कथम् ? इति चेत्—नात्रानयोर्हेतुहेतुमद्भावः विवक्षितः । किन्तु वस्तुस्थितिकथनमात्रम् । सूर्यास्तमनस्यातिसन्निहितत्वात् ततः पूर्वमेव दाहस्य कर्तव्यत्वेन, बहुवाक्यप्रतिपादनीयत्वात् विवक्षितांशस्य, अस्तमयात्पूर्वं प्रथमं दहनं कुरु, ततः तन्मित्रं वक्ष्यामीति यथावस्थितकथनमिदं, न तु सुग्रीववृत्तान्तोऽपि दिव्यज्ञानेनैव वक्तव्यमित्यभिप्रायः । दहनात् पूर्वमेव किल बहु वक्ष्यति सुग्रीवमधिकृत्यैव । अतः विलम्बासहत्वत एव 'दग्धः स्वं रूपमास्थितः' इत्युक्तिः । दाहानन्तरं रावणविषयकवृत्तान्ताकथनं तु, तदानीमप्यज्ञानात्, मित्रद्वारैव कार्यस्य साधनीयत्वनियमज्ञानाद्वा स्यादिति न कोऽपि विरोधः ॥

[1] परिसृतो–ङ.

द्विसप्ततितमः सर्गः

[सीताप्राप्त्युपायकथनम्]

एवमुक्तौ तु तौ वीरौ कबन्धेन नरेश्वरौ ।
[1]गिरि[2]प्रदरमासाद्य * पावकं विससर्जतुः ॥ १ ॥

अथ संस्कृतेन स्वरूपं प्रत्यापन्नेन रामस्य मित्रोपदेशः । एवमुक्ता-वित्यादि । प्रदरं—श्वभ्रम् । आसाद्य—प्राप्य । कबन्धमिति शेषः ॥१॥

लक्ष्मणस्तु महोल्काभिः ज्वलिताभिः समन्ततः ।
चितामादीपयामास स प्रजज्वाल सर्वतः[2] ॥ २ ॥
तच्छरीरं कबन्धस्य घृतपिण्डोपमं महत् ।
मेदसा [3]पच्यमानस्य मन्दं दहति पावकः ॥ ३ ॥
स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः ।
विरजे वाससी बिभ्रत् मालां दिव्यां महाबलः ॥ ४ ॥

विरजे—विरजस्के इति यावत् ॥ ४ ॥

ततश्चिताया वेगेन भास्वरो [4]विमलाम्बरः ।
उत्पपाताशु संहृष्टः सर्वप्रत्यङ्गभूषणः ॥ ५ ॥

चिताया उत्पपातेति अन्वयः । सर्वेषु प्रत्यङ्गेषु करचरणादिषु भूषणं यस्य स तथा ॥ ५ ॥

---

* आसाद्य-प्राप्य, तत्र चितां निर्मायेति, कबन्धशरीरं संस्थाप्य चेति शेषः-रा.

[1] झ पुस्तके एतत्स्थाने—"न्यायेन कृत्वा महतीं चितां गिरिगुहोपमाम् । ततः कबन्धमारोप्य चितां ज्वलितचेतसौ । बाहू च सुमहाबाहू योजनायतविभ्रमौ ॥" इति दृश्यते । [2] एतदनन्तरं झ पुस्तके—अधिकं—"तां प्रेक्ष्य सर्वतो दीप्तां चितां दृढधनुर्धरः । उत्स्मयान इदं वाक्यं राघवं लक्ष्मणोऽब्रवीत् ॥ दग्धो जटायुः पूर्वं तु सीतामन्वेषता त्वया । अयं द्वितीयो निर्दग्धः तृतीयं किं नु धक्ष्यसि ॥ महाभ्रशिखरप्रख्यं कबन्धमनलो महान् । अन्तरिक्षं महोल्काभिः आवृणोत् स सहस्रशः ॥" इति दृश्यते । [3] दह्यमानस्य-ङ. [4] विरजाम्बरः-ज.

विमाने भास्वरे तिष्ठन् हंसयुक्ते यशस्करे ।
प्रभया च महातेजाः दिशो दश विराजयन् ॥ ६ ॥
सोऽन्तरिक्षगतो रामं कबन्धो वाक्यमब्रवीत् ।

हंसयुक्ते विमाने इत्यनेन ब्रह्मात्मना रामेण साक्षात् संस्कृतत्वात् जटायुवदस्यापि ब्रह्मलोकावाप्तिः सूचिता ॥ ६ ॥

शृणु, राघव ! तत्त्वेन यथा सीतामवाप्स्यसि ॥ ७ ॥
राम ! षड्युक्तयो लोके याभिः सर्वं विमृश्यते ।

तत्त्वेन—परमार्थतः । उच्यमानामिति शेषः । अथ यत् प्राक् प्रत्यायि, उपायं तद्विषयं मित्रं चोपदेक्ष्यामीति, तन्निर्वर्तयति—षडित्यादि । युक्तिदशोपायाः पर्यायाः । हे राम ! लोके कार्यसिद्धये राज्ञां प्रसिद्धाः षड्युक्तयः—षडुपायाः सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः सन्ति । याभिर्युक्तिभिः सर्वं राज्ञां कृत्यं विमृश्यते—विमृश्य प्राप्यते ॥ ७ ॥

[1]परिभ्रष्टो *दशान्तेन दशाभागेन सेव्यते ॥ ८ ॥

---

*दशा नाम दौरवस्थरूपावस्था, तस्या अन्तः—परिपाकः, तेन परिमृष्टः—संस्पृष्टः पुरुषः दशाभागेन—दशायाः भागः—परिपाकरूपः अंशः यस्य तेन सेव्यते । अस्तु, प्रकृते किमायातं ? तत्राह—दशाभागगत इति । हे राम सलक्ष्मणस्त्वं दशाभागगतः—दुर्दशापन्नः अत एव हीनश्च । कुतः ? यत्कृते—येन कारणेन दारप्रधर्षणं नाम व्यसनं प्राप्तं ; तेन त्वं दशाभागगतः । ततोऽपि किमित्यत्राह—तदिति । दशाभागगतेन त्वया सः—तादृशः—दशाभागगतः कश्चित् सुहृत् कार्यः—गो. यद्वा—षड्युक्तयः—प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावप्रमाणानि ; पार्थसारथिमिश्रैः शास्त्रदीपिकायां युक्तिशब्दस्य प्रमाणपरतया व्याख्यातत्वात् । हे राम लोके षड्युक्तयः—षट्प्रमाणानि सन्ति ; याभिः प्रत्यक्षादिभिः सर्वं वस्तु विमृश्यते—ज्ञाप्यते । सर्वप्रमाणैः क्षीणः पुरुषः क्षीणेन पुरुषेण सेव्यत इत्यर्थः—तो.

[1] परिमृष्टो—ङ, ज.

दशाभागगतो हीनः त्वं हि रामः सलक्ष्मणः ।
यत्कृते व्यसनं प्राप्तं त्वया दार[1]प्रधर्षणात् ॥ ९ ॥

ताः सन्ति, किं ततः ? इत्यतः—परिभ्रष्ट इति । परिभ्रष्टः—अर्थात् भ्रष्टः राजा दशान्तेन दशानां—उपायानां षण्णां अन्तः तथा तेन—अन्तिमोपायरूपेण दशाभागेन—उपायभागेन मित्रसमाश्रयलक्षणेनैव सेव्यते । प्रकृते त्वं दशाभागगतोऽपि—अन्तिमोपायाश्रययोग्यतां गतोऽपि तेनान्तिमोपायेन, हे राम ! सहलक्ष्मणस्त्वं हीनः, यत्कृते यदाश्रयाभावापराधादेव दारप्रधर्षणात् व्यसनं प्राप्तम् ॥

तदवश्यं त्वया कार्यः स सुहृत्, सुहृदां वर !
अकृत्वा हि न ते सिद्धिं अहं पश्यामि चिन्तयन् ॥१०॥

यदेवमतः—तत्—तस्मात् अवश्यं त्वया सुहृत्समाश्रयणं कार्यम् । अवश्यमित्यत्र हेतुमाह—अकृत्वेत्यादि ॥ १० ॥

श्रूयतां, राम ! वक्ष्यामि सुग्रीवो नाम वानरः ।
भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना ॥ ११ ॥
ऋष्यमूके गिरिवरे पम्पापर्यन्तशोभिते ।
*निवसत्यात्मवान् वीरः चतुर्भिस्सह वानरैः ॥ १२ ॥

एवं समाश्रयणोपायं अद्य भ्रष्टदशोचितमुपदिश्य तद्विषयं चोपदिशति—श्रूयतामिति । पम्पायाः पर्यन्ते शोभितः तथा । चतुर्भिरिति । मन्त्रिभिरिति शेषः ॥ ११–१२ ॥

वानरेन्द्रो महावीर्यः [2]तेजोवान् अमितप्रभः ।

---

* श्लोकद्वयमेकान्वयि–रा.

[1] प्रधर्षणम्–ङ, ज. [2] तेजसा च रविप्रभः–ङ.

सत्यसन्धो विनीतश्च धृतिमान् मतिमान् महान् ॥ १३ ॥

तेजोवानिति । तेजस्वीति यावत् ॥ १३ ॥

दक्षः प्रगल्भः द्युतिमान् महाबलपराक्रमः ।
भ्रात्रा विवासितः, [1]राम ! राज्यहेतो[2]र्महाबलः ॥ १४ ॥
स ते सहायो मित्रं च सीतायाः परिमार्गणे ।
भविष्यति हि ते, राम ! मा च शोके मनः कृथाः ॥१५॥

हि ते इति पदद्वयम् ॥ १५ ॥

भवितव्यं हि यच्चापि न तच्छक्यमिहान्यथा ।
कर्तुं, इक्ष्वाकुशार्दूल ! कालो हि दुरतिक्रमः ॥ १६ ॥

यच्चापि भवितव्यमिति । राज्यभ्रंशवनवासदारापहारादि दुःखं तन्न शक्यमिह संसारे केनापि अन्यथा कर्तुं, *अतः शोके मनः मा कृथाः ॥ १६ ॥

गच्छ शीघ्रमितः, राम ! सुग्रीवं तं महाबलम् ।
वयस्यं तं कुरु क्षिप्रं इतो गत्वाऽथ, राघव ! ॥ १७ ॥
अद्रोहाय समागम्य दीप्यमाने विभावसौ ।

अद्रोहाय—परस्परद्रोहपरिहारार्थमित्यर्थः । दीप्यमाने विभावसौ—तत्सन्निधौ तत्साक्षिकतया तं वयस्यं कुर्विति समसंधिः ॥ १७ ॥

स च ते नावमन्तव्यः सुग्रीवो वानराधिपः ॥ १८ ॥
कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान् ।

---

* अतः शोके मनः मा कृथाः इति शेषः—ति. पूर्वस्थितस्यैवावृत्तिर्वा ॥

[1] वीर—ज. [2] र्महात्मना—ज.

न तेऽवमन्तव्य इति । अयं तिर्यक् किमनेनेति न त्वया तस्यावमतिः कार्येत्यर्थः । मित्रापेक्षा तस्याप्यस्तीत्याह—सहायार्थीति ॥

*शक्तौ ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितम् ॥ १९ ॥
†कृतार्थो वाऽकृतार्थो वा तव कृत्यं करिष्यति ।

कृतार्थो वेति । त्वया कृतस्वप्रयोजनः, करिष्यमाणस्वप्रयोजनोऽपीत्यर्थः ॥ १९ ॥

‡स ऋक्षरजसः पुत्रः पम्पामटति शङ्कितः ॥ २० ॥
भास्करस्यौरसः पुत्रः वालिना §कृतकिल्बिषः ।

ऋक्षरजसः पुत्र इति । सुग्रीवपिता ऋक्षरजाः । पम्पामटति-तत्तीरे पर्यटति । शङ्कित इति । वालिनामिति शेषः । §कृतकिल्बिषः—कृतवैरः ॥ २० ॥

‖सन्निधायायुधं क्षिप्रं ऋष्यमूकालयं कपिम् ॥ २१ ॥
कुरु, राघव! सत्येन वयस्यं वनचारिणम् ।

---

*ननु आवाभ्यामशक्ताभ्यां कस्तस्य सहाय इत्यत्राह—शक्तौ हीति—**ति.** †कृतार्थः—कृतप्रयोजनो वा, अकृतार्थो वा तव कृत्यं—कार्यं करिष्यति। एतेन सुग्रीवस्य सत्यप्रतिज्ञत्वं सूचितम्—**रा.** भवता यावच्छक्ति अद्रोहेण तस्य चिकीर्षितं संपादनीयम्। तत्र फलप्राप्तावप्राप्तौ वा तव साहाय्यं तु सोऽपि अद्रोहेण कुर्यादिति भावः। भवदिष्टप्राप्तिस्तु तद्द्वारा भविष्यतीत्यत्र न संशय इति यावत्। ‡ऋक्षरजसः क्षेत्रज इत्यर्थः—**ति.** भास्करस्य—सूर्यस्यौरसः, ऋक्षरजसः—तदभिधस्य पुत्रः—क्षेत्रजः—**रा.** ऋक्षरजास्तन्मातेत्याहुः—**गो.** 'सुग्रीवं जनयामास तपनस्तपतां वरः' (बाल. 17–10) इति श्लोकोऽत्र स्मर्तव्यः। उत्तरकाण्डीय-प्रक्षिप्तसर्गेषु सुग्रीवायुत्पत्तिर्वर्णिता द्रष्टव्या। 75–26 श्लोकश्चात्र द्रष्टव्यः। §कृतकिल्बिषः—कृतव्यथः इति वा। ‖सख्यं च न केवलमग्निसाक्षिकम् ; आयुधं च सन्निधाप्य कर्तव्य-मित्याह—सन्निधायेति—**गो.** अथवा 'वालिना कृतकिल्बिषः' इति अत्र कथनात्,

अपि च आयुधमपि अग्निसन्निधौ निधाय—निक्षिप्य तेनापि सत्येन च तं वयस्यं कुरु ॥ २१ ॥

स हि स्थानानि सर्वाणि कात्स्न्र्येन कपिकुञ्जरः ॥ २२ ॥
नरमांसाशिनां लोके नैपुण्यादधिगच्छति ।
नरमांसाशिनामिति राक्षसानामित्यर्थः ॥ २२ ॥

न तस्यादितं लोके किञ्चिदस्ति हि, राघव ! ॥ २३ ॥
* यावत् सूर्यः प्रतपति सहस्रांशुरिरिन्दम !
स नदीन् विपुलान् शैलान् गिरिदुर्गाणि कन्दरान् ॥२४॥
[1]अन्वीक्ष्य वानरैः सार्धं पत्नीं तेऽधिगमिष्यति ।
अधिगमिष्यति— ज्ञास्यति ॥ २४ ॥

'वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत्' (किष्कि. 2–1) 'ततस्तं भयसंविग्नं वालिकिल्बिषशङ्कितम्' (13) इति वक्ष्यमाणत्वाच्च, भवतां आयुधदर्शनमात्रेण सुग्रीवः भीतः दूरतोऽपसर्पेत्। अतः आयुधौ यत्र कुत्रचित्सन्निधाय—निक्षिप्य गम्यताम्–इति स्याद्वा । तर्हि कथं तौ सायुधावेव गतौ इति चेत्—आयुधदर्शनेन सुग्रीवस्य यथोद्वेगो न स्यात् तथा गमनस्यैवाभिप्रेतत्वेन, तथैव गमनात्। 'इत्युक्तस्तद्वनं सर्वं विचचार सलक्ष्मण । कुद्धो रामः शरं घोरं संधाय धनुषि क्षुरम्' (अर. 67–8) इति सदा सज्यधनुष्ट्वेनैव रामसञ्चारप्रतीत्या तादृशभयानकाकारपरित्यागेन गमनस्यैवाभिप्रेतत्वात् । सुग्रीवस्तु तादृशमपि रामं दृष्ट्वा हृदयदौर्बल्यात् भीतो बभूव। अत एव हनुमानपि—'नं क्रूरदर्शनं क्रूरं नेह पश्यामि वालिनम्' (किष्कि. 2–15) 'अहो शाखामृगत्वं ते व्यक्तमेव प्लवङ्गम' (17) इत्युपहसति । सुग्रीवसख्यं च अग्निसाक्षिकं केवलं कृतवानित्यप्यत्रावधेयम्। सुग्रीवः तादृशभयाक्रान्तो बभूवेति सूचनं परमोद्देश्यमिति सारम् ॥ * अत एव उत्तरत्र वानरसंप्रेषणसमये—'अभास्करममर्यादं न जानीमस्ततः परम्' इति सुग्रीवो वदति ॥

[1] अन्विष्य—ज्ञ.

वानरांश्च [1] महाकायान् प्रेषयिष्यति, राघव ! ॥ २५ ॥
* दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीम् ।
† [2] स यास्यति वरारोहां [3] निर्मलां रावणालये ॥ २६ ॥

रावणालये शोचतीमित्यन्वयः ॥ २६ ॥

स मेरुशृङ्गाग्रगतामनिन्दितां
प्रविश्य पातालतलेऽपि वाऽऽश्रिताम् ।
प्लवङ्गमानां [4] प्रवरस्तव प्रियां
निहत्य रक्षांसि पुनः प्रदास्यति ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे द्विसप्ततितमः सर्गः

अनिन्दितां – निर्मलां इति वचनं रामस्य सीताशुद्धवप्रत्यभिज्ञानार्थम् । सारी(२७)मानः सर्गः ॥ २७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे द्विसप्ततितमः सर्गः

---

* अनेन ज्ञायते—सर्वदिक्षु रावणालयास्सन्ति । तत्र किंदिक्स्थरावणालये इति ज्ञातुं सर्वदिग्विचयनम्- ति. रा. चौर्येण सीताया आनीतत्वात्, यथा लोके चोरितं वस्तु चोरः न स्वगृहे स्थापयेत्, किन्त्वन्यत्रैव, तथा रावणेन दक्षिणाभिमुखगमनेऽपि कुत्र सीतां निक्षिप्तवानित्यज्ञानात् सर्वदिगन्वेषणम् । † वानरैरन्विष्य रावणालये स्थितां वरारोहां प्रति सः—सुग्रीवः स्वयं यास्यति । स्वयमेव त्वया सह तां मोचयितुं सहकरिष्यतीति भावः । 'निर्मलां' इत्यनेन सीतापरिशुद्धये चिन्तयतो रामस्य समाधानमुच्यते । अस्यैव विवरणं अनन्तरश्लोकः ॥

[1] महाभागान्-ङ. [2] अन्वेष्यति-ज [3] मैथिलीं-ज. [4] ऋषभ-ज.

त्रिसप्ततितमः सर्गः

[ऋष्यमूकमार्गकथनम्]

निदर्शयित्वा रामाय सीतायाः [1]परिमार्गणे ।
वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत् ॥ १ ॥

अथ मार्गोपदेशपूर्वं सुग्रीवावस्थानदेशमुक्त्वा कबन्धस्य निर्याणम् । निदर्शयित्वेत्यादि । परिमार्गण इति । उपायमिति शेषः ॥ १ ॥

एषः, राम! [2]शिवः पन्थाः यत्रैते पुष्पिता द्रुमाः ।
प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः ॥ २ ॥
जम्बूप्रियालपनसप्लक्षन्यग्रोधतिन्दुकाः ।
अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः ॥ ३ ॥
धन्वना नागवृक्षाश्च तिलका नक्तमालकाः ।
नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः ॥ ४ ॥
*[3]अग्निमुख्या अशोकाश्च सुरक्ताः पारिभद्रकाः ।

धन्वनाः—धवाः । नागवृक्षाः—नागकेसराः । अग्निमुख्याः—अरुष्कराः । सुरक्ताः—रक्तचन्दनाः । पारिभद्रकाः—मन्दाराः ॥ ३-४ ॥

†तानारुह्याथ वा भूमौ पातयित्वा च तान् बलात् ॥ ५ ॥

---

* अग्निमुख्याः—भल्लातकीवृक्षाः । पारिभद्रकाः—निम्बाः–गो. † पातयित्वा–नमयित्वा–गो. उत्तरार्धोच्यमानफलग्रहणशेषतया तानारुह्येत्याद्युच्यत इति प्रतिभाति। उत्तरत्रा(९)प्येवमेव दृश्यते ।

[1] प्रतिपादने–ङ. [2] गिरेः–ङ. [3] अशोकास्त्वतिमुक्ताश्च सुभद्राः पारिभद्रकाः–ङ.

फलान्यमृतकल्पानि भक्षयन्तौ गमिष्यथः ।
तदतिक्रम्य, काकुत्स्थ! वनं पुष्पितपादपम् ॥ ६ ॥

नन्दनप्रतिमं चान्यत् कुरवो ह्युत्तरा इव ।
[1]सर्वकामफला वृक्षाः पादपास्तु मधुस्रवाः ॥ ७ ॥

सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा ।
फलभारानतास्तत्र महाविटपधारिणः ॥ ८ ॥

शोभन्ते [2]सर्वतस्तत्र [3]मेघपर्वतसन्निभाः ।
तानारुह्याथवा भूमौ पातयित्वा यथासुखम् ॥ ९ ॥

फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति ।
चङ्क्रमन्तौ वरान् देशान् शैलाच्छैलं वनाद्वनम् ॥ १० ॥

ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः ।
*अशर्करामविभ्रंशां समतीर्थामशैवलाम् ॥ ११ ॥

राम! सञ्जातवालूकां कमलोत्पल[4]शालिनीम् ।

(समे–समभूमौ?) चङ्क्रमन्तौ—चङ्क्रममाणाविति यावत् । पुष्करिणीं—नदीमित्यर्थः । अविभ्रंशां—शैवालाद्याश्लेषतः पादादिभ्रंशाहेतुभूताम् । समतीर्थां—समावताराम् । सञ्जातवालूकामिति दीर्घः छान्दसः ॥ १०–११ ॥

---

*अविभ्रंशां—शैवालासम्बन्धेन पादभ्रंशाहेतुम्–ति. न विभ्रंशः—अधः पतनकारकः कर्दमः तीरे यस्य ताम्–रा. अविभ्रंशां–अशिथिलतटाम् । समतीर्थां—अवतारस्थले अतिनिम्नत्वात्यगाधत्वरहितां–गो.

[1]सर्वकालफला यत्र–ज. [2]तरव–ङ. [3]महापर्वत–ङ. [4]मालिनीम्–ङ, शोभिताम्–ज.

तत्र हंसाः *प्लवाः क्रौञ्चाः कुरराश्चैव, राघव! ॥ १२ ॥
वल्गुस्वना निकूजन्ति पम्पासलिल[1]गोचराः।

प्लवाः—मण्डूकाः ॥ १२ ॥

नोद्विजन्ते नरान् दृष्ट्वा [2]वधस्याकोविदाः [3]शुभाः ॥ १३ ॥
घृतपिण्डोपमान् स्थूलान् तान् द्विजान् भक्षयिष्यथः।

वधस्य अकोविदाः—वधमजानाना इत्यर्थः। द्विजान्—पक्षिणः ॥ १३ ॥

रोहितान् [4]चक्रतुण्डांश्च [5]नडमीनांश्च, राघव! ॥ १४ ॥
पम्पायामिषुभिर्मत्स्यान् तत्र, राम! वरान् हतान्।
निस्त्वक्पक्षान् †अयस्तप्तान् ‡[6]अकृशानेककण्टकान् ॥
तव भक्त्या समायुक्तो लक्ष्मणः संप्रदास्यति।

रोहितः—पितृप्रियः मत्स्यभेदः। चक्रतुण्डाः—चक्राङ्गाः मत्स्याः। 'नळमीनः चिलिचिमः चक्राङ्गः'। वरान्—श्रेष्ठान्। अयस्तप्तान्—अयश्शूलाग्रप्रोततया तप्तान्-पक्वानित्यर्थः। कृशाः अनेककण्टकाश्च येषां न विद्यन्ते ते, अकृशानेककण्टकाः ॥ १४-१५ ॥

---

*प्लवाः—मण्डूकाः, हंसभेदा वा—गो. †अयस्तप्तान्—अयसा वह्नौ तप्तान्—परिपक्वान् यान् भक्ष्यान् मूलफलसमूहान् तव भक्त्या प्रदास्यति, तान् द्विजान् पक्षिणः न रोहितादींश्च भक्षयिष्यथः भोजयिष्यथः—रा. ‡अकृशानेककण्टकान् कृशाः—कृशवत्तीक्ष्णाः अनेककण्टकाः येषां न विद्यन्ते तथोक्तान्—ती.

[1] वासिनः—ङ. [2] अवस्था—ङ. [3] पुरा—ज. [4] चक्र—ङ. [5] नल—ज. [6] अकृशा—ङ.

*भृशं ते खादतो मत्स्यान् पम्पायाः पुष्पसञ्चये ॥१६॥
पद्मगन्धि शिवं वारि [2]सुखशीतमनामयम् ।
उद्धृत्य [3]स तदाऽक्लिष्टं रौप्यस्फटिकसन्निभम् ॥ १७ ॥
असौ पुष्करपर्णेन लक्ष्मणः पाययिष्यति ।

पुष्पसंचय—पद्मादिपुष्पसमूहमध्ये वर्तमानं, अत एव सुगन्धि, अक्लिष्टं—मलादिकश्मलरहितम् । पुष्करपर्णेनेति । पद्मपत्रेण गृहीत्वेति शेषः ॥ १६-१७ ॥

स्थूलान् गिरिगुहाशय्यान् [4]वराहान् वनचारिणः ॥१८॥
[5]सायाह्ने विचरन् राम ! दर्शयिष्यति लक्ष्मणः ।
अपां लोभादुपावृत्तान् [6]वृषभानिव नर्दतः ॥ १९ ॥
[7]रूपान्वितांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम !

गिरिगुहायां शय्या-शयनं येषां ते तथा ॥ १८-१९ ॥

सायाह्ने विचरन्, राम ! [8]विटपी माल्यधारिणः ॥ २० ॥
[9]पद्मषण्डयुतं स्वादु कूजत्पक्षिगणैर्युतम् ।
[10]शीतोदकं च पम्पायाः दृष्ट्वा शोकं विहास्यसि ॥ २१ ॥

विटपी । व्यत्ययात् प्रथमैकवचनम् ; विटपिन इति यावत् । माल्यानि—पुष्पाणि साधु धरन्तीति तथा । दृष्ट्वेत्युत्तरेण सम्बन्धः ॥

---

* पुष्पसञ्चये—कमलपुष्पसमूहसमीपे । मत्स्यान्—मत्स्यवेन प्रतीयमानान्, फलादीनित्यर्थः, भृशं खादते पक्ष्यादये पायविष्यति—रा.

[1] संयुतम्—ङ. [2] स्वादु—ङ. [3] सततक्लिष्टं—ङ. [4] वानरान्—ज. [5] इदमर्धं न—ङ. [6] वृषभान् महिषांस्तथा—ङ. [7] स्थूलान् पीतांश्च—ज. [8] विटपीन्—ङ. [9] इदमर्धं न—ङ. [10] शिवोदकं—ज.

[1]सुमनोभिश्चितांस्तत्र तिलकान् नक्तमालकान् ।
उत्पलानि च फुल्लानि पङ्कजानि च, राघव ! ॥ २२ ॥
न तानि कश्चिन्माल्यानि [2]तत्रारोपयिता* नरः ।
न च वै [3]म्लानतां यान्ति न च शीर्यन्ति, राघव ! ॥

तत्र कश्चिदपि नरः तानि माल्यानि नारोपयिता—गृहीत्वा ग्रथिता न । महावनत्वात् पुष्पबाहुल्याच्च ॥ २३ ॥

मतङ्गशिष्याः तत्रासन् ऋषयः सुसमाहिताः ।
तेषां भाराभितप्तानां वन्यमाहरतां गुरोः ॥ २४ ॥
ये प्रपेतु[4]र्महीं तूर्णं शरीरात् स्वेदबिन्दवः ।
† तानि जातानि माल्यानि मुनीनां तपसा तदा ॥ २५ ॥
स्वेदबिन्दुसमुत्थानि न [5]विनश्यन्ति, राघव !

अम्लानाशीर्णीकारणं—मतङ्गशिष्या इत्यादि । भाराभितप्तानां—गुर्वर्थमाह्रियमाणवन्यपदार्थभारेण श्रान्तानामित्यर्थः । तानि माल्यानीति विधेयापेक्षया नपुंसकत्वम् ॥ २४–२५ ॥

[6]तेषामद्यापि तत्रैव दृश्यते परिचारिणी ॥ २६ ॥
‡ श्रमणी शबरी नाम, काकुत्स्थ ! चिरजीविनी ।
§ त्वां तु धर्मे स्थिता नित्यं [7]सर्वभूतनमस्कृतम् ॥ २७ ॥

---

* मतङ्गशिष्यप्रभावाद्धा अनारोपणम् गो. † स्वेदबिन्दवः वायुना वृक्षोपरि नीताः माल्यानि जातानीत्याशयः—गो. 'न विशीर्यन्ति' इति अविशरणस्योक्तत्वादेवं व्याख्यातं स्यात् । ‡ मतङ्गस्य, तच्छिष्याणां वृत्तत्वेऽपि शबर्या अवस्थाने बीजं—चिरजीविनीति । बहुवृद्धेति यावत् । तस्याः सन्यासेऽनधिकारात् श्रमणीत्वम् । § या दृश्यते, सा त्वां दृष्ट्वा—इत्यन्वयः । श्लोकद्वयमेकान्वयम् ।

[1] सुमनोभिश्चितास्तत्र तिलका नक्तमालकाः—ज. [2]तत्र गोपयिता—ङ. [3]ग्लानतां—ज. [4]र्महीरेणौ—ङ. [5] विशीर्यन्ति—ङ. [6]तेषां गतानामद्यापि—ङ. [7] सर्वलोक—ङ.

दृष्ट्वा देवोपमं, राम ![1] देवलोकं गमिष्यति ।

शबरीत्याख्या श्रमणी—तापसीति विशेषणम् । नामशब्दः प्रसिद्धौ । त्वां दृष्ट्वा देवलोकं गमिष्यति—योगसिद्धत्वतः त्वां त्वदायतिं चावगत्य त्वत्सूचनानन्तरं त्वदनुग्रहादहमिव आदिदेव-ब्रह्मलोकं जिगमिषतीत्यर्थः ॥ २६–२७ ॥

[2] ततस्तद्राम ! पम्पायास्तीरमाश्रित्य पश्चिमम् ॥ २८ ॥
आश्रमस्थानमतुलं गुह्यं, काकुत्स्थ ! पश्यसि ।

आश्रमस्थानं—आश्रमप्रदेशम् । गुह्यं–गुप्तम् ॥ २८ ॥

न तत्राक्रमितुं नागाः शक्नुवन्ति तमाश्रमम् ॥ २९ ॥
[3] विविधास्तत्र वै नागाः वने तस्मिंश्च पर्वते ।
ऋषेस्तस्य मतङ्गस्य *[4] विधानात्तच्च काननम् ॥ ३० ॥
[5] मतङ्गवनमित्येव विश्रुतं, रघुनन्दन ! ।
तस्मिन् नन्दनसङ्काशे देवारण्योपमे वने ॥ ३१ ॥
नानाविहगसङ्कीर्णे रंस्यसे, राम ! निर्वृतः ।

नागाः–गजाः । देवारण्यम्–चैत्ररथादिरूपं नानाप्रकारम् ॥

---

*मतङ्गस्य विधानात्—प्रभावात् नागाः न संचरन्तीत्यर्थः–**ति.** मतङ्गस्य ऋषेः विधानात्–निर्माणात्–**गो., रा.** तन्निर्मितत्वात्—मतङ्गवनमिति विश्रुतमित्यर्थः ।

[1] स्वर्गलोकं–**ङ.** [2] ततस्त्वं राम–**ङ.** [3] इदमर्धं कुण्डलितं–**ज.** [4] प्रभावा–**ङ.** [5] इदमर्धं कुण्डलितं–**ङ.**

*ऋष्यमूकश्च पम्पायाः पुरस्तात् पुष्पितद्रुमः ॥ ३२ ॥
सुदुःखा[1]रोहणो †नाम ‡शिशुनागाभिरक्षितः[2] ॥
उदारो ब्रह्मणा चैव पूर्वकाले विनिर्मितः ॥ ३३ ॥

पम्पाया इति । पम्पातीरवर्तिमतङ्गाश्रमादित्यर्थः । सुदुःखेनारोहणं यस्य स तथा । शिशुभिः नागैः—सर्पैः अभिरक्षितः तथा । अयमेव दुरारोहत्वे हेतुः । एनं ऋष्यमूकं पापकर्मा नाधिरोहतीत्यत्र हेतुः—उदारः इत्यादि । प्रशस्त इत्यर्थः । तत्र हेतुः—ब्रह्मणेत्यादि । पूर्वकाले सर्गादिकाले इत्यर्थः । सर्वस्य च ब्रह्मनिर्मितत्वेऽपि भूयोगतिर्विज्ञायते विशेषणेन । विधैश्वर्यतपःप्राधान्येन सृष्ट इत्यर्थः । अतः तन्मूलोऽतिशयः प्रदर्श्यते ॥ ३३ ॥

शयानः पुरुषः, राम ! तस्य शैलस्य मूर्धनि ।
यत् स्वप्नं लभते वित्तं [3]प्रबुद्धोऽप्यधिगच्छति ॥ ३४ ॥

शयान इत्यादि । प्रबुद्धोऽप्यधिगच्छतीति । स्वप्नं लब्धं जाग्रत्यपि लब्धमेवावतिष्ठत इत्यर्थः ॥ ३४ ॥

[4]न त्वेनं विषमाचारः पापकर्माधिरोहति ।
यस्तु तं विषमाचारः पापकर्माधिरोहति ॥ ३५ ॥
तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ।

तत्रैव — पर्वतमूर्ध्न्येवेत्यर्थः ॥ ३५ ॥

---

*ऋष्याः – मृगविशेषाः मूकाः— निःशब्दा भवन्ति यस्मिन् स ऋष्यमूक –गो. †नामशब्दः प्रसिद्धिवाची । ‡शिशुनागः—बालसर्पैः, बालगजैश्च रा. अत्र नागाः गजा एव–गो. शिशुनागाः—देवयोनिविशेषा इति केचित् ।

[1]रोहणश्चैव–ज्ञ. [2]एतदनन्तरं—महात्मभिर्महाभागैः स्तोत्रमन्त्रैर्द्विजातिभिः—इत्यधिकं–ङ. [3]तत्प्रबुद्धोऽधि–ङ. [4]इदं अर्धं कुण्डलितं–ज्ञ.

तत्रापि शिशुनागानां आक्रन्दः श्रूयते महान् ॥ ३६ ॥
क्रीडतां, राम! पम्पायां [1] मतङ्गारण्यवासिनाम् ।

[2] सक्ता रुधिरधाराभिः [*3] संहत्य परमद्विपाः ॥ ३७ ॥
प्रचरन्ति पृथक् कीर्णाः मेघवर्णाः तरस्विनः ।

शिशुनागाः—बालगजाः । शिशुनागानां बालगजानां रुधिरधाराभिः—ईषद्रक्तमदधाराभिः सक्ताः—संबद्धाः । सक्ता रुधिरधाराभिरिति पाङ्क्तः पाठः । संहत्य—संभूय चरन्ति । पृथक्—प्रकीर्णाः चरन्ति ॥ ३६-३७ ॥

ते तत्र पीत्वा पानीयं विमलं [4] शीतमव्ययम् ॥ ३८ ॥

[5] अत्यन्तसुखसंस्पर्शं सर्वगन्धसमन्वितम् ।
निर्वृताः संविगाहन्ते वनानि वनगोचराः ॥ ३९ ॥

ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ।
[†6] रुरूनपेतापजयान् दृष्ट्वा शोकं [7] जयिष्यसि ॥ ४० ॥

---

*संहत्य—अन्योन्यं प्रहृत्य रुधिरधाराभिः सिक्ताः, अत एव पृथक्कीर्णाश्चरन्ति—गो. पृथक्कीर्णाः—विजातीयेभ्यो भिन्नाः—रा. † अपेतापजयान्—जयशीलान्—गो. अपेतान्—मनुष्यं दृष्ट्वा पलायितान्। अजयान्—प्राणिजयहीनान्, अनेनाकूरतोक्ता—ति. उपेतान्—वधशङ्कया अभावेन समीपं प्राप्तान्, अजयान्—मनुष्यजयरहितान्—रा.

[1] मतङ्गाश्रम—ज. [2] सिक्ता—ङ. [3] संहत्य—ङ. [4] चारु शोभनम्—ज. [5] इदं अर्धं कुण्डलितं—ङ. [6] रुरून् गतभयांश्चैव, रुरूनपेतानजयान्, रुरूनुपेतानजयान्—ङ. [7] प्रहास्यसि—ज.

राम! तस्य तु शैलस्य[1] महती शोभते गुहा।
*शिलापिधाना, काकुत्स्थ! दुःखं चास्याः प्रवेशनम्॥

ऋष्यमूकस्यासाधारणचिह्नोपदेशः—राम तस्य त्वित्यादि॥

[2]तस्या गुहायाः प्राग्द्वारो महान् शीतोदको ह्रदः।
फलमूलान्वितो रम्यः †नाना[3]मृगसमावृतः॥ ४२॥
तस्यां वसति[4] सुग्रीवः चतुर्भिः सह वानरैः।
‡कदाचिच्छिखरे तस्य पर्वतस्या[5]पि तिष्ठति॥ ४३॥

कदाचित् तस्य शिखरे तिष्ठति। अपिशब्दात् अधश्च तिष्ठति॥

कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ।
स्रग्वी भास्करवर्णाभः ख्रे व्यरोचत वीर्यवान्॥ ४४॥
तं तु खस्थं[6] महाभागं[7] कबन्धं रामलक्ष्मणौ।
§[8]प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके॥ ४५॥

---

*शिलापिधानेति गुहानामेति ज्ञातव्यम्—ती. शिला पिधानं—आच्छादनं यस्याः सा—रा., गो. गुहाद्वारे महती शिला आवृत्य वर्तत इति भावः। एतेन गुहायाः सावधानान्वेषणीयत्वं बोध्यते। †नानानगेति पाठे—नगाः—वृक्षाः। ‡कदाचित् गुहायां तिष्ठति, कदाचित् पर्वतस्य शिखरेऽपि तिष्ठति—रा. कदाचित् भूमाविति सिद्धम्—गो. 'वालिना कृतकिल्बिषः' इति कथनेन भयात् सदा गुहायामेव स्यादिति मत्वा तत्रान्विष्य तत्रादर्शनमात्रेण न तूष्णीं स्थातव्यं, गुहा तु वासस्थानं, बहिरपि अन्वेषणीयः त्वया-इति भावेन गुहायां वसति, शिखरेऽपि कदाचित्तिष्ठतीत्युच्यते। §प्रस्थितौ सन्तौ—गो. अथवा लोक इव 'वयं प्रस्थितौ, त्वमपि व्रज' इत्यर्थः।

[1] महतः शोभना—ङ. [2] तस्यां गुहायां वृद्धायां—ङ. [3] नग—ज. [4] धर्मात्मा सुग्रीवः—ज. [5] वतिष्ठते—झ. [6] महाबाहुं—ङ. [7] तावुभौ—ज. [8] प्रस्थितः—ङ.

प्रस्थितौ त्वं व्रजस्वेति । त्वद्वचनावलम्बनेन आवां सुग्रीवं गच्छावः । त्वं च पुण्यलोकं व्रजस्व—व्रज इति अन्तिके समीपे वर्तमानं देवभूतमूचतुः ॥ ४५ ॥

गम्यतां कार्यसिद्ध्यर्थं इति तावब्रवीत् स च ।
सुग्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितः तदा ॥ ४६ ॥

स चेति । ताभ्यां कृतानुमतिकः स देवोऽपीत्यर्थः ॥ ४६ ॥

स तत् कबन्धः प्रतिपद्य रूपं
वृतः श्रिया[1] भास्करतुल्यदेहः ।
* निदर्शयन्[2] राममवेक्ष्य खस्थः
सख्यं कुरुष्वेति तदाऽभ्युवाच ॥ ४७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अरण्यकाण्डे त्रिसप्ततितमः सर्गः

उक्तार्थस्योपसंहारेण वादः—स तदित्यादि । अगर्व(४३ १/२ ?)-मानः सर्गः ॥ ४७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे त्रिसप्ततितमः सर्गः

चतुःसप्ततितमः सर्गः

[ऋष्यमूकप्रस्थानं शबरीदर्शनं च]

तौ कबन्धेन तं मार्गं पम्पाया दर्शितं वने ।
[3] प्रतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥ १ ॥

---

* किञ्चिद्दूरं गत्वा पुनः राममवेक्ष्य सख्यं कुरुष्वेत्युवाच—ति. वस्तुतस्त्वयं श्लोकः आहत्यवादरूपः सुस्पष्टः ॥

[1] भास्वरसर्वदेहः—ज. [2] राममुदारवीर्यं—ङ. [3] आतस्थतु—ज.

अथ शबरीसंदर्शनपूर्वं तस्याः ब्रह्मलोकप्रदानम् । तौ कबन्धेनेत्यादि । यः कथितः, तं कथितं मार्गमिति योजना ॥ १ ॥

तौ शैलेष्वा[1]चितान् वृक्षान् * क्षौद्रकल्प[2]फलान् बहून् ।
वीक्षन्तौ जग्मतुः द्रष्टुं सुग्रीवं रामलक्ष्मणौ ॥ २ ॥

आचितान्—आहृतान् ॥ २ ॥

कृत्वा च शैलपृष्ठेषु तौ वासं रघुनन्दनौ ।
पम्पायाः पश्चिमं [3]तीरं राघवावुपतस्थतुः ॥ ३ ॥

तौ पुष्करिण्याः पम्पायाः तीरमासाद्य पश्चिमम् ।
अपश्यतां ततस्तत्र [4]शबर्याः रम्यमाश्रमम् ॥ ४ ॥

तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतम् ।
सुरम्यमभिवीक्षन्तौ शबरीमभ्युपेयतुः ॥ ५ ॥

तौ तमाश्रमं—शबर्याश्रममित्यर्थः ॥ ५ ॥

तौ च दृष्ट्वा तदा सिद्धा समुत्थाय कृताञ्जलिः ।
रामस्य पादौ जग्राह लक्ष्मणस्य च धीमतः ॥ ६ ॥

---

* क्षौद्रं—मधु, तत्तुल्यरसफलवत इत्यर्थः ॥

[1] चितानेकान्–ङ. [2] फलद्रुमान्–ङ. [3] देशं–ङ. [4] शबरीमाश्रमस्थिताम्–ङ.

पाद्यमाचमनीयं च सर्वं प्रादाद्यथाविधि ।
सिद्धा—सिद्धयोगा ॥ ६ ॥

तामुवाच ततो रामः श्रमणीं *[1] शंसितव्रताम् ॥ ७ ॥
कच्चित्ते निर्जिता विघ्नाः ? कच्चित्ते वर्धते तपः ?
कच्चित्ते [2] नियतः कोपः आहारश्च, तपोधने ! ॥ ८ ॥
कच्चित्ते नियमाः प्राप्ताः ? कच्चित्ते मनसः सुखम् ?
कच्चित्ते गुरुशुश्रूषा सफला ? चारुभाषिणि ! ॥ ९ ॥

विघ्नाः—तपोविघ्नाः कामादयः । कोपः नियतः—निगृहीतः । कच्चित् आहारश्चेति । नियत इत्यनुकर्षः ॥ ८–९ ॥

रामेण तापसी पृष्टा सा सिद्धा सिद्धसंमता ।
शशंस शबरी वृद्धा रामाय [3]प्रत्युपस्थिता ॥ १० ॥
अद्य प्राप्ता तपस्सिद्धिः तव सन्दर्शनान्मया ।

अद्य प्राप्ता तपस्सिद्धिरिति उपचारवत् शबर्याः परमार्थदर्शा वादः । तथा अग्रेऽपि ॥ १० ॥

अद्य मे सफलं [4]जन्म गुरवश्च सुपूजिताः ॥ ११ ॥

---

* शंसितव्रतां—तीक्ष्णव्रताम् । स्वव्रतपरिपालनेऽतिजागरूकामिति यावत् ।

[1] धर्मसंस्थिताम्—ज. [2] निर्जितः—ङ. [3] प्रत्यवस्थिता—ज. [4] तप—ङ.

अद्य मे सफलं [1]तप्तं *[2]स्वर्गश्चेह भविष्यति ।
त्वयि देववरे, राम! पूजिते, पुरुषर्षभ! ॥ १२ ॥

स्वर्गः—परमः । देववरे—देवरत्ने ब्रह्मणीत्यर्थः ॥ १२ ॥

[3]चक्षुषा तव सौम्येन पूताऽस्मि, रघुनन्दन !
गमिष्याम्यक्षयान् लोकान् त्वत्प्रसादादरिन्दम! ॥ १३ ॥

त्वत्प्रसादात् अक्षयान् लोकान् गमिष्यामीति—ब्रह्मणः तवानुमत्या सर्वाविवादोऽक्षयत्वादिस्वभावान् ब्रह्मलोकान् गमिष्यामीत्यर्थः ॥ १३ ॥

चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः ।
इतस्ते दिवमारूढाः यानहं पर्यचारिषम् ॥ १४ ॥

चित्रकूटं त्वयि प्राप्ते इति । त्वदासक्तिवैभवमात्रादेवेत्यर्थः । इतस्त इति । अस्मादाश्रमादित्यर्थः । त इति के? इत्यतः यानित्यादि ॥ १४ ॥

तैश्चाहमुक्ता धर्मज्ञैः महाभागै[4]र्महर्षिभिः ।
आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ १५ ॥
स ते प्रतिगृहीतव्यः सौमित्रिसहितोऽतिथिः ।
तं च दृष्ट्वा वरान् लोकान् अक्षयांस्त्वं गमिष्यसि ॥ १६

---

* स्वर्गः—ब्रह्मलोकः—ति.

[1] जन्म—ङ. [2] स्वर्गश्चैव—ङ. [3] तवाहं चक्षुषा राम पूता सौम्येन पानद—ङ, ज. [4] महात्मभिः—ङ.

आगमिष्यति ते इति। अनुग्रहायेति शेषः। स त इति। त्वयेति यावत्। तं च दृष्ट्वेति। अस्माकं शुश्रूषाजनितादृष्टमिव रामरूप-ब्रह्मापरोक्षसाक्षात्कारजमदृष्टमपि सम्पाद्येत्यर्थः। वरान् अक्षयान् लोकान् इति विशेषणाभ्यां इह 'लोक' इति ब्रह्मलोकः सुस्पष्टः, अन्यत्र तद्विशेषणयोर्मनसाऽप्यशंक्यत्वात् ॥ १५-१६ ॥

[1]एवमुक्ता महाभागैः तदाऽहं पुरुषर्षभ।
*मया तु विविधं वन्यं संचितं, पुरुषर्षभ ॥ १७ ॥

तवार्थे, पुरुषव्याघ्र! पम्पायास्तीरसंभवम्।
एवमुक्तः स धर्मात्मा शबर्या शबरीमिदम् ॥ १८ ॥

राघवः प्राह †विज्ञाने तां नित्यमबहिष्कृताम्।

---

* संचितं—सम्यक् परीक्ष्य माधुर्ययुतं संचितमित्यर्थः। तदुक्तं पाद्मे 'फलानि च सुपक्वानि मूलानि मधुराणि च। स्वयमास्वाद्य माधुर्यं परीक्ष्य च परीक्ष्य च॥ पश्चान्निवेदयामास राघवाभ्यां दृढव्रता। फलान्यास्वाद्य काकुत्स्थः तस्यै मुक्तिं परां ददौ' इति—ति. तत्तत्फलजातीयमाधुर्यं परीक्ष्य स्थापितमिति संप्रदायः—गो.

† जात्या हीनामपि आचार्यप्रसादलब्धब्रह्मज्ञानाम्—गो. विज्ञाने—आगतानागत-ज्ञाने—ती. विशिष्टं ज्ञानं येषां, तेषां सम्बन्धः यस्याः तत्सम्बोधनं—हे विज्ञाने। तां नित्यमबहिष्कृतां—भोजनादिव्यवहारादिति शेषः। तद्वत्तमादाराद्यङ्गीकृत्य चेति शेषः इत्यन्ये—ति.

[1] इदं अर्धं नास्ति—ङ.

नित्यं विज्ञाने अवहिष्कृतां इति । वाचक्नवीमैत्रेय्यादिवत् विरक्तजकुलस्त्रीत्वात् ब्रह्मविद्यायामप्यधिकारस्य अविवादात् । तच्च श्रीबृहदारण्यभङ्गलाचरणे श्रीहंसभाष्ये च प्रतिपादितम् ॥ १८ ॥

* दनोः सकाशात् तत्त्वेन प्रभावं ते [1] महात्मनाम् ॥१९॥
श्रुतं प्रत्यक्षमिच्छामि संद्रष्टुं यदि मन्यसे ।

महात्मनामिति । त्वदाचार्याणामिति शेषः । प्रत्यक्षमिच्छामीति । कर्तुमिति शेषः । संद्रष्टुं यदि मन्यसे इति । संदर्शयितुं यदि योग्यं मन्यसे इत्यर्थः ॥ १९ ॥

एतच्च वचनं श्रुत्वा रामवक्त्राद्विनिःसृतम् ॥ २० ॥
शबरी दर्शयामास तावुभौ तद्वनं महत् ।
पश्य † मेघघनप्रख्यं मृगपक्षिसमाकुलम् ॥ २१ ॥
मतङ्गवनमित्येव विश्रुतं, रघुनन्दन !

मेघघनप्रख्यं—मिह सेचने, उणादिः, बाहुलकात् घत्वम्, वर्षुकघनवत् नीलाभमित्यर्थः । मतङ्गवनमिति तत् स्वभूतं तत्तपोमहिमनित्यरक्षितं चेत्यर्थः ॥ २१ ॥

---

* दनोः सकाशात्—दनोः पुत्रस्य मुखतः श्रुत महात्मनां प्रभावं प्रत्यक्षं संद्रष्टुमिच्छामि । यदि मन्यसे—यदीच्छसीति यावत् । † मेघघनप्रख्यं—निबिड-मेघसदृशं—रा. घनमेघसदृशं—गो.

[1] महात्मनः—ङ.

इह ते भावितात्मानः गुरवो मे, [1] महाद्युते ! ॥ २२ ॥
जुहवांचक्रिरे †[2] नीडं मन्त्रवन्मन्त्रपूजितम् ।

इह ते इति । प्रसिद्धाः इत्यर्थः । मन्त्रपूजितम् । श्रीमद्ब्रह्म-महामात्रकपालपञ्जरादिमहान्यासमन्त्रैः श्रीमद्ब्रह्मरसेशानदेवगुह्यहृदय-तारान्तपञ्चब्रह्मविद्याभिश्च नित्यन्यासपूजनं न्यासस्यैव साक्षात् स्थूलोपग्रह-ब्रह्मपूजात्वं दर्शयति—

"अक्षतद्वौलकं विंशत्कुक्षपुरोव्यञ्जनं दश ।
सन्ध्याष्षडङ्गं मरुतः स्वरा आत्माक्षरोच्चयताम् "

इति । अस्यार्थः सत्संप्रकाशभाष्यादवगन्तव्यः । मन्त्रपूजितं नीडं मन्त्रवदेव यथावत् साधितब्रह्ममेधाग्नौ—

'वाचे पुरुषं, प्रजापतये पुरुषम्'

इत्याद्युपनिषदुपदिश्यमानब्रह्ममयप्रधानाहुतिमन्त्रतः इह वने जुहवा-ञ्चक्रिरे ॥ २२ ॥

* इयं प्रत्यक्स्थली वेदिः यत्र ते [3] मे सुसत्कृताः ॥ २३ ॥
पुष्पोपहारं कुर्वन्ति श्रमादुद्वपिभिः करैः ।

---

* प्रत्यक्स्थली—प्रत्यक्प्रदेशे स्थलीभूता प्राक्प्रदेशे पश्चिमाभिमुखविष्णुस्थानत्वेन प्रत्यङ्निम्नेत्यर्थः । वेदिः—देवपूजास्थानं इयं, अवलोक्यतामिति शेषः । वेदिरिति जात्येकवचनम्, उत्तरश्लोके बहुवचनप्रयोगात्, बहूनां बहुवेदिसंभवाच्च—गो.

[1] महामते—ङ. [2] तीर्थं—ङ. [3] पुरुषर्षभाः—ङ.

इयं इत्यादि ।

" उद्धृत्यापां स्वेमनाद्यै रक्षाः आप्सु विलापयेत् ।

चतुर्मृदापूर्य कुण्डान् अग्र स्थाप्याद्रदेवताः "

काशीयमष्टदिक्कोशा " इति श्रुतिरहस्योपदिष्टरीत्या भस्मोद्धारादिदेवतास्थापनान्तशिष्यकृत्यसंपादनाय स्वाचार्यैः स्थापिततया, मया यत्र ते मद्गुरवः यथोक्तभस्मोद्धारादिदेवतास्थापनान्तोत्तरकृत्यसाधनेन सुपत्कृता अभवन्, यत्र च महाश्मशानप्रसिद्धसाक्षात्काशीश्रुतेः उद्वृषिभिः—उद्वृत्यवाद्भिः करैः उपचितं पुष्पराशिभिः पुष्पोपहारं कुर्वन्ति, ब्रह्मविद्यासिद्धिकामाः सर्वे योगिनः प्रत्यक्स्थरूप्याख्या प्रत्यगात्मनः साक्षादहरन्यासपूर्वकसाक्षात्सायुज्यसिद्धिस्थलीत्वात् प्रत्यक्स्थरूप्याख्या ब्रह्ममेघवेदिरियं भवति ॥ २३ ॥

तेषां तपःप्रभावेन पश्याद्यापि, [1]रघूद्वह ! ॥ २४ ॥
[2]द्योतयन्ती दिशः सर्वाः श्रिया [3]वेद्यतुलप्रभा ।

तेषामित्यादि । तेषां—अस्मदाचार्याणां, तप प्रभावेन इयं वेदी ब्रह्ममेघकुल इव अद्यापि श्रिया सर्वा दिशः द्योतयन्ती अतुलप्रभा दृश्यते, पश्य ॥ २४ ॥

अशक्नुवद्भिस्तैर्गन्तुं उपवासश्रमालसैः ॥ २५ ॥
[4]चिन्तितैरागतान् पश्य सहितान् सप्त सागरान् ।

---

[1] रघूत्तम-ज. [2] द्योतयन्ति-ङ. [3] वेद्योऽतुलप्रभाः-ङ. [4] चिन्तितेऽभ्यागतान्-ङ. चिन्तितेनागतान्-ज.

आश्चर्यान्तरं दर्शयति—अशक्नुवद्भिरित्यादि। सागरादि र्थं गन्तुमशक्नुवद्भिः इत्यर्थः। तत्र हेतुः—उपवासश्रमालसैः इति। उपवासैः "तप इति तपो नानशनात् परम्" इति श्रुतेः कृच्छ्र-चान्द्रायणादिशास्त्रीयोपवासैः जातो यः श्रमः, तेनालसाः—दुर्बला इत्यर्थः। एवंविधैः तैस्तु स्नानाय—

"सप्त चक्रे तीर्थराज जुषस्थं सागरैः स्मरन्"

इति शास्त्रोपदिष्टमार्गतः ध्याने सति आगतान् सप्तसागरान् सहितान् तदभिषेकतीर्थे समेतान् पश्य ॥ २५ ॥

कृताभिषेकैस्तैर्न्यस्ताः वल्कलाः पादपेष्विह ॥ २६ ॥
अद्यापि नावशुष्यन्ति प्रदेशे, रघुनन्दन !

कथं तत्समवायोऽनुभूयत इत्यतः तत्प्रदर्शयति—कृताभिषेकै-रित्यादि। यथोक्तसप्तसागरतीर्थे कृताभिषेकैः तैराचार्यैः इह पादपेषु न्यस्ताः वल्कलाः *तत्तीर्थवैभवात् अद्यापि नावशुष्यन्ति ॥ २६ ॥

देवकार्याणि कुर्वद्भिः †यानीमानि कृतानि वै ॥ २७ ॥
पुष्पैः [1]कुवलयैः सार्धं म्लानत्वं नोपयान्ति वै।

आश्चर्यान्तरप्रदर्शनं—अपि च ‡हे रघुनन्दन! इह प्रदेशे देवकार्यं देवपूजां विशेषेण कुर्वद्भिः यानीमानि पुण्यार्जनाय कृतानि—विनियुक्तानि, तैः पुष्पैः अतिमृदुभिः कुवलयैः सार्धं अन्यान्यपि तदर्चनपुष्पाणि म्लानत्वं नोपयान्ति, वै प्रसिद्धम् ॥ २७ ॥

---

* तदङ्गसंपर्कवैभवात्—गो. तीर्थवैभवात्, तपोवैभवाच्च—ति. † यानीमानि कृतानि माल्यानि—गो., रा. ‡ हे रघुनन्दनेति पूर्वश्लोकादाकृष्टम्।

[1] किसलयैः—ङ.

कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया ॥ २८ ॥
तदिच्छाम्यभ्यनुज्ञाता त्यक्तुमेतत् कलेवरम् ।

उपसंहरति—कृत्स्नमित्यादि । अभ्यनुज्ञातेति । ब्रह्मणा त्वया इति शेषः ॥ २८ ॥

तेषामिच्छाम्यहं गन्तुं समीपं भावितात्मनाम् ॥ २९ ॥
मुनीना[1]माश्रमो येषां अहं च परिचारिणी ।

मुनीनां भावितात्मनां—येषां ऋषीणां अयमाश्रमः, येषां चाहं परिचारिणी, तेषां भावितात्मनां—स्वतत्त्वतया सादरसदाऽनुसंहित-परमात्मनां मुनीनां—ब्रह्मलोकगतानां समीपं गन्तुमिच्छामि इति च अब्रवीत् ॥ २९ ॥

[2]धर्मिष्ठं तु वचः श्रुत्वा राघवः सहलक्ष्मणः ॥ ३० ॥
प्रहर्षमतुलं लेभे * आश्चर्यमिति [3]तत्त्वतः ।

इति—श्रुतार्थमुद्दिश्येति शेषः ॥ ३० ॥

तामुवाच ततो रामः [4]श्रमणीं संशितव्रताम् ॥ ३१ ॥
अर्चितोऽहं त्वया [5]भक्त्या गच्छ कामं [6]यथासुखम् ।
इत्युक्ता जटिला वृद्धा चीरकृष्णाजिनाम्बरा ॥ ३२ ॥

---

* आश्चर्यमित्यब्रवीच्च-रा. तत्त्वतः—वस्तुतः आश्चर्यमिति अतुलं प्रहर्षं लेभे ॥

[1] माश्रमे-ङ. [2] धर्मिष्ठाया-ङ. [3] चाब्रवीत्-ज. [4] शबरीं-ज. [5] भद्रे-ज. [6] तपोधने-ङ.

[1]तस्मिन् मुहूर्ते शबरी देहं जीर्णं जिहासती ।
अनुज्ञाता तु रामेण हुत्वाऽऽत्मानं हुताशने ॥ ३३ ॥
ज्वलत्पावकसङ्काशा *स्वर्गमेव जगाम सा ।

आत्मानं हुताशने हुत्वेति । स्वाचार्योपदिष्टमार्गतः ब्रह्ममेधाग्नौ निजाचार्यवदेव हुत्वेत्यर्थः । स्वर्गं परमेव जगामेत्यन्वयः ॥ ३३ ॥

दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना ॥ ३४ ॥
दिव्याम्बरधरा तत्र बभूव प्रियदर्शना ।
विराजयन्ती तं देशं विद्युत् सौदामिनी यथा ॥ ३५ ॥
[2]प्रणम्य शिरसा रामं स्वर्गता सुप्रभानना ।
यत्र ते सुकृतात्मानो विहरन्ति महर्षयः ।
तत् पुण्यं शबरी स्थानं जगामात्मसमाधिना ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे चतुःसप्ततितमः सर्गः

तत्—स्पष्टम्, †'यत्र ते सुकृतात्मानः' इत्याद्युत्तरवाक्यत्वात्। सुकृतात्मानः—सुसाधितब्रह्मात्मैक्ययोगाः यत्र महर्षयः—यत्र ब्रह्मलोकस्थाने विहरन्ति, तत् नित्यपुण्यं स्थानं शबरी च आत्मसमाधिना—

---

*स्वर्गं—ब्रह्मलोकं—ति. 'तेषां समीपं' इति पूर्वोक्तस्य विवरणरूपमिदं; अतो न विरोधः। †व्याख्यादृष्ट्या 'यत्र ते सुकृतात्मानः' इत्यार्धमेव 'तत्पुण्य' इत्यादनन्तरं स्यादिति भाति।

[1] इदमर्धं कुण्डलितं—ज. [2] इदमर्धं नास्ति—ज.

समिद्धब्रह्मसेवतः जडत्यागार्हेण ब्रह्मसमाधिनेत्यर्थः, जगाम । तुला(३६)मानः सर्गः ॥ ३६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अरण्यकाण्डे चतुःसप्ततितमः सर्गः

पञ्चसप्ततितमः सर्गः

[पम्पादर्शनम्]

दिवं तु तस्यां यातायां शबर्यां *स्वेन [1]तेजसा ।
लक्ष्मणेन सह भ्रात्रा चिन्तयामास राघवः ॥ १ ॥

अथ पम्पाभिगमनम् । दिवं तु तस्यामित्यादि ॥ १ ॥

†स चिन्तयित्वा धर्मात्मा प्रभावं तं महात्मनाम् ।
हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् ॥ २ ॥

महात्मनां प्रभावमिति । शबर्युक्तरूपमित्यर्थः ॥ २ ॥

दृष्टोऽयमाश्रमः, सौम्य! बह्वाश्चर्यः ‡[2]कृतात्मनाम् ।
विश्वस्तमृगशार्दूलः नानाविहग[3]सेवितः ॥ ३ ॥

कृतात्मनां-कृतः-व्याकृतः आत्मा यैः, तेषां-ऋषीणाम् ॥३॥

---

*स्वेन तेजसा उपलक्षितायामिति शेषः-गो. स्वीयप्रभावेणेति वा ।
†चिन्तयामासेति पूर्वश्लोकोक्तचिन्तायाः विषयः अत्रोक्तः । ‡पूर्वसर्गान्ते 'सुकृतात्मनः' इत्यनेन समानार्थकमिदं पदं भाति ।

[1] कर्मणा-ङ. [2] महात्मनाम्-ङ. [3] शोभितः-ङ.

सप्तानां च समुद्राणां एषु तीर्थेषु, लक्ष्मण!
उपस्पृष्टं च विधिवत् पितरश्चापि तर्पिताः ॥ ४ ॥

सप्त-समुद्रतीर्थेष्विति । वाप्यादिरूपेण लोकोपकाराय स्थापितेष्विति शेषः । उपस्पृष्टमिति । स्नातमिति यावत् ॥ ४ ॥

अनष्टमशुभं तत्तत् कल्याणं समुपस्थितम् ।
[1]तेन तत्त्वेन हृष्टं मे मनः, लक्ष्मण! सम्प्रति ॥ ५ ॥

तेनेति । कल्याणोपस्थानेनेत्यर्थः ॥ ५ ॥

[2]हृदये हि, नरव्याघ्र! शुभ[3]माविर्भविष्यति ।
तदागच्छ गमिष्यावः पम्पां तां प्रियदर्शनाम् ॥ ६ ॥

शुभं शुभस्मरणमित्यर्थः ॥ ६ ॥

ऋष्यमूको गिरिर्यत्र नातिदूरे प्रकाशते ।
यस्मिन् वसति धर्मात्मा सुग्रीवोऽशुमतः सुतः ॥ ७ ॥
नित्यं वालिभयात् त्रस्तः चतुर्भिः सह वानरैः ।

अंशुमतः—सूर्यस्य ॥ ७ ॥

[4]अहं त्वरे च तं द्रष्टुं सुग्रीवं वानरर्षभम् ॥ ८ ॥
तदधीनं हि मे, [5]सौम्य! सीतायाः परिमार्गणम् ।

त्वरे—त्वरामीति यावत् ॥ ८ ॥

---

[1] तेन त्वेतत्तद्धृष्टं-ज्ञ. [2] निश्चितं हि-ङ्ग. [3] माशु भविष्यति-ङ्ग. [4] अभित्वरे-ङ्ग. [5] कार्य-ज्ञ.

एवं ब्रुवाणं तं [1]धीरं रामं सौमित्रिरब्रवीत् ॥ ९ ॥
गच्छावः त्वरितं तत्र ममापि [2]त्वरते मनः ।

तत्र ममापीति । पम्पादर्शन इत्यर्थः ॥ ९ ॥

आश्रमात्तु ततस्तस्मात् निर्गत्य तु विशांपतिः ॥ १० ॥
*आजगाम ततः पम्पां लक्ष्मणेन [3]सह प्रभुः ।
†स ददर्श ततः पुण्यां उदार[4]जनसेविताम् ॥ ११ ॥
नानाद्रुमलताकीर्णां पम्पां पानीयवाहिनीम् ।
पद्मैः सौगन्धिकैः ताम्रां शुक्लां कुमुदमण्डलैः ॥ १२ ॥
नीलां [5]कुवलयोद्घाटैः बहुवर्णां कुथामिव ।

पानीयवाहिनीं—पानार्हातिमधुरसुशीतलनिर्मलवाहिनीमित्यर्थः । कुवलयानां उद्घटः—समूहः । कुथा—गजास्तरणचित्रकम्बलः ॥१२॥

स तामासाद्य ‡वै रामः [6]दूरादुदकवाहिनीम् ॥ १३ ॥
§मतङ्गसरसं नाम ह्रदं समवगाहत[7] ।

---

*'आजगाम ततः पम्पां' इत्यस्यैव विस्तरः 'स ददर्श' इत्यारभ्य 'जगाम परमं ह्रदम्' (१८) इत्यन्तम् । †'स ददर्श' इत्युक्तः दूरात् पम्पादर्शनाभिप्रायेण । अत एव 'दूरादुदकवाहिनीम्' इत्यनन्तरोक्तिः । सरसः निम्नप्रदेश एव सरःप्रसक्तया उन्नतप्रदेशात् आहत्यदर्शनं विवक्षितं 'स ददर्श' इत्यत्र । अत एव 'उदारजनसेवितां' 'बहुवर्णां कुथामिव' इत्यादिषु दूरादृश्यमानाकारवर्णनरूपं स्वरसं संगच्छते ॥ ‡तां पम्पां दूरादासाद्य—दूरतः प्राप्य । अत एव उत्तरत्र पंपाप्राप्तिवचनेन न पौनरुक्त्यम् ॥ §पम्पाप्राप्तेः पूर्वमेव केचन ह्रदाः सन्तीति ज्ञायते, 'सरांसि विविधानि च' (18) इति हि वक्ष्यति । अस्य ह्रदस्य मतङ्गाश्रमसीमास्थत्वात् तन्नाम । एवं सन्त्यन्येऽपि ह्रदाः मध्येमार्गम् ॥

[1] वीरं-ज. [2] त्वरितं-ङ. [3] सहाभिभूः-ङ. [4] जल-झ. [5] कुवलयैर्जलैः-ङ. [6] दूरात्पानीय-ङ. [7] 'अरविन्दोत्पलवतीं' इत्यादिसार्धश्लोकत्रयं ङपुस्तके एतदनन्तरं दृश्यते ॥

मतङ्गसरसमित्यकारान्तः। 'अनोश्मायः सरसां जातिसंज्ञयोः' इति अच् समासान्तः। अयं पम्पायामेव प्रदेशभेदः, गङ्गायां मणिकर्णिकेव॥

अत्र 'निर्गत्य तु विशांपतिः' इत्यनन्तरं "आजगाम ततः पम्पां लक्ष्मणेन सह प्रभुः' इति, अथ 'स ददर्श' इत्यादि श्लोकद्वयम्, अनन्तरं 'स तामासाद्य वै रामो दूरादुदकवाहिनीम्' इति, अनन्तरं 'मतङ्गसरसं नाम ह्रदं समवगाहत' इति पाठक्रमः पाठः। 'गमिष्यावः पम्पां' इति प्रतिज्ञातत्वात् 'आजगाम ततः पम्पां' इत्येव न्याय्यम्। एवं स्थिते प्राचीनपाठनाशकः कश्चित् 'आजगाम' इत्यादि सार्धश्लोकद्वयं परित्यज्य अन्यदेव श्लोकत्रयं प्रक्षिप्य मृषापाठमेव केवलं पठति व्याख्यातुमागतः॥ १३॥

*[1] समीक्षमाणौ [2] पुष्पाढ्यं सर्वतो विपुलद्रुमम्॥ १४॥
कोयष्टिकैश्चार्जुनकैः शतपत्रैश्च [3] कीरकैः।
एतैश्चान्यैश्च [4] विहगैः नादितं तु वनं महत्॥ १५॥

'मतङ्गसरसं नाम ह्रदं समवगाहत' इति संक्षिप्तोक्तस्य सप्रपञ्चप्रतिपादनं—'समीक्षमाणौ' इत्यादि 'जगाम परमं ह्रदम्' इत्यन्तम्॥ १४–१५॥

---

* मतङ्गह्रदे स्नात्वा ततः तत महत वनं समीक्षमाणौ, जग्मतुः इति शेषः। अस्यैवानुवादः, 'ततो जग्मतुः' इति श्लोकः। अथवा समीक्षमाणौ इत्यादि सार्धश्लोकद्वयमेकं वाक्यम्। द्विवचनान्तपदस्वारस्यात्। 'तद्वनं पश्यन्तौ महत वनं जग्मतुः' इत्यन्वयः। दीर्घवाक्यत्वात् लोकवत् 'वन'पदावृत्तिः। वस्तुतः—'जगाम परमं ह्रदम्' इत्यत्र पम्पैव विवक्षिता। एतत्प्रकरणटिप्पणी सर्वा विलोकनीया॥

[1] समीक्षमाणः—ज. [2] पुष्पाढ्यां फलपुष्पसमाकुलाम्—ङ. [3] किंशुकैः—ङ, कीचकैः—ज. [4] विविधः—ङ, बहुभिः—ज.

ततो जग्मतुरव्यग्रौ राघवौ सुसमाहितौ ।
तद्वनं चैव सरसः पश्यन्तौ शकुनैर्युतम् ॥ १६ ॥
*प्रविवेश ततः पम्पां शीतवारि[1]निधिं शुभाम् ।
प्रविवेश ततः पम्पामिति । मतङ्गसरसप्रदेशवर्तिनीमित्यर्थः ॥

प्रहृष्टनानाशकुनां पादपैरुपशोभिताम् ॥ १७ ॥
तिलकाशोकपुन्नागवकुलोद्दालकाशिनीम् ।
†स रामो विविधान् वृक्षान् सरांसि विविधानि च ॥
पश्यन् कामाभिसंतप्तः जगाम परमं ह्रदम् ।
पुष्पितोपवनोपेतां सालचम्पकशोभिताम् ॥ १९ ॥
पद्मपद्मौघसमाविष्टां श्रीमतीमतुलप्रभाम् ।
स्फटिकोपमतोयाढ्यां श्लक्ष्णवालुकसंततताम् ॥ २० ॥
श्लक्ष्णाभिः-मृदुस्पर्शाभिः वालुकाभिः संततां-युक्ताम् ॥ २० ॥

---

*ततः—मतङ्गाश्रमात् पम्पासरःपर्यन्तमध्यदेशवर्तिवनं अतीत्य तत्र तत्रस्थवृक्षान् विविधानि सरांसि च पश्यन् स रामः पम्पां जगाम । 'प्रविवेश ततः पम्पां' इत्यस्यैव विस्तरः—उत्तरसपादश्लोकद्वयम् । अथवा 'प्रविवेश' इति प्रयोगात् पम्पाशब्देन तत्प्रदेशो लक्ष्यते । प्रहृष्टेत्यादिवर्णनायाः कविवाक्यरूपत्वात्, 'पुष्पितोपवनोपेतां' इत्यादिवर्णनायाश्च रामदृष्टपम्पावर्णनारूपत्वाच्च न पौनरुक्त्यम् । अत एव तिलकादिपदानामावृत्तावपि न दोषः । †'आजगाम ततः पम्पां' (११) इत्युक्तान्वयोपसंहारः—स राम इत्यादि । अत्र 'विविधान् वृक्षान्' 'सरांसि विविधानि च' इति वाक्यद्वयसत्त्वात् अयं श्लोकः सर्वोपसंहाररूप इति स्पष्टम् । अस्मिन् प्रकरणे, सरः, पुष्करिणी, ह्रदः—इत्यादिशब्दाः पर्यायतया प्रयुक्ताः । अतः अत्र ह्रदशब्दः पम्पावाची, न तु मतङ्गह्रदवाची । 'मतङ्गसरसं नाम ह्रदं' इत्यत्रापि ह्रदशब्दः सरस्सामान्यपर एव । किञ्चात्र 'परमं ह्रदम्' इति कथनात् परमह्रदः पम्पैव । ह्रदशब्दस्य नियतलिङ्गत्वात्, पूर्वत्र परत्र च पम्पापदप्रयोगेऽपि न दोषः । 'जगाम परमं ह्रदम्' इत्यत्र मतङ्गसरोविवक्षा तु अत्यन्तानुचितैव । एवमत्र व्याख्यानस्य स्वरसत्वात्, कतकादृतश्लोकक्रमः सर्वापेक्षया व्याख्यान् ॥

[1] धरां-ङ.

[1]अरविन्दोत्पलवतीं पद्मसौगन्धिकैर्युताम् ।
पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादिताम् ॥ २१ ॥

अरविन्दपद्मयोः रक्तश्वेतविषयत्वेन भेदः ॥ २१ ॥

तिलकैः बीजपूरैश्च धवैः शुक्लद्रुमैस्तथा ।
पुष्पितैः करवीरैश्च पुन्नागैश्च सुपुष्पितैः ॥ २२ ॥

शुक्लद्रुमः—लोध्रः ॥ २२ ॥

मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥ २३ ॥

भण्डीरः—वटः । निचुलः—वकुलः । अतिमुक्तकैः—माधवीलताभिः ॥ २३ ॥

अन्यैश्च विविधैः वृक्षैः प्रमदामिव भूषिताम् ।
स तां दृष्ट्वा पुनः पम्पां पद्मसौगन्धिकैर्युताम् ॥ २४ ॥
इत्युवाच तदा वाक्यं लक्ष्मणं [2]सत्यविक्रमः ।

इत्युवाचेति । वक्ष्यमाणलक्षणम् ॥ २४ ॥

अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमण्डितः ॥ २५ ॥
ऋष्यमूक इति ख्यातः [3]पुण्यः पुष्पितपादपः ।

पूर्वोक्त इति । कबन्धेनेति शेषः ॥ २५ ॥

---

[1] एतदादि सार्धश्लोकत्रयं 13 श्लोकानन्तरं दृश्यते—ङ. [2] सत्यविक्रमम्—ङ.
[3] चित्रः—ङ.

*[1] हरिः ऋक्षरजोनाम्नः पुत्रस्तस्य महात्मनः ॥ २६ ॥
अध्यास्ते तं महावीर्यः सुग्रीव इति विश्रुतः ।
† सुग्रीव[2]मभिगच्छ त्वं वानरेन्द्रं, नरर्षभ ! ॥ २७ ॥

हरिः–वानरः । ऋक्षरजोनाम्नः—तन्नामिकाया(?) इत्यर्थः ॥

[3] इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमम् ।
राज्यभ्रष्टेन [4]दीनेन तस्यामासक्तचेतसा ।
कथं मया विना शक्यं सीतां, लक्ष्मण ! जीवितुम् ॥२८॥

इत्युवाचेति । अन्तरान्तरा सीताशोकं उवाचेत्यर्थः ॥ २८ ॥

इत्येवमुक्त्वा मदनाभिपीडितः
स लक्ष्मणं वाक्यं [5] अनन्यचेतसम् ।
‡ विवेश पम्पां नलिनीं [6] मनोरमां
रघूत्तमः शोकविषादयान्वितः ॥ २९ ॥

इत्येवमुक्त्वेत्यादिः उपसंहारेण वादः । नलिनीभिः मनोरमा । तथाकृतः ॥ २९ ॥

---

* अत्र 72–21 श्लोकव्याख्या, टिप्पणी च द्रष्टव्या । † सुग्रीवमभिगच्छेत्यनन्तरं इत्युक्तेति शेषः । इत्युक्त्वा पुनः लक्ष्मणं इति—वक्ष्यमाणप्रकारं उवाचेत्यन्वयः–गो. किष्किन्धकाण्डेऽपि, रामः आदौ लक्ष्मणद्वारैव व्यवहरतीति द्रष्टव्यम् । ‡ विवेश, स्नानायेति शेषः–गो. अस्य श्लोकस्य उपसंहारवाक्यत्वात् 'जगाम' इत्यर्थो वाऽत्र विवक्षितः । अथवा—'प्रविवेश ततः पम्पां' इतिवन्नेयम् ।

[1] हरेः–ङ. [2] मभिगच्छाव:–ङ. [3] इत्युक्त्वा च–ङ. [4] हीनेन–ङ. [5] अदीनचेतसम्, अदीनसत्त्वः–ङ. [6] मनोहरां–ङ.

ततो * महद्वर्त्म च दूरसङ्क्रमः
क्रमेण गत्वा †[1] प्रविलोकयन् वनम्।
ददर्श पम्पां शुभदर्शकाननां
अनेक[2]नानाविधपक्षिजालकाम्[3] ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां अरण्यकाण्डे पञ्चसप्ततितमः सर्गः

समाप्तश्चायमरण्यकाण्डः

---

* दूरसक्रमः—बहुदूरं संचरन् महद्वर्त्म क्रमेण गत्वेत्यन्वयः। † प्रतिकूलधन्वनं (पा.) पथिकजनप्रतिकूलभूतमरुकान्तारं कबन्धवनमित्यर्थः- गो.

[1] प्रतिकूलैधन्वनम्—ङ. [2] नानामृग—ङ. [3] अस्मिन् सर्गे ङ. पुस्तकरीत्या श्लोकक्रमः नातिव्यत्यस्तः। 13 श्लोकानन्तरं किञ्चिदिव दृश्यते। स च तत्रैव अधस्तात् सूचितः। च. ज. पुस्तकदृष्ट्या तु क्रमः एवं विभाव्यः—

आजगाम ततः पम्पां—श्लो. ११ (एतत्पूर्वं न क्रममेदः। अत्र श्लोकसंख्यास्तु एतत्कोशदृष्ट्या दत्ताः।)

समीक्षमाणौ पुष्पाढ्यं— (१४)
कोविदारैश्चार्जुनकैः (१४)
एतैश्चान्यैश्च बहुभिः (१५)
[समाजग्मतुरव्यग्रौ राघवौ सुसमाहितौ] (ज)
स रामो विविधान् वृक्षान् (१८)
पश्यन् कामाभिसंतप्तः (१८)
स तामासाद्य वै रामः (१३)
मतङ्गसरसं नाम (१३)
ततो जग्मतुरव्यग्रौ (१६)
स तु शोकसमाविष्टः रामो दशरथात्मजः।
विवेश नलिनीं रम्यां पङ्कजैश्च समावृताम्।
तिलकाशोकपुन्नागबकुलोद्दालकाशिनीम्।
रम्योपवनसंबाधां रम्यसंपीडितोदकाम्।
स्फटिकोपमतोयां तां श्लक्ष्णवालुकसन्ततां।

दूरदेशे सङ्क्रमो गमनं येन स तथा। ततः पम्पां शुभदर्श-कानन त्वविशेषणवतीं ददर्शेत्यन्वयः। सर्वत इति शेषः॥ ३०॥

इति श्रीमन्माधवयोगिविरचितायां श्रीमद्रामायणामृतकतकटीकायां
अरण्यकाण्डे पञ्चसप्ततितमः सर्गः
समाप्तश्चायमरण्यकाण्डः

मत्स्यकच्छपसम्बाधां तीरस्थद्रुमशोभिताम्।
सखीभिरिव संयुक्तां लताभिरनुवेष्टिताम्।
किंनरोरगगन्धर्वयक्षराक्षससेविताम्।
नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभाम्।
पद्मैः सौगन्धिकैस्तात्रां (१२)
नीलां कुवलयोत्करैः (१२)
अरविन्दोत्पलवतीं (२१)
पुष्पितास्तरणोपेतां (२१)
स तां दृष्ट्वा ततः पम्पां रामः सौमित्रिणा सह।
विललाप च तेजस्वी रामो दशरथात्मजः।
तिलकैर्बीजपूरैश्च (२२)
पुष्पितैः करवीरैश्च (२२)
मालतीकुन्दगुल्मैश्च (२३)
अशोकैः सप्तपर्णैश्च (२३)
अन्यैश्च विविधैर्वृक्षैः (२४)

[स तामासाद्य पम्पां च विषसाद महामनाः]-ज.

अस्यास्तीरे तु पूर्वोक्तैः (२५)—(एतदनन्तरं तु न क्रममेदः)
'तता मद्वदनं' इत्यादिश्लोकस्थाने—च. ज. पुस्तकयोः—
"क्रमेण गत्वा प्रविलोकयन् वनं ददर्श पम्पां शुभदर्शकाननाम्।
अनेकनानाविधपक्षिसंकुलां विवेश रामः सह लक्ष्मणेन॥" इति वर्तते॥

श्रीमद्वाल्मीकि रामायणम्

(अरण्यकाण्डः)

सम्पादकः
विद्वान्
एन्. एस्. वेङ्कटनाथाचार्यः

विश्वविद्यानिलयः
मैसूरु
१९६५

4